
Digitized by Madhuban Trust, Delhi



कृष्णयजुर्वेदीयं

तैत्तिरीयब्राह्मणम्

(श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्)

भाग II

प्रो० पुष्पेन्द्र कुमार

NAG PUBLISHERS

नाग प्रकाशक

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain

Digitized by Madhuban Trust, Delhi

तैत्तिरीयब्राह्मणम्

(श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्)

प्रो० पुष्पेन्द्र कुमार

भाग II

NAG PUBLISHERS

Shri Vipin Kumar Col. Deoband. In Public

Digitized by Madhuban Trust, Delhi

Taittiriya Brahmana is related to Taittiriya Samhita of Kṛṣṇa Yajurveda. It may be called the extention of Taittiriya Samhita. Scholars agree that it is the oldest available Bramana Grantha. Its text is accented like Śatapath Brahmana. The vacabulary and syntax also prove it the oldest one. The Sāyanāchārya has written his Bhāsya first of all on this Brahmana. The Taittiriya Samhita and Taittriya Brahmana both the works are popular throughout the South India. It has three Kaṇḍas and each Kaṇḍa is again devided into Adhyayas. The first and second Kaṇḍa are comprised of eight Adhyayas while third one has twelve chapters.

This Brahmana Granth explains in details the performance of Agnyādhana, Vajpeya, Soma-yagas, Rajsūya, Sautramani sacrifices, all mentioned in Taittriya Samhita. The Purushamedha sacrifice is a speciality of this Brahamana. It discuses in detail the rights and duties of four varnas and Ashramas respectively. Pashu-yagas and Iṣṭis are discussed elaborately. It is also very rich in old stories called Akyanas. The story of Bharadvaja, Nachiketa, Prahlada, Agastya are the main Akhyanas. Similarly Upakhyanas of Sita, Savitri and Usha are mainly the love stories, which make the book very interesting. In the second Kaṇḍa an elaborate discussion is given about the creation of the world. The publication of this Brahmana will surely be of much interest of the Vedic scholars in India and abroad.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृष्णयजुर्वेदीयं

तैत्तिरीयब्राह्मणम्

भाग २

CC-0. Shri Vipin Kumar Col. Deoband. In Pu...

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृष्णयजुर्वेदीयं

तैत्तिरीयब्राह्मणम्

(श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्)

भाग २

सम्पादकः
प्रो० पुष्पेन्द्र कुमार

NAG PUBLISHERS

नाग प्रकाशक
११ ए/यू० ए० जवाहर नगर,
दिल्ली-११०००७

CC-0. Shri Vipin Ku

Digitized by Madhuban Trust, Delhi

THIS PUBLICATION HAS BEEN BROUGHT OUT WITH THE FINANCIAL ASSISTANCE FROM RASHTRIYA SANSKRIT SANSTHAN, NEW DELHI.

NAG PUBLISHERS

(i) 11A/U.A. (Post Office Building), Jawahar Nagar, Delhi 110 007.

(ii) Sanskrit Bhawan, 12,15, Sanskrit Nagar, Plot No. 3, Sector-14, Rohini, New Delhi - 110 085

(iii) Jalalpur Mafi, Chunar, Dist. Mirzapur, U. P.

ISBN : 81-7081-395-6 (Set)

ISBN : 81-7081-397-2 (Vol. 2)

FIRST EDITION : 1998

Price :

PRINTED IN INDIA

Published by Surendra Pratap for Nag Publishers,
11A/U.A., Jawahar Nagar, Delhi-110007
and printed at G. Print Process, 308/2,
Shahzada Bagh, Dayabasti, Delhi-110035.
Laser Typesetting by **Compu-Media**,
43, Bunglow Road, Kamla Nagar, Delhi-110 007.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

द्वितीयं काण्डम् ।

तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
आधानं वाजपेयश्च राजसूयस्तथाऽपरे ।
कर्मशेषाः केचिदत्र काण्डे प्रथम ईरिताः ॥
अग्निहोत्रं च होतार उपहोमाख्यमन्त्रकाः ।
सौत्रामणीसवाः सूक्तं वक्ष्यन्तेऽस्मिन्द्वितीयके ॥
काण्डे प्रपाठका अष्टाविहाऽऽद्ये तु प्रपाठके ।
अग्निहोत्र उपोद्घातोऽनुवाके प्रथमे भवेत् ॥

प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थमर्थान्तरवर्णनमुपोद्घातः । इह चाग्निहोत्रं प्रतिपाद्यं तद् बुद्धौ संगृह्य तत्प्रशंसा प्रथमं क्रियते । महाभागैः पितृभिरप्यस्मिन्नग्निहोत्रे भागधेयं प्रार्थितम् । किमु वक्तव्यमग्निहोत्रस्य माहात्म्यमित्येवं प्रशंसा । तदर्थमिमामाख्यायिकामाह–

अङ्गिरसो वै सत्रमासत । तेषां पृश्निर्घर्मधुगासीत् । सर्जीषेणाजीवत् । तेऽब्रुवन् । कस्मै नु सत्रमास्महे । येऽस्या ओषधीर्न जनयाम इति । ते दिवोवृष्टिमसृजन्त । यावन्तः स्तोका अवा पद्यन्त । तावतीरोषधयोऽजायन्त, इति ।

अङ्गिराश्चतुर्थवेदप्रवर्तकाचार्यः । तस्य कुले समुत्पन्नाः सर्वेऽप्यङ्गिरसः । ते यदा सत्रमन्वतिष्ठंस्तदा तेषां पृश्निः काचिच्छ्वेता गौर्घर्मधुगासीत् । प्रवर्ग्यहविर्धर्मः। तं दोग्धीति धर्मधुक् । सा चारण्ये तृणमलब्ध्वा निष्पीडितरसस्य सोमस्य यदृजीषं तद्भक्षणेनाजीवत् । तदा कृपालवोऽङ्गिरसः परस्परमिदमब्रुवन् । ये वयमस्या गोर्भक्षणाय तृणविशेषानपि नोत्पादयामस्तादृशा असमर्था वयं कस्मै खलु प्रयोजनाय सत्रमनुतिष्ठामः । ऋद्धिकामैर्हि सत्रमनुष्ठेयम् । गोग्रासमपि संपादयितुमशक्तानामस्माकं का नामान्या समृद्धिर्भविष्यतीति । ततः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कारीर्याद्यनुष्ठानेन तैर्वृष्टौ संपादितायां यावन्तो जलबिन्दवस्तावत्य ओषधय उत्पन्नाः ।

अथाग्निहोत्रप्रशंसाप्रसङ्गेन पितृभ्यो लेपमार्जनं विधत्ते-

ता जाताः पितरो विषेणालिम्पन् (१) । तासां जग्ध्वा रुप्यन्त्यैत् । तेऽब्रुवन् । क इदमित्थमकरिति । वयं भागधेयमिच्छमाना इति पितरोऽब्रुवन् । किं वो भागधेयमिति । अग्निहोत्र एव नोऽप्यस्त्वित्यब्रुवन् । तेभ्य एतद्भागधेयं प्रायच्छन् । यद्धुत्वा निमार्ष्टि । ततो वै त ओषधीरस्वदयन्, इति ।

या उत्पन्ना ओषधयस्ता एताः पितृभिर्विषेण लेपिताः । तासां मध्ये कियदपि तृणं भक्षयित्वा विषदोषेण पीडां प्राप्नुवती प्राप्नुवती सत्रमागात् । तां दृष्ट्वा तेऽङ्गिरसः को नामेत्थं कृतवानिति विचारितवन्तः । तदानीं भागार्थिनो वयमिति पितृभिरुक्ते सति तदिच्छानुसारेणाप्यग्निहोत्र एव तेषां भागं दत्तवन्तः । तेन लेपमार्जनेन भागेन तुष्टाः पितरो विषमपनीय ता ओषधीः स्वादूकृतवन्तः । यदेतद्धोमानन्तरभावि लेपमार्जनं तत्सूत्रकारेण स्पष्टमुक्तम्-"प्राचीनावाति (ती) स्वधा पितृभ्यः पितृञ्जिन्वेति दक्षिणेन वेदिं भूम्यां लेपं निमृज्य" इति ।

तदेतद्विषापनयनवेदनं प्रशंसति-

य एवं वेद (२) । स्वदन्तेऽस्मा ओषधयः, इति ।

अथैतद्धेनुप्रसङ्गाद् बुद्धिस्थं वत्सविषयं कंचिद्धर्मं सूचयति-

ते वत्समुपावासृजन् । इदं नो हव्यं प्रदापयेति । सोऽब्रवीद्वरं वृणै । दश मा रात्रीर्जातं न दोहन् आसंगवं मात्रा सह चराणीति । तस्माद्वत्स जातं दश रात्रीर्न दुहन्ति । आसंगवं मात्रा सह चरति । वारे वृत ँ ह्यस्य । तस्माद्वत्स ँ स ँ सृष्टधयं ँ रुद्रो धातुकः । अति हि संधां धयति (३), इति ।

अलिम्पन्वेद धातुक एकं च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयकाण्डे
प्रथमप्रपाठके प्रथमोऽनुवाकः ।। १ ।।

हे वत्स नोऽस्मदर्थं स्तनपानपूर्वकं गां दोहयित्वा प्रवर्ग्यार्थमिदं हव्यं प्रदापयेत्येवं वदन्तस्तेऽङ्गिरसो वत्सं पाशात्प्रमुच्य गोसमीपे प्रेरितवन्तः । स च वत्सो वरं वृतवान्तजातं मां दृष्ट्वा दशरात्रीर्भवन्तो गां न दुहन्तु प्रतिदिनं दोहादूर्ध्वं संगवकाहपर्यन्तं मात्रा सह संचराणीति । यस्मादयं वत्सेन वरो वृतस्तस्माच्छ्रुतिस्मृत्यभिज्ञः शिष्टा दशसु रात्रीषु गां न दुहन्ति । वत्सं संगवपर्यन्तं मात्रा सह मुञ्चन्ति । यस्मात्संगवपर्यन्तमेव वत्सेन वरो वृतस्तस्मात्संगवादूर्ध्वमग्निहोत्र्या धेन्वा सह संसृष्टः स्तनं पिबति यो वत्सस्तं वत्सं संधां संगवपर्यन्तमित्येतादृशीं स्वकीयभाषामतिलङ्घ्य स्तनं पिबति तस्माद्रुद्रेण तस्य हननं युक्तम् । न ह्युत्तरकाले स्तने पीते सति रात्रावग्निहोत्रार्थं हविः संभवति । अत्रैतद्धर्मत्रयमवगम्यते- दशसु रात्रिषु क्षीरं न ग्राह्यम्, प्रतिदिनमासंगवं मात्रा सह वत्सो मोचनीयः, पश्चान्मातुः सकाशादपाकर्तव्य इति ।

इति श्रीमत्सायणाचार्य विरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
प्रथमप्रपाठके प्रथमोऽनुवाकः ।। १ ।।

अथ प्रथमप्रपाठके द्वितीयोऽनुवाकः ।

प्रथमेऽनुवाकेऽग्निहोत्रस्योपोद्घात उक्तः । द्वितीयेऽग्निहोत्रं निरूप्यते । तत्राऽऽदौ तावत्स्वाहाकारमन्त्रस्योत्पत्तिं वक्तुमाख्यायिकामाह-

प्रजापतिरग्निमसृजत । तं प्रजा अन्वसृज्यन्त । तमभाग उपास्त । सोऽप्रजाभिरपाक्रामत् । तमवरुरुत्समानोऽन्वैत् । तमवरुधन्नाशक्नोत् । स तपोऽतप्यत । सोऽग्निरुपारमताताऽपि वै स्य प्रजापतिरिति । स रराटादुदमृष्ट (१) । तदघृतमभवत् । तस्माद्यस्य दक्षिणतः केशा उन्मृष्टाः । तां ज्यैष्ठलक्ष्मी प्राजापत्येत्याहुः । यद्रराटादुदमृष्ट । तस्माद्रराटे केशा न सन्ति । तदग्नौ प्रागृह्णात् । तद्व्यचिकित्सत् । जुहवानी३माहौषा३मिति । तद्विचिकित्सायै जन्म, इति ।

Digitized by Madhuban Trust, Delhi

यदा प्रजापतिना सृष्टमग्निमनु प्रजा अन्या असृज्यन्त तदानीं सोऽग्निर्भागरहित एव तं प्रजापतिं कंचित्कालमुपास्य खिन्नः सन्प्रजाभिः सह तस्मात्प्रजापतेरपाक्रात्। तमग्निमवरोद्धुमिच्छन्प्रजापतिः पृष्ठतो गत्वा पलायमानं तमवरोद्धुं नाशक्नोत्। अशक्तः स प्रजापतिः श्रमेण संतापं प्राप्तः। ततोऽग्निस्तं दृष्ट्वा स प्रजापतिस्तप्त इत्येवं वदन्पलायनादुपरतः। स च प्रजापतिः श्रमजन्यं स्वेदजलं स्वकीयललाटादुन्मृष्टवान्। तच्च जलं घृतरूपेण प्रादुरभूत्। यस्मात्प्रजापतिः स्वकीयललाटस्य दक्षिणभागे स्थितं स्वेदजलममङ्गलं मन्यमान उन्ममार्ज तस्माल्लोकेऽपि यस्य पुरुषस्य दक्षिणभागे केशा उन्मृष्टा इवोर्ध्वाः पृष्टतोऽवनता उत्पद्यन्ते तस्य पुरुषस्य तां केशोत्पत्तिं प्रजापतिसंबन्धिनी ज्येष्ठलक्ष्मीत्येवमभिज्ञा आहुः। लक्ष्म्याः पूर्वमुत्पन्ना ज्येष्ठलक्ष्मीर्यां दारिद्र्यस्वामिनीं देवतामुद्दिश्य ज्येष्ठाव्रतमाचरन्ति। तद्रूपत्वादेव तथाविधं केशलक्षणं दृष्ट्वा मातापितृगतं तत्फलं व्यवहरन्ति। यस्मादयं प्रजापतिर्ललाटादुन्मार्जनं चकार तस्मात्कस्यापि ललाटे केशा न विद्यन्ते। तेन तदुत्पन्नं घृतं होतुं हस्ते गृहीत्वा स्वेदजलस्यापवित्रत्वसंदेहेन होमं कुर्यां न वेत्येवं व्यचिकित्सत्संदेहं कृतवान्। विविधस्य केतनस्य ज्ञानस्येच्छा विचिकित्सा। कोटिद्वयात्मकः संशय इत्यर्थः। तस्याश्च विचिकित्सा यास्तदा जन्म संपन्नम्।

एतद्वेदनं प्रशंसति-

य एवं विद्वान्विचिकित्सति (२)। वसीय एव चेतयते, इति।

यः पुमानेवं प्रजापतेर्विचिकित्सोत्पत्तिं विद्वान्स्वयं शास्त्रार्थं विचारयति स पुमान्वसीय एव चेतयते वस्तुतत्वमेव निश्चिनोति।

इदानीं स्वाहाकारोत्पत्तिं दर्शयति-

तं वागभ्यवदज्जुहुधीति। सोऽब्रवीत्। कस्त्वमसीति। स्वैव ते वागित्यब्रवीत्। सोऽजुहोत्स्वाहेति। तत्स्वाहाकारस्य जन्म, इति।

तं होमविषये संदिहानं प्रजापतिं काचिददृश्या वाग्जुहुधीत्यब्रवीत्। ततः प्रजापतिना कस्त्वमिति पृष्टे सति तव स्वकीया या वागस्ति सैवाहमित्यब्रवीत्। ततः प्रजापतिः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

स्वाहेत्युच्चारयन्नजुहोत् । स्वकीया वाग्जुहुधीत्याहेत्यस्य मन्त्रस्यार्थः। तस्मात्पदद्वयं मिलित्वा स्वाहाकारमन्त्रस्य स्वरूपं संपन्नम् ।

एतद्वेदनं प्रशंसति-

य एव ँस्वाहाकारस्य जन्म वेद । करोति स्वाहाकारेण वीर्यम्, इति ।

तमेतं मन्त्रं होमे विनियुङ्क्ते-

यस्यैवं विदुषः स्वाहाकारेण जुह्वति (३) । भोगायैवास्य हुतं भवति, इति ।

अथाग्निहोत्रशब्दार्थं निरूपयति-

तस्या आहुत्यै पुरुषमसृजत् । द्वितीयमजुहोत् । सोऽश्वमसृजत । तृतीयमजुहोत् । स गामसृजत । चतुर्थमजुहोत् । सोऽविमसृजत । पञ्चममजुहोत् । सोऽजामसृजत (४) । सोऽग्निरबिभेत् । आहुतीभिर्वै माऽऽप्नोतीति । स प्रजापतिं पुनः प्राविशत् । तं प्रजापतिरब्रवीत् । जायस्वेति । सोऽब्रवीत् । किं भागधेयमभिजनिष्य इति । तुभ्यमेवेद ँ हूयाता इत्यब्रवीत् । स एतद्भागधेयमभ्यजायत । यदग्निहोत्रम् (५)। तस्मादग्निहोत्रमुच्यते । इति ।

पुरा प्रजापतेस्तापं दृष्ट्वा पलायनादुपरतोऽग्निः । प्रजास्त्वपक्रम्य गता एव । ततः प्रजापतिस्तस्मिन्नग्नौ पूर्वोक्तेन घृतेन स्वाहाकारेण यामाहुतिं प्रथममजुहोत्तदाहुतिसामर्थ्येन पुरुषमसृजत । तथा द्वितीयाद्याहुतिभिरश्वादीनसृजत । ततः प्रजानां पुनरुत्पत्तेः स्वस्य प्रजापतित्वं सुस्थितम् । तदानीमग्निर्भीतोऽभूत्तस्यायमभिप्रायः-प्रजापतिः पुनः पुनराहुतीभिरेव मां प्राप्नोति न तु भागं प्रयच्छति । तास्त्वाहुतीर्देवा एव गृह्णन्ति । तस्माद्भागरहितः सेवितुं न शक्नोमीति विचार्य पूर्ववत्पलायनमकृत्वा तस्मिन्प्रजापतावेव प्रविष्टः । स च प्रजापतिर्जायस्वेति पुनरग्निमब्रवीत् । स च चाग्निस्तदुदर एव स्थित्वा भागरहितोऽहं क्षुधितः सेवितुं न शक्नोमि

Digitized by Madhuban Trust, Delhi

भागो मेऽपेक्षितः । कं भागमभिलक्ष्याहमुत्पत्स्य इत्यग्निनोक्तः प्रजापतिरिदमग्निहोत्रगतं हविस्तुभ्यमेव हूयत इति । भागं दत्तवान् ततोऽग्निहोत्रहविःस्वरूपं भागधेयमभिलक्ष्याग्निरुत्पन्नः तस्मादग्नये होत्रं होमोऽस्मिन्कर्मणीति बहुव्रीहिव्युत्पत्त्याऽग्निहोत्रमिति कर्मनाम । अग्नये होत्रमिति तत्पुरुषव्युत्पत्त्या हविर्नाम ।

अथास्य हविषः कालभेदेन व्यवस्थां विधत्ते-

तद्धूयमानमादित्योऽब्रवीत् । मा हौषीः । उभयोर्वै नावेतदिति । सोऽग्निरब्रवीत् । कथं नौ होष्यन्तीति । सायमेव तुभ्यं जुह्वन् । प्रातर्मह्यमित्यब्रवीत् । तस्मादग्नये सायꣳहूयते । सूर्याय प्रातः (६), इति ।

तद्धविरग्न्यर्थं प्रजापतिना हूयमानं दृष्ट्वा मा हौषीरित्येवमादित्यो निवारयामास । हेतुं चैवमवोचद्योऽयमग्निर्यश्चाहं तयोरावयोरेतद्धविर्न त्वेकस्याग्नेरिति । तदानीमुभयोर्भागव्यवस्थायामग्निना पृष्टाया कालभेदेन व्यवस्थामुवाच । तस्मादग्नये सायं जुहुयात्सूर्याय प्रातर्जुहुयात् । प्रातर्होमे द्वौ पक्षौ । उदितहोमोऽनुदितहोमश्चेति ।

तयोरुदितहोमपक्षमत्र विधत्ते-

आग्नेयी वै रात्रिः । ऐन्द्रमहः । यदनुदिते सूर्ये प्रातर्जुहुयात् । उभयमेवाऽऽग्नेयꣳस्यात् । उदिते सूर्ये प्रातर्जुहोति । तथाऽग्नये सायꣳहूयते । सूर्याय प्रातः, इति ।

रात्रावग्नेः प्रकाशाधिक्याद्रात्रिराग्नेयी । इन्द्रशब्देन परमैश्वर्ययोगात्सूर्योऽत्रविवक्षितः । तद्योगादहः सौर्यम् । एवं सत्युदयात्पाचीमः सर्वोऽपि कालोरात्र्यन्तःपातीति कृत्वा तत्र सूर्याय हुतमपि हविराग्नेयमेव स्यात् । ततः कालद्वयवर्तिनो हविष आग्नेयत्वात्सूर्यो हविर्हीनो भवेत्तन्मा भूदित्युदयादूर्ध्वं प्रातर्होमः कार्यः । तथा सति कालद्वये द्वयोर्देवतयोर्होमौ व्यवस्थितौ भवतः।

कालद्वयहोमं प्रशंसति-

रात्रिं वा अनु प्रजाः प्रजायन्ते । अह्ना प्रतितिष्ठन्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यत्सायं जुहोति (७) प्रैव तेन जायते । उदिते सूर्ये प्रातर्जुहोति । प्रत्येव तेन तिष्ठति, इति ।

रात्रौ गर्भधारणाद्रात्रिमनु प्रजा उत्पद्यन्ते । अह्नि जीवनहेतूनां कृषिवाणिज्यादीनां प्रवृत्तेरह्ना प्रतितिष्ठन्ति प्रतिष्ठिता भवन्ति । तस्मात्कालद्वयहोमेन प्रजोत्पादनं प्रतिष्ठां च प्राप्नोति ।

अथ प्रातः काले मन्त्ररहितां द्वितीयामहुतिं विधत्ते-

प्रजापतिरकामयत प्रजायेयेति । स एतदग्निहोत्रं मिथुनमपश्यत् । तदुदिते सूर्येऽजुहोत् । यजुषाऽन्यत् । तूष्णीमन्यत् । ततो वै स प्राजायत । यस्यैवंविदुष उदिते सूर्येऽग्निहोत्रं जुह्वति (८) । प्रैव जायते । अथो यथा दिवा प्रजानन्नेति । तादृगेव तत्, इति ।

प्रजोत्पत्तिसाधनमाहुतिद्वयोपेतत्वेन मिथुनरूपमग्निहोत्रमित्येवं प्रजापतिर्निश्चित्य सूर्योदयादूर्ध्वं मन्त्रेणैकममन्त्रकमपरं हविरित्याहुतिद्वयं हुत्वा प्रजा उत्पादयामास । तस्मादेवंविदुषः समन्त्रकोऽमन्त्रकश्चेत्याहुतिद्वयहोमेन प्रजोत्पत्तिर्भवति । अपि चोदयादूर्ध्वं होमे सति यथा लोके दिवा गच्छन्पुरुषो मार्गविशेषं चक्षुषा जानन्नेष गच्छति तादृगेव तदूर्ध्वमनुष्ठानम् ।

अत्र हि द्वौ पक्षौ । अग्निसूर्ययोरसंसृष्टहोम एकः पक्षः । सोऽयं पूर्वमुक्तः । अथ संसृष्टहोमं विधत्ते-

अथो खल्वाहुः । यस्य वै द्वौ पुण्यौ गृहे वसतः । यस्तयोरन्य राधयत्यन्यं न । उभौ वा वसतावृच्छतीति । अग्निं वावाऽऽदित्यः । सायं प्रविशति । तस्मादग्निर्दूरान्नक्तं ददृशे । उभे हि तेजसी संपद्येते (९) । उद्यन्तं वावाऽऽ दित्यमग्निरनुसमारोहति । तस्माद् धूम एवाग्नेर्दिवा ददृशे । यदग्नये सायं जुहुयात् । आ सूर्याय वृश्च्येत । यत्सूर्याय प्रातर्जुहुयात् । आऽग्नये वृश्च्येत देवताभ्यः समदं दध्यात् । अग्निर्ज्योतिर्ज्योतिः सूर्यः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वाहेत्येव सायꣳ होतव्यम् । सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातः । तथोभाभ्याꣳ सायꣳ हूयते (१०) । उभाभ्यां प्रातः। न देवताभ्यः समदं दधाति, इति ।

अथोशब्दः पक्षान्तरोपक्रमार्थः। लोके यस्य गृहे द्वौ पुरुषौ पुण्यात्मानौ समानैश्वर्यौ समानविद्यौ वा परस्परस्नेहयुक्तौ निवसतस्तस्य गृहे तयोः पुण्यात्मनोर्मध्ये कंचित्पुण्यात्मानं यः पूजयित्वाऽन्यं न पूजयति स पूजकस्तावुभौ पुण्यात्मानावुभावप्यृच्छति । हिनस्तीत्यर्थः । पूजाराहित्यमेवैकस्य हिंसा । इतरस्य तु सत्यामपि पूजायं स्निग्धस्य द्वितीयस्य तदभावेन मनःक्लिश्नाति । एवमत्रापि परस्परस्निग्धयोरग्न्यादित्ययोर्मध्ये सायं प्रातर्वा कस्यचिदेव होमे सत्युभावपि क्लिश्नीतः । परस्परस्नेहश्चैवमवगन्तव्यः । सायं कालादूर्ध्वमादित्योऽग्निं प्रविशति । अत एव तेजोद्वयमेलनाद्रात्रौ दूरेऽप्यग्निर्दृश्यते । तथोद्यन्तमादित्यमग्निरनुकूलः समारोहति । तस्मादग्नितेजसः सूर्ये प्रविष्टत्वादहनि दूरे धूम एव दृश्यते न तु तेजः एवं परस्परस्नेहे सति सायं काले यदाऽग्न्यर्थमेव हुत्वा सूर्यार्थं न जुहुयात्तदानीमयं सूर्याद्विच्छिद्यते । एवं प्रातरति सूर्यार्थमेव हुत्वा वह्न्यर्थमजुह्वत्पुमानग्नेर्विच्छिद्येत । अपि च देवतानां वह्न्यादित्यरूपाणां सपरिवाराणां कलहं संपादयेत् । अतस्तत्परिहाराय सायंकालेऽग्निना सह सूर्यं मिश्रयित्वा तादृशेन मन्त्रेण जुहुयात् । मन्त्रस्य चायमर्थः-अग्निरूपं यज्ज्योतिः सूर्यरूपं च यज्ज्योतिस्तदुभयं विधाय तस्मा इदं हविरिति स्वकीया वागाह । यद्वा स्वाहाशब्दस्य निपातस्य दानार्थवाचित्वादिदं हविर्दत्तमिति । एवं प्रातःकालेऽपि सूर्येण सहाग्निं मिश्रयित्वा "सूर्यः" इत्यादिमन्त्रेण जुहुयात् । तथा सति कालद्वयेऽपि पुण्यात्मनोरुभयोर्होमात्मकलहं न संपादयति ।

सायंकालीनमन्त्रे पूर्वभागस्य तात्पर्यं दर्शयति-

अग्निर्ज्योतिरित्याह । अग्निर्वै रेतोधाः, इति ।

रेतसो गर्भाशये स्थापकोऽग्निरतस्तद्भागपाठेन यजमानो रेतो वारयति । अत्रोत्तरभागब्राह्मणमुन्नेयम् । तदुक्तं बौधायनेन-"द्विरङ्गुल्या प्राश्नाति जा ज्योतिरिति" इति ।

तमिमं मन्त्रं प्रसङ्गाद् बुद्धिस्थं व्याचष्टे-

प्रजा ज्योतिरित्याह । प्रजा एवास्मै प्रजनयति, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

येयमुत्पादनीया प्रजा सा ज्योतिः स्वरूपोत्पद्यताम् । अनेन मन्त्रेण यजमानार्थं प्रजा उत्पादयति । अथवा सूर्यो ज्योतिः स्वाहेत्यस्योत्तरभागस्यार्थतो निर्देशः प्रजा ज्यौतिरित्यनेन विवक्षितः । सूर्यात्मकं ज्योतिः प्रजा उत्पा दयतीति तस्यार्थः । अनेनोपलक्षिते मन्त्रभागे पठिते सति यजमानार्थं प्रजा उत्पादयति । एतदे (मे) व श्रुत्यभिप्रायं हृदि निधायाऽऽपस्तम्बः-"प्रजाज्योतिः" इत्येतं मन्त्रमुपेक्ष्य भक्षणे शाखान्तरमन्त्रमुदाजहार -"पूषाऽसीति लेपं प्राश्नाति" इति ।

प्रातः कालीनमन्त्रे पूर्वभागस्य तात्पर्यं दर्शयति-

सूर्यो ज्योतिरित्याह । प्रजास्वेव प्रजातासु रेतो दधाति, इति ।

पूर्वमन्त्रस्योत्तरभागे याः प्रजा उत्पादितास्तासु प्रजासु पुनरपत्योत्पादनार्थं सूर्यो ज्योतिरिति भागपाठेन रेतः स्थापयति । ज्योतीरूपः सूर्यो रेतः स्थापयत्विति तस्यार्थः ।

उत्तरभागस्य तात्पर्यं दर्शयति-

ज्योतिरग्निः स्वाहेत्याह । प्रजा एव प्रजाता अस्यां प्रतिष्ठापयति (११), इति ।

ज्योतीरूपोऽग्निरस्यां भूमावुत्पन्नाः प्रजाः प्रतिष्ठापयत्विति मन्त्रार्थः । तेन तथैव प्रतिष्ठापयत्विति ।

कालद्वयेऽपि द्वितीयामाहुतिं विधत्ते-

तूष्णीमुत्तरामाहुतिं जुहोति । मिथुनत्वाय प्रजात्यै, इति ।

आहुत्योर्द्वित्वेन मिथुनहोमस्य मिथुनत्वम् ।

उदितहोमानुदितमोमरूपौ यौ द्वौ पक्षौ तयोरुदितहोमपक्षः पूर्वं विहितः इदानीमनुदितहोमपक्षं विधत्ते-

यदुदिते सूर्ये प्रातर्जुहुयात् । यथाऽतिथये प्रद्रुताय शून्यायाऽऽवसथायाऽऽहार्यं हरन्ति । तादृगेव तत् । क्वाह ततस्तद्भवतीत्याहुः । यत्स न वेद । यस्मै

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तद्धरन्तीति । तस्माद्यदौषसं जुहोति । तदेव संप्रति । अथो यथा प्रार्थमौषसं परिवेवेष्टि । तादृगेव तत् (१२), इति ।

अमृष्ट विचिकित्सति जुह्वत्यजामसृजताग्निहोत्र सूर्याय प्रातर्जुहोति जुह्वति संपद्यैते हूयते स्थापयति संप्रति द्वे च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके प्रथमाध्याये द्वितीयोऽनुवाकः ।। २ ।।

सूर्योऽयमतिथिरूपेणोदयकाले समागच्छति । अतस्तदागमनात्प्रागेवार्घ्यपाद्यादिस्थानीयमाहुतिरूपं सत्कारसाधनं संपादनीयम् । तत्परिज्योदयादूर्ध्वं होमे सति यथा लोके कश्चिन्मन्दः पुरुषोऽतिथौ प्रतिनिवृत्य गते सति पश्चादर्घ्यपाद्यादिकं संपादनीयं सत्कारसाधनं संपादयति तदनुष्ठानं भवति । तच्चायुक्तम् । यस्मा अतिथये यत्सत्कारद्रव्यं संपादयति सोऽतिथिर्यस्मात्कारणान्न जानाति तस्मात्कारणात्तत्सत्कारसाधनं द्रव्यं क्वाह खलु भवति न काप्युपयुज्यत इत्येवमभिज्ञा आहुः । यस्मादेवमुदयादूर्ध्वं होमे दोषोऽस्ति तस्मादौषसमुषःकालसंबन्धि हव्यं जुहोतीति यत्तदेव संप्रति सम्यगनुष्ठानम् । अपि च यथा लोके राजसेवको जनसमूह उषःकाले राज्ञः शयनोत्थानात्पूर्वमौषसमुषाकाले सेवोचितं प्रार्थ्यं प्रकृष्टेन प्रयोजनेनोपेतं पादप्रक्षालनार्थं जलपादुकादिकं पुरस्तात्स्थापितं परिवेष्ट्य राज्ञोऽवसरं प्रतीक्षमाणस्तिष्ठति तादृगेव तदुदयात्प्राचीनमनुष्ठानं द्रष्टव्यम् । अत्राग्निहोत्रशब्दः कर्मनामधेयं न तु देवताविधिपरमि (र इ) ति प्रथमाध्यायस्य चतुर्थपादे यन्मीमांसितं तदस्माभिराधारप्रतिपादके "भुवनमसि" इत्यनुवाक एवोदाहृतम् । आधाराग्निहोत्रशब्दयोर्नामत्वस्यैकेनैवाधिकरणेन निर्णीतत्वात् । अग्निहोत्रस्य मूलप्रकृतित्वमष्टमे चिन्तितम् । तदपि "वायव्य श्वेतमालभेत "इत्यादीनां काम्यपशूनां विकृतित्वप्रतिपादनप्रसङ्ग उदाहृतम् । इष्ट्यग्निहोत्रसोमानां मूलप्रकृतित्वस्यैकेनैवाधिकरणेन निर्णीतत्वाद्वायव्यादिपशूनामग्नीषोमीयपशुः प्रकृतिः । तस्य चावान्तरप्रकृतित्वेन मूलप्रकृतिसापेक्षत्वान्मूलविचारस्तत्र कृतः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः ।। २ ।।

अथ प्रथमप्रपाठके तृतीयोऽनुवाकः ।

द्वितीयेऽनुवाकेऽग्निहोत्रं निरूपितम् । तृतीयेऽधिश्रयणादिका हविःसंस्कारा. उच्यन्ते । "गार्हपत्यादुदीचोऽङ्गारान्निरूह्य व्यन्तान्गार्हपत्येन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृत्वेत्युपक्रम्य तेष्वग्नहोत्रमधिश्रयति" इति यत्सूत्रकारेणोक्तं तदिदं विधत्ते-

रुद्रो वा एषः । यदग्निः । पत्नी स्थाली । यन्मध्येऽग्नेरधिश्रयेत् । रुद्राय पत्नीमपि दध्यात् । प्रमायुका स्यात् । उदीचोऽङ्गारान्निरुह्याधिश्रयति । पत्नियै गोपीथाय, इति ।

योऽयमग्निः स एष रुद्रः क्रूरो देवः । रुद्रो वै क्रूर इति श्रुत्यन्तरात् । येयं हविराधारभूता स्थाली सा पत्नीस्थानीया । एवं सत्यग्निमध्ये स्थाल्यामधिश्रितायां रुद्राय पत्नी समर्पिता स्यात् । ततः सा म्रियेत । अतस्तत्परिहारायोत्तरादिग्वर्तिनोऽङ्गारान्पृथक्कृत्वा तेषु स्थालीमधिश्रयेत् । तच्च पत्न्यारक्षार्थं भवति ।

अङ्गाराणां पृथक्करणे विशेषं विधत्ते-

व्यन्तान्करोति । तथा पत्न्यप्रमायुका भवति ।(१), इति ।

गार्हपत्यायतनेन वियुक्तं यत्स्थानं तत्स्थानं येषामङ्गाराणां ते व्यन्ताः । तथा सति रुद्रसंस्पर्शाभावात्पत्नी न म्रियते ।

संतापाधिक्यात्पात्रस्योर्ध्वमुद्गतस्य क्षीरस्य बहिष्पतनव्यावृत्तये जलेन प्रतिषेकं विधत्ते-

घर्मो वा एषोऽशान्तः । अहरहः प्रवृज्यते । यदग्निहोत्रम् । प्रतिषिञ्चेत्पशुकामस्य । शान्तमिव हि पशव्यम्, इति ।

अग्निहोत्रहविर्यदस्त्येषोऽशान्तो घर्मः । यथा घर्मशब्दवाच्यं प्रवर्ग्यहविरशान्तमेवमिदमप्यशान्तम् । प्रतिदिनं प्रकर्षेण तप्यमानत्वात् । अतस्तच्छान्त्यर्थं मुद्गतस्य क्षीरस्योपरि जलेन प्रतिषेकं पशुकामः कुर्याद्यस्माच्छान्तमेव हविः पशुभ्यो हितं भवति ।

अधिकारिविशेषेण प्रतिषेकं निषेधति-

न प्रतिषिञ्चेद्ब्रह्मवर्चसकामस्य । समिद्धमिव हि ब्रह्मवर्चसम्, इति ।

यस्माद्ब्रह्मवर्चसमुज्ज्वलं भासते, तस्मात्तत्कामी प्रतिषेकेण क्षीरोत्सेकं न शमयेत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

तमिमं पक्षं दूषयित्वा प्रतिषेकस्य प्रतिप्रसवं विधत्ते-

अथो खलु । प्रतिषिच्यमेव । यत्प्रतिषिञ्चति (२) । तत्पशव्यम् । यज्जुहोति तद्ब्रह्मवर्चसि । उभयमेवाकः, इति ।

अथोशब्दः पक्षान्तरार्थः । खल्वाहुरिति शेषः । प्रतिषेकेण पशव्यत्वं होमेन ब्रह्मवर्चसमित्युभयमपि करोत्येव ।

यदुक्तं सूत्रकारेण-"तृणेन ज्वलताऽवेक्षते" इति । तदिदं विधत्ते--

प्रच्युतं वा एतदस्माल्लोकात् । अगतं देव लोकम् । यच्छृत ँहविरनभिघारितम् । अभिद्योतयति । अभ्येवैनद् घारयति । अथो देवत्रैवैनद्गमयति (३), इति ।

शास्त्रीयश्रपणेन (?) हविषोऽस्माल्लोकात्प्रच्युतिः अनभिघारितत्वात्स्वर्गप्राप्त्यभावः । अतस्तं (स्ता) वारयितुं ज्वलता तृणेनाभिद्योतिते सत्येतद्धविरभिघारितमेव भवति । अपि चैतद्धविर्देवेष्वेव गमयति ।

पर्यग्निकरणं विधत्ते-

पर्यग्निं करोति । रक्षसामपहत्यै, इति ।

ज्वलतस्तृणस्य परितः प्रदर्शनं पर्यग्निकरणम् । तेन रक्षांस्यपहन्यन्ते । तस्याऽऽवृत्तिं विधत्ते-

त्रिः पर्यग्निं करोति । त्र्यावृद्धि यज्ञः । अथो मेध्यत्वाय, इति ।

तिस्र आवृत्तयो यस्य यज्ञस्य सोऽयं त्र्यवृत् । "त्रिषत्या हि देवाः" इति श्रुत्यन्तरेण त्रिवारानुष्ठाने देवानां सत्यत्वबुद्धयभ्युदयान्त्रिरावृतो यज्ञः प्रशस्तः । अपि च त्रिरावृत्या दोषाभावस्य पर्यालोचितत्वाद्धविर्यज्ञयोग्यं भवति ।

यदुक्तं सूत्रकारेण-"वर्त्म कुर्वन्यागुद्वासयत्युदक्प्रायमुदग्वा" इति । तत्रोदगुद्वासनपक्षं विधत्ते -

यत्प्राचीनमुद्वासयेत् । यजमान ँशुचाऽर्पयेत् । यद्दक्षिणा ।

Digitized by Madhuban Trust, Delhi

पितृदेवत्यꣳ स्यात्। यत्प्रत्यक् (४)। पत्नीꣳ शुचाऽर्पयेत्। उदीचीनमुद्वासयति। एषा वै देवमनुष्याणाꣳ शान्ता दिक्। तामेवैनदनूद्वासयति शान्त्यै, इति।

प्राक्प्रतीच्योर्यजमानपत्नीस्थानत्वात्तत्रहविरुद्वासने तयोस्तापप्राप्तिः। दक्षिणदिशः। पित्रधीनत्वात्तत्रोद्वासितं हविः। पितृदेवत्यं भवेत्। देवमनुष्याणां चोपद्रवाभावेन शान्तेयमुत्तरा दिक्। अतस्तामनूद्वासितं हविः शान्त्यै भवति।

विधत्ते-

वर्त्म करोति। यज्ञस्य संतत्यै, इति।

पात्रस्य भूमावाकर्षणेन भस्मना च लाञ्छिता भूमिर्वर्त्मवदवलोक्यते। उद्वासनकाले तथा कुर्यात्। तेन यज्ञः संततो भवति।

यदुक्तं सूत्रकारेण -"स्रुक्स्रुवावादाय प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इत्याहवनीये गार्हपत्ये वा प्रतितपति" इति। तदिदं प्रतितपनं विधत्ते-

निष्टपति। उपैव तत्स्तृणाति, इति।

तत्तेन निःशेषतपनेन स्रुक्स्रुवयोरुपस्तरणं कृतं भवति।

निष्टप्तायां स्रुचिं चतुर्वारं हविष्पूरणं स्रुवेण कुर्यादिति विधत्ते-

चतुरुन्नयति। चतुष्पादः पशवः (४)। पशूनेवावरुन्धे, इति।

चतुर्वारावृत्या चतुष्पादः पशवो भवन्ति।

ग्रहणकाले तेषां पूरणं विधत्ते-

सर्वान्पूर्णानुन्नयति। सर्वे हि पुण्या राद्धाः, इति।

स्रुवाणां परिपूर्त्या यजमानसंबन्धिनः सर्वे पुरुषाः पुण्यात्मानो धनसमृद्धा भवन्ति।

चतुर्णां पर्यायाणां मध्ये व्यापारान्तरेण व्यवधानाभावं विधत्ते-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अनूच उन्नयति । प्रजाया अनूचीनत्वाय । अनूच्येवास्य प्रजार्धुका भवति, इति ।

एकं स्रुवमनु द्वितीयस्रुवोऽञ्चति प्रवर्तत इत्येते चत्वारोऽन्वञ्चः । तेन ज्येष्ठं पुत्रमनु द्वितीय इत्येवमनूचीना प्रजा भवति । सा च द्रव्यसमृद्ध्यै संपद्यते ।

यदुक्तं सूत्रकारेण "गार्हपत्ये हस्तं प्रताप्य संमृशति" इति । तदिदं विधत्ते-

संमृशति व्यावृत्त्यै, इति ।

संमर्शनेन चतुरुन्नीतस्य देवार्थस्येतरस्मात्पात्रस्थाद्व्यावृत्तिर्भवति । संमर्शनात्पूर्वमपरेण गार्हपत्यं समीपे हविःसादनंशाखान्तरसिद्धं सूत्रकारेणोदाहृतम्-"अपरेण गार्हपत्यमुन्नयनदेशेऽतितरां वा सादयित्वा गार्हपत्ये हस्तं प्रताप्य संमृशति" इति । तस्मात्सादनादुत्तरकालभाविसादनमुपसादनम् । तच्चोपसादनमादौ गार्हपत्यसमीपे कृत्वा पश्चादाहवनीय समीपमुपसाद्यानन्तरं होतव्यमिति शाखान्तराध्यायिनां मतम् ।

तत्र गार्हपत्यसमीपे यदुपसादनं तदेतन्निषेधति-

नाहोष्यन्नुपसादयेत् । यदहोष्यन्नुपसादयेत् । यथाऽन्यस्मा उपनिधाय (६) । अन्यस्मै प्रयच्छति । तादृगेव तत् । आऽस्मै । वृश्च्येत् । यदेव गार्हपत्येऽधिश्रयति । तेन गार्हपत्यं प्रीणाति, इति ।

इदं हविराहवनीय एव होष्यति न तु गार्हपत्ये । तस्मादहोष्यन्गार्हपत्य समीप उपसादनं न कुर्यात् । तत्करणेन गार्हपत्यार्थं समीपे निधाय तस्मिन्नहुत्वा पश्चादाहवनीये होमे सति यथा लोके देवदत्तार्थं पात्रेषु परिवेषणं कृत्वा यज्ञदत्ताय प्रयच्छति तादृगेव तद्भवेत् । ततो होमाभावेन क्षुब्धाद्गार्हपत्यादयं विच्छिद्येत् । तस्मान्न तत्रोपसादनं कर्तव्यम् । गार्हपत्ये त्वधिश्रयणेनैव प्रीतो भवति ।

यदुक्तं सूत्रकारेण-"होष्यन्नप उपस्पृश्य पालाशीं समिधमादधाति" इति । तदेतद्विधत्ते-

अग्निरबिभेत् । आहुतयो माऽत्यैष्यन्तीति । स एता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समिधमपश्यत् । तामाधत्त । ततो वा अग्नावाहुतयोऽध्रियन्त (७) । यदेनं समयच्छत् । तत्समिधः समित्वम् । समिधमादधाति । समेवैनं यच्छति । आहुतीनां धृत्यै । अथो अग्निहोत्रमेवेध्मवत्करोति । आहुतीनां प्रतिष्ठित्यै, इति ।

आहुत्यर्थं हविषि समीपमानीते सति सोऽग्नरबिभेत् । तस्यायमभिप्रायः- हूयमानस्त्वाहुतयो माममतिलङ्घ्यन्यत्र गमिष्यन्तीति । अतस्तन्निवारणसमर्थो कांचित्समिधं निश्चित्यं तां स्वस्मिन्नाधत्त । तया समिधा नियमिता आहुतयोऽग्नावेवस्थिताः । यस्मात्कारणादाहुतयो यथाऽतिलङ्घ्य नान्यत्र गच्छन्ति तथैनमग्निं समर्थं कृत्वा समिदियं नियतवती । तस्मात्समयच्छत्समगच्छदिति (?) व्युत्पत्या समिन्नाम संपन्नम् । अतः समिधमादध्यात्ते नाऽऽहुतिधारणाय समार्थ्यं दत्त्वाग्निं नियच्छति । अपि च दर्शपूर्णमासयोरिवाग्निहोत्रे पूर्वमिध्यो नास्ति । इदानीं तदग्निहोत्रमिध्मवद्युक्तं करोति । तेनाऽऽ हुतयः । प्रतिष्ठिता भवन्ति । अत्र शाखान्तरमाश्रित्य समित्संख्याविकल्पं सूत्रकार उदाजहार-"एकां द्वे तिस्रो वा " इति ।

तत्राऽऽक्षेपसमाधानाभ्यां स्वकीयमेकत्वपक्षं द्रढयति-

ब्रह्मवादिनो वदन्ति । यदेकाꣳ समिधमाधाय द्वे आहुती जुहोति । अथ कस्याꣳ समिधि द्वितीयामाहुतिं जुहोतीति (८) । यद् द्वे समिधावादध्यात् । भ्रातृव्यमस्मै जनयेत् । एकाꣳ समिधमाधाय । यजुषाऽन्यामाहुतिं जुहोति । उभे एव समिद्वती आहुती जुहोति । नास्मै भ्रातृव्यं जनयति, इति ।

अत्रैतच्चिन्त्यते । द्वितीया समिदाधातव्या न वेति । नाऽऽद्यः । द्वितीयस्याः प्रतियोगिरूपत्वेन भ्रातृव्योत्पत्तिप्रसङ्गात् । न द्वितीयः । द्वितीयाहुतेः समिदभावात्वसंभावादिति ब्रह्मवादिनामाक्षेपः। तत्रैतदुत्तरम् । एकस्या एव समिध आधानान्नास्ति भ्रातृव्योत्पत्तिः । प्रथमाहुतिमन्त्रेण परितोष्य द्वितीयाहुतेः समिधा परितोषादुभयोः समिदाधारत्वं सिध्यति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समिदाधानादूर्ध्वं तस्याः प्रदीप्तिपर्यन्तं प्रतीक्ष्य तद्धोमं विधत्ते-

आदीप्तायां जुहोति । समिद्धमिव हि ब्रह्मवर्चसम् । अथो यथाऽतिथिं ज्योतिष्कृत्वा परिवेवेष्टि । तादृगेव तत्, इति ।

आहितायां समिधि सर्वतो दीप्तायां सत्यां पश्चाज्जुहुयात्तस्यां ब्रह्मवर्चसमुज्ज्वलमिव दृश्यते । तस्मात्तदा होमो युक्तः । अपि च यथा लोके समागतमतिथिं भोक्तुमुपवेश्य समीपे दीपं कृत्वा पश्चात्परिवेषणं क्रियते तादृगेवैतदादीप्तायामनुष्ठानम् ।

पूर्वोक्तामुन्नयनसंख्यामाहुतिसंख्यां च प्रशंसति-

चतुरुन्नयति । द्विर्जुहोति । तस्माद् द्विपाच्चतुष्पादमत्ति । अथो द्विपद्येव चतुष्पदः प्रतिष्ठापयति, इति ।

भवति प्रतिषिञ्चति गमयति प्रत्यक् पशव उपनिधायादिप्रयन्तेति तच्चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

प्रथमाध्याये तृतीयोऽनुवाकः ।। ३ ।।

येयं चतुःसंख्या या च द्वित्वसंख्या तयोः परस्परोपकार्योपकारित्वादेकस्मिन्नुष्ठाने सहावस्थानं युक्तम् । यस्मादेवं तस्माल्लोकेऽपि द्विपान्मनुष्यश्चतुष्पदां गवां संबन्धि क्षीरादिकमुपभुङ्क्ते । तत्र चतुष्पदामुपकारकत्वम् । अपि च द्विपद्येव मनुष्ये चतुष्पदः प्रतिष्ठापयति । मनुष्यो हि शालानिर्माणादिना गवादिपशून्पालयति तत्र द्विपदमुपकारकत्वम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

प्रथमप्रपाठके तृतीयोऽनुवाकः ।। ३ ।।

अथ प्रथमप्रपाठके चतुर्थोऽनुवाकः ।

तृतीये हविष उपयोक्ष्यमाणस्य संस्कारोऽभिहितः । चतुर्थे तूप [युक्त] संस्कारोऽभिधीयते । तत्राऽऽदौ तावदन्वयव्यतिरेकाभ्यामाहुतिप्रकारं विवक्षित्वा प्रथममन्वयं दर्शयति -

उत्तरावतीं वै देवा आहुतिमजुहवुः । अवाचीमसुराः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ततो देवा अभवन् । पराऽसुराः । यं कामयेत वसीयान्स्यादिति । कनीयस्तस्य पूर्वं हुत्वा । उत्तरं भूयो जुहुयात् । एषा वा उत्तरावत्याहुतिः । तां देवा अजुहवुः । ततस्तेऽभवन् (१) । यस्यैवं जुहति । भवत्येव, इति ।

प्रथमाहुतावल्पमेव द्रव्यं हुत्वा द्वितीयस्यामधिकद्रव्यहोमे सत्युत्तरमधिकमस्यामाहुताविति उत्तरावती । तादृशहोमेन देवा धनिका अभवन् । एवमन्योऽपि धनिको भवति ।

अथ व्यतिरेकं दर्शयति -

यं कामयेत पापीयान्त्स्यादिति । भूयस्तस्य पूर्वं हुत्वा । उत्तरं कनीयो जुहुयात् । एषा वा अवाच्याहुतिः । तामसुरा अजुहवुः । ततस्ते पराभवन् । यस्यैवं जुहति । परैव भवति (२), इति ।

प्रथमाहुतावधिकं द्रव्यं हुत्वा द्वितीयाहुतावल्पद्रव्यहोमे सत्यवमं क्षीणं यथा भवति तथाऽञ्चति प्रवर्तत इत्यवाची । तादृशहोमादसुरवदन्योऽपि पराभवति ।

प्रथमाहुतेरूर्ध्वं स्रुचोऽधस्तादुपसानं विधत्ते-

हुत्वोपसादयत्यजामित्वाय । अथो व्यावृत्त्यै, इति ।

नैरन्तर्येणाऽऽहुतिद्वये सत्यालस्यं भवेत् । मध्ये स्रगुपसादनेन तत्परिहृतं भवति । अपि च न नैरन्तर्येण होमे सत्याहुतिद्वयस्य मध्ये व्यावृत्तेरप्रीतेरकैवाऽऽहुतिः स्यात् । अत उपसादनमिदमाहुत्योर्व्यावृत्तये भवति ।

उपसादनादूर्ध्वमाहवनीयसमीप एवावस्थितस्य पश्चिमाभिमुखत्वेन गार्हपत्यप्रतीक्षणं विधत्ते -

गार्हपत्यं प्रतीक्षते । अनन्नुध्यायिनमेवैनं करोति, इति ।

स्वसेवां परित्याज्याऽऽहवनीयसेवायां कुपितो गार्हपत्य एनं यजमानं हिंसितुमनुध्यायति । तत्र प्रतीक्षणेन सेवित्वा ध्यानरहितं करोति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयाहुतेर्होमदेशं विधत्ते-

अग्निहोत्रस्य वै स्थाणुरस्ति । तं ऋच्छेत् । यज्ञस्थाणुमृच्छेत् । एष वा अग्निहोत्रस्य स्थाणुः । यत्पूर्वाऽऽहुतिः । तां यदुत्तरयाऽभिजुहुयात् (३) । यज्ञस्थाणुमृच्छेत् । अतिहाय पूर्वामाहुतिं जुहोति । यज्ञस्थाणुमेव परिवृणक्ति । अथो भ्रातृव्यमेवाऽऽप्त्वाऽतिक्रामति, इति ।

स्थाणुः स्तम्भः । यथा गृहस्य स्तम्भ आधारभूत एवमग्निहोत्रस्यापि प्रथमाहुतिर्मूलस्तम्भः । यदि तां प्रथमाहुतिमभिलक्ष्य तस्या उपर्युत्तरयाऽऽहुत्यानुष्ठानं निष्पादयेत्तदानीं यज्ञसंबन्धिनं मूलस्तम्भमृच्छेत्प्राप्नुयादभिघातेन पातयेदित्यर्थः । अतस्तदाहुतिप्रदेशं परित्यज्य पूर्वभागे जुहुयात् । अत एव सूत्रकारः–"द्व्यङ्गुलेर्मूलात्समिधमभिजुहोति" इत्युक्त्वाऽनन्तरमिदमाह–" भूर्भुवः सुवरित्युत्तरामाहुतिं पूर्वार्धे समिधि जुहोति तूष्णीं वेति"। एवं सति यज्ञस्तम्भभूता पूर्वाऽऽहुती रक्षिता भवति । अपि चेयमाहुतिर्भ्रातृव्यमेव प्राप्यतिक्रामति । विनाशयतीत्यर्थः ।

यदुक्तं सूत्रकारेण--"इषे त्वेति स्रुङ्मुखादवाचीनं सायं लेपमवमार्ष्ट्यूर्जे त्वेत्यूर्ध्वंप्रातः" इति । तदिदं विधत्ते--

अवाचीनꣳ सायमुपमार्ष्टि । रेत एव तद्दधाति । ऊर्ध्वं प्रातः । प्रजनयत्येव तत्, इति ।

यदुक्तं स्रुग्लक्षणे--मुखमष्टाङ्गुलं प्रोक्तं बिलं तु चतुरङ्गुलम् । द्वादशाङ्गुलदण्डस्तु स्रुग्लक्षणमुदाहृतम् ।। [इति] ।

तस्य मुखस्याग्रमारभ्य बिलपर्यन्तं होमादूर्ध्वं लेपमवाचीनं सायंकाले मृज्यात्तेन बिलमध्ये लेपापनयनाद्यजमानो रेतो धारयति । प्रातःकाले तु बिलमारभ्य मुखाग्रपर्यन्तमूर्ध्वलेपमुपमृज्यात्तेन प्रजामुत्पादयति ।

अथ हविः शेषप्राशनं विधत्ते--

ब्रह्मवादिनो वदन्ति । चतुरुन्नयति (४) । द्विर्जुहोति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ क्व द्वे आहुती भवत इति । अग्नौ वैश्वानर इति ब्रूयात् । एष वा अग्निर्वैश्वानरः । यद्ब्राह्मणः । हुत्वा द्विः प्राश्नाति । अग्नावेव वैश्वानरे द्वे आहुती जुहोति, इति ।

पूर्वं स्रुवेण चतुर्वारं स्रुचि द्रव्यपूरणं कृतम् । तच्चाऽऽहुतिचतुष्टयाय पर्याप्तम् । तत्र द्वे आहुती आहवनीयं समाहितायां समिधि हुते इतः परं द्वयोराहुत्योः कुत्र होम इति ब्रह्मवादिनां प्रश्नः । विश्वेषां नराणां संबन्धी योऽग्निस्तस्मिन्नित्युत्तरं ब्रूयात् । ब्राह्मणश्च वैश्वानरोऽग्निर्हविर्दातुरग्निवत्फलप्रदत्वात् । अतो वह्नौ द्वे आहुती हुत्वा यजमानो द्विः प्राश्नीयात् । यदाऽन्यो जुहोति तदाऽन्यः प्राश्नीयात् । एवं सति ब्राह्मणरूपे वैश्वानराग्नावाहुतिद्वयं भवति ।

होममार्जनप्राशनसंख्यां प्रशंसति–

द्विर्जुहोति । द्विर्निमार्ष्टि । द्विः प्राश्नाति (४) । षट् संपद्यन्ते । षड् वा ऋतवः ऋतूनेव प्रीणाति, इति ।

अथ प्रश्नोत्तराभ्यां सर्वदेवतासंबन्धित्वेनाग्निहोत्रं प्रशंसति–

ब्रह्मवादिनो वदन्ति । किंदेवत्यमग्निहोत्रमिति । वैश्वदेवमिति ब्रूयात् । यद्यजुषा जुहोति । तदैन्द्राग्नम् । यत्तूष्णीम् । तत्प्राजापत्यम् (६) । यन्निमार्ष्टि । तदोषधीनाम् । यद् द्वितीयम् । तत्पितृणाम् । यत्प्राश्नाति । तद्गर्भाणाम् । तस्माद्गर्भा अनश्नन्तो वर्धन्ते । यदाचामति । तन्मनुष्याणाम्, इति ।

यद्यपि होमद्रव्यमग्निसूर्ययोर्भागस्तथाऽप्यग्निहोप्रयोगेण कासां देवतानां प्रीतिरिति ब्रह्मवादिनां प्रश्नः । विश्वेषां सर्वेषां देवानां प्रीतिरित्युत्तरं ब्रूयात् । तत्कथमिति तदुच्यते । समन्त्रकहोमेनैन्द्राग्न्योः प्रीतिः । इन्द्रशब्देन सूर्यो विवक्षित इत्युक्तम् । तूष्णीं होमेन प्रजापतेः प्रीतिः अन्यत्र प्रजापतेराधारे तूष्णींहोमदर्शनात् । निर्माजनं द्विविधम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तच्च सूत्रकारेणोदाहृतम्- 'ओषधीभ्यस्त्वौषधीर्जिन्वेति बर्हिषि लेपं निमृज्येति, प्राचीनावीती स्वधा पितृभ्यः पितॄञ्जिन्वेति दक्षिणेन वेदिं भूम्यां लेपं निमृज्य' इति च । तेनोभयेनौषधीनां पितॄणां च प्रीतिः । ब्राह्मणप्राशनेन गर्भाणां तृप्तिः । यस्मादेवं तस्माद्गर्भा स्वतन्त्रभोजनमन्तरेणैव वर्धन्ते । प्राशनव्यतिरिक्तं यच्छेषभक्षणं तेन मनुष्याणां प्रीतिः। प्राशनं भक्षणं च सूत्रकारःपृथगेव दर्शयति-पूषाऽसीति लेपं प्राश्नात्यशब्दं कुर्वन्नतिहाय दत्तोऽप आचम्यैवं पुनः प्राश्याऽऽचम्य बर्हिषोपयम्योदङ्ङावृत्योन्मृज्य गर्भेभ्यस्त्वेत्युदग्दण्ड्या प्राग्दण्ड्या वा स्रुवाऽ ऽचामति " इति च । अत्र यत्प्राशनं तत्पूर्वमेव द्विः प्राश्नातीति वाक्येन विहितम् ।

यत्त्वाचामतीत्युक्तं भक्षणं तदिदं विधत्ते-

उदङ्पर्यावृत्याऽऽचामति (७) । आत्मनो गोपीथाय, इति ।

हविः शेषसहितां स्रुचं गृहीत्वोदङ्मुखः किंचिद् दूरं गत्वा तत्रैव स्रुचा हविः शेषं मुखे प्रक्षिप्य भक्षयेत् । अनेन स्वस्य रक्षा भवति ।

यदुक्तं सूत्रकारेण-"अग्रेणाऽऽहवनीयं दर्भैरग्निहोत्रहवणीं प्रक्षालयति" इति । तदिदं विधत्ते-

निर्णेनेक्ति शुद्ध्यै, इति ।

यदुक्तं सूत्रकारेण "आहवनीये स्रुचं प्रताप्य हस्तोऽ वधेयो हस्तो वा प्रताप्य स्रुच्यवधेयस्त्वयोद् ङ्ङुद्दिशति सप्तर्षिभ्यस्त्वा सप्तर्षीञ्जिन्वेति" इति तदेतन्निष्टपनमुद्देशनं च क्रमेण विधत्ते-

निष्टपति स्वगाकृत्यै । उद्दिशति । सप्तर्षीनेव प्रीणाति, इति ।

निष्टपति नितरां तपनं स्वगाकृत्यै स्वर्गप्राप्त्यै भवति । स्रुचो हस्तस्य वा यत्प्रतपनं तेन हविः सर्वं स्वगतं करोति स्रुचा यदुद्देशनं तेन सप्तर्षीन्प्रीणाति ।

उद्देशनादूर्ध्वं प्रदक्षिणाकारेण पर्यावृत्तिं विधत्ते-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणा पर्यावर्तते । स्वमेव वीर्यमनुपर्यावर्तते । तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरः । अथो आदित्यस्यैवाऽऽवृतमनुपर्यावर्तते, इति ।

योऽयमुदङ्मुखः सप्तर्षीणामुद्देशं कृतवान्सोऽयं वामभागे पर्यावृत्तिं न कुर्यात् । किंतु दक्षिणाभागमुद्दिश्य पर्यावृत्तिं कुर्यात् । तथा सति दक्षिणभागे विद्यमानानां स्वशक्तिमनुपर्यावृत्तिं करोति । यस्मादेवं तस्मात्पुरुषम्य दक्षिणभागोऽतिशयेन शक्तिमान् । अपि चाऽऽदित्यो गोलोके प्रादक्षिण्येन वर्तते । अतस्तदीयामावृत्तिमन्वयं पर्यावृत्तो भवति ।

सूत्रकारेण-"दीदिहि दीदिदासि दीदायेत्येषोऽग्न्युपसमिन्धन आम्नातः" इति यस्मिन्समिन्धने मन्त्र उदाहृतस्तदिदं समिन्धनं विधत्ते-

हुत्वोपसमिन्धे (८) । ब्रह्मवर्चसस्य समिद्ध्यै, इति ।

सम्यक्प्रकाशनायेत्यर्थः ।

दर्शपूर्णमासादाविव बर्हिष्प्रहरणशङ्कां वारयितुं निषेधति-

न बर्हिरनुप्रहरेत् । असंस्थितो वा एष यज्ञः । यदग्निहोत्रम् । यदनुप्रहरेत् । यज्ञं विच्छिन्द्यात् । तस्मान्नानुप्रहृत्यम् । यज्ञस्य संतत्यै, इति ।

करिष्यमाणानां यज्ञानामग्न्याधारत्वात्तेषां चेदानीमप्यनुष्ठितत्वात्तस्य चाग्नेः सत्यग्निहोत्रेऽवस्थानात्सर्वयज्ञानुष्ठानमन्तरेणाग्निहोत्राख्यो यज्ञो न समाप्तः । तस्मात्समाप्तिद्योतकं बर्हिष्यहरणं न कुर्यात् । तस्मिन्कृते स यज्ञो विच्छिद्येत । तस्माद्यज्ञसंतत्यर्थं प्रहरणं न कर्तव्यम् ।

यदुक्तं सूत्रकारेण-"अग्निहोत्रस्थालीं प्रक्षाल्याक्षितमक्षित्यै जुहोमि स्वाहेत्युन्नयनदेशे निनयत्यन्तर्वेदि वा" इति । तदिदं विधत्ते-

द्वपो निनयति । अवभृयस्यैव । रूपमकः (९) ।

अभवन्भवति जुहुयान्नयति मार्ष्टि द्विप्राश्नाति प्राजापत्यमार्चामतीन्धेऽकः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
प्रथमाध्याये चतुर्थोऽनुवाकः ।। ४ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोमयाग इवावभृथस्य यत्स्वरूपं तदत्रापां निनयनेन करोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयकाण्डे
प्रथमप्रपाठके चतुर्थोऽनुवाकः ।। ४ ।।

अथ प्रथमप्रपाठके पञ्चमोऽनुवाकः ।

चतुर्थ उपयुक्तहविःसंस्कारा उक्ताः । पञ्चमे काम्यद्रव्याणामवशिष्टानामङ्गानि चोद्यन्ते । तत्राऽऽदौ तावत्प्रश्नोत्तराभ्यामग्निहोत्रहविःसंस्कारोपक्रमंनिश्चिनोति-

ब्रह्मवादिनो वदन्ति । अग्निहोत्रप्रायणा यज्ञाः । किं प्रायणमग्निहोत्रमिति । वत्सो वा अग्निहोत्रस्य प्रायणम् । अग्निहोत्रं यज्ञानाम्, इति ।

सर्वेषां यज्ञानां मध्येऽग्निहोत्रं प्रथमभावि । तथा च सूत्रकारेणोदाहृतम्- "अग्नीनाधाय हस्तावनिज्य संवत्सरमग्निहोत्रं हुत्वा द दर्शपूर्णमासावारभते । ताभ्यां संवत्सरमिष्ट्वा सोमेन पशुना वा यजते । तत ऊर्ध्वमन्यानि कर्माणि कुरुते" इति । यथा सर्वेषां यज्ञानामग्निहोत्रादित्वमेवमग्निहोत्रहवि संस्काराणामपि कश्चिदादिर्वक्तव्य इति ब्रह्मवादिनां प्रश्नः । शाखान्तरानुसारेण "पूषाऽसीति वत्समुपसृज्य" इति यत्सूत्रकारेणोक्तं सोऽयमग्निहोत्रहविः संस्कारस्याऽऽदिः । तच्चाग्निहोत्रमुत्तरक्रतूनामादिरित्युत्तरम् ।

यथा प्रतिमादिषु विष्ण्वादिबुद्धिः । यथा च श्राद्धे गोत्रान्तरोत्पन्ने ब्राह्मणे पितृपितामहादिबुद्धिः । एवमग्निहोत्रे सोमयागबुद्धिं प्रशंसार्थं भावनार्थं च संपादयति-

तस्य पृथिवी सदः । अन्तरिक्षमाग्नीध्रम् । द्यौर्हविर्धानम् । दिव्या आपः प्रोक्षणयः । ओषधयो बर्हिः (१) । वनस्पतय इध्मः । दिशः । परिधयः । आदित्यो यूपः । यजमानः पशुः । समुद्रोऽवभृथः । संवत्सरः स्वगाकारः । तस्मादाहिताग्नेः सर्वमेव बर्हिष्यं दत्तं भवति । यत्सायं जुहोति । रात्रिमेव तेन दक्षिण्यं कुरुते । यत्प्रातः (२) ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अह॑रे॒व तेन॑ दक्षि॒ण्यं॑ कुरुते । यत्तते॒ दद॑ाति । सा दक्षि॑णा, इति ।

सोमयागरुपेण भाव्यमानस्य तस्याग्निहोत्रस्य सदःप्रभृति सोमयागाङ्गवकल्पनीयम् । या पृथिवी सैव सदःस्थानीया । यदन्तरिक्षं तदाग्नीध्रीयधिष्ण्यस्थानीयम् । येयं द्यौः सा हविर्धानमण्डपस्थानीया । या वृष्टिजन्या दिव्या आपस्ताः प्रोक्षणार्थजलस्थानीयाः या व्रीह्याद्या ओषधयस्ता बर्हिः । एवं वनस्पत्यादिषु द्रष्टव्यम् । स्वगा स्वगतं तत्तद्देवतानां हविः करोतीति स्वर्गाकारः । बृहस्पतिपुत्रः शंयुः-"ते शंयुं बार्हस्पत्यमब्रुवन्निमं नो यज्ञँ स्वर्गाकुर्विति" इति श्रुत्यन्तरात् । यस्मादेवं सोमाङ्गानि सर्वाणि संपन्नानि तस्मादाहिताग्नेरग्निहोत्रिणो बर्हिष्यं सोमयागार्हं सर्वमेव कृत्स्नमप्यङ्गजातं दत्तं संपादितं भवति । तत्र हि केचिद्दक्षिणार्हा विद्यन्ते-"यावन्तो वै सदस्यास्ते सर्वे दक्षिण्याः" इति श्रुतत्वात् । अत्रापि सायं प्रातर्होमेन रात्रेरह्नश्च दक्षिणार्हत्वं संपादनीयम् । अयमग्निहोत्री बन्धुभ्योऽन्येभ्यो वा यत्किंचिद्ददाति तत्सर्वं दक्षिणास्थानीयम् । तदेवमग्निहोत्रं प्रशस्य सोमयागत्वभावनया तत्र कश्चिदतिशयः संप (पा) द्यते । यथा विष्णवादिदृष्ट्या शिलायामतिशयः । यथा वा श्राद्धे पितृपितामहादिदृष्ट्या दौहित्रस्य नमस्कार्यत्वं तद्वत् ।

प्रकारान्तरेणाग्निहोत्रं प्रशंसति-

याव॑न्तो॒ वै दे॒वा अहु॑त॒माद॑न् । ते परा॑भवन् । त ए॒तद॑ग्निहो॒त्रꣳ सर्व॑स्यै॒व स॑मव॒दाया॑जुहवुः । तस्मा॑दाहुः अ॒ग्नि॒हो॒त्रं वै दे॒वा गृ॒हाणा॒ं निष्कृ॑तिम पश्य॒न्निति॑ । यत्सा॒यं जु॒होति॑ । रात्रि॑या ए॒व तद्धु॒ताद्या॑य (३) । यज॑मान॒स्याप॑राभावाय । यत्प्रा॒तः । अह्न॑ ए॒व तद्धु॒ताद्या॑य । यज॑मान॒स्याप॑राभावाय । यत्तत॒ोऽऽश्नाति॑ । हु॒तमे॒व तत् इति ।

देवानां मध्ये केचिदग्निहोत्रं हुत्वा तच्छेषं भक्षितवन्तः । अपरे तु होममन्तरेणाऽऽहुतिशेषमेव भक्षितवन्तः । यावन्त एतादृशस्तावन्तः पराभूताः । ते च देवाः पुनर्विचार्य तदेतदग्निहोत्राख्यं हविः सर्वस्यैवाग्नेः सूर्यस्य चेत्युभयस्यार्थं सम्यगवदानं कृत्वा होममकार्षुस्तस्मादभिज्ञा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवमाहुः । अग्निहोत्रमेव स्वगृहाणां निष्कृतिं पुनःप्राप्त्युपायं निश्चितवन्त इति । अथ सायंहोमो रात्रौ हुतेशषभक्षणाय प्रातर्होमोऽहनि हुतेशषभक्षणाय । तेन च कालद्वयेऽपि यजमानस्य पराभवो न भवति । ततो होमादूर्ध्वं यदश्नाति तत्सर्वं हुतमेव भवति ।

यदुक्तं सूत्रकारेण-"द्वयोः पयसा पशुकामस्य जुहुयात् । अग्निहोत्रस्थाल्यां पूर्वां दोग्धि दोहनेनोत्तरामधिश्रित्य पूर्वमुत्तरमानयति" इति । तदेतद्विधत्ते-

द्वयोः पयसा जुहुयात्पशुकामस्य । एतद्वा अग्निहोत्रं मिथुनम् । य एवं वेद । प्र प्रजया पशुभिर्मिथुनैर्जायते (४) । इमामेव पूर्वया दुहे । अमूमुत्तरया । अधिश्रित्योत्तरमानयति । योनावेव तद्रेतः सिञ्चति प्रजनने, इति ।

गोद्वयक्षीरेण होमे सति द्वित्वादग्निहोत्रस्य मिथुनरूपत्वं तद्वेदितुर्मिथुनरूपाणां प्रजानां पशूनां चोत्पत्तिः । द्वयोर्गवोर्मध्ये पूर्वया गवा भूमिरेव दुग्धा भवति । उत्तरया गत्वा द्यौर्दुग्धा भवति । प्रथमगोक्षीरं बह्वावधिश्रित्य पश्चादुत्तरगोक्षीमानयेत् । तेन पूर्वक्षीरे क्षीरान्तरसेचने कृते प्रजोत्पत्तौ योनौ रेतः सिक्तं भवति ।

अथ काम्यानि चत्वारि द्रव्याणि क्रमेण विधत्ते-

आज्येन जुहुयात्तेजस्कामस्य । तेजो वा आज्यम् । तेजस्व्येव भवति । पयसा पशुकामस्य । एतद्वै पशूना रूपम् । रूपेणैवास्मै पशूनवरुन्धे (५) । पशुमानेव भवति । दध्नेन्द्रियकामसय् । इन्द्रियं वै दधि । इन्द्रियाव्येव भवति । यवाग्वा ग्रामकामस्यौषधा वै मनुष्याः । भागधेयेनैवास्मै सजातानवरुन्धे । ग्राम्येव भवति, इति ।

आज्यस्य स्निग्धत्वात्तेजत्वम् । यन्नित्यहोमद्रव्यं पयस्तदेव काम्यमाने पशुफलायापि कामुकम्य संपद्यते । न तु पयोन्तारं संपादनीयमिति दध्युदाहरणेन निर्णेष्यते । एकगोक्षीरेपरेण पशुमात्रं फलम् । गोद्वयक्षीरेण पशु बाहुल्यम् । कर्मभयस्त्वाफलभयस्त्वमिति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न्यायात् । क्षीरार्थमेव पशूनां संपाद्यत्वात्पयसः पशुस्वरूपत्वम् । दध्न इन्द्रियवृद्धिहेतुत्वादिन्द्रियत्वम् । मनुष्या औषधा ओषधिमद् द्रव्यभोजनः । अतो यवागूर्ग्रामेण सहोत्पन्नानां मनुष्याणामुचितं भागधेयम् ।

चतुरुन्नयनादिकमग्निहोत्रे यत्पूर्वमुक्तं तदत्र प्रशंसति-

अयज्ञो वा एषः योऽसामा (६) । चतुरुन्नयति । चतुरक्षर ँ रथंतरम् । रथंतरस्यैष वर्णः । उपरीव हरति । अन्तरिक्षं वामदेव्यम् । वामदेव्यस्यैष वर्णः । द्विर्जुहोति । द्व्यक्षरं बृहत् । बृहत् एष वर्णः । अग्निहोत्रमेव तत्सामन्वत्करोति (७), इति ।

अग्निष्टोमादीनां प्रसिद्धयज्ञानां सामयुक्तत्वात्सामरहित-स्याग्निहोत्रस्य यज्ञत्वं यदमुख्यमिति चेत् । मैवम् । उपचरितानां साम्नां संपादयितुं शक्यत्वात् । उन्नयने या चतुःसंख्या पूर्वं विहिता सा रथंतरनामाक्षरेषु विद्यते । तेन साम्येनोन्नयनव्यापारो रथंतरस्य स्वरूपभूतः । उपरीवोन्नीतस्य हविष आहवनीयदेशं प्रति भूस्पर्शमन्तरेणोपर्येव यद्धरण तस्य चान्तरिक्षवर्तित्वादन्तरिक्षद्वारा वामदेव्यसाम्नः स्वरूपत्वेनोपचरितुं शक्यम् । वामदेव्यसाम्नोऽन्तरि-क्षत्वेन श्रुतिरन्यत्र श्रूयते- "अन्तरिक्षं वै वामदेव्यम्" इति । त्वाहुतिविशेषगता द्वित्वसंख्या बृहदित्येतस्मिन्सामनाम्नि विद्यत इति बृहत्सामत्वोपचारः । तेनाग्निहोत्रं सामयुक्तेव करोति ।

यत्वेतद्धविषो भूमावुपसादनं तदेतज्ज्योतिष्टोपगतोपसदुपचारेण प्रशंसति-

यो वा अग्निहोत्रस्योपसदो वेद । उपैनमुपसदो नमन्ति । विदन्त उपसत्तारम् । उन्नीयोपसादयति । पृथिवीमेव प्रीणाति । होष्यन्नुपसादयति । अन्तरिक्षमेव प्रीणाति । हुत्वो पसादयति । दिवमेव प्रीणाति । एता वा अग्निहोत्रस्योपसदः (८)। एवं वेद । उपैनमुपसदो नमन्ति । विन्दत उपसत्तारम्, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निहोत्रसंबन्धिनीरुपचरिता उपसदो यो वेद सोऽ यमुपसत्तारं स्वसेवकं लभते । अत्र हविषस्त्रिवारमुपसादनं विधत्ते । उन्नयनानन्तरमभिमर्शनार्थं गार्हपत्यसमीपे प्रथममुपसादनम् । तत ऊर्ध्वमावहनीयमसीपे होमात्प्राक्पश्चाच्च द्विरूपसादनम् । तेन त्रयेण लोकत्रयप्रीतिः । एता एव त्रिविधा उपसादनक्रिया अग्निहोत्रसंबन्धिन्य उपचरिता उपसदः । उपपूर्वस्य सदिधात्वर्थस्य समानत्वात् । उपेनमिति पुनरुक्तिर्वेदनफलोपसंहारार्था ।

अथोपचरिताश्रं (श्रा) वणादिसंपादनेनाग्निहोत्रहोमं प्रशंसति –

यो वा अग्निहोत्रस्याऽऽश्रावितं प्रत्याश्रावित ँ होतारं ब्रह्माणं वषट्कारं वेद । तस्य त्वैव हुतम् । प्राणो वा अग्निहोत्रस्याऽऽश्रावितम् । अपानः प्रत्याश्रावितम् । मनो होता । चक्षुर्ब्रह्मा । निमेषो वषट् कारः (९) । य एवं वेद । तस्य त्वैव हुतम्, इति ।

यदुक्तं सूत्रकारेण–"समिधमाधाय प्राण्यापान्य निमील्य वीक्ष्य हुत्वाध्यायेद्यत्कामः स्यात्" इति । तत्र प्राणो वा अग्निहोत्रमि (स्ये) त्यारभ्य तस्य त्वेव हुतमित्येतत्पर्यन्तं प्राणादीनामाश्रावादिरूपेण जो जानाति तस्यैव होमो मुख्यो भवति ।

अथ गृहगतातिथितर्पणं विधत्ते–

सायंयावानश्व वै देवाः प्रातर्यावाणश्चाग्निहोत्रिणो गृहमागच्छन्ति । तान्यन्न तर्पयेत् । प्रजयाऽस्य पशुभिर्वितिष्ठेरन् । यत्तर्पयेत् । तृप्ता एनं प्रजया पशुभिस्तर्पयेयुः, इति ।

सायंकाले यान्त्यग्निहोत्रिणो गृहं गच्छन्तीति सायंयावानः । एवं प्रातर्यावाणः। ते तेषामुभयेषामतृप्तौ प्रजापशुधियोगः । तत्तृप्तौ प्रजादिसंपत्तिः । अतस्तर्पणाय समन्त्रकं हविः स्पर्शनं विधत्ते–

सजूर्देवैः सायंयावभिरिति साय ँ संमृशति । सजूर्देवैः प्रातर्यावभिरिति प्रातः । ते चैव देवाः सायंयावानो ये च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रातर्यावाणः (१०) । तानेवोभया स्तर्पयति । त एनं तृप्ताः प्रजया पशुभिस्तर्पयन्ति, इति ।

अतस्त उभये तृप्ताः सन्तो यजमानं प्रजापशुयुक्तं कुर्वन्ति । अतस्तर्पणाय मन्त्राभ्यां हविःस्पर्शनम् । हे हविः सायंयावभिर्देवैः सह तिष्ठेति मन्त्रार्थः । एवमितरत्रापि । पुनः फलोक्तिरुपसंहारार्था ।

अथाग्निहोत्रकर्मण्युन्नयनादिकं वज्रत्वकल्पनया प्रशंसति-

अरुणो ह स्माऽऽहौपवेशिः । अग्निहोत्र एवाह सायं प्रातर्वज्रं भ्रातृव्येभ्यः प्रहरामि । तस्मान्मत्पापीया सौ भ्रातृव्या इति । चतुरुन्नयति । द्विर्जुहोति । समित्सप्तमी । सप्तपदा शक्वरी । शाक्वरो वज्रः । अग्निहोत्र एव तत्सायं प्रातर्वज्रं यजमानो भ्रातृव्याय प्रहरति । भवत्यात्मना । पराऽस्य भ्रातृव्यो भवति (११), इति ।

बर्हिः प्रातर्हुताद्यंय जायते रुन्धेऽसामा करोत्येता वा अग्निहोत्रस्योपसदो वषटकारश्च प्रातर्यावाणो वज्रस्त्रीणि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके प्रथमाध्याये पञ्चमोऽनुवाकः ।। ५ ।।

अरुणो नाम कश्चिदषिः स चोपवेशस्य पुत्रः । कदाचित्सभामध्ये एवमुवाच । सायं प्रातश्च यदनुष्ठानं सोऽयं भ्रातृव्यभ्यां मदीयो वज्रप्रहारः । तस्मात्कारणाद् भ्रातृव्यो मत्तोऽप्यतिदरिद्र इति । कथं वज्र संपादनमिति तदुच्यते । उन्नयनहोमसमिद्गता या सप्तसंख्या सप्तभिः पादैरुपेता शक्वरी बुद्धिस्था वज्रश्च शाक्वरः । "वज्रो वै शाक्वरः" इत्यादिश्रुत्यन्तरप्रसिद्धेः । तस्मादीदृशाग्निहोत्रप्रयोगेण यजमानः स्वयं संपन्नो भवति । भ्रातृव्याः पराभवन्ति ।

अत्र मीमांसायां प्रथमाध्यायस्य चतुर्थपादे चिन्तितम्-

आदित्यो यूप इत्यत्र स्तुतिरादित्यशब्दतः ।
द्वारं चाक्षुषसारूप्यं घृताक्ते तैजसेऽस्ति तत् ।। [[*[Lइति] ।

आदित्ये यच्चक्षुर्गम्यं तेजस्वित्वं तद्यूपेऽप्यस्ति, घृताक्तस्य यूपस्य तेजस्वित्वावभासात् । तत आदित्यशब्देन यूपः स्तूयते । एवं "यजमानो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युपः'' इत्यत्र चक्षुर्गम्यस्योर्ध्वत्वस्य समानत्वाद्यजमानशब्देन यूपः स्तूयते ।

द्वितीयाध्यायस्य द्वितीयपादे चिन्तितम् –

दध्ना होमेऽन्यकर्मत्वं गुणो वाऽन्यत्तु पूर्ववत् ।

विगुणत्वादग्निहोत्रे युक्तो दध्यादिको गुणाः । [इति] ।

"दध्ना जुहोति'' इति श्रूयते । तत्र "अग्निहोत्रं जुहोति'' इत्येतस्मात्प्रकृतात्कर्मणोऽन्यदधिहोमरूपं कर्मेति पूर्वन्यायेनावगम्यते । यथा पूर्वत्र वाजिनद्रव्येण कर्म भिद्यते तथा दधिद्रव्येणेति चेन्न । वैषम्यात् । वैश्वदेवयाग आमिक्षागुणावरुद्धस्तथाऽग्निहोत्रं न गुणान्तरावरुद्धम् । प्रत्युत निर्गुणत्वाद्गुणमाकाङ्क्षति । तस्मादयं गुणविधिः । एवं "पयसा जुहोति'' इत्यादिषु द्रष्टव्यम् । पयोदध्यादीनां सर्वेषामुत्पन्नशिष्टतया समबलत्वादेकेनैव द्रव्येणाग्निहोत्रे निष्पन्ने व्रीहियववद्विकल्पः ।

तत्रैवान्यच्चिन्तितम् –

यद्दध्नेन्द्रियकामस्य जुहुयादिति तत्पृथक् ।

गुणो वा भिद्यते कर्म धात्वर्थस्य फलित्वतः ।।

मत्वर्थगौरवादिभ्यो नान्यत्कर्म फलाय तु ।

गुणो विधेयो धात्वर्थो विहितत्वानूद्यते ।। [इति] ।

"दध्नेन्द्रियकामस्य जुहुयात्'' इति श्रूयते । तदिदं प्रकृतादग्निहोत्रादन्यत्कर्म न त्वत्र गुणविधिः । कुतः । इन्द्रियकामस्येत्युक्तस्य फलस्य धात्वर्थमन्तरेण द्रव्यमात्रादनिष्पत्तेरिति चेत् । मैवम् । कर्मान्तरविधौ दधिमता होमेनेन्द्रियं भावयेदिति मत्वर्थलक्षणाप्रसङ्गाद् गुणविशिष्टक्रियाविधौ गौरवात्प्रकृतहाना प्रकृतिप्रक्रियाप्रसङ्गाच्च । गुणमात्रं तु फलाय विधीयते । यद्यपि "दध्ना जुहोति'' इति दधि प्राप्तं तथाऽपि फलसंबन्धो न प्राप्तः । धात्वर्थाभावे फलासंभव इति चेन्न । "अग्निहोत्रं जुहोति''इति विहितस्य प्रकृतस्य धात्वर्थस्येहानूद्यमानत्वात् ।

चतुर्थाध्यायस्य तृतीयतपादे चिन्तितम् –

दध्ना त्विन्द्रियकामस्य नित्येऽन्यदुत तद्दधि ।

अन्यत्स्यात्पूर्ववन्नैवं संयोगस्य पृथक्त्वतः । [इति] ।

अग्निहोत्रे श्रूयते "दध्नेन्द्रियकामस्य जुहुयात्'' इति । तत्र दध्नः काम्यत्वं नित्येऽग्निहोत्रे पूर्वन्यायेन तद्दधि न प्रयोक्तव्यम् । किंत्वन्यदेव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

किंचिद्द्रव्यमिति चेत् । मैवम् । दध्ना जुहोतीत्यस्मिन्वाक्यान्तरे कामसंयोगमनुपन्यस्य नित्यहोमसंयोगेन दधिविधानात् । तस्मादेकस्यापि दध्नो वाक्यद्वयेन नित्यत्वं काम्यत्वं चाविरुद्धम् । एवमग्नीषोमीयपशौ "खादिरे बध्नाति" "खादिरं वीर्यकामस्य यूपं कुर्वीत" इत्याद्युदाहरणीयम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये
प्रथमपाठके पञ्चमोऽनुवाकः ॥५॥

अथ प्रथमप्रपाठके षष्ठोऽनुवाकः ।

पञ्चमे काम्यानि होमद्रव्याण्युक्तानि । षष्ठेऽभ्युद्रवणं होमाभावप्रतीकारश्चेत्युभयमभिधीयते । तत्राभ्युद्रवणं विधातुमादावुपाख्यानेनाग्निहोत्ररूपया गोत्पत्तिं दर्शयति-

प्रजापतिरकामयताऽऽत्मन्वन्मे जायेतेति । सोऽजुहोत् । तस्यात्मन्वदजायत । अग्निर्वायुरादित्यः । तेऽब्रुवन् । प्रजापतिरहौषीदात्मन्वन्मे जायेतेति । तस्य वयमजनिष्महि । जायतां न आत्मन्वदिति तेऽजुहवुः । प्राणानामग्निः । तनुवै वायुः (१) । चक्षुष आदित्यः । तेषा हुतादजायत गौरेव, इति ।

पुरा कदाचित्प्रजापतिरचेतनं गिरिनगरादिकमुत्पाद्याऽऽत्मन्वज्जीवात्मयुक्तं चेतनं वस्तुजातमग्नावुत्पद्यतामिति कामयित्वा तत्साधनहोमं कृतवान् । तेन होमेनाग्निवाय्वावादित्यरूपं चेतनमाजयत । तेऽप्यग्न्यादयः परस्परं विचार्य प्रजापतेर्होमाद्यथा वयमुत्पन्नास्तथाऽस्माकमपि चेतनं जायतामिति विचार्य होमं चक्रुः । तत्राग्निः प्राणेभ्यः स्वाहेत्येवं प्राणानामर्थे हुतवान् । तथा वायुस्तन्वर्थ आदित्यश्चक्षुरर्थे । तेषां त्रयाणां होमादूर्ध्वमेका गौरेवाजायत ।

अथ तस्या गोरग्निहोत्रशब्दाभिधेयत्वं संपाद्य प्रशंसां दर्शयति-

तस्यै पयसि व्यायच्छन्त । मम हुतादजनि ममेति । ते प्रजापतिं प्रश्नमायन् । स आदित्योऽग्निमब्रवीत् । यतरो नौ जयात् । तन्नौ सहासदिति । कस्यै कोऽहौषीदिति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिरब्रवीत्कस्यै क इति । प्राणानामहमित्यग्निः (२) । तनुवा अहमिति वायुः । चक्षुषोऽहमित्यादित्यः । य एव प्राणानामहौषीत् । तस्य हुतादजनीति । अग्नेर्हुतादजनीति । तदग्निहोत्रस्याग्निहोत्रत्वम् । गौर्वा अग्निहोत्रम् । य एवं वेद गौरग्निहोत्रमिति । प्राणापानाभ्यामेवाग्नि ँ समर्धयति । अभ्यर्धुकः प्राणापानाभ्यां भवति (३) । य एवं वेद, इति ।

त्रयाणां होमाद्येयं गौरुत्पन्ना तस्याः पयसि कलहरूपं विरोधं त्रयोऽप्याचरन् । तदीयं वचनं प्रदर्श्यते । मम होमादियं गौरजनीत्यग्निः । एवं वायुरादित्योऽपि अतो वाक्यवीप्साद्योतनाय पुनर्ममेति शब्दः। ततस्ते सर्वे तन्निर्णयार्थं प्रजापतिं प्रतिप्रश्नं कर्तुमागच्छन् । आगमनकाले स आदित्योऽग्निं प्रत्येवं समयं कृतवान् । आवयोर्मध्ये यतरस्य जयो भवत्यन्यतरस्य तद्वस्तु नौ सहाऽऽवयोर्भवत्विति । ततस्तैः पृष्टःप्रजापतिस्तेषां होमप्रकारं पप्रच्छ । युष्माकं मध्ये कः कस्यै देवतायै हुतवानिति । बहून्प्रतिप्रश्नद्योतनाय वीप्सार्थं द्विरुक्तिः । तत्राग्निः प्राणानामर्थेऽहं हुतवानित्युवाच । वायुः शरीरार्थमुक्तवान् । आदित्यश्चक्षुरर्थमुक्तवान् । तदा प्रजापतिः शरीरचक्षुषोः प्राणाधीनत्वेन प्राणानां मुख्यत्वात्तद्विषयहोमाग्द्रौरुत्पन्नेत्युवाच । अग्निसंबन्धाद्धोमादुत्पन्नेति व्युत्पत्त्याऽग्निहोत्रमिति गोर्नाम संपन्नम् । गौरग्निहोत्रं यो जानाति सोऽग्निः (ग्निं) प्राणापानाभ्यामेव समृद्धं करोति । य एवं वेद सोऽ यमायुषः पुरा केनाप्यपमृत्युना प्राणापानाभ्यां वियुक्तो न भवति ।

अथाभ्युदद्रवणं विधत्ते-

तौ वायुरब्रवीत् । अनु मा भजतमिति । यदेव गार्हपत्येऽधिश्रित्याऽऽहवनीयमभ्युदद्रवान् । तेन त्वां प्रीणानित्यब्रूताम् । तस्माद्यद्गार्हपत्येऽधिश्रित्याऽऽहवनीयमभ्युदद्रवति । वायुमेव तेन प्रीणाति, इति ।

तावग्निसूर्यौ प्रति वायुः प्रार्थितवान् । युवामुभावनु पयस्यस्मिन्मामपि भागिनं कुरुतमिति । ततस्तावेवमब्रूतामिदं पयः पाकार्थं गार्हपत्येऽधिश्रित्य पश्चादाहवनीयमभिलक्ष्योदद्रवानुद

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्रवन्त्ययूर्ध्वं नयन्तीति । यत्तेन व्यापारेण त्वां प्रीणनाग्निहोत्रिणः प्रीणयन्त्वति । यस्मादेवं तस्माद्गार्हपत्याधिश्रयणादूर्ध्व माहवनीयमभिलक्ष्य तत्पय उदद्रवेत् । तेन वायुः प्रीतो भवति । तदेतत्सूत्रकारेणोक्तम्-"वाताय त्वेत्युद्गृह्णाति" इति ।

अथ होमाभावप्रतीकारं दर्शयितुं प्रस्तौति-

प्रजापतिर्देवताः सृजमानः । अग्निमेव देवतानां प्रथममसृजत । सोऽन्यदालभ्यमवित्वा (४) । प्रजापतिमभिपर्यावर्तत । स मृत्योरबिभेत् । सोऽमुमादित्यमात्मनो निरमिमीत । तꣳ हुत्वा पराङ् पर्यावर्तत । ततो वै स मृत्युमपाजयत् । अपमृत्युं जयति । य एवं वेद, इति ।

पुरा प्रजापतिर्देवताः सर्वाः सिसृक्षुः प्रथममग्निमेवासृतः । सोऽग्निर्देवतान्तरस्यानुत्पन्नत्वात्स्वार्थमालम्भनीयं पशुस्थानीयं चेतनमन्यत्किंचिदप्यलब्ध्वा प्रजापतिमेवाऽऽलब्धुमभिलक्ष्य तत्समीपं पर्यावृत्तः । स च प्रजापतिर्मृत्योर्भीतः सन्नात्मनः सकाशादादित्यं निर्माय तमादित्यमग्नौ हुत्वा स्वयं पराङ्मुखो जगाम । तेनापमृत्युं जितवानेवमन्यस्याप्येवंविदोऽपमृत्युजयो भवति ।

अथ होमाभावप्रतीकारं दर्शयति-

तस्माद्यस्यैवं विदुषः । उतैकाहमुत द्व्यहं न जुह्वति । हुतमेवास्य भवति । असौ ह्यादित्योऽग्निहोत्रम् (५), इति ।

तनुवै वायुरग्निर्भवत्यवित्त्वा भवत्येकं च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके प्रथमाध्याये षष्ठोऽनुवाकः ॥ ६ ॥

आदित्यो होमद्रव्यमित्येवं विदित्वा यो ध्यायति तस्यैवं विदुषा यद्यप्येकाहं द्व्यहं या केनापि निमित्तेन प्रतिबद्धाः सन्तोऽग्निहोत्रं तदीयाः केऽपि न जुह्वति तथाऽपि तस्याग्निहोत्रिणो ध्यानशीलस्य तदेवाग्निहोत्रं भवति । यस्मादादित्यो होमद्रव्यं सर्वदा वर्तते यजमानोऽप्याहुतित्वेन ध्यायति तस्मादहोमप्रयुक्तः प्रत्यावायो नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीये ब्राह्मणभाष्ये द्वितीयकाण्डे
प्रथमप्रपाठके षष्ठोऽनुवाकः ।। ६ ।।

अथ प्रथमप्रपाठके सप्तमोऽनुवाकः ।

षष्ठे होमाभावप्रतीकारोऽभिहितः। सप्तमे होतव्यस्य हविषोऽवस्थाभेदेन सर्वदेवताप्रियत्वं प्रशंसार्थमनुसंधानार्थं च दर्शयति-

रौद्रं गवि । वायव्यमुपसृष्टम् । आश्विनं दुह्यमानम् । सौम्यं दुग्धम् । वारुणमधिश्रितम् । वैश्वदेवाभिन्दवः । पौष्णमुदन्तम् । सारस्वतं विष्यन्दमानम् । मैत्र ँ शरः । धातुरुद्वासितम् । बृहस्पते रुन्नीतम् । सवितुः प्रक्रान्तम् । द्यावापृथिव्य ँ ह्रियमाणम् । ऐन्द्राग्नमुपसन्नम् । अग्नेः पूर्वाऽऽहुतिः । प्रजापतेरुत्तरा । ऐन्द्र ँ हुतम् (१), इति ।

उद्वासित ँ सप्त च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
प्रथमाध्याये सप्तमोऽनुवाकः ।। ७ ।।

पयो यदा गवि तिष्ठति तदा रुद्रस्य प्रियम्। वत्सेनोपसृष्टं चोष्यमाणं वायोः प्रियम्। दोहनमापन्नमश्विनोः प्रियम्। दोहादूर्ध्वं सोमस्य प्रियम्। वह्नावधिश्रितं वरुणस्य प्रियम्। दर्व्या क्षोभ्यमाणस्य पयसो ये बिन्दवस्ते विश्वेषां देवानां प्रियाः । तापाधिक्येन पात्रस्यान्तपर्यन्तं यदुद्गमनं तत्पूष्णः प्रियम् । उत्सिक्तस्य पात्रगतप्रदेशेषु सर्वेषु विविधं स्यन्दनं प्रसरणं यत्तत्सरस्वत्याः प्रियम् । क्षीरमध्ये घनीभूत यच्छरः सार तन्मित्रस्य प्रियम्। पाकादूर्ध्वमुद्वासितं धातुः प्रियम्। स्रुच्युन्नीतं बृहस्पतेः प्रियम्। आहवनीयसमीपे गन्तुं यत्प्रक्रान्तं तत्सवितुः प्रियम्। तत्र ह्रियमाणं द्यावापृथिव्योः प्रियम् । नीत्वा तत्समीप उपसन्नमिन्द्राग्न्योः प्रियम् । प्रथमाहुतिरग्नेः प्रिया । द्वितीयाहुतिः प्रजापतेः प्रिया । होमादूर्ध्वमिन्द्रस्य प्रियम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये
प्रथमप्रपाठके सप्तमोऽनुवाकः ।। ७ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ प्रथमप्रपाठकेऽष्टमोऽनुवाकः ।

सप्तमे हविषः सर्वदेवतासबंन्धेन प्रशंसा कृता । अष्टमे दोहनप्रकारोऽभिधीयते । तत्राऽऽदौ गोसमीपे वत्सप्रेरणं विधत्ते-

दक्षिणत उपसृजति । पितृलोकमेव तेन जयति, इति ।

अग्निहोत्र्या धेनोर्दक्षिणपार्श्वे यथा वत्सं संबध्नाति तथा तं वत्समुपसृजेत् । तेन पितृलोकस्य जयो भवति ।

धेनोः प्राङ्मुखतामपि विकल्पेन विधत्ते-

प्राचीनमावर्तयति । देवलोकमेव तेन जयति । उदीचीमावृत्य दोग्धि । मनुष्यलोकमेव तेन जयति, इति ।

देवलोकमनुष्यलोकयोः प्रागुदग्वर्तित्वेन तज्जयोऽनेकेष्वर्थवादेषु प्रसिद्धः । तथा च शाखाहरणे श्रूयते-" यत्प्राचीमाहरेत् । देवलोकमभिजयेत् । यदुदीचीं मनुष्यलोकम्" इति ।

अधिकारिभेदेन दोहनीयस्तनस्य चोस्यां विधत्ते-

पूर्वौ दुह्याज्ज्येष्ठस्य ज्यैष्ठिनेयस्य । यो वाऽऽगतश्रीः स्यात् । अपरौ दुह्यात्कनिष्ठस्य कानिष्ठिनेयस्य । यो वा बुभूषेत् (१), इति ।

ज्येष्ठभार्यायाः पुत्रो ज्यैष्ठिनेयः । स्वयं च भ्रातृणां मध्ये ज्येष्ठः । तादृशस्य होमार्थं धेनुसंबन्धिपूर्वदिग्वर्तिनौ स्तनौ दुह्यात् । यस्तु प्राप्तश्रीः शुश्रुवान्ग्रामणी राजन्यो वा तस्यापि पूर्वौ दुह्यात् । कनिष्ठभार्यायाः पुत्रः कानिष्ठिनेयः । स्वयं भ्रातृणां मध्ये कनिष्ठस्तादृशस्य पश्चिमदिग्वर्तिनौ स्तनौ दुह्यात् । यो भवितुमितः परं श्रेयः प्राप्तुमिच्छति तस्याप्यपरौ दुह्यात् ।

लोके दोहनात्पूर्वं वत्सचोषणादूर्ध्वमतिप्रस्त्रवणायाङ्गुलीभिः स्तनान्मर्दयन्ति । तदत्र निषेधति-

न संमृशति । पापवस्यस्य व्यावृत्त्यै, इति ।

स्तनोपद्रवेण प्राप्तं पापवस्यसं पापयुक्तं वस्तु तद् व्यावृत्यर्थं स्तनोपमर्दाभावः ।

पूर्वोक्तं सर्वदेवतासंबन्धमनुक्तैः कैश्चिद्विशेषैः सहानूद्य तेन हविषाऽग्निहोत्रहोमप्रयोगं विधत्ते-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वायव्यं वा एतदुपसृष्टम् । आश्विनं दुह्यमानम् । मैत्रं दुग्धम् । अर्यम्ण उद्वास्यमानम् । त्वाष्ट्रमुन्नीयमानम् । बृहस्पतेरुन्नीतम् । सवितुः प्रक्रान्तम् । द्यावापृथिव्य ँ ह्रियमाणम् (२) । ऐन्द्राग्नमुपसादितम् । सर्वाभ्यो वा एष देवताभ्यो जुहोति । योऽग्निहोत्रं जुहोति, इति ।

उक्तरीत्या हविषः सर्वदेवताप्रियत्वात्तादृशं हविर्जुहुयात्तेन सर्वाभ्यो देवताभ्यो हुतं भवति ।

तमेव होमं तद्वेदनबहुविधफलप्रदर्शनेन प्रशंसति–

यथा खलु वै धेनुं तीर्थे तर्पयति । एवमग्निहोत्री यजमानं तर्पयति । तृप्यति प्रजया पशुभिः । प्र सुवर्गं लोकं जानाति । पश्यति पुत्रम् । पश्यति पौत्रम् । प्र प्रजया पशुभिर्मिथुनैर्जायते । यस्यैवं विदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद (३), इति ।

बुभूषेद् ध्रियमाणं जायते द्वे च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
प्रथमाध्यायेऽष्टमोऽनुवाकः ।। ८ ।।

लोके क्षीरप्रदां धेनुं विविधघासादिप्रदानेन तीर्थे स्वीयभोगस्थाने तर्पयति प्रीणयति । एवमियमग्निहोत्री धेनुर्होमद्रव्यं बहुक्षीरं प्रयच्छन्ती साङ्गकर्मसंपादनद्वारा यजमानं तर्पयति । अथवा धेनुमग्निहोत्रीं तीर्थेऽग्निहोत्राख्ये कर्मणि यजमानो यथा तर्पयति तथेयमग्निहोत्री कर्मफलेन यजमानं तर्पयति । स च यजमानः प्रजया पशुभिश्च तृप्तो देहपातादूर्ध्वं स्वर्गं प्रजानाति । ततः पूर्वं दीर्घायुष्येण युक्तः पुत्रं पौत्रं च पश्यति । एवमग्निहोत्रीमहिमानं जानतो यस्य यजमानस्याग्निहोत्रमध्वर्युः । पुत्रादयो वा जुह्वति यश्च केवलमुक्तवृत्तान्तं जानाति तावुभावपि मिथुनरूपैः पुत्रादिभिश्च समृद्धौ भवतः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
प्रथमप्रपाठकेऽष्टमोऽनुवाकः ।। ८ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ प्रथमप्रपाठके नवमोऽनुवाकः ।

अष्टमेऽग्निहोत्रविधिरुक्तः । नवमे तदीयमन्त्राः उच्यन्ते । यद्यपि द्वितीयानुवाके संसृष्टमन्त्रावुक्तौ तथाऽप्यसंसृष्टहोम एव तत्रोक्तो न तु तन्मंत्रौ । तस्मात्तौ मन्त्रावत्र विधत्ते-

त्रयो वै प्रैयमेधा आसन् । तेषां त्रिरेकोऽग्निहोत्रमजुहोत् । द्विरेकः । सकृदेकः । तेषां यस्त्रिरजुहोत् । स ऋचाऽजुहोत् । यो द्विः । स यजुषा । यः सकृत् । स तूष्णीम् (१) यश्च यजुषाऽजुहोद्यश्च तूष्णीम् । तावुभावार्ध्नुताम् । तस्माद्यजुषाऽऽहुतिः । पूर्वा होतव्या । तूष्णीमुत्तरा । उभे एवर्द्धी अवरुन्धे । अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति । रेत एव तद्दधाति । सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहे ति प्रातः । रेत एव हितं प्रजनयति, इति ।

मेधा श्रुतग्रन्थतदर्थयोर्धारणाशक्तिः । प्रिया मेधा यस्यासौ प्रियमेधःकश्चिद्दृषिस्तस्य पुत्राः प्रैयमेधाः । तेषां त्रयाणां मध्ये ज्येष्ठः प्रतिदिनं त्रिवारमग्निहोत्रमृचा हुत्वाऽपि समृद्धिं न प्राप । द्वितीयो यजुषा द्विरजुहोत् । तृतीयस्तूष्णीं सकृदजुहोत् । तत्र यो यजुषाऽजुहोत् । यश्च तूष्णीं तावुभावृद्धिं प्राप्नुताम् । तस्मादन्येनापि प्रथमाहुतिरग्निर्ज्योतिरित्यादिना यजुषा होतव्या । द्वितीया तूष्णीं होतव्या । तथा सति समृद्धिं प्राप्नोति । मन्त्रस्य चायमर्थः । अग्निरङ्गारात्मकः । ज्योतिः प्रभाद्रव्यम् । योऽग्निरङ्गारात्मकः स एव प्रभाद्रव्यरूपः । यच्च प्रभाद्रव्यं तदेवाङ्गारात्मकम् । तयोरविनाभावस्य दृष्टत्वात् । तदेतत्स्वकीयावागाह । अनेन मन्त्रेण सायं हुते सति रेतोधारणं भवति । एवं सूर्यमण्डलं तत्प्रभयोरविनाभावो द्वितीयमन्त्र उच्यते । तेन प्रातर्होमे सत्याहितं रेतः प्रजोत्पत्तिं करोति । द्वितीयस्मिन्नुवाक उदितानुदितहोमपक्षौ विहितौ । तयोः प्रक्रमानुसारेण व्यवस्था । द्रष्टव्या । "प्रक्रमे वायाकामी प्रक्रमात्तु नियम्यते" इति सूत्रकारेणोक्तन्यायात् ।

एवं सति योऽनुदितहोमं प्रकम्यानुतिष्ठति तस्य प्रमादाद्यदा होमात्प्रागेव सूर्योऽभ्युदियात् । तदानीं प्रायश्चित्तं विधत्ते-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रेतो वा एतस्यं हितं न प्रजायते (२)। यस्याग्निहोत्रमहुतं सूर्योऽभ्युदेति। यद्यन्ते स्यात्। उन्नीय प्राङुदाद्रवेत्। स उपसाद्याऽऽतमितोरासीत। स यदाऽऽताम्यैत्। अथ भूः स्वाहेति जुहुयात्। प्रजापतिर्वै भूतः। तमेवोपासरत्। स एवैनं तत उन्नयति। नार्तिमार्च्छति यजमानः (३), इति।

तूष्णीं जायते यजमानः।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके प्रथमाध्याये नवमोऽनुवाकः ॥ ९ ॥

अनुदितहोमं प्रक्रम्यानुतिष्ठतो यस्य यजमानस्याग्निहोत्रमहुतमेवाभिलक्ष्य सूर्य उदेत्येतस्य गर्भाशये निषिक्तमपि रेतो न प्रजामुत्पादयति। तदानीं यदि यजमानोऽन्ते स्याद् ग्रामान्तरमगत्वा समीपे तिष्ठेत्तदानीं स्वयमेव हविरुन्नीय प्राङ्मुखमाहवनीयं हविरुपसाद्य स्वयं श्रमपर्यन्तं निरुद्धश्वासस्तिष्ठेत्। यदा श्रान्तो भवति तदा निरोधं परित्यज्य "भूः स्वाहा" इति मन्त्रेण जुहुयात्। प्रजापतिर्भूतो नित्यसिद्ध इति तन्मन्त्रगतस्य भूशब्दस्यार्थः। अतस्तेन मन्त्रेण तमेव प्रजापतिं प्राप्तवान्भवति। स एव प्रजापतिरेनं यजमानं ततः कालापराधदोषादुद्धृत्य सगुणं कर्म प्रापयति। यजमानो विनाशं न प्राप्नोति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

अथ प्रथमप्रपाठके दशमोऽनुवाकः।

असंसृष्टहोममन्त्रौ नवमेऽभिहितौ। दशमे वह्नेरवस्थाविशेषानुसारेण होमो विधीयते। तत्र प्रथमामवस्थां दर्शयति --

यदग्निमुद्धरति। वसवस्तर्ह्यग्निः। तस्मिन्यस्य तथाविधे जुह्वति। वसुष्वेव वास्याग्निहोत्रꣳ हुतं भवति, इति।

यदा यजमानो गार्हपत्यादाहवनीयेऽग्निमुद्धृत्य प्रतिष्ठापयति तदानीमुद्धरणावस्थायाऽग्निरूपेण वर्तन्ते। यस्य यजमानस्य तथाविधे तस्मिन्नग्नावृत्विजो जुह्वति तस्य यजमानस्य तदग्निहोत्रं वसुष्वेव हुतं भवति। तेन वसवः प्रीयन्त इत्यर्थः। एवमुत्तरत्रापि योज्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ द्वितीयावस्थामाह-

निर्हितो धूपायञ्छेते । रुद्रास्तर्ह्यग्निः । तस्मिन्यस्य तथाविधे जुहोति । रुद्रेष्वेवास्याग्निहोत्रँ हुतं भवति, इति ।

आवहनीये निहितोऽग्निर्धूपायन्निर्गच्छता धूमेन युक्तो यदाऽतिष्ठते तदानीमयं रुद्रस्वरूपः ।

अथ तृतीयावस्थामाह-

प्रथममिध्यमर्चिरालभते । आदित्यास्तर्ह्यग्निः (१) । तस्मिन्यस्य तथाविधे जुहोति । आदित्येष्वेवास्याग्निहोत्रँ हुतं भवत, इति ।

अर्चिर्ज्वाला । सा यदेध्मकाष्ठं प्रथमं स्पृशति तदा सोऽग्निरादित्यरूपः अथ चतुर्थीमवस्थामाह-

सर्व एव सर्वश इध्म आदीप्तो भवति । विश्वे देवतास्तर्ह्यग्निः । तस्मिन्यस्य तथाविधे जुहोति । विश्वेष्वेवास्य देवेष्वग्निहोत्रँ हुतं भवति, इति ।

सर्वोऽपि काष्ठसमूहः सर्वेषु प्रदेशेषु यस्मिन्काल आदीप्तो भवति तदा विश्वे देवा अग्निस्वरूपाः । अथ पञ्चमीमवस्थामाह-

नितरामर्चिरुपावैति लोहिनीकेव भवति । इन्द्रस्तर्ह्यग्निः । तस्मिन्यस्य तथाविधे जुहोति । इन्द्र एवास्याग्निहोत्रँ हुतं भवति (२), इति ।

आर्चिर्ज्वाला सर्वाणि काष्ठानि यदा नितरामुपाप्नोति तेषु च काष्ठेषु लौहित्यमिव भवति तदानीमिन्द्रस्वरूपोऽग्निः।

अथ षष्ठीमवस्थामाह-

अङ्गारा भवन्ति । तेभ्योऽङ्गारेभ्योऽर्चिरुदैति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिस्तर्ह्यग्निः । तस्मिन्यस्य तथाविधे जुह्वति । प्रजापतावेवास्याग्निहोत्रँ हुतं भवति, इति ।

प्रौढज्वालासु शान्तासु काष्ठान्यङ्गारा भवन्ति । तेभ्यश्चाङ्गारेभ्य ईषदेवार्चिरुदेति । तदा प्रजापतिरूपोऽयमग्निः ।

अथ सप्तमीमवस्थामाह-

शरोऽङ्गारा अध्यूहन्ते । ब्रह्म तर्ह्यग्निः तस्मिन्यस्य तथाविधे जुह्वति । ब्रह्मन्नेवा स्याग्निहोत्रँ हुतं भवति, इति ।

शरशब्देन क्षीरसारभूतं मण्डम् । अङ्गारशब्देन चाञ्चल्यमात्ररूपेणावभासमानो ज्वालालेशोऽभिधीयते । तादृशाः शरोऽङ्गारा यदाऽध्यूहन्त उपरि धावन्ति तदा परब्रह्मरूपोऽयमग्निः ।

इदानीमेवंविश्नभूर्यकानुष्ठानस्य तथाविधध्यानस्य च प्रशंसां दर्शयति –

वसुषु रुद्रेष्वादित्येषु विश्वेषु देवेषु । इन्द्रे प्रजापतौ ब्रह्मन् । अमरिवर्गमेवास्यैतासु देवतासु हुतं भवति । यस्यैवंविदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद, इति ।

आदित्यास्तर्ह्यग्निरिन्द्र एवास्याग्निहोत्रँ हुतं भवति देवेषु चत्वारि च । यदग्नि निहितः प्रथमँ सर्व एव नितरामङ्गाराः शरोऽङ्गारा वसुषु सप्त ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

प्रथमाध्याये दशमोऽनुवाकः ।। १० ।।

यस्य ज्ञानपूर्वको होमो यस्य च ध्यानं तथोरुभयोरप्यपरिवर्गयेकमपि दिनमवर्जयित्वा वस्वादिषु ब्रह्मान्तेषु देवेषु हुतं भवति । अ इत्यादय । परिवर्गः परिवारः । इदं क्रियाविशेषणम् । एतासु पूर्वोक्तासु देवतास्वस्य यजमानस्याऽऽहुतं भवत्येव । अन्यत्स्पष्टम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

प्रथमपाठके दशमोऽनुवाकः ।। १० ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ प्रथमप्रपाठक एकादशोऽनुवाकः ।

दशमे वह्नेरवस्थाविशेषं होमप्राशस्त्यं दर्शितम् । एकादशे कालभेदेन परिषेचनं समन्त्रकं विधत्ते-

ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चति । सत्यं त्वर्तेन परिषिञ्चामीति प्रातः । अग्निर्वा ऋतम् । असावादित्यः सत्यम् । अग्निमेव तदाऽऽदित्येन सायं परिषिञ्चति । अग्निनाऽऽदित्यं प्रातः सः । यावदहोरात्रे भवतः । तावदस्य लोकस्य । नार्तिर्न रिष्टिः । नान्तो न पर्यन्तोऽस्ति । यस्यैवंविदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद (१), इति ।

अस्ति द्वे च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
प्रथमाध्याये एकादशोऽनुवाकः ।। ११ ।।

अङ्गिरसः प्रजापतिरग्नि ँ रुद्र उत्तरावतीं ब्रह्मवादिनोऽग्निहोत्रप्रायणा यज्ञाः प्रजापतिरकामयताऽऽ त्मन्वद्रौद्रं गवि दक्षिणतस्त्रयो वै यदग्निमृतं त्वा सत्वे नैकादश ।। ११ ।।

अङ्गिरसः प्रैव तेन पशूनेव यन्निमार्ष्टि यो वा अग्निहोत्रस्योपसदो दां णतः षष्टिः ।। ६० ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे
द्वितीयाष्टके प्रथमोऽध्यायः ।। १ ।।

ऋतशब्देन मानससत्यवाचिनाऽग्निरत्र विवक्षितः । सत्यशब्देन वाचिक सत्यवाचिनाऽऽदित्योऽत्र विवक्षितः । तथा सति ऋतमग्नि स्वामादित्येन परितः सिञ्चामीति सायंकालीमन्त्रस्यार्थः । सत्यमादित्यं त्वामृतेनाग्निना परितःसिञ्चामीति प्रातः कालीनमन्त्रस्यार्थः । एवंविज्ञानपूर्वकानुष्ठाने तथा विधज्ञाने च पावन्तं कालमहोरात्रे उभे सुस्थिते वर्तेते तावन्तं कालमहोरात्रे उभे सुस्थिते वर्तेते तावनतं कालमेतदीयपुत्रपात्रादिपरम्परायामग्निहोत्रानुष्ठानोपयुक्तस्यास्य विघ्न-कारिणी कालार्तिर्न भवति । नापि सर्वात्मना नाशो भवति । तथा योग्यवस्तूनां कदाऽ प्यन्तपर्यन्तौ न स्तः । अन्तः प्रतिबन्धः । पर्यन्तः सर्वात्मना नाशः । तस्मादेतत्प्रशस्तमग्निहोत्रमनुष्ठेयमिति प्रपाठकस्य तात्पर्यार्थः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ प्रपाठकस्यानुवाकार्थः संगृह्यते-

उपोद्घातोऽग्निहोत्रं च संस्काराः प्राक्तनास्तथा ।
उदीच्या अपि संस्काराः काम्यद्रव्यविधिस्तथा ।।
अहोमस्य प्रतीकारो दोहनीयहविःस्तुतिः ।
दोहोऽसंसृष्टहोमश्च वह्न्यवस्थाप्रसंशनम् ।।
दोहोऽसंसृष्टहोमञ्च वह्न्यवस्थाप्रसंसनम् ।।
परिषेचनमित्येवं प्रपाठक उदीरितः ।।
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
प्रथमप्रपाठक एकादशोऽनुवाकः ।। ११ ।।

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये
वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
प्रथमः प्रपाठकः समाप्तः ।। १ ।।

(मूलक्रमेण-अष्ट. २ अध्या १ (९) अनु. ११ (८९)। (भाष्यक्रमेण -कां. २ प्रपा. १ (९) अनु. ११ (८९) ।

अथ द्वितीयकाण्डे द्वितीयप्रपाठकारम्भः ।

तत्र प्रथमोऽनुवाकः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ।।
अग्निहोत्रविधिः साङ्गप्रशंसाज्ञानसंयुतः ।
आद्ये प्रपाठके प्रोक्तो नित्यकाम्यविभेदतः ।।
आरण्यकाण्डगा मन्त्रा दशहोत्रादयः श्रुताः ।
तद्ब्राह्मणं स्पष्टमुक्तं द्वितीयेऽस्मिन्प्रपाठके ।।

आरण्यकाण्डस्य तृतीयप्रपाठके प्रथमानुवाके दशहोत्राख्यः "चित्तिः स्रुक्" इत्यादिहोममन्त्र आम्नातः । तस्य विधिरस्मिन्प्रथमानुवाकेऽभिधीयते । होतृमन्त्राणां च प्रयोगव्यवस्था सूत्रकारेण विस्पष्टं दर्शिता-"त इमे चतुर्होतारो यत्र होमार्थाः सग्रहाः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सस्वाहाकारास्तत्र प्रयुज्येरन् , यत्रा होमार्था अग्रहा अस्वाहाकारा यत्र जपा याजमानास्तेषां ये विहारसंयुक्ता आहिताग्नेस्तांन्प्रतीयादुभयोरितरान्" इति ।

चतुर्होतृशब्दः कृत्स्नहोतृमन्त्रविषयः । एतच्च प्रश्नोत्तराभ्यां विस्पष्टमाप्यास्यते । एतेषु चतुर्होतृमन्त्रेषु धावन्ति पूर्वभागे होमसाधननामानि श्रूयन्ते । तेषां प्राधान्येन दशहोतृमन्त्रत्वम् । उपरिभागो ग्रहशब्दवाच्यः . तस्यान्ते स्वाहाकारः पठितः । तौ ग्रहस्वाहाकारौ होमेष्वेव । जपादौ तद्रहितो होतृभाग एव प्रयोक्तव्यः । विहार आहवनीयादियुक्तं कर्म । तद्विषयविधिष्वाहिताग्निरेवाधिकारीतरेषु त्वनाहिताग्निरपि । अत एत तेषां क्रत्वर्थः पुरुषार्थश्चेत्युभवविधः प्रयोगो विद्यते । एवं सत्यत्र पुरुषार्थप्रयोग तावदादौ विधत्ते-

प्रजापतिरकामयत प्रजा सृजेयेति । स एतं दशहोतारमपश्यत् । तं मनसाऽनुद्रुत्य दर्भस्तम्बेऽजुहोत् । ततो वै स प्रजा असृजत । ता अस्मात्सृष्टा अपाक्रामन् । ता ग्रहेणागृह्णात् । तद्ग्रहस्य ग्रहत्वम् । यः कामयेत प्रजायेयेति । स दशहोतारं मनसाऽनुद्रुत्य दर्भस्तम्बे जुहुयात् । प्रजापतिर्वै दशहोता (१) । प्रजापतिरेव भूत्वा प्रजायते, इति ।

पुरा कदाचित्प्रजापतिः प्रजा उत्पादयितुं कामयमानस्तदुपायं वेदेषु परीक्ष्य दशहोत्राख्यं मन्त्रमपश्यत् । स च मन्त्र आरण्यकाण्ड एवं समान्नातः- "चित्तिः स्रुक् । चित्तमाज्यम् । वाग्वेदिः। आधीतं बर्हिः । केतो अग्निः विज्ञातमग्निः । वाक्पतिर्होता । मन उपवक्ता । प्राणो हविः । सामाध्वर्युः" इति । अत्र चित्तिचित्तशब्दाभ्यां निर्विकल्पकसविकल्पकभेदजनकावन्तःकरणभेदौ विवक्षितौ । वाक्यप्रसिद्धा । आधीतमुच्चार्यमाणम् । केतविज्ञातशब्दाभ्यां निर्विकल्पसविकल्पकविज्ञानविषयावभिधीयते । वाक्पतिशब्देन वाचः प्रवर्तकः । कण्ठताल्वादिस्थानेषु संयुज्यमानो वायुरुच्यते । मनःप्राणौ प्रसिद्धौ । सामशब्देन तद्धेतुः स्वरोच्चारणशक्तिरुच्यते । एवं चित्यादयो दश शरीरगताः पदार्थविशेषाः । स्रुगादयो दश पदार्था होमनिष्पादकाः

अग्निशब्दद्वयेनाऽऽहवनीयगार्हपत्यौ विवक्षितौ । उपवक्तृशब्देनामुवचनकर्तुर्होतुः पुरा प्रैषवक्ता मैत्रावरुणो विवक्षितः । चित्यादयः शारीरपदार्थाः स्रुगादिरूपा इति वाक्यार्थः । अस्मिन्मन्त्रे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्रुगादीनां होमसाधनानां दशानामभिहितत्वादयं मन्त्रो दशहोतेत्युच्यते सोऽयं मन्त्रस्य पूर्वभागः । उत्तरभागस्तु ग्रहशब्दवाच्य एवमाम्नातः-"वाचस्पते विधे नामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिः सोमं पिबतु । अस्मासु नृम्णं धात्स्वाहा" इति । हे वाचस्पते वाचः पलक हे विधे जगद्विधातर्हे नामन्सर्वस्य वशीकर्तुस्ते तब नाम विधेयास्मदनुग्रहकारी देवोऽयमित्येवं प्रसिद्धिं कुर्मः । यद्वा नमनं प्रह्वीभावं संपादयामः । त्वमप्यस्माकं नाम विधेर्देवेषु मध्ये यजमानोऽयं यथाशास्त्रं हुतवानिति प्रसिद्धिं कुरु । अयं वाचस्पतिर्मदीयेषु यागेषु सोम सदृशमाज्यं पिबतु । अस्मासु होमकर्तृषु नृम्णमपेक्षितं धनं धाद्वाचस्पतिः संपादयतु । इमं वृत्तान्तमुद्दिश्य जुहुधीति स्वकीया वागाह । अत्र वाचस्पते इत्यादि नृम्णं धादित्यन्तो ग्रहभागः । तेन ग्रहभागेन (ण) स्वाहाकारेण च सहितं तं दशहोतृमन्त्रं मनसोच्चार्य कस्मिंश्चिद्दर्भस्तम्ब आज्येन हुतवान् । ततो होमसामर्थ्यात्स प्रजापतिः कामिताः प्रजाः ससर्ज । ताः सृष्टाः प्रजा अनुरागरहिता अस्मात्प्रजापतेरपक्रान्ताः । स च प्रजापतिः "वाचस्पते" इत्यादिग्रहभागपठनसामर्थेन ताः प्रजाः पुनरगृह्णात् । ततो गृह्णात्यनेनेति व्युत्पत्या ग्रहत्वं संपन्नम् । प्रजापतिवदन्योऽपि होमं कृत्वां प्रजापतिसामर्थ्यं प्राप्य प्रजोत्पत्तिं करोति । सोऽ यं विधिः । सूत्रकारेण संगृहीतः-"यः कामयेत प्रजायेयेति स द्वादशगृहीतेन स्रुवं पूरयित्वा दशहोतारं मनसाऽनुद्रुत्य दर्भस्तम्बे सग्रहं जुहुयादर्धं वा पूर्वेण ग्रहेणार्धमुत्तरेण" इति ।

मानसं मन्त्रोच्चारणं प्रशंसति-

मन॑सा जुहोति । मन॑ इव॒ हि प्र॒जाप॑तिः । प्र॒जाप॑ते॒राप्त्यै॑, इति ।

यथाऽस्मदीयं मनः संकल्पमात्रेण मनोराज्यगतान्गिरिन-द्यादीन्सृजति, एवं प्रजापतिरपि संकल्पमात्रेण सृजतीति तत्साम्यतो मानसमुच्चारणं प्रजापतेः प्राप्त्यै भवति ।

विधत्ते -

पू॒र्णया॑ जुहोति । पू॒र्ण इ॑व॒ हि प्र॒जाप॑तिः । प्र॒जाप॑ते॒राप्त्यै॑, इति ।

द्वादशगृहीतेनाऽऽज्येन या स्रुक्पूर्णा तया जुहुयात् । सर्वात्मकत्वात्प्रजापत्तेः पूर्णत्वम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पक्षान्तरं विधत्ते-

न्यूनया जुहोति । न्यूनाद्धि प्रजापतिः प्रजा असृजत । प्रजाना ँसृष्ट्यै (२), इति ।

चतुर्गृहीतेनाऽऽज्येन युक्ता येयमपूर्णा स्रुक्तया जुहुयात् । सृष्टेः प्राक्प्रजापतेः स्वरूपं सर्वजगद्बीजावस्थापन्नमव्य कृतं सर्वविशेषराहित्येन न्यूनं तस्मादेवाव्याकृताद्व्याकृतरूपाः प्रजाः सृष्टवान् । अतो न्यूनया होमः प्रजा सृष्ट्यै भवति । पूर्णत्वन्यूनत्वपक्षौ समबलत्वाद्विकल्पितौ । ग्रहसहितेन होतृमन्त्रेण सर्वद्रव्यं सकृद्धोतव्यमित्येकः पक्षः । होतृभागेना (णा) र्धं हुत्वा पुनरर्थं ग्रहभागेन (ण) होतव्यमिति द्वितीयः पक्षः । ताविमौ पक्षौ सूत्रोक्तौ ।।

अथ होमाधारं विधत्ते-

दर्भस्तम्बे जुहोति । एतस्माद्वै योनेः प्रजापतिः प्रजा असृजत । यस्मादेव योनेः प्रजापतिः प्रजा असृजत । तस्मादेव योनेः प्रजायते, इति ।

भूयिष्ठदर्भस्तम्बस्य प्रजायोनित्वम् । तथा च पञ्चमकाण्डे समाम्नातम्- "यद्वा अस्या अमृतं यद्वीर्यं तद्दर्भास्तस्मिञ्जुहोति प्रजैव जायते" इति । विधत्ते -

ब्राह्मणो दक्षिणत उपास्ते । ब्राह्मणो वै प्रजानामुपद्रष्टा । उपद्रष्टुमित्येव प्रजायते, इति ।

होमकाले कश्चिद्ब्राह्मणो दक्षिणभागे स्थापनीयः । उपद्रष्टा हिताहितस्य प्रजानामुपदेष्टा । उपद्रष्टा उपद्रष्टुमतिहिताहितद्रष्टुयुक्ते देशे प्रजायते ।

ग्रहभागं प्रशंसति-

ग्रहो भवति । प्रजाना ँसृष्टानां धृत्यै, इति ।

यथा प्रजापतिरपक्रान्ताः प्रजा ग्रहभागेन (ण) धृतवानेवं यजमानोऽपि । इत्थं प्रजाकामस्य प्रयोगमभिधायाथ यशस्कामस्य प्रयोग विधत्ते-

यं ब्राह्मणं विद्यां विद्वा ँसंयशो नर्च्छेत् (३) । सोऽरण्यं परेत्य । दर्भस्तम्बमुद्ग्रथ्य । ब्राह्मणं दक्षिणतो निषाद्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्होतॄन्व्याचक्षीत । एतद्वै देवानां परमं गुह्यं ब्रह्म । यच्चतुर्होतारः । तदेव प्रकाशं गमयति । तदेनं प्रकाशं गवम् । प्रकाशं प्रजानां गमयति, इति ।

वेदशास्त्रविद्यां तां जानन्तं ब्राह्मणं यदि तदनुरूपं यशो न प्राप्नुयात्तदा स ब्राह्मणोऽरण्यमनुप्रविश्य दर्भस्तम्बंमूर्ध्वग्रन्थिकं बध्नीत । तत्राऽऽसीनः सन्कंचिद्विशिष्टं ब्राह्मणं दक्षिणभाग उपवेश्य तत्समीपे होतृमन्त्रान्विस्पष्टमुचारयेत् । चित्तिः स्रुगित्यादिको दशहोता पृथिवी होतेत्यादिकश्चतुर्होताऽग्निर्होतेत्यादिकः पञ्चहोता सूर्य ते चक्षुरित्यादिकः षड् ढोता महाहविर्होतेत्यादिकः सप्तहोता । एते सर्वेऽपि होतृमन्त्राश्चतुर्होतृशब्देन च्छत्रिन्यायेनोपलक्षिताः । अन्यथा बहुवचनानुपपत्तेः । चतुर्होतृशब्दस्यैव सर्वोपलक्षकत्वं, न तु दशहोत्रादि-शब्दस्येत्ययमर्थ उपरिष्टाद्विस्पष्टी भविष्यति । अत्र होमविधाना-भावाद्ग्रहभागस्वाहाकारभागौ न प्रयोक्तव्यौ । यत्ते चतुर्होतारो मन्त्रा एतदेव देवानामुत्कृष्टं गोप्यं ब्रह्म । देवाः परस्मिन्ब्रह्मणि यादृशं गौरवं तादृशमेतेषु कुर्वन्ति । तदेव देवाभिमन्त्ररूपं ब्रह्म देवेषु मध्ये विद्वांसमेनं प्रकाशं गमयति । ततो देवेषु ख्यातिं गतमेनं ब्राह्मणं देवानुग्रहयुक्तं पुनः प्रजानां मध्ये प्रकाशं गमयति ततो लोकद्वयप्रख्यातो भवति ।

उक्तदर्भस्तम्बं प्रशंसति -

दर्भस्तम्बमुद्ग्रथ्य व्याचष्टे (४) अग्निवान्वै दर्भस्तम्बः। अग्निवत्येव व्याचष्टे, इति ।

यथाऽग्निर्होमाधारस्तद्वद्दर्भस्तम्बोऽपि तत्र होमाधारत्वेन विहितः । ततोऽग्निमत्वं हिताहितसाक्षित्वेनोपवेशितं ब्राह्मणं प्रशंसति-

ब्राह्मणो दक्षिणत उपाऽऽस्ते । ब्राह्मणो वै प्रजानामुपद्रष्टा । उपद्रष्टुमत्येवैनं यश ऋच्छति, इति ।

इदं हितमिदमहितमिति ब्राह्मणः प्रजाभ्य उपदिशति तस्मादय-मुपद्रष्टा । तथाविधब्राह्मणैर्युक्त एव देशे विद्वांसमेनं यशः प्राप्नोति ।

अथ साक्षिणे ब्राह्मणाय गोदानं विधत्ते-

ईश्वरं तं यशोऽर्तोरित्याहुः । यस्यां तै व्याचष्ट इति । वरस्तस्मै देयः । यदे वैनं तत्रोपनमति । तदेवावरुन्धे, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यं ब्राह्मणं संनिधाप्य होतॄन्पठति तमेव ब्राह्मणं तद्यशोऽर्तोरीश्वरं प्राप्तुं समर्थम्। अतस्तस्मै गोदानेन यद्यश एनं ब्राह्मणं प्राप्नोति तत्स्वयमेव स्वीकरोति।

तदेवं पुरुषार्थप्रयोगद्वयमभिधाय क्रत्वर्थं दशहोतृमन्त्रस्य प्रयोगचतुष्टयं क्रमेण विधत्ते–

अ॒ग्निमा॒दधा॑नो॒ दश॑होत्रा॒रणि॒मव॑दध्यात्। प्र॒जात॑मे॒वै॒न॒माध॑त्ते। तेनै॒वोद् द्रुत्याग्निहो॒त्रं जु॑हुयात्। प्र॒जात॑मे॒वैं॒नज्जुहोति। ह॒विर्निर्व॒प्स्यन्द श॑होतार॒ं व्याच॑क्षीत। प्र॒जात॑मे॒वै॒नं निर्व॑पति। सा॒मि॒धे॒नीर॑नुव॒क्ष्यन्दश॑होतार॒ं व्याच॑क्षीत। सा॒मि॒धे॒नीरे॒व सृ॒ष्ट्वाऽऽरभ्य॒ प्रत॑नुते। अथो॑ य॒ज्ञो वै दश॑होता। य॒ज्ञमे॒व त॑नुते (६), इति।

प्रजातं प्रभूतमाधेयोऽग्निर्होतव्यं निर्वपणीयं च हविर्दशहोतृमन्त्रेण वर्धते। तथा सामिधेनीरेव दशहोतृपाठेन सृष्ट्वा तदनुष्ठानं प्रारभ्य विस्तारयति। अपि च दशहोतृमन्त्रस्य यज्ञसाधनत्वेन यज्ञरूपत्वाद्यज्ञमेव विस्तारयति।

यदुक्तं सूत्रकारेण –"दशहोत्राऽभिचरन्यजेत स्वकृत इरिणे प्रदरे वा जुहुयात्" इति। तदिदं पुरुषार्थत्वेन विधत्ते–

अ॒भि॒चर॒न्दश॑होतारं जुहुयात्। नव॒ वै पुरु॑षे प्रा॒णाः। नाभि॒र्द॑श॒मी। सप्रा॑णमे॒वै॒न॑म॒भिच॑रति। ए॒ताव॒द्वै पुरु॑षस्य॒ त्वम्। याव॑त्प्रा॒णाः। याव॑दे॒वास्या॑स्ति। तद॒भिच॑रति, इति।

शिरसि च्छिद्राणि सप्ताधस्तने द्वे छिद्रे तेषु संचरन्तः प्राणा नवसरख्यात्मकास्तदपेक्षया नाभेर्दशमत्वम्। एवं सति होतृमन्त्रगतथा दशसंख्या (ख्य) या सर्वप्राणयुक्तमेवैनं शत्रुमुदिश्याभिचारः कृतो भवति। अपि च प्राणा इति यावदस्ति, एतावदेव पुरुषस्य मुख्यं स्वम्। अतस्तत्सर्वमुद्दिश्याभिचारः कृतो भवति।

होमदेशं विधत्ते –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वकृत इरिणे जुहोति प्रदरे वा । एतद्वा अस्यै निर्ऋतिगृहीतम् । निर्ऋतिगृहीत एवैनं निर्ऋत्या ग्राहयति, इति ।

इरिणमु (म्) षरस्थानं तच्च स्वकृतं स्वयमेव सिद्धं न तु गार्हपत्याहवनीयाद्यायतनवदुषनिवपनेन संपादितम् । प्रदरो भूछिद्रम् । अतयोर्मध्य एकस्मिञ्जुहुयात् । एतच्चोभयं निर्ऋत्या राक्षसरूपया देवतया गृहीतं स्थानम् । अतस्तस्मिन्नेव स्थान एनं वैरिणं निर्ऋत्या ग्राहयति ।

विधत्ते –

यद्वाचः क्रूरम् । तेन वषट् करोति । वाच एवैनं क्रूरेण प्रवृश्चति । ता जगार्तिमार्छति, इति ।

दशहोता सृष्ट्या ऋच्छेद्व्याचष्टे रुन्ध एव तनुते निर्ऋतिगृहीतं पञ्च च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
द्वितीयाध्याये प्रथमोऽनुवाकः ।। १ ।।

आरण्यकाण्डे क्रूराणि समाम्नातानि –"खट् फट् जहि । छिन्धी भिन्धी इन्धी कट् । इति वाचः क्रूराणि" इति । तेषां मध्ये केनचित्क्रूरेण दशहोतृ मन्त्रान्ते वषट्कारकृतं संपादयेत् । ततस्तेन क्रूरेणैनं शत्रुं छिनत्ति । तदानीमेवासौ मरणं गच्छति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
द्वितीयप्रपाठके प्रथमोऽनुवाकः ।। १ ।।

अथ द्वितीयप्रपाठके द्वितीयोऽनुवाकः ।

प्रथमे दशहोतृमन्त्रस्य क्रत्वर्थपुरुषार्थप्रयोगद्वयं दर्शितम् । द्वितीये चतुर्होत्रादिमन्त्राणां क्रत्वर्थप्रयोगः प्रदर्श्यते । तत्राऽऽदौ चतुर्होतुः प्रयोगं विधत्ते–

प्रजापतिरकामयत दर्शपूर्णमासौ सृजेयेति । स एतं चतुर्होतारमपश्यत् । तं मनसाऽनुद्रुत्याहवनीयेऽजुहोत् । ततो वै स दर्शपूर्णमासावसृजत ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तावस्मात्सृष्टावपाक्रामताम् । तौ ग्रहेणागृह्णात् । तद् ग्रहस्य ग्रहत्वम् । दर्शपूर्णमासावालभमानः । चतुर्होतारं मनसाऽनुद्रुत्याऽऽहवनीये जुहुयात् । दर्शपूर्णमासावेव सृष्ट्वाऽऽरभ्य प्रतनुते (१)। ग्रहो भवति । दर्शपूर्णमासयोः सृष्ट्योर्धृत्यै, इति ।

चतुर्होतृमन्त्र आरण्यकाण्ये समाम्नातः-"पृथिवी होता । द्यौरध्वर्युः । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता" इति । सोऽयं होतृभागः। तत्र पृथिव्यादयः प्रसिद्धाः । तथा होत्रादयश्च । उपवक्तृशब्देन समीपे स्थितत्वात्तत्कर्मानुजानानो ब्रह्मा विवक्षितः । ग्रहभागस्त्वेवमाम्नातः- "वाचस्पते वाचो वीर्येण । संभृततमेनाऽऽयक्ष्यसे । यजमानाय वार्यम् । आ सुवस्करस्मै । वाचस्पतिः सोमं पिबति । जजनदिन्द्रमिन्द्रियाय स्वाहा" इति । हे वाचस्पतेऽत्यन्तं संपादितेन मन्त्रात्मिकाया वाचः सामर्थ्येन त्वमासमन्ताद्यक्ष्यसे । अस्मै यजमानाय वार्यं वरणीयं सुवः स्वर्गमाकः समन्तात्कुरु । अथ वाचस्पतिरस्मदीयेषु यागेषु सोमं पिबति । इन्द्रं देवमिन्द्रियायेन्द्रियसमृद्ध्यर्थं जननञ्जनयन्प्रे (तुप्रे) रयत्वित्यर्थः तदेतदुद्दिश्य जुहुधीति स्वकीया वागाह । होमकाले यथोक्तग्रहेण स्वाहाकारेण च युक्तश्चतुर्होतृमन्त्रः प्रयोक्तव्यः । आलभमान उपक्रममाणः। अन्यत्सर्वं दशहोतृमन्त्रवद्व्याख्येयम् ।

अथ पञ्चहोतुः प्रयोगं विधत्ते-

सोऽकामयत चातुर्मास्यानि सृजेयेति । स एतं पञ्चहोतारमपश्यत् । तं मनसाऽनुद्रुत्याऽहवनीयेऽजुहोत् । ततो वै स चातुर्मास्यान्यसृजत । तान्यस्मात्सृष्टान्यपाक्रामन् । तानि ग्रहेणागृह्णात् । तद् ग्रहस्य ग्रहत्वम् । चातुर्मास्यान्यालभमानः (२) । पञ्चहोतारं मनसाऽनुद्रुत्याऽऽहवनीये जुहुयात् । चातुर्मास्यान्येव सृष्ट्वाऽऽरभ्य प्रतनुते । ग्रहो भवति । चातुर्मास्यानां सृष्टानां धृत्यै, इति ।

पञ्चहोतृमन्त्र आरण्यकाण्ड एवमाम्नातः-"अग्निर्होता । अश्विनाऽध्वर्यू । त्वष्टाऽग्नीत् । मित्र उपवक्ता" इति। अग्न्यादयः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रसिद्धाः । अध्वर्युःप्रतिप्रस्थाता चेत्यध्वर्युद्वित्वेन होतृपञ्चकं पूरणीयम् । तत्र ग्रहभाग एवमात्रन्मातः-"सोमः सोमस्य पुरोगाः । शुक्रःशुक्रस्य पुरोगाः। श्रतास्त इन्द्रसोमाः । वातापेर्हवनश्रुतः स्वाहा" इति । योऽयं देवतात्मकः सोमः सोऽयं लतात्मकस्य सोमस्य यागदेशं प्रत्यागमने पुरुतो गच्छति । शुक्रो भासको देवतादिप्रकाशको मन्त्रः शुक्रस्यगृह्यमाणतया भासमानस्यसोमस्य पुरतो गच्छति । आदौ मन्त्रं पठित्वा पश्चात्सोमा गृह्यन्ते । हे, इन्द्र त्वदर्थमेते सोमाः श्राताः पक्वा आशिता वा । कीदृशस्य ते बातापेर्वायुवदान्पोति सहसा गच्छतीति वातापिः । तस्य हवनाह्वानं शृणोतीति हवनश्रुत्तस्यैतदर्थं जुहुधीति स्वकीया बागाह ।

अत्र सर्वत्र दर्शपूर्णमासचातुर्मास्यादीनामुपक्रमणं तदभिमानिचेतनविषयं द्रष्टव्यम् । अन्यत्पूर्ववद्व्याख्येयम् ।

षड्ढोतृमन्त्रस्य प्रयोगं विधत्ते-

सोऽकामयत पशुबन्ध ँ सृजेयेति । स एत ँ षड्ढोतारमपश्यत् । तं मनसाऽनुद्रुत्याऽऽहवनीयेऽजुहोत् । ततो वै स पशुबन्धमसृजत । सोऽस्मात्सृष्टोऽपाक्रामत् । तं ग्रहेणागृह्णात् (३) तद्ग्रहस्य ग्रहत्वम् । पशुबन्धेन यक्ष्यमाणः । षड्ढोतारं मनसाऽनुद्रुत्याऽऽहवनीये जुहुयात् । पशुबन्धमेव सृष्ट्वाऽऽरभ्य प्रतनुते । ग्रहो भवति । पशुबन्धस्य सृष्टस्य धृत्यै, इति ।

षड्ढोतृमन्त्र आरण्यकाण्ड एवमाम्नातः- "सूर्यं ते चक्षुः । वातं प्राणः। द्यां पृष्ठम् । अन्तरिक्षमात्मा । अङ्गैर्यज्ञम् । पृथिवी शरीरैः" इति । हे पशो योऽयं सूर्यः स च ते चक्षुः । यो वायुः स ते प्राणः । तथा च पशुविषयेऽधिग्रपैषे समाम्नायते-"सूर्यं चक्षुर्गमयतात् । वातं प्राणमन्ववसृजतात्" इति । सा द्यौस्ते पृष्ठभागः । उपरिवर्तित्वसाम्यात् । यदिदमन्तरिक्षं ते त्वदीयो जीवात्मा । मध्यवर्तित्वसाम्यात् । यानि हृदयादिन्यङ्गानि तैर्यज्ञ संपादयेति शेषः । यान्यन्यान्यस्थ्यादीनि शरीरगतानि तैः पृथिवीं प्राप्नुहीति शेषः । सूर्यं ते चक्षुरित्यादावपि त्वदीयं चक्षुः सूर्यं प्राप्नोत्विति वा योजनीयम् । होमनिष्पाद्रकस्य पशोः षडङ्गानि चक्षुरादीन्यत्रोक्तानीत्यस्य मन्त्रस्य षड्ढोतृत्वम् । ग्राहभाग एवमाम्नातः-"वाचस्पतेऽच्छिद्रया वाचा । अच्छिद्रया जुह्वा । दैवि देवावृध ँ होत्रामैरयस्व स्वाहा" इति । हे वाचस्पतेऽच्छिद्रया वाता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वराक्षरपूर्णेन मन्त्रेणाच्छिद्रया जुह्वा घृतसंपूर्णया स्रुचा देवा वृधं देवानां वर्धयित्रीं होत्रां होमक्रियां दिवि द्युलोक एरयस्व सर्वतः प्रेरय । एवमर्थमुद्दिश्य जुहुधीति स्वकीया वागाह । अन्यत्पूर्ववद्व्याख्येयम् ।

सप्तहोतृमन्त्रस्य प्रयोगं विधत्ते–

सोऽकामयत सौम्यमध्वरँ सृजेयेति । स एतँ सप्तहोतारमपश्यत् । तं मनसाऽनुद्रुत्याऽऽहवनीयेऽजुहोत् । ततो वै स सौम्यमध्वरमसृजत (४)। सोऽस्मात्सृष्टोपाक्रामत् । तं ग्रहेणागृह्णात् । तद्ग्रहस्य ग्रहत्वम् । दीक्षिष्यमाणः । सप्तहोतारं मनसाऽनुद्रुत्याऽऽहवनीये जुहुयात् । सौम्यमेवाध्वरँसृष्ट्वाऽऽरभ्य प्रतनुते । ग्रहो भवति । सौम्यस्याध्वरस्य सृष्टस्य धृत्यै, इति ।

न विद्यते ध्वरो हिंसा यस्याग्निष्टोमादेः सोऽयमध्वरः । न हि तदनुष्ठायिनः काचिद्धिंसाऽस्ति । तस्य स्वर्गकामस्यापि हेतुत्वात् । स च सोमद्रव्येण निष्पाद्यत्वात्सौम्यः । सप्तहोतृमन्त्रश्चाऽऽरण्यकाण्ड एवमाम्नातः–"महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा अग्नीत् । अच्युतमना उपवक्ता । अनाधृश्यश्चाप्रतिधृश्यश्चयज्ञस्याभिगरौ । अयास्य उद्गाता" इति । महाहविः सत्यहविरित्याद्या अयास्यान्ताः सप्तसंख्याका महर्षयस्तन्महर्षिस्वरूपा मन्त्रगता अत्रत्या होत्रादयो यज्ञस्य सोमयागस्याभिगरावभित उद्गातुः पुरस्तात्पश्चाच्च गृणीतः प्रस्तारप्रतिहारभागौगायत इति प्रस्तोतृप्रतिहर्तारावभिगरौ । होताऽध्वर्युराग्नीध्रो ब्रह्मा प्रस्तोता प्रतिहर्तोद्गातेति सप्तसंख्याका होमनिष्पादका अत्रोक्ता इत्ययं मन्त्रः सप्तहोतेत्युच्यते । अस्य ग्रहभागस्त्वेवमाम्नातः– "वाचस्पते हृद्विधे नामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिः सोममपात् । मा दैव्यस्तन्तुश्छेदि मा मनुष्यः । नमो दिवे । नमः पृथिव्यै स्वाहा" इति हे वाचस्पते हे हृद्विधे हृदयस्य विधातः । चितप्रेरकेत्यर्थः। हे नामन्सर्वजनसंबन्धिप्रणामयुक्त ते तुभ्यं नाम नमनं प्रणतिं विधेम कुर्मः। त्वं चास्माकं नाम विधेर्देवानां मध्ये सम्यगिष्टवानिति प्रसिद्धं नामधेयं कुरु । अयं वाचस्पतिःसोममपात्पी तवान्दैव्यस्तन्तुर्मदगृहे हविःस्वीकारार्थभाग तो देवसंबन्धी संतानो माच्छेदि कदाचिदपि विच्छिन्नो मा भूत् । तथा मम

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मनुष्यस्तन्तुर्ऋत्विवयवाहोऽपिविच्छिन्नो मा भूत् । द्यावापृथिवीभ्यां नमोऽस्तु । तमिममर्थमुद्दिश्य जुहुधीति स्वकीया वागाह। तेनानेन ग्रहस्वाहाकारसहितेन सप्तहोत्रा दीक्षार्थी जुहुयात्। सोमयागस्य दीक्षादित्वेन तदारम्भार्थ एवायं होमः । दीक्षाद्यङ्गेष्वग्नीषोमीयपशोरन्तर्भावात्तस्य यद्यपि पृथगुपक्रमोनास्ति तथाऽपि निरूढपशुबन्धवायव्यादीनामनन्तर्भावात्तदर्थः पूर्वो मन्त्रहोमः। अन्यत्पूर्ववद्व्याख्येयम् ।

तदेवं चतुर्होत्रादिमन्त्रचतुष्टयस्य ऋत्वर्थः । प्रयोग उक्तः । अथ संभारयजुर्मन्त्राणां । क्रत्वर्थप्रयोगं विधत्ते-

दे॒वेभ्यो॒ वै य॒ज्ञो न प्राभ॑वत् । तमे॑ताव॒च्छः सम॑भरन् (५) । यत्सं॑भा॒राः । ततो॒ वै तेभ्यो॑ य॒ज्ञः प्राभ॑वत् । यत्सं॑भा॒रा भव॑न्ति । य॒ज्ञस्य॒ प्रभू॑त्यै, इति ।

योऽयमग्निष्टोमादिर्यज्ञः स देवेभ्यःपर्याप्तो नाभूत्। तत्साधनेषु वैकल्यसंभवात् । तदा देवास्तं यज्ञंसंभाराःसंभारयजुराख्या मन्त्रा यावन्तः सन्ति तावद्भिः समभरन्संपूर्तिर्यथा भवति तथा पोषितवन्तः । ततस्तेभ्यो देवेभ्यःस यज्ञपर्याप्तोऽभवत् । संभारयजूंषि चाऽऽरण्यकाण्ड एवमाम्नातानि-" अग्निर्यजुर्भिः। सविता स्तोमैः । इन्द्र उक्थामदैः । मित्रावरुणावाशिषा। अङ्गिरसोऽधिष्णियैरग्निभिः । मरुतः सदोहविर्धानाभ्याम् । आपःप्रोक्षणीभिः । ओषधयो बर्हिषा। अदितिर्वेद्या । सोमो दीक्षया । त्वष्टेध्मेन। विष्णुर्यज्ञेन । वसव आज्येन । आदित्या दक्षिणाभिः । विश्वेदेवा ऊर्जा । पूषा स्वगाकारेण । बृहस्पतिः पुरोधया । प्रजापतिरुद्गीथेन । अन्तरिक्षं पवित्रेण। वायुः पात्रैः । अह ँ श्रद्धया" इति । अत्राग्निसवित्रादयो देवा यजुस्तोमादीनि यज्ञे संभरणीयान्यङ्गानि । एते देवास्तैः संभरणीयैः सहास्मिन्कर्मण्या-गच्छन्त्विति वाक्यार्थः । उक्थामदशब्दः शस्त्रवाची । यज्ञशब्दो हविष्प्रक्षेपवाची । स्वगाकाराः शंयुवाकमन्त्रः । पुरोधाग्रहणकाले पठनीया पुरोरुक् । पवित्रशब्दो दशपवित्रवाची। अहं यजमानः श्रद्धयासहाऽऽगच्छामि । त एते संभारमन्त्राः प्रयोक्तव्याः । तेन यज्ञस्य प्रभूतिः पर्याप्तिर्भवति ।

सामान्यतो यज्ञसंबन्धेन विहितानां संभारयजुषां पुनः स्थानविशेषं विधत्ते-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आतिथ्यमासाद्य व्याचष्टे । यज्ञमुखं । आतिथ्यम् । मुखत एव यज्ञꣳ संभृत्य प्रतनुते, इति ।

आतिथ्येष्टौ "अग्निरातिथ्यमसि " इत्यादिभिर्मन्त्रैर्निरुप्तं यद्धविस्तदेतद्वेदिमध्य आसाद्य पूर्वोक्तान्यग्निर्यजुर्भिरित्यादीनि संभारयजूंषि पठनीयानि । आतिथ्यहविषोऽनुष्ठास्यमानस्य सोमयज्ञमुखत्वान्मुखत एव संपूर्णावयवयज्ञं संपाद्य विस्तारयति ।

अथ देवपत्न्याख्यान्मन्त्रान्क्रत्वर्थतया विधत्ते-

अयज्ञो वा एषः । योऽपत्नीकः । न प्रजाः प्रजायेरन् । पत्नीर्व्याचष्टे । यज्ञमेवाकः। प्रजानां प्रजननाय, इति ।

यो देवपत्नीमन्त्ररहितः स तावद्यज्ञ एव न भवति, कुतस्तस्य फलपर्यन्तता । तस्मात्तादृशानुष्ठाने प्रजानोत्पद्येरन् । अतस्तत्परिहाराय देवपत्नीमन्त्रान्विस्पष्टं पठेत् । ते च मन्त्रा आरण्यकाण्ड एवमाम्नायन्ते-"सेनेन्द्रस्य । धेना बृहस्पतेः । पथ्या पूष्णः । वाग्वायोः दीक्षा सोमस्य । पृथिव्यग्नेः। वसूनां गायत्री । रुद्राणां त्रिष्टुक् । आदित्यानां जगती । विष्णोरनुष्टक्। वरुणस्य विराट्। यज्ञस्य पङ्क्ति । प्रजापते रनुमतिः । मित्रस्य श्रद्धा । सवितुः प्रसूतिः । सूर्यस्य मरीचिः । चन्द्रमसो रोहिणी । ऋषीणामरुन्धती । पर्जन्यस्य विद्युत् । चतस्रो दिशः। चतस्रोवाऽन्तरदिशः । अहश्च रात्रिश्च । कृषिश्च वृष्टिश्च । त्विषिश्चापचितिश्च । आपश्चौषधयश्च । ऊर्क च सूनृता च देवानां पत्नयः" इति । देवता इन्द्रादयः पतयः । सेनादयः पत्न्यः। दिग्विदिगादयोऽपि केषांचिद्देवानां पत्न्यः एताः सर्वा आगत्य यज्ञमविकलं कुर्वन्त्विति वाक्यार्थः । एतेषां देवपत्नीमन्त्राणां पाठेन वैकल्यकृतमयज्ञत्वं परिहृत्य संपूर्णमेव यज्ञं करोति । तत्र पत्नीसंबन्धात्प्रजानामुत्पत्तिर्भवति ।

देवपत्नीनां सामान्येन यज्ञसंबन्धं विधाय स्थानविशेषमभिधत्ते-

उपसत्सु व्याचष्टे । एतद्वै पत्नीनामायतनम् । स्व एवैना आयतनेऽवकल्पयति (६), इति ।

तनुत आलभमानोऽगृह्णादसृजताभरज्ञायोरन्षट् च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

द्वितीयाध्याये द्वितीयोऽनुवाकः ।। २ ।।

"या ते अग्ने याशयां "इत्यादिमन्त्रसाध्या आहुतय उपसदस्तासां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्त्रीत्वविवक्षया स्त्रीलिङ्गेनोपसच्छब्देन निर्देशात्सामीप्यं पत्नीनामुचितं स्थानम् । अत एता देवपत्नीःस्वोचित एव स्थाने यजमानः स्थापयति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
द्वितीयप्रपाठके द्वितीयोऽनुवाकः ।। २ ।।

अत्र द्वितीयप्रपाठके तृतीयोऽनुवाकः।

द्वितीये चतुर्होत्रादिमन्त्राणां क्रत्वर्थप्रयोगो दर्शितः । तत्राऽऽदौ तावदनुक्तकालविशेषाणां कर्मणां सामान्येन शुक्लपक्षमन्वयव्यतिरेकाभ्यां विधत्ते-

प्रजापतिरकामयत प्रजायेयेति । स तपोऽतप्यत। स त्रिवृत ँ स्तोममसृजत । तं पञ्चदशस्तोमो मध्यत उदतृणत् । तौ पूर्वपक्षश्चापरपक्षश्चाभवताम् । पूर्वपक्षं देवा अन्वसृज्यन्त । अपरपक्षमन्वसुराः। ततो देवा अभवन् पराऽसुराः । यं कामयेत वसीयान्त्स्यादिति (१) । तं पूर्वपक्षे याजयेत् । वसीयानेव भवति । कं कामयेत पापीयान्त्स्यादिति । तमपरपक्षे याजयेत् । पापीयानेव भवति । तस्मात्पूर्वपक्षोऽपरपक्षात्करुण्यतरः, इति ।

सिसृक्षुः प्रजापतिस्तत्साधनं तपोऽनुष्ठाय तपः सामर्थ्येन नवसंख्याकाभिर्ऋग्भिरुपेतं त्रिवृन्नामकं स्तोममसृजत् । तं च सृष्टं स्तोममपरः पञ्चदशस्तोमः केनापि वैरेण मध्ये विच्छिन्नमकरोत्। । तावेतौ त्रिवृत्स्तोमस्य पूर्वोत्तरभागौ शुक्लकृष्णपक्षरूपेण परिणतौ । तत्र शुक्लपक्षमनु देवानां सृष्टत्वात्तेषां चैश्वर्ययुक्तत्वात्पूर्वपक्षे यागं कुर्वाणो धनिको भवति । अपररक्षे तु विपरीतः । तस्मादनुक्तकालविशेषेषु कर्मसु पूर्वपक्षः करुण्यतरोऽतिशयेन प्रशस्तः ।

अथ प्रसङ्गात्स्रष्टुः प्रजापतेः सर्वात्मकत्वेन स्तुवंस्तदनुसंधानं पुरुषार्थतया विधत्ते-

प्रजापतिर्वै दशहोता । चतुर्होता पञ्चहोता । षड्ढोता सप्तहोता । ऋतवः संवत्सरः (२) । प्रजाः पशव इमे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लोकाः । य एवं प्रजापतिं बहोर्भूयाꣳसं वेद । बहोरेव भूयान्भवति, इति ।

प्रजापतेर्दशहोतृप्रभृतिलोकपर्यन्तसर्ववस्त्वात्मकत्वेनास्य बहोरप्यतिशयेन बहुत्वम् । तादृशं विदित्वा ध्यानं कुर्वन्वयमपि तादृशो भवति ।

अथ चतुर्होतृमन्त्रस्य पुरुषार्थप्रयोगं विधातुं प्रस्तौति -

प्रजापतिर्देवासुरानसृजत । स इन्द्रमपि नासृजत । तं देवा अब्रुवन् । इन्द्रं जनयेति । सोऽब्रवीत् । यथाऽहं युष्माꣳस्तपसाऽसृक्षि । एवमिन्द्रं जनयध्वमिति (३) । ते तपोऽतप्यन्त । त आत्मन्निन्द्रमपश्यन् । तमब्रुवन् । जायस्वेति । सोऽब्रवीत् । किं भागधेयमभिजनिष्य इति । ऋतून्संवत्सरम् । प्रजाः पशून् । इमाँल्लोकानित्यब्रुवन् । तं वै माऽऽहुत्या प्रजनयतेत्यब्रवीत् (४) । तं चतुर्होत्रा प्राजनयन्, इति ।

प्रजापतिर्देवानसुरांश्च सृष्ट्वा देवस्वामिनमिन्द्रं नासृजत । अपिशब्दादसुरस्वामिनमपि नासृजत । तत इन्द्रसृष्ट्यर्थं देवैः प्रार्थितः सृष्टिसाधनं तप उपदिदेश ततो देवास्तपस्तप्त्वा स्वहृदय एवावस्थितमिन्द्रं दृष्ट्वा जायस्वेति प्रार्थितवन्तः । इन्द्रश्च भागधेयमाकाङ्क्षन्, ऋत्वादिलोकपर्यन्तं जगत्स्वभोग्यत्वेन देवेभ्यो लब्ध्वा स्वोत्पादनहेतुमाहुतिमुपदिदेश । ते च देवाश्चतुर्होत्राहुत्या तमिन्द्रमजनयन् ।

इदानीं विधत्ते :-

यः कामयेत वीरो म आजायेतेति । स चतुर्होतारं जुहुयात् । प्रजापतिर्वै चतुर्होता । प्रजा पतिरेव भूत्वा प्रजायते । जजनदिन्द्रमिन्द्रियाय स्वाहेति ग्रहेण जुहोति । आऽस्य वीरो जायते । वीरꣳहि देवा एतयाऽऽहुत्या प्राजनयन्, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वीरो लौकिकवैदिककर्मसु शूरः पुत्रः । पृथिवी होतेत्यादिबृहस्पतिरुपवक्तेत्यन्तश्चतुर्होता । उपरितन इन्द्रियाय स्वाहेत्यन्तो ग्रहभागस्तेन सर्वेणापि चतुर्होतारं जुहुयादिति होमो विहितः । जजनदिन्द्रमित्यादिग्रहभागान्त एकहोम इत्येकः पक्षः । होतृभागेन (ण) ग्रहभागेन (ण) चाऽऽहुतिद्वयं वाक्याभ्यां विधीयत इत्यपरः पक्षः । तदुभयं सूत्रकार आह-" यःकामयेत वीरो म आजायेतेति । स चतुर्होतारं जुहुयाच्चतुर्गृहीतेनाऽऽज्येनार्धं वा पूर्वेण ग्रहेणार्धमुत्तरेण" इति ।

अथ क्रतुमध्य एव गोदोहनेन पशुकामस्येत्यादिवत्पुरुषार्थं पञ्चहोतृमन्त्रेण ग्रहहोमं विधत्ते-

आदित्याश्चाङ्गिरसश्च सुवर्गे लोकेऽस्पर्धन्त । वयं पूर्वे सुवर्गं लोकमियाम वयं पूर्व इति । (५) । त आदित्या एतं पञ्चहोतारमपश्यन् । तं पुरा प्रातरनुवाकादाग्नींधेऽजुहवुः । ततो वै ते पूर्वे सुवर्गं लोकमायन् । यः सुवर्गकामः स्यात् । स पञ्चहोतारं पुरा प्रातरनुवाकादाग्नीधे जुहुयात् । संवत्सरो वै पञ्च होता । संवत्सरः सुवर्गो लोकः । संवत्सर एवर्तुषु प्रतिष्ठाय । सुवर्गं लोकमैति, इति ।

प्रथमतः स्वर्गगमने मात्सर्यग्रस्ता आदित्या यागमध्ये प्रातरनुवाकशस्त्रपाठात्पुरा पञ्चहोत्रा हुत्वा प्रतिस्पर्धिभ्योऽङ्गिरोभ्यः पूर्वमेव स्वर्गं प्राप्ताः। अतोऽन्योऽपि तथा हुत्वा स्वर्गं प्राप्नोति । संवत्सरस्य सर्वात्मकप्रजापतिरूपत्वेन पञ्चहोतृत्वं स्वर्गलोकरूपत्वं च द्रष्टव्यम् ।

अथोक्त होमकर्त्रादित्यप्रशंसामुखेन तदादित्यध्यानं फलाय विधत्ते-

तेऽब्रुवन्नङ्गिरस आदित्यान् (६) । क्व स्थ । क्व वः सद्भ्यो हव्यं वक्ष्याम इति । छन्दःस्वित्यब्रुवन् । गायत्रियां त्रिष्टुभि जगत्यामिति । तस्माच्छन्दःसु सद्भ्य आदित्येभ्यः । आङ्गीरसीः प्रजाहव्यं वहन्ति । वहन्त्यस्मै प्रजा बलिम् । ऐनमप्रतिख्यातं गच्छति । य एवं वेद, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते पूर्वोक्ताः प्रथमतः स्वर्गप्राप्तिरहिता अङ्गिरस आदित्यान्पप्रच्छुः । आदित्याः कुत्र यूयं स्थिता युष्मदर्थं हव्यं वोढुकामा वयं कुत्र स्थितेभ्यो युष्मभ्यं हविर्वहनं करिष्याम इति । ते चाऽऽदित्या गायत्र्यादिच्छन्दःसु वयं गूढाः स्थिता इत्यब्रुवन् । तस्मादङ्गिरोगोत्रे समुत्पन्नाः प्रजा गायत्र्यदिच्छन्दांस्युच्चार्य तेष्वादित्यान्भावयन्तस्तेभ्यो हव्यं प्रयच्छन्ति । एवमादित्यवृत्तान्तं यो वेदास्मै वेदित्रे सर्वाः प्रजाः पूजां वहन्ति । केनाप्यप्रतिख्यातमेतमादित्यसमूहमसौ वेदिता पाप्नोति । अत्र य एवं वेदेति

ज्ञानविवक्षायामादित्यप्रशंसा । ध्यानविवक्षायामुक्तफलप्राप्तिः । एवं सर्वत्र द्रष्टव्यम् ।

प्रकाशरान्तरेणाऽऽदित्यप्रशंसामुखेन ध्यानं विधत्ते -

द्वादश मासाः पञ्चर्तवः । त्रय इमे लोकाः । असावादित्य एकवि ँ शः । एतस्मिन्वा एष श्रितः । एतस्मिन्प्रतिष्ठितः । य एवमेत ँ श्रितं प्रतिष्ठितं वेद । प्रत्येव तिष्ठति (७), इति ।

स्वादिति संवत्सरो जनयध्वमितीत्यब्रवीत्पूर्व इत्यादित्यानृतवः षट् च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
द्वितीयाध्याये तृतीयोऽनुवाकः ।। ३ ।।

मासाद्यपेक्षया योऽयमेकविंश आदित्यः स एष एतस्मिन्प्रकृते पञ्चहोतृमन्त्रे श्रितः । तद्विषयानुष्ठानुक्तत्वात् । किंचैतस्मिन्मन्त्रे प्रतिष्ठितस्तज्जन्यफलभागित्वात् । तमेतं पञ्चहोतृमन्त्रे प्रतिष्ठितं चाऽऽदित्यं यो वेद स प्रतितिष्ठत्येव ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयप्रपाठके
तृतीयोऽनुवाकः ।।३।।

अथ द्वितीयप्रपाठके चतुर्थोऽनुवाकः ।

तृतीये चतुर्होतृपञ्चहोतृमन्त्रग्रहभागयोः पुरुषार्थप्रयोगो विहितः । चतुर्थे जगत्सृष्टिकथनमुखेन होतृमन्त्रप्रशंसा क्रियते । तत्र प्रथमं तावद्दशहोतारं प्रशंसति-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिरकामयत प्रजायेयेति । स एतं दशहोतारमपश्यत् । तेन दशधाऽऽत्मानं विधाय । दशहोत्राऽतप्यत । तस्य चित्तिः स्रुगासीत् । चित्तमाज्यम् । तस्यैतावत्येव वागासीत् । एतावान्यज्ञ क्रतुः, इति ।

प्रजापतिः स्रष्टुकामस्तत्साधनं वेदेषु विचार्य दशहोतृमन्त्रं दृष्ट्वा तन्मन्त्रोक्तप्रकारेण स्वस्वरूपमेव चित्तिश्चित्तवागाद्यवयवैर्दशधा दशप्रकारजातेन दशहोत्रमन्त्रेण तपः कृतवान् । तपशब्दोऽयं पर्यालोचनवाची । पर्यालोचन रूपं मानसं यज्ञं कृतवानित्यर्थः । तस्य मानसयज्ञे प्रवृत्तस्य बाह्यसाधनाभावाद्येयं स्वकीया चित्तिर्निर्विकल्पकज्ञानहेतुभूताऽन्तः करणवृत्तिः सैव स्रुगासीत् । यत्तु चित्तं सविकल्पज्ञानसाधनमन्तःकरणं तदेवाऽऽज्यम् । एवमुत्तरत्रापि योज्यम् । तदेवं संगृह्य प्रदर्श्यते । तस्य प्रजापतेस्तदानीं दशहोतृमन्त्ररूपा यावत्युच्चार्यत एतावत्येव वागासीत् । इममेव पुनः पुनरावर्तयति । तत्रान्यं वाग्व्यापारं न करोतीत्यर्थः । तस्मिन्मन्त्रे यावानर्थः प्रतीयत एतावानेव तदीयो यज्ञक्रतुः, न तु बाह्यानुष्ठानरूपः । यज्ञशब्दो हविस्त्यागवाची । क्रतुशब्दो हविस्त्यागयुक्तकृत्स्नयोगं वक्ति । तदेवं प्रजापत्यनुष्ठान-वाचित्वात्प्रशस्तोऽयं दशहोतृमन्त्रः ।

अथ चतुर्होतृमन्त्रं प्रशंसति-

स चतुर्होतारमसृजत । सोऽनन्दत् (१) । असृक्षि वा इममिति । तस्य सोमो हविरासीत् । स चतुर्होत्राऽतप्यत । सोऽताम्यत् । स भूरिति व्याहरत् । स भूमिमसृजत । अग्निहोत्रं दर्शपूर्णमासौ यजूꣳषि । स द्वितीयमतप्यत । सोऽताम्यत् । स भुव इति व्याहरत् । (२) । सोऽन्तरिक्षमसृजत । चातुर्मास्यानि सामानि । स तृतीयमतप्यत । सोऽताम्यत् । स सुवरिति व्याहरत् । स दिवमसृजत । अग्निष्टोममुक्थ्यमतिरात्रमृचः । एता वै व्याहृतय इमे लोकाः । इमान्खलु वै लोकाननु प्रजाः पशवश्छन्दाꣳसि प्राजायन्त । य एवमेताः प्रजापतेः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रथमा व्याहृतीः प्रजाता वेद (३) । प्र प्रजया पशुभिर्मिथुनैर्जायते, इति ।

स प्रजापतिर्दशहोतृमन्त्रानुष्ठानेन सत्यसंकल्पः सन्स्वसंकल्पेन चतुर्होतृमन्त्रमसृजत । स इमं मन्त्रं सृष्टवानस्मीत्येवं हृष्टवान् । तस्य संतोषयुक्तस्य प्रजापतेः संकल्पमात्रेण सोमवल्लीरसो हविरासीत् । स पुनश्चतुर्होतृमन्त्रेण सोमाख्यं हविः प्रक्षिप्य होमानुष्ठानरूपं तपोऽकुरुत । तेन स्वव्यापारेण श्रान्तो दीर्घश्वासं कृतवान् । तदनुकरुणपो भूरिति शब्दः । स च प्रजापतिना व्याहृतत्वात्प्रथमलोकप्रकाशव्याहृतिरूपो मन्त्र इत्युच्यते । तेन मन्त्रेण ज्ञातां तदर्थरूपां भूमिं संकल्प्यासृजत् । ततः संकल्पादेवाग्निहोत्रादिकमसृजत । एवं द्वितीयतृतीयपर्यायौ व्याख्यातव्यौ । एवमुक्तेन प्रकारेणैताभूरादिव्याहृतय एव होमत्रयरूपेण परिणताः । तानिमाल्लँोकाननुसृत्य प्रजादिकमुत्पन्नम् । एतद्वेदनस्य प्रजादिप्राप्तिःफलम् ।

अथ पञ्चहोतृमन्त्रं प्रशंसति –

स पञ्चहोतारमसृजत । स हविर्नाविन्दत । तस्मै सोमस्तनुवं प्रायच्छत् । एतत्ते हविरिति । स पञ्चहोत्राऽतप्यत । सोऽताम्यत् । स प्रत्यङ्ङबाधत । सोऽसुरानसृजत । तदस्याप्रियमासीत् (४) । तद्दुर्वर्णँ हिरण्यमभवत् । तद्दुर्वर्णस्य हिरण्यस्य जन्म । स द्वितीयमतप्यत । सोऽ ताम्यत् । स प्राङबाधत । स देवानसृजत । तदस्य प्रियमासीत् । तत्सुवर्णँ हिरण्यमभवत् । तत्सुवर्णस्य हिरण्यस्य जन्म । य एवँ सुवर्णस्य हिरण्यस्य जन्म वेद (५) । सुवर्ण आत्मना भवति । दुर्वर्णोऽस्य भ्रातृव्यः । तस्मात्सुवर्णँ हिरण्यं भार्यम् । सुवर्ण एव भवति । ऐनं प्रियं गच्छति नाप्रियम्, इति ।

स प्रजापतिः पञ्चहोतृमन्त्रं सृष्ट्वा तेन होतुमलब्धे हविषि सोमस्य शरीरं हविष्ट्वेनं लब्ध्वा पञ्चहोतृमन्त्रेण तं सोमं हुत्वा श्रान्तवान् । श्रान्तः सन्नसौ प्रत्यङ्ङबाधत निरुद्धप्राणवृत्तिः सञ्शरीर एव महतीं पीडां प्राप्तवान् । तस्यामुपद्रववेलायामसुरानसृजत । तेषामसुराणां सृष्टिहेतुभूतं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत्पीडायुक्तं शरीरमस्य प्रजापतेरप्रियमासीत् । तच्चाप्रियं शरीरं दुर्वर्णहिरण्यरूपेण निष्पन्नम् । हिरण्यशब्दः सर्वलोहवाच्यत्र । तत्र दुर्वर्णविशेषणाद्रजतसीसताम्रादिवाची भवति । तदेव रजतताम्रादिरूपस्य लोहस्य लोके जन्म संपन्नम् । स प्रजापतिर्द्वितीयवारं पञ्चहोतृमन्त्रेण सोमद्रव्यं होमरूपं तपः कृत्वा श्रान्तः प्राङबाधत प्राङ्वृत्तिप्राणत्वाच्छ्वासनिरोधमंतरेण तस्मिन्नवसरे देवानसृजत । श्रममात्रबाधां प्राप्तवान् । तदेव स्त्रष्टुः शरीरं प्रजापतेः प्रियं भूत्वा सुवर्णहिरण्यरूपेण परिणतम् । रजतादिव्यावृत्तये सुवर्णं विशेषणम् । तदेवं लोके सुवर्णजन्म प्रवृत्तम् । तज्जन्म वेदिता स्वशरीरसौन्दर्येण मणिमुक्ताद्याभरणेन सुवर्णो भवति । तद्वैपरीत्येन भ्रातृव्यो दुर्वर्णो भवति । यस्मादेवं सुवर्णं प्रशस्तं तस्मात्पुरुषेण हस्तकर्णादौ सुवर्णाभरणं धार्यते । तेन लोकद्वयेऽपि रमणीयो भवति । एनं सुवर्णधारिणं पुरुषं सत्काररूपं प्रियमेव प्राप्नोति न तु कदाचिदपि तिरस्कारादिरूपमप्रियं प्राप्नोति ।

अथ सप्तहोतृमन्त्रं प्रशंसति-

स सप्तहोतारमसृजत । स सप्तहोत्रैव सुवर्गं लोकमैत् , इति ।

स प्रजापतिः सप्तहोतृमन्त्रं सृष्ट्वा तेन हुत्वा स्वर्गं प्राप्तवान् । यद्यपि प्रजा पतेर्नैतत्फलं युक्तं तथाऽ प्याचारप्रवर्तकत्वेन स्वर्गं लोकं गतवानिति नास्ति विरोधः ।

होतृमन्त्रप्रशंसाप्रसङ्गेन सामवेदगतानस्तोमान्प्रशंसति-

त्रिणवेन स्तोमेनैभ्यो लोकेभ्योऽसुरान्प्राणुदत । त्रयस्त्रिँशेन प्रत्यतिष्ठत् । एकविँशेन रुचमधत्त (६) । सप्तदशेन प्राजायत । य एवं विद्वान्सोमेन यजते । सप्तहोत्रैव सुवर्गं लोकमैति । त्रिणवेन स्वेमैनैभ्यो लोकेभ्यो भार्तृव्यान्प्रणुदते । त्रयस्त्रिँशेन प्रतितिष्ठति । एक विँशेन रुचं धत्ते । सप्तदशेन प्रजायते । तस्मात्सप्तदशः स्तोमो न निर्हृत्यः । प्रजापतिर्वै सप्तदशः । प्रजापतिमेव मध्यतो धत्ते प्रजात्यै (७), इति ।

अनन्दद्भुव इति व्याहरद्वेदाऽऽसीद्वेदाऽऽ धत्त प्रजात्यै ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
द्वितीयाध्याये चतुर्थोऽनुवाकः ।। ४ ।।

स प्रजापतिस्त्रिणवादिस्तोमैरसुरान्मरणादिफलेनैव योजयामास । तस्मादन्योऽप्येवं ज्ञात्वा सोमेन यजमानो दीक्षाकालीनसप्तहोतृहोमेन स्वर्गं प्राप्नोति । त्रिणवादिस्तोमैर्भ्रातृव्यनिराकरणादिफलं च प्राप्नोति । यस्मात्सप्तदशस्तोमः प्रजोत्पत्तिहेतुस्तस्मादयं सोमयागाद्बहिर्नि निःसारणीयः । किंतु यागमध्य एव प्रयोक्तव्यः । तस्य च सप्तदशस्तोमस्य सप्तदशाक्षरात्मकप्रजापतिसाम्यात्प्रजापतिमेव मध्ये स्थापयति । तच्च प्रजोत्पत्त्यर्थं भवति ।

अत्र मीमांसा । तृतीयाध्यायस्य चतुर्थपादे चिन्तितम् –

हिरण्यं वर्णवद्धार्यं क्रत्वङ्गं भरणं भवेत् ।
हिरण्यसंस्कृतिर्वाऽत्र वर्णो वोत पुमर्थता ।।
वैदिकत्वात्क्रतुस्मृत्या तदङ्गं कर्मकारके ।
प्राधान्यात्संस्कृतिर्वर्णो गुणोऽस्तु विधिलाघवात् ।
अनारभ्य श्रुतत्वेन नियता न क्रतुस्मृतिः ।
अतः पुमर्थता स्वर्गः कल्प्योऽन्यद्वाऽस्तु रात्रिवत् । [इति]

अनारभ्य श्रूयते-"तस्मात्सुवर्णं हिरण्यं भार्यम् । सुवर्ण एव भवति" इति । तत्र यदेतच्छोभनवर्णोपेतं हिरण्यधारणं तस्य वैदिकक्रियारूपत्वेन क्रतुस्मारकत्व क्रत्वङ्ग धारणमि त्येक पक्षकारकं किंतु क्रतुगतं हिरण्यं धारणेन संस्क्रियते भार्यमित्यत्र ण्यत्प्रत्ययस्य कर्मणि विहितत्वेन कर्मकारकस्य हिरण्यस्य प्राधान्यावगमादिति द्वितीयः पक्षः । वर्णावाशिष्टधारणाविधाने गौरवाद्धारणसहितं हिरण्यमनूद्य शोभनवर्णमात्रं विधेयमिति तृतीयः पक्षः । त्रेधाऽपि क्रत्वर्थो विधिः । न तु पुरुषार्थ इति प्राप्ते ब्रूमः । यद्धि क्रतुप्रकरणे श्रुतं तस्यास्ति नियमेन क्रतुस्मारकत्वम् । इदं त्वनारभ्याधीतम् न चात्र हिरण्यं जुह्वादिवत्क्रताव्यभिचरितम् । येन क्रतुस्मृतिर्नियम्येत ननु संस्कार्यत्वान्यथानुपपत्त्या क्रतुप्रवेशः स्यात् । न हि धारणेन संस्कृतस्य हिरण्यस्य लौकिकः कश्चिदुपयोगोऽस्तीति चेत् । न । क्रतावप्युपयोगाभावात् । क्रतूपयोगोऽपि कल्प्यत इति चेत् । न । क्रतूपयोगित्वेन संस्कार्यत्वं तेन च क्रतूपयोग इत्यन्योन्याश्रयत्वात् । न च कर्मकारकत्वात्संस्कार्यत्वम् । परसमवेतक्रियाफलशालित्वमात्रस्य कर्मलक्षणत्वात् । अतः क्रतौ नियन्तुमशक्यत्वात्पुरुषार्थमिदं धारणम् । न चात्र फलभावः। विश्वजिन्न्यायेन स्वर्गस्य कल्प्यत्वात् । अथवा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रात्रिसत्रे यथा वाक्यशेषेणार्थवादेन श्रुता प्रतिष्ठा फलत्वेन कल्पिता तथाऽत्रापि "सुवर्ण एव भवति । दुर्वर्णोऽस्य भ्रातृव्यः" इत्यर्थवादगतं फलमस्तु । तस्मात्पुरुषार्थो धारणविधिः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
द्वितीयप्रपाठके चतुर्थोऽनुवाकः ।। ४ ।।

अथ द्वितीयप्रपाठके पञ्चमोऽनुवाकः ।

चतुर्थे होतृमन्त्रप्रशंसा कृता पञ्चमे दक्षिणाप्रतिग्रह-मन्त्रानुवाकव्याख्यानं क्रियते । स चानुवाक आरण्यकाण्ड एवमाम्नातः-"देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि । राजा त्वां वरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यम् । तेनामृतत्वमश्याम् । वयो दात्रे । मयो मह्यमस्तु प्रतिग्रहीत्रे । क इदं कस्मा अदात् । कामः कामाय । कामो दाता । कामः प्रतिग्रहीता । काम ँ समुद्रमाविश । कामेन त्वा प्रतिगृह्णामि कामैतत्ते । एषा ते काम दक्षिणा । उत्तानस्त्वाऽङ्गीरसः प्रतिगृहणातु" इति । सोऽयं तस्मिन्ननुवाक एको मन्त्रः । हे प्रतिगृह्यमाण द्रव्य सवितुर्देवस्य प्रसवे प्रेरणे सत्यश्विसंबन्धिभ्यां बाहुदण्डाभ्यां पूषसंबन्धिभ्यां हस्ताभ्यां त्वां प्रतिगृह्णामि । हे दक्षिणे देवि वरुणो राजा हिरण्यरूपां त्वाग्नये प्रापयतु । तेनाग्निप्रापणेन प्रतिग्रहदोषाभावादहममृत्वमश्यां नरकाभावरूपं प्राप्नुयाम् । इदं च दक्षिणादात्रे वयोऽस्तु । पक्षी भूत्वा दातारं स्वर्गं नयत्वित्यर्थः । प्रतिग्रहीत्रे मह्यं मयः सुखकरमस्तु । कः प्रजापतिरिदं द्रव्यं प्रजापतये दत्तवान् । अन्तर्यामिरूपेणदातृप्रतिग्रहीत्रोः प्रेरकत्वात् । तथा कामः कामाय दत्तवान् । यथा प्रजापतिरदृष्टः प्रेरकस्तथा कामस्याऽदृष्टप्रेरकत्वात् । तस्मात्काम एव दाता प्रतिग्रहीता च । स्वर्गादिफलविषयः कामो दाता । ऐहिकसुखविषयः कामः प्रतिग्रहीता । ततो हे दक्षिणे समुद्रसमानं कामं प्रविश । कामेन निमित्तेन त्वां प्रतिगृहणामि । हे मद्हृदयवर्तिकामदेव तद्द्रव्यं तुभ्यं भवतु । हे काम ते त्वदर्थमेवैषा दक्षिणा प्रवृत्ता । अङ्गिरोगोत्रे उत्पन्न उत्तानाख्यो महर्षिस्त्वां प्रतिगृह्णातु ।

अथ वस्त्रादिद्रव्यविषयाः षोडश मन्त्रास्तस्मिन्ननुवाक एवमाम्नाताः- "सोमाय वासः । रुद्राय गाम् । वरुणायाश्वम् । प्रजापतये पुरुषम् । मनवे तल्पम् । त्वष्ट्रेऽज्याम् । पुष्णेऽविम् । निर्ऋत्या अश्वतरगर्दभौ । हिमवतो हस्तिनम् । गन्धर्वाप्सरोभ्यः स्रगलंकरणे । विश्वेभ्यो देवेभ्यो धान्यम् । वाचोऽन्नम् । ब्रह्मण ओदनम् ।

Digitized by Madhuban Trust, Delhi

समुद्रायाऽऽपः । उत्तनायाऽऽङ्गीरसायान्नः । वैश्वानरायरथम् ’’ इति । एतेषु सर्वेषु मन्त्रेषु देवि दक्षिणा इत्यन्तः पूर्वानुषङ्गः । तेनामृतत्वमित्यादिरुत्तरानुषङ्गः ।

तत्र च रथप्रतिग्रहमन्त्रस्योत्तरानुषङ्गात्पूर्वं काचिदृगेवमाम्नाता–

वैश्वानारः प्रत्नथा नाकमारुहत् । दिवः पृष्ठं भन्दमानः सुमन्मभिः।

स पूर्ववज्जनयञ्जन्तवे धनम् । समानमज्या परियाति जागृविः । ।। इति ।।

वैश्वानराख्यो देवः प्रत्नथा पुरातनशरीरधारी सन्स्वर्गमारूढवान् । स च दिवः पृष्ठं द्युलोकस्योपरिभागं मन्मभिर्मरनविशेषैर्भन्दमानः कल्याणं कुर्वन्वर्तते । अयं यजमान इमां दक्षिणां दत्तवानित्येवं देवानामग्रे स्मारयतीत्यर्थः । स वैश्वानरो जन्तवे प्राणिरूपाय यजमानाय धनं पूर्ववज्जनयत् । यत्र यजमानः पुरा यथा दक्षिणां दत्तवांस्तथैव तदनुरूपं फलं जनयति । स वैश्वानरो जागृविः सावधानः सन्नज्या स्वर्गे गमनशीलः समानं परियाति यावद्दक्षिणार्थं द्रव्यं दत्तं तेन सदृशं तद्योग्यं फलं एरितः प्रापयति । अस्या ऋच उपर्यदुषङ्गाभ्यां सह पूर्वोक्त एव स्थाविषयो मन्त्रस्तस्मिन्नुवाक एवमाम्नातः–“राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथम् । ते नामृतत्वपश्याम् । वयो दात्रे । भयो मह्यमस्तु प्रतिग्रहीत्रे । क इदं कस्मा अदात् । कामः कामाय । कामो दाता । कामः प्रतिग्रहीता । काम समुद्रमाविश। कामेन त्वा प्रतिगृह्णामि । कामैतत्ते । एषा ते काम दक्षिणा । उत्तानस्त्वाऽऽङ्गीरसः प्रतिगृह्णातु” इति । अनुषङ्गं योजयित्वा प्रदर्शयितुं पुनः पाठः सोऽयमनुवाकोऽत्र व्याख्येयः।

तत्राऽऽदौ प्रतिग्रहप्रकारं विधत्ते–

देवा वै वरुणमयाजयन् । स यस्यै यस्यै देवतायै दक्षिणामनयत् । तामब्लीनात् । तेऽब्रुवन् । व्यावृत्य प्रतिगृह्णाम । तथा नो दक्षिणा न ब्लैष्यतीति । ते व्यावृत्य प्रत्यगृह्णन् । ततो वै तान्दक्षिणा नाब्लीनात् । य एवं विद्वान्व्यावृत्य दक्षिणां प्रतिगृह्णाति । नैनं दक्षिणा ब्लीनाति (१), इति ।

यदा देवाः स्वयमृत्विजो भूत्वा वरुणं याजितवन्तस्तदा वरुण एकैकस्यै देवतायै दक्षिणां दत्त्वा तां देवतां विशीर्णामकरोत् । ते च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवास्तत्परिहारोपायमन्यव्यवधानं निश्चित्याग्नये हिरण्यं सोमाय वास इत्येवं तत्तद् द्रव्येषु देवतान्तरव्यवधानेन स्वयं व्यावृत्ता भूत्वा प्रत्यगृह्णन्। ततो व्यवधानादियं दक्षिणा तान्देवाञ्शीर्णान्नाकरोत् । अत्रान्योऽप्येतैर्मन्त्रैर्देवतान्तरव्यवधानं कृत्वा प्रतिगृह्णन्विशीर्णो नैव भवेत् ।

अथ मन्त्रेषु द्रव्याधिपतीनां देवानामेव प्रतिगृहीतृत्वेन निर्देशात्तद् व्यवधानेन प्रतिग्रहो न तु साक्षादित्यमुं मन्त्राणामभिप्रायं दर्शयति-

राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यमित्याह । आग्नेयं वै हिरण्यम् । स्वयैवैनद्देवतया प्रतिगृह्णाति । सोमाय वास इत्याह । सौम्यं वै वासः । स्वयैवैनद्देवतया प्रतिगृह्णाति । रुद्राय गामित्याह । रौद्री वै गौः । स्वयैवैनां देवतया प्रतिगृह्णाति । वरुणायाश्वमित्याह (२) । वारुणो वा अश्वः । स्वयैवैनं देवतया प्रतिगृह्णाति । प्रजापतये पुरुषमित्याह । प्राजापत्यो वै पुरुषः । स्वयैवैनं देवतया प्रतिगृह्णाति । मनवे तल्पमित्याह । मानवो वै तल्पः । स्वयैवैनं देवतया प्रतिगृह्णाति । उत्तानायाऽऽङ्गीरसायान इत्याह । इयं वा उत्तान आङ्गीरसः (३) । अनयैवैनत्प्रतिगृह्णाति, इति ।

हिरण्यस्याग्निरेतोरूपत्वमाधानप्रकरणे श्रुतम् । तस्मात्तदाग्नेयम् । वस्त्रादीनां सोमादिसंबन्धः शाखान्तरगतार्थवादेषु प्रसिद्ध इत्येवं वैशब्देन सूच्यते । केषुचिन्मन्त्रेषु व्याख्यानस्य व्युत्पादितत्वादन्येष्वपि त्वष्ट्रेऽजामित्यादिषु व्याख्यातमुन्नेयम् । शकटमन्त्रे योऽयमुत्तानाख्यो देवस्तस्य भूमित्वेन प्रशंसाद्भूम्यैव शकटं परिगृहीतं भवति ।

इव प्रतिग्रहे-"वैश्वानरः प्रत्नया" इत्येतामृचं विधत्ते-

वैश्वानर्यर्चा रथं प्रतिगृह्णाति । वैश्वानरो वै देवतया रथः । स्वयैवैनं देवतया प्रतिगृह्णाति, इति ।

अश्यामित्यस्योत्तमपुरुषस्य तात्पर्यं दर्शयति-

तेनामृतत्वमश्यामित्याह । अमृतमेवाऽऽत्मन्धत्ते, इति ।

Digitized by Madhuban Trust, Delhi

पक्षिवाचकस्य वयाशब्दस्य तात्पर्यं दर्शयति-

वयो दात्र इत्याह । वय एवैनं कृत्वा । सुवर्गं लोकं गमयति, इति ।

पक्षिवदुत्पतनसमर्थमेनं यजमानं कृत्वत्यर्थः ।

मयः शब्दवाच्यस्य मङ्गलस्य सुखस्य स्वसंबन्धप्रार्थनया स्वस्य परिरक्षा क्रियत इत्येतत्तात्पर्यं दर्शयति-

मयो मह्यमस्तु प्रतिगृहीत्र इत्याह (४) । यद्वै शिवम् । तन्मयः । आत्मन एवैषा परीत्तिः, इति ।

परीत्तिः परिदानं रक्षा ।

कशब्दस्य प्रजापतिवाचकत्वं दर्शयति-

क इदं कस्मा अदादित्याह । प्रजापतिर्वै कः । स प्रजापतये ददाति, इति ।

दातृप्रतिगृहीत्रोः काम एव प्रेरक इत्येतत्प्रसिद्धामिति दर्शयति-

कामः कामायेत्याह । कामेन हि ददाति । कामेन प्रतिगृह्णाति, इति ।

कामस्य प्रेरकत्वे सत्यन्वयव्यतिरेकाभ्यां दातृत्वं प्रतिगृहीतृत्वं च कामस्यैव पर्यवस्यतीत्येतद्दर्शयति-

कामो दाता कामः प्रतिगृहीतेत्याह (५) । कामो हि दाता । कामः प्रतिग्रहीता, इति ।

अवसानराहित्येन समुद्रसाम्यं दर्शयति-

काम समुद्रमाविरोत्याह । समुद्र इव हि कामः । नेव हि कामस्यान्तोऽस्ति । न समुद्रस्य, इति ।

कामेनेति निमित्तनिर्देशः परलोके काम्यमानफलसिद्ध्यर्थ इत्येतद्दर्शयति-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कामेन त्वा प्रतिगृह्णामीत्याह । येन कामेन प्रतिगृह्णाति । स एवैनममुष्मिँल्लोके काम आगच्छति, इति ।

कामं संबोध्य द्रव्यसमर्पणं दक्षिणानिर्देशश्च परलोके कामदेवतायामेव दक्षिणाफलवाञ्छयेत्येतद्दर्शयति-

कामैतत्त एषा ते काम दक्षिणेत्याह । काम एव तद्यजमानोऽमुष्मिँल्लोके दक्षिणामिच्छति । न प्रतिग्रहीतरि, इति ।

न हि यजमानेन सह प्रतिग्रहीता स्वर्गं वाञ्छति । येन यजमानः प्रतिग्रहीतरि फलमिच्छेत् । कामदेवतायास्तु तत्र विद्यमानतया यजमानस्य दक्षिणाफलेच्छा युक्ता ।

अत्र प्रतिग्रहमन्त्रतात्पर्यं संक्षिप्य दर्शयति-

य एवं विद्वान्दक्षिणां प्रतिगृह्णाति । अनृणामेवैनां प्रतिगृह्णाति (६), इति ।

व्लीनात्यश्वमित्याहाऽऽङ्गीरसः प्रतिग्रहीत्र इत्याह प्रतिग्रहीतेत्याह दक्षिणेत्याह चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

द्वितीयाध्याये पञ्चमोऽनुवाकः ।। ५ ।।

य एवमुक्तप्रकारं विद्वानेतैर्मन्त्रैर्देवतान्तरव्यवधानं कृत्वा यः प्रतिगृह्णाति स एनां दक्षिणामृणरहितामेव प्रतिगृह्णाति । अन्यथा परद्रव्यस्वीकाराद्दणवती दक्षिणा स्यात् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

द्वितीयप्रपाठके पञ्चमोऽनुवाकः ।। ५ ।।

अथ द्वितीयप्रपाठके षष्ठोऽनुवाकः ।

पञ्चमे प्रतिग्रहमन्त्रा व्याख्याताः । षष्ठे द्वादशाहर्भागगतस्य दशरात्रस्य दशमेऽहनि होतृमन्त्रान्विधित्सुरादौ तावत्सर्पराज्ञीभिरृग्भिः स्तुतिं विधत्ते-

अन्तो वा एष यज्ञस्य । यद्दशममहः । दशमेऽ

Digitized by Madhuban Trust, Delhi

हन्त्सर्पराज्ञिया ऋग्भिः स्तुवन्ति । यज्ञस्यैवान्तं गत्वा । अन्नाद्यमवरुन्धते, इति ।

यद्यपि दशमादह्न ऊर्ध्वभाव्युदयनीयाख्यमहर्द्वादशाहयज्ञस्यान्तस्तथाऽप्युपान्त्यत्वादन्तत्वोपचारः । सर्पराज्ञी भूमिः, तस्याः संबन्धिन्य ऋचो "भूमिर्भूम्ना" इत्याद्यास्ताभिः स्तुतौ सत्यां द्वादशाहयज्ञस्यान्तं प्राप्य समीचीनमन्नं प्राप्नोति । तस्यामृचि "अग्निमन्नाद्यायाऽऽदधे " इत्याम्नानात् ।

ऋक्संख्यां विधत्ते-

तिसृभिः स्तुवन्ति । त्रय इमे लोकाः । एभ्य एव लोकेभ्योऽन्नाद्यमवरुन्धते । पृश्निवतीर्भवन्ति । अन्नं वै पृश्नि (१) । अन्नमेवावरुन्धते, इति ।

पृश्निशब्द आस्वृक्षु विद्यत इति पृश्निवत्यः । अन्नस्य श्वेतवर्णत्वात्पृश्निशब्दवाच्यत्वम् ।

आस्वृक्षु गानवेलायां प्रस्तावोद्गीथप्रतिहारभागेषु मानसगानं विधत्ते-

मनसा प्रस्तौति । मनसोद्गायति । मनसा प्रतिहरति । मन इव हि प्रजापतिः। प्रजापतेराप्त्यै, इति ।

जगत्सृष्टेः पूर्वमव्यक्तरूपत्वात्प्रजापतेर्मनः साम्यम् ।

ऋचां सर्पराज्ञीसंबन्धं प्रशंसति-

देवा वै सर्पाः । तेषामियँ राज्ञी । यत्सर्पराज्ञिया ऋग्भिः स्तुवन्ति । अस्यामेव प्रतितिष्ठन्ति, (२), इति ।

सर्पन्ति गच्छन्तीति देवाः सर्पास्तेषां सर्पाणां देवानां राज्ञी भूमिः । भूमौ हि सर्पणं सुशकम् । अतस्तदीयाभिर्ऋग्भिः स्तुतौ भूम्यां प्रतिष्ठा भवति । यथोक्तस्तुतेरूर्ध्वं होतृमन्त्रपाठं विधत्ते-

चतुर्होतॄन्होता व्याचष्टे । स्तुतमनु शसतिँ शान्त्यै, इति ।

स्तोत्रानुभाविशंसनेन देवाः शान्ता अनुग्रहकरा भवन्ति । अहर्विशेषमन्त्रविशेषयोः संबन्धं प्रशंसति-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्तो वा एष यज्ञस्य । यद्दशममहः । एतत्खलु वै देवानां परमं गुह्यं ब्रह्म । यच्चतुर्होतारः । दशमेऽहँ श्चतुर्होतॄन्व्याचष्टे । यज्ञस्यैवान्तं गत्वा । परमं देवानां गुह्यं ब्रह्मावरुन्धे । तदेव प्रकाश गमयति (३) । तदेनं प्रकाशं गतम् । प्रकाशं प्रजानां गमयति, इति ।

प्रथमानुवाकोक्तवद्व्याख्येयम् ।

यदुक्तं सूत्रकारेण - "औदुम्बरीं परिष्वज्योदरैरुपस्पृशन्तो वाग्यतास्तिष्ठन्ति" इति । तदेतद्विधत्ते-

वाचं यच्छति । यज्ञस्य धृत्यै, इति ।

यदप्यन्यत्सूत्रकारेणोक्तम्-"भूर्भुवः सुवरित्यह्ना रात्रिं ध्यात्वाऽधिवृक्षसूर्ये सुब्रह्मण्यया वाचं विसृजेत् " इति । तत्र ध्यानवाग्विसर्जने क्रमेण विधत्ते-

यजमानदेवत्यं वा अहः । भ्रातृव्यदेवत्या रात्रिः । अह्ना रात्रिं ध्यायेत् । भ्रातृव्यस्यैव तल्लोकं वृङ्क्ते । यद्दिवा वाचं विसृजेत् । अहर्भ्रातृव्यायोच्छिँषेत् । यन्नक्तं विसृजेत् । रात्रिं भ्रातृव्यायोच्छिँषेत् । अधिवृक्षसूर्ये वाचं विसृजति । एतावन्तमेवास्मै लोकमुच्छिँषति । यावदादित्योऽस्तमेति (४), इति ।

पृश्निं तिष्ठन्ति गमयति शिँषेत्पञ्च च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

द्वितीयाध्याये षष्ठोऽनुवाकः ।। ६ ।।

अहर्यथा प्रकाशं करोति तथा यजमानो देवताभ्यो हविः प्रकाशयतीत्यह्नो यजमानो देवता । "पाप्मा भ्रातृव्यः" इति श्रुत्यन्तरात्पाप्मनश्च देवहविर्विरोधाद्रात्रेश्च प्रकाशराहित्याद्रात्रेर्भ्रातृव्यो देवता । एवं सत्यहो रूपेण रात्रेर्यद्ध्यानं तेन रात्रिस्वरूपं भ्रातृव्यस्य तल्लोकवर्जितं भवति । दिवा रात्रौ वा वाग्विसर्गे स कालो भ्रातृव्यायावशेषितः स्यात् । अतस्तत्परिहारायाधिवृक्षसूर्ये वाचं विसृजेत् । सूर्यशब्देनाऽऽतप उपलक्ष्यते । स चाऽऽतपो भूमिं परित्यज्य वृक्षमधिरुह्य तदग्र एव यदा

Digitized by Madhuban Trust, Delhi

दृश्यते तदा वाग्विसर्गे सति तत आरभ्यास्तमयादर्वागेतावन्तमल्पमेव कालमस्मै भ्रातृव्यायावशेषयति ।

इति श्रीमत्सायणचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
द्वितीयप्रपाठके षष्ठोऽनुवाकः ।। ६ ।।

अथ द्वितीयप्रपाठके सप्तमोऽनुवाकः ।

षष्ठे द्वादशाहदशमेऽहनि होतृमन्त्रा विहिताः । सप्तमे काम्यफलसाधनत्वमभिप्रेत्य सप्तहोतृमन्त्रं प्रशंसितुमुपाख्यानमाह-

प्रजापतिः प्रजा असृजत । ताः सृष्टाः समश्लिष्यन् । ता रूपेणानुप्राविशत् । तस्मादाहुः । रूपं वै प्रजापतिरिति । ता नाम्नाऽनुप्राविशत् । तस्मादाहुः । नाम वै प्रजापतिरिति । तस्मादप्यामित्रौ संगत्य । नाम्ना चेद् ध्वयेते (१) । मित्रमेव भवतः, इति ।

प्रजापतिना याः प्रजाः सृष्टास्ताः सर्वाः संश्लिष्टा अभवन् । रूपविशेषस्य नामविशेषस्य चासृष्टत्वादेकविधैव भूत्वा देवोऽयं मनुष्योऽयं पशुरयमित्येवं विशेषव्यवहारयोग्या नाभूवन् । तदा प्रजापतिर्विचार्य स्वयमेव रूपविशेषाकारेण नामविशेषाकारेण तासु प्रजासु प्रविष्टः । अत एव शास्त्रज्ञानामरूपयोः सर्ववस्तुव्याप्तिं दृष्ट्वा प्रजापत्यात्मकत्वं तयोराहुः । यस्मान्नाम प्रजापतिरेव तस्मात्पूर्वममित्रावपि द्वौ पुरुषौ कदाचिन्मार्गे ग्रामान्तरे वा संगत्य भो देवदत्त भो यज्ञदत्तेत्येवं तत्तन्नाम्ना परस्परमाह्वयेते चेत्तदानीमेव मित्रौ भवतः । प्रजापते सर्वमित्रत्वेन तदात्मकस्य नाम्नो मित्रत्वसंपादकत्वं युक्तम् । अत एव लौकिकाः साप्तपदीनं सख्यमित्याहुः ।

नामरूपसृष्टिमुक्त्वा विशेषकारणेनेन्द्रसृष्टिमाह-

प्रजापतिर्देवासुरानसृजत । स इन्द्रमपि नासृजत । तं देवा अब्रुवन् । इन्द्रं नो जनयेति । स आत्मन्निन्द्रमपश्यत् । तमसृजत । तं त्रिष्टुग्वीर्यं भूत्वाऽनुप्राविशत । तस्य वज्रः पञ्चदशो हस्त आपद्यत । तेनोदय्यासुरानभ्यभवत् (२), इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदा देवानसुरांश्चासृजत तदा प्रजापतिर्देवस्वामिनमिन्द्रमपिशब्दादसुरस्वामिनं च नासृजत । ततो देवैः प्रार्थितः स्वात्मन्येवान्तःस्थितमिन्द्रं दृष्ट्वा तं बहिरसृजत । तं च सृष्टमिन्द्रं त्रिष्टुब्देवता वीर्यरूपा भूत्वा प्राविशत् । तस्य वीर्यवत इन्द्रस्य हस्ते पञ्चदशभिर्धाराभिर्युक्तः कश्चिद्वज्रः प्रादुरभूत् । तेन वज्रेण युक्तं हस्तमुद्यम्यासुरानभिभूतवान् ।

एतद्वेदनं प्रशंसति–

य एवं वेद । अभि भ्रातृव्यान्भवति, इति ।

अथ सप्तहोतृमन्त्रं प्रशंसति–

ते देवा असुरैर्विजित्य । सुवर्गं लोकमायन् । तेऽमुष्मिँल्लोके व्यक्षुध्यन् । तेऽब्रुवन् । अमुतः प्रदानं वा उपजिजीविमेति । ते सप्तहोतारं यज्ञं विधायायास्यम् । आङ्गीरसं प्राहिण्वन् । एतेनामुत्र कल्पयेति (३) । तस्य वा इयं क्लृप्तिः । यदिदं किंच । य एवं वेद । कल्पतेऽस्मै । स वा अयं मनुष्येषु यज्ञः सप्तहोता । अमुत्र सद्भ्यो देवेभ्यो हव्यं वहति । य एवं वेद । उपैनं यज्ञो नमति, इति ।

ते देवा इन्द्रसाहाय्यवशादसुरैः सह युद्धे विजित्य स्वर्गं प्राप्य तत्र विशेषेण क्षुधिताः सन्तः परस्परमिदमब्रुवन्नयं स्वर्गो भोग्यवस्तुसंपादनस्थानं न भवति । तस्य कर्मभूमित्वाभावात् । कस्मादमुत प्रदानं मनुष्यलोके प्रदीयमानं हविरूपजीव्य तिष्ठामेति । अमुतःशब्दः परोक्षवाचित्वाद्भूम्यपेक्षया परोक्षं स्वर्गं ब्रूते, तथा स्वर्गापेक्षया परोक्षं भूलोकमपि ब्रूते । अत्र तु स्वर्गवासिभिः प्रयुज्यमानत्वाद्भूलोकवाची । ते देवा इत्थं विचार्य सप्तहोतृमन्त्रसाध्यं कंचिद्यागं निर्मायाङ्गिरोगोत्रोत्पन्नमयास्यनामकमृषिं मनुष्यलोके प्रेषितवन्तः । भो, अयास्यैतेन सप्तहोतृयज्ञेनामुत्र मनुष्यलोकेऽनुष्ठानं निष्पादयेति । ततो यदिदं किंचिदनुष्ठानं लोके दृश्यते सेयं सर्वाऽपि तस्यैवायास्यनामकस्य महर्षेः क्लृप्तिः प्रवर्तना । य एवं मुनेः क्लृप्तिं वेद तदर्थमनुष्ठानं सम्यक्प्रवर्तते सप्तहोतृयज्ञो मनुष्येषु प्रवृत्तः सन्नमुत्रसद्भ्यः स्वर्गनिवासिभ्यो देवेभ्यो हव्यं प्रापयति । य एवं सप्तहोतृयज्ञमहिमानं वेद तमेतं वेदितारं स यज्ञः प्राप्नोति । यज्ञानुष्ठनसमर्थो भवतीत्यर्थः ।

Digitized by Madhuban Trust, Delhi

सप्तहोतृमन्त्रे-"वाचस्पते हृद्विधे नामन्" इति योऽयं ग्रहभागस्तं प्रशंसति -

सोऽमन्यत । अभि वा इमे सोऽस्माँल्लोकादमुं लोकं कमिष्यन्त इति । स वाचस्पते हृदिति व्याहरत् । तस्मात्पुत्रो हृदयम् । तस्मादस्माल्लोकादमुं लोकं नाभिकामयन्ते । पुत्रो हि हृदयम् (४), इति ।

हृयेते अभवत्कल्पयेतीति चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
द्वितीयाध्याये सप्तमोऽनुवाकः ।। ७ ।।

मनुष्यलोके यज्ञप्रवर्तकः सोऽयास्यो मुनिर्मनिस्येवचिन्तयदिमे सर्वे मनुष्या अस्माद्भूलोकादमुं स्वर्गलोकमभिकमिष्यन्तः स्वर्गो मे भूयनादित्येवं कामयमाना यज्ञानानुष्ठास्यन्ति न तु पुत्रानुत्पादयिष्यन्ति । ततः संतति विच्छेदे सति स्वर्गवासिनां देवानां भागोऽपि विच्छिद्येतेति विचार्य तत्परिहाराय "वाचस्पते हृद्विधे" इत्यादिग्रहभागमुच्चारितवान् । तत्र मनोवाचिना हृच्छब्देन मनस्कार्यः पुत्रो विवक्षितः । मनस्कार्यत्वं च वाजसनेयिनः समामनन्ति-"मनसा वै सम्यक्स्त्रियमभिहार्यते, तस्यां वै प्रतिरूपः पुत्रो जायते, स आनन्दः" इति । यस्मादत्र पुत्रविवक्षया हृच्छब्द प्रयुक्तस्तस्माल्लोके पुत्रो पुत्रविषयमेव चित्तं सर्वदा प्रवर्तत इत्यर्थः । यस्मात्पुत्रासक्तचित्ता मनुष्यास्तस्मात्तत्प्राधान्येन पुत्रानेव कामयमाना अस्मान्मनुष्यलोकादमुं स्वर्गलोकं नात्यन्तं कामयन्ते । यस्मात्पुत्राश्चित्तस्वरूपास्तस्मान्मनुष्याणां तदुचितम् । अत एव संतानविच्छेदो देवहविर्विच्छेदश्च न भविष्यति । तथा च तस्मिन्मन्त्रशेषे समाम्नातम्-"मा दैव्यस्तन्तुश्छेदि मा मनुष्यः" इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयत्तैत्तिरीय ब्राह्मणभाष्ये द्वितीयकाण्डे
द्वितीयप्रपाठके सप्तमोऽनुवाकः ।। ७ ।।

अथ द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ।

सप्तमे सप्तहोतृमन्त्रसाध्ययज्ञप्रशंसा कृता । अष्टमे होतृमन्त्राणां सोमयागङ्गत्वमभिधीयते । तत्राऽऽदौ सामान्येन यज्ञसंबन्धं विधत्ते-

देवा वै चतुर्होतृभिर्यज्ञमतन्वत । ते वि पाप्मना

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भ्रातृव्येणाजयन्त । अभि सुवर्गं लोकमजयन् । य एवं विद्वाँश्चतुर्होतृभिर्यज्ञं तनुते । वि पाप्मना भ्रातृव्येण जयते । अभि सुवर्गं लोकं जयति, इति ।

चतुर्होतृशब्द एकवचनान्तः पृथिवी होतेत्यमुमेव मन्त्रं ब्रूते । बहुवचनान्तस्तु सर्वानपि होतृमन्त्रान् तैर्मन्त्रैर्यज्ञं तन्वानस्ते देवाः पापरूपेण भ्रातृव्येण वियुक्ता इह लोकेजयं प्राप्य स्वर्गमपि जितवन्तः । तथाऽन्योऽपि लोकद्वयं जयति ।

प्रतिमन्त्रं विशेषेण यज्ञसंबन्धं विधत्ते-

षड् ढौत्रा प्रायणीयमासादयति । अमुष्मै वै लोकाय षड् ढौता । घ्नन्ति खलु वा एतत्सोमम् । यदभिषुण्वन्ति (१) । ऋजुधैवैनममुं लोकं गमयति । चतुर्होत्राऽऽतिथ्यम् । यशो वै चतुर्होता । यश एवाऽऽत्मन्धत्ते । पञ्चहोत्रा पशुमुपसादयति । सुवर्ग्यो वै पञ्चहोता । यजमानः पशुः । यजमानमेव सुवर्गं लोकं गमयति । ग्रहान्गृहीत्वा सप्तहोतारं जुहोति । इन्द्रियं वै सप्तहोता (२) । इन्द्रियमेवाऽऽत्मन्धत्ते, इति ।

प्रायणीयायामिष्टौ यद्धविस्तत्-"सूर्यं ते चक्षु" इति मन्त्रेण वेद्यामासादयेत् । अयं षड्ढोतृमन्त्रः स्वर्गार्थं प्रवृत्तः । तत्कथमिति तदुच्यते । सोमाभिषवरूपं हननं यत्कृतं तत्प्रत्यवायं परिहृत्य ऋजुधैव नाकलोकरूपं वक्रमार्गं परित्यज्यैनं यजमानमृजुनैव मार्गेण प्रापयति । आतिथ्येष्टौ यद्धविस्तत् - "पृथिवी होता" इत्यनेन चतुर्होतृमन्त्रेण वेद्यामासादयेत् । तस्य मन्त्रस्य यशोहेतुत्वात्स्वात्मनि यशः संपादयति । अग्नीषोमीयपशोर्यद्धविस्तत् - "अग्निर्होता" इत्यनेन पञ्चहोतृमन्त्रेण वेद्यामुपसादयेत् । तस्य मन्त्रस्य स्वर्गसाधनत्वात्पशोश्च यजमाननिष्क्रयणार्थत्वाद्यजमानं स्वर्गं प्रापयति । ऐन्द्रवायवादि-ग्रहग्रहणादूर्ध्वं "महाहविर्होता" इत्यनेन सप्तहोतृमन्त्रेण जुहुयात् । तस्येन्द्रियसाधनत्वादिन्द्रियं स्वस्मिन्संपादयति ।

सवनेषु होतृमन्त्रप्रयोगं विधत्ते -

Digitized by Madhuban Trust, Delhi

यो वै चतुर्होतॄननुसवनं तर्पयति । तृप्यति प्रजया पशुभिः । उपैनं सोमपीथो नमति । बहिष्पवमाने दशहोतारं व्याचक्षीत । माध्यन्दिने पवमाने चतुर्होतारम् । आर्भवे पवमाने पञ्चहोतारम् । पितृयज्ञे षड्ढोतारम् । यज्ञायज्ञियस्य स्तोत्रे सप्तहोतारम् । अनुसवनमेवैनां स्तर्पयति (३) । तृप्यति प्रजया । पशुभिः । उपैनं सोमपीथो नमति, इति ।

चतुर्होतृमन्त्राभिमानिनां देवानां तत्तन्मन्त्रप्रयोगेण तृप्तिर्भवति । तथा यजमानोऽपि प्रजया पशुभिस्तृप्त उत्तरक्रतुगतं सोमपानं प्राप्नोति । तस्माद्बहिष्पवमानादिस्तोत्रादिकाले होतृमन्त्रान्संग्रहान्यजमानः पठेत् । एतच्च सूत्रकारेण स्पष्टमुक्तम् –"सन्नेषु नाराशंसेषु चमसिनः स्वँ स्वं चमसमनून्नुन्ते (?) त्री ँ स्त्रीन्पुरोडाशशकलानुपवपन्त एतत्ते ततोऽसौ ये च त्वामन्वित्यैतैः प्रतिमन्त्रं नमो वः पितरो रसायेति नमस्काराञ्जपन्ति षड्ढोतारं यजमानो व्याचष्टे" इति । सोऽयं सूत्रोक्तः प्रयोगोऽत्र पितृयज्ञशब्देन व्यवहृतः।

अनुसवनमित्यादिरूपसंहारार्था पुनरुक्तिः । यज्ञाङ्गत्वेन विहितान्होतृमन्त्रान्प्रशंसति–

देवा वै चतुर्होतृभिः सत्रमासत । ऋद्धिपरिमितं यशस्कामाः । तेऽब्रुवन् । यन्नः प्रथमं यश ऋच्छात् । सर्वेषां नस्तत्सहाऽसदिति । सोमश्चतुर्होत्रा । अग्निः पञ्चहोत्रा । धाता षड्ढोत्रा (४) । इन्द्रः सप्तहोत्रा । प्रजापतिर्दशहोत्रा । तेषा ँ सोम ँ राजानं यश आर्च्छत्, इति ।

सोमाग्न्यादयो देवा धनादिसमृद्ध्या युक्तं यशः कामयमानाः सत्रमनुष्ठातुं प्रारब्धवन्तः । तदानीमेवं परस्परं भाषां कृतवन्तोऽस्माकं मध्ये यं पुरुषमादौ धनसमृद्धियुक्तं यशः प्राप्नुयात्तस्य पुरुषस्य तद्यशः सर्वेषाम् स्माकं साधारणमस्त्विति । ततः सोमादयो यथायथं सत्रे होतृमन्त्राननुष्ठितवन्तस्तदा तेषां सोममेवाऽऽदौ यशः प्राप्नोत् ।

अथ प्रसङ्गाद्यज्ञाङ्गभूतान्प्रैषनिविदाग्रीग्रहानत्र प्रशंसति–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तन्न्यकामयत । तेनापाक्रामत् । तेन प्रलायमचरत् । तं देवाः प्रैषैः प्रैषमैच्छन् । तत्प्रेषाणां प्रैषत्वम् । निविद्भिर्न्यवेदयन् । तन्निविदां निवित्त्वम् (५) । आप्रीभिराप्नुवन् । तदाप्रीणामाप्रित्वम् । तमघ्नन् । तस्य यशो व्यगृह्णत । ते ग्रहा अभवन् । तद् ग्रहाणां ग्रहत्वम् । यस्यैवं विदुषो ग्रहा गृह्यन्ते । तस्य त्वेव गृहीताः, इति ।

तद्धनसमृद्धियुक्तं यशो ममैव भूयादिति सोमो नितरां कामयित्वा तेन धनेन सहापक्रम्य पुनस्तेन युक्तः सन्प्रकर्षेण लीनो भूत्वा यथा देवा न जानन्ति तथैव व्यचरत् । ततो देवाः "होता यक्षत्" इत्यादिभिः प्रैष मन्त्रैः प्रैषं प्रकृष्टं सोमस्यान्वेषणमैच्छन् । ततः प्रेष्यत एभिरिति व्युत्पत्या मन्त्राणां प्रैषनाम संपन्नम् । ततः "अग्ने महानसि" इत्यादिभि-र्निविन्मन्त्रैरिमं वृत्तान्तं तत्र तत्र नितरामावेदयन् । निवेद्यत एभिरिति व्युत्पत्या मन्त्राणां निविन्नाम संपन्नम् । "समिद्धो अद्य मनुषो दुरोणे" इत्यार्पीमन्त्रैस्तं सोममाप्नुवन् । आप्य (प्रीय) एभिरिति व्युत्पत्या मन्त्राणामाप्रीनाम संपन्नम् । ततः सोमं हत्वा तस्याधीनं यशोहेतुं प्रत्येकं विभज्य गृहीतवन्तः । ते च भागा ऐन्द्रवायवादिग्रहा अभवत् । तस्माद्गृह्यन्त इति व्युत्पत्या ग्रहनाम संपन्नम् । य एतं वृत्तान्तं जानाति तस्यैव यागे ग्रहा मुख्यत्वेन गृहीता भवन्ति । इतरस्य तु यागे गृहीता अप्यधिकफलत्वाभावादगृहीता एव ।

अथ ग्रहप्रसङ्गाच्छन्दः सामोक्थानि प्रशंसति-

तेऽब्रुवन् । यो वै नः श्रेष्ठोऽभूत् (६) । तमवधिष्म । पुनरिमँ सुवामहा इति । तं छन्दोभिरसुवन्त । तच्छन्दसां छन्दस्त्वम् । साम्ना समानयन् । तत्साम्नः सामत्वम् । उक्थैरुदस्थापयन् । तदुक्थानामुक्थत्वम् । य एवं वेद । प्रत्येव तिष्ठति (७) । सर्वमायुरेति, इति ।

ते देवाः परस्परमिदं विचारितवन्तो यः सोमोऽस्माकं मध्ये श्रेष्ठोऽभूत्तं वयमवधिष्म । तदेतन्महदनुचितम् । तस्मात्पुनरिमं सोममुत्पादयाम इति विचार्य गायत्र्यादिच्छन्दांस्यनुष्ठाय तत्सामर्थ्यात्सोममुदपादयन् । उत्पादनविषया छन्दसीच्छा सिध्यत्येभिरिति व्युत्पत्या छन्दोनाम संपन्नम् । ततः सामगानसामर्थ्येन उक्थनामकशस्त्रसामर्थ्येन तं सोमं

Digitized by Madhuban Trust, Delhi

भूमावुपविष्टमुत्थापितवन्तः । उत्थाप्यते सोमोऽनेनति व्युत्पत्त्योक्थनाम संपन्नम् । य एवं सोमवृत्तान्तं वेद स भूमौ प्रतिष्ठितो भूत्वा संपूर्णमायुः प्राप्नोति ।

अथ सोमयागप्रशंसाप्रसङ्गात्पुरुषार्थं सोमयागसमीपगमनं विधत्ते-

सोमो वै यशः । य एवं विद्वान्सोममागच्छति । यश एवैनमृच्छति । तस्मादाहुः । यश्चैवं वेद यश्च न । तावुभौ सोममागच्छः । सोमो हि यशः । तं त्वा व यश ऋच्छतीत्याहुः । यः सोमे सोमं प्राहेति । तस्मात्सोमे सोमः प्रोच्यः । यश एवैनमृच्छति (८), इति ।

अभिषुण्वन्ति सप्तहोता तर्पयति षड्ढोत्रा निवित्त्वमभूतिष्ठति प्राहेति द्वे च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
द्वितीयाध्यायेऽष्टमोऽनुवाकः ॥ ८ ॥

यः सोमयागः स एव यशोहेतुत्वाद्यशः । तस्मात्सोमस्य यशोहेतुत्वं यो विद्वान्स सोमयागस्थानं प्रत्यागच्छेत् । तत्तदनुष्ठानप्रकारोपन्यासेन तमेनं यश ऋच्छति प्राप्नोति । यस्मादेवं तस्मादभिज्ञोऽयं महात्मेत्येवं सर्वे जना आहुः । किं च यः सोमपयागं यशोहेतुं वेद यश्च न तावुभौ सोमयागस्थानमागच्छतः । सोमयागस्य यशोहेतुत्वात् । अस्ति त्वनयोर्मध्य एकस्य विशेषः । न हि सोमे सोमयागे सोमं सोमप्रयोगं विशेषर्त्विज्याय स्वकीयवाक्पाण्डित्यप्रकटनाय वा यः प्राह तमभिज्ञास्त्वा व त्वामेव यश ऋच्छति प्राप्नोतीत्याहुः । यस्मादेवं तस्मादभिज्ञः सोमे सोमयागे सोमः सोमप्रयोगः प्रोच्यः प्रकर्षेण वाच्यः यश एनमभिज्ञमृच्छत्येव प्राप्नोत्येव ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

अथ द्वितीयप्रपाठके नवमोऽनुवाकः ।

अष्टमे होतृमन्त्राणां सोमाङ्गत्वेन प्रयोग उक्तः । अथ होतृमन्त्रोत्पत्तिकथनप्रसङ्गेन जगत्सृष्टिर्नवमेऽभिधीयते-

इदं वा अग्रे नैव किंचनाऽऽसीत् । न द्यौरासीत् । न

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पृथिवी । नान्तरिक्षम् । तदसदेव सन्मनोऽकुरुत स्यामिति । तदतप्यत । तस्मात्तेपानाद् धूमोऽजायत । तद्भूयोऽतप्यत । तस्मात्तेपानादग्निरजायत । तद्भूयोऽतप्यत (१) । तस्मात्तेपा नाज्ज्योतिरजयत । तद्भूयोऽतप्यत । तस्मात्तेपानादर्चिरजायत । तद्भूयोऽतप्यत । तस्मात्तेपानान्मरीचयोऽजायन्त । तद्भूयोऽतप्यत । तस्मात्तेपानादुदारा अजायन्त । तद्भूयोऽतप्यत । तदभ्रमिव समहन्यत, इति ।

यदिदं स्थावरजंगमरूपं भूलोकादिरूपं च जगदिदानीं दृश्यते तत्किमपि सृष्टेः पूर्वं नैवाऽऽसीत् । तत्तादृशमसद्रूपमेव वर्तमानं सद्रूपतां प्राप्नुयामित्येतादृशं मनोऽकुरुत । तथा चोपनिषदि पूर्वमसद्रूपं पश्चात्सद्रूपतोत्पत्तिश्च विस्पष्टमाम्नायते-"असद्वा इदमग्र आसीत् । ततो वै सदजायत' ' इति । अत्रासच्छब्देन न शशविषाणादिसमानं शून्यत्वं विवक्षितं किं तर्ह्यनभिव्यक्तनामरूपत्वम् । अत एव वाजसनेयिनः समामनन्ति-"तद्धेदं .तर्ह्यव्याकृतमासीत् । तन्नामरूपाभ्यामेव व्याक्रियतं" इति । भूमिराप इत्यादिकं नाम् । काठिन्यद्रवादिकं रूपम् । तत्तद्भू (स्य भू) तत्रयाकारेण विस्पष्टमासमन्तान्निष्पादनं व्याकरणम् । तद्रहितत्वेनाविस्पष्टदशापन्नत्वमव्याकृतत्वम् । तदेवं मनुना स्मर्यते-

आसीदिदं तमोभूतसंमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ।। इति ।।

शून्यत्वविवक्षायां छन्दोगश्रुतिर्विरुध्येत । छन्दोगा ह्येवमामनन्ति-"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् " इति । पुनरपि-"तद्धैक आहुरसदेवेदमग्र आसीत्" इति शून्यत्वपक्षमुपन्यस्य तन्निराकरणमेवमामनन्ति-"कुतस्तु खलु सौम्येदं ँ स्यादिति होवाच कथमसतः सज्जायेतेति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति । ऐतरेयिणस्त्वधीयते-"आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्' इति । तस्मान्नैवं किंचनाऽऽसीदित्ययं निषेध परमात्मनिर्मितनामरूपात्मकजगद्विषयो न तु कृत्स्नविषयः । नामरूपरहितत्वेनासच्छब्दवाच्यं सदेवावस्थितं परमात्मतत्त्वं स्वात्मन्यन्तर्हितप्राणिकर्मपेषितं सन्नामरूपाकारेणाऽऽविर्भवेयमिति पर्यालोचनरूपं मनोऽकुरुत । यथा गाढनिद्रां प्राप्तस्य पुरुषस्य कर्मफलयोगाय प्रबोध

Digitized by Madhuban Trust, Delhi

उत्पद्यते तथा सर्वान्प्राणिनः स्वस्वकर्मफलं भोजयितुमीदृशो विचारः परमात्मनः प्रादुरभूत् । तथाविधविचारयुक्तं तत्परमात्मतत्त्वरूपं नामरूपसृष्टिसाधनरूपं तपोऽकुरुत । नात्र तपः कृच्छ्रचान्द्रायणदिरूपम् । किंतु स्रष्टव्यपदार्थविशेषविषयं पर्यालोचनम् । अत एवाऽऽथर्वणिका आमनन्ति- "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः" इति । कृच्छ्रादिरूपत्वाभावादशरीरस्यापि सर्वशक्तियुक्तस्य पर्यालोचनमुपपन्नम् । तादृशीं शक्तिं च श्वेताश्वतरा आमनन्ति-"पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति । तच्छक्तिवशादेवेन्द्रियनिरपेक्षव्यवहारं चात एवाऽऽ मनन्ति--"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः" इति । तस्मादचिन्त्यशक्तिपरमेश्वरस्य लीलाविशेषो यथावचनमवबोद्धव्यः । वचनं चात्राऽऽरण्यक आम्नायते-"स तं मणिमविन्दत् । सोऽतङ्गुलिरावयत् । सोऽग्रीवः प्रत्यमुञ्चत्" इति । तेन मानसं तपः कृतवानित्यर्थः । तादृशात्तस्मात्परमेश्वरात्स्वसंकल्पानुसारेण कश्चिद्धूम उदपद्यत । एवमगस्त्यादयोऽपि संकल्पादुत्पन्नाः । अग्निरङ्गारवान् । ज्योतिरङ्गारनिष्ठप्रकाशः । अर्चिर्ज्वाला । मरीचयः सर्वत्र प्रसृतप्रभाद्रव्यम् । उदारा उल्बणज्वालाः । तत्सर्वं धूमज्वालादिकं संघातरूपं कठिनमभूत् । यथा- "धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघ" इति तद्वत् । तच्च घनीभूतं वस्तु परमात्मनो बस्तिस्थानमासीत् । बस्तिशब्दार्थश्चाऽऽयुर्वेदे दर्शितः-"मूत्राशयो धनुर्वक्रो बस्तिरित्यभिधीयते" [इति] ।

अथ समुद्रोत्पत्तिं दर्शयति-

तद्बस्तिमभिनत् (२) । स समुद्रोऽभवत् । तस्मात्समुद्रस्य न पिबन्ति । प्रजननमिव हि मन्यन्ते । तस्मात्पशोर्जायमानादापः पुरस्ताद्यन्ति, इति ।

यदेतत्समुद्रपर्यन्तस्य वस्तुनः स्रष्टुः परमात्मनो रूपं बस्तिस्थानीयं तस्य भेदमकरोत् । परितो मूत्राशये पूर्णे सति यथा लोके मेहनद्वारान्मुञ्चति तद्वत् । स च प्रभिन्नबस्तिगतो जलसंघः समुद्ररूपेण प्रादुरभूत् । यस्मात्समुद्रस्य जलं प्रजननमिव गर्भाशयगतमुदकमिवास्पृश्यं मन्यन्ते तस्माच्छिष्टाः समुद्रस्य जलं न पिबन्ति । यस्मादस्ति प्रजनने गर्भाशये जलं तस्माल्लोके जायमानात्पशोः पुरस्तादाप एव निर्गच्छन्ति ।

अथ प्रकृतस्य होतृमन्त्रस्य सृष्टिमाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

तद्दशहोताऽन्वसृज्यत । प्रजापतिर्वै दशहोता, इति ।

ततस्तत्समुद्रपर्यन्तं सृष्टं जगत्पश्चाच्चिचत्ति स्रुगित्यादिर्दशहोताऽसृज्यत् । तन्मन्त्रप्रतिपाद्याकारयुक्तप्रजापतिरेवात्र दशहोता ।

यथोक्तस्य परमात्मतपसो वेदनं प्रशंसति-

य एवं तपसो वीर्यं विद्वाँस्तप्यते । भवत्येव, इति ।

पूर्वोक्तस्य तपः सामर्थ्यं विद्वान्यः स्वयं तपः करोति सोऽयमैश्वर्यं प्राप्नोत्येव ।

अथ लोकत्रयसृष्टिं दर्शयति-

तद्वा इदमापः सलिलमासीत् । सोऽरोदीत्प्रजापतिः (३) स कस्मा अपि । यद्यस्या अप्रतिष्ठाया इति । यदप्स्ववपद्यत । सा पृथिव्यभवत् । यद्व्यमृष्ट । तदन्तरिक्षमभवत् । यदूर्ध्वमुदमृष्ट । सा द्यौरभवत् । यदरोदीत् । तदनयो रोदस्त्वम् । (४) य एवं वेद । नास्य गृहे रुन्दति । एतद्वा एषां लोकानां जन्म । य एवमेषां लोकानां जन्म वेद । नैषु लोकेष्वार्तिमार्च्छति । स इमां प्रतिष्ठामविन्दत, इति ।

तदिदं परमात्मना सृष्टं जगत्समुद्ररूपेण सलिलमासीत् । तस्मिन्सलिले पृथिवीमिश्रणं वारयितुमाप इत्युक्तम् । केवलं जलमेवाऽऽसीदित्यर्थः । तदिदं निरन्तरं जलं दृष्ट्वा दशहोतृरूपः स प्रजापतिररोदीत् । रुदतस्तस्यायमभिप्रायः यद्यहमप्रतिष्ठाया अवस्था-तुमयोग्याया अविद्यमानाया अस्याः पृथिव्याः सकाशात्यत्किमपि प्राणिजातं स्रष्टुं शक्नोमि तर्हि तादृशः सोऽहं कस्या अग्नि किमर्थमुत्पादितोऽस्मीति रुदतस्तस्य यन्नेत्रजलादिकसमुद्ररूपास्वप्सु पतितं तद्घनीभूतं पृथिव्यभवत् । तस्याः पृथिव्या उपर्युच्चावचभावं वारयितुं विविधं मार्जनं कृतवान् । तच्च सृष्टं स्थानमन्तरिक्षमभूत् । ततो हस्तमूर्ध्वं प्रसार्य तत्स्थानमसृष्टं सा द्यौरभवत् । यस्मात्प्रजापतिररोदीत्तेन च रोदनेन द्यावापृथिव्यावुत्पन्नौ । तस्माद्रोदः शब्दाभिधेयत्वं तयोः संपन्नम् । तं प्रकारं वेदितुर्गृहे बन्धुमरणाभावान्न केऽपि रुदन्ति । योऽयं

Digitized by Madhuban Trust, Delhi

लोकत्रयजन्मप्रकारं वेद तद्वेत्ता लोकत्रये नाशं न प्राप्नोति । स प्रजापतिरिमां पृथिवीं प्रतिष्ठां स्त्रक्ष्यमाणप्राण्याधारभूतामालभत ।

अथ तस्यां पृथिव्यामसुरसृष्टिं दर्शयति–

स इमां प्रतिष्ठां वित्वाऽकामयत प्रजायेयेति । स तऽपोऽतप्यत । सोऽन्तर्वानभवत् । स जघनादसुरानसृजत (५) । तेभ्यो मृन्मये पात्रेऽन्नमदुहत् । याऽस्य सा तनूरासीत् । तामपाहत । सा तमिस्राऽभवत्, इति ।

प्रजापतिरिमां भूमिं स्त्रक्ष्यमाणप्राण्याधारयोग्यां लब्ध्वा प्रजोत्पादनं कामयमानस्तदुपापर्यालोचनरूपं तपः कृत्वा स्वयमेव देहान्तरेण गर्भवानभूत् । तस्य गर्भयुक्तस्य जंघाभागादसुरानसृजत । तेभ्यः कस्मिंश्चिन्मृत्पात्रे भोजनार्थमन्नं प्रक्षिप्य दत्तवान् । ततोऽसुराणामुत्पादिका या स्वकीया तनूस्तां विनाशितवान् । सा तनूः शरीराकारं परित्यज्य तमोयुक्ता रात्रिरभवत् ।

अथ मनुष्यादिसृष्टिं दर्शयति–

सोऽकामयत प्रजायेयेति । स तपोऽतप्यत । सोऽन्तर्वानभवत् । स प्रजननादेव प्रजा असृजत । तस्मादिमा भूयिष्ठाः । प्रजननाद्ध्येना असृजत (६) । ताभ्यो दारुमये पात्रे पयोऽदुहत् । याऽस्य सा तनूरासीत् । तामपाहत । सा ज्योत्स्नाऽभवत्, इति ।

प्रजननात्प्रजोत्पादनसमर्थाद् दाराद्धि यस्मादुत्पादनसामर्थ्यं कारणं तस्मात्प्रजा अत्यन्तबहुलाः । ज्योत्स्ना चन्द्रप्रकाशाः । अन्यत्पूर्ववद् व्याख्येयम् ।

अथ वसन्तादिकालाभिमानिपुरुषस्य सृष्टिं दर्शयति–

सोऽकामयत प्रजायेयेति । स तपोऽतप्यत । सोऽन्तर्वानभवत् । स उपपक्षभ्यामेवर्तूनसृजत । तेभ्यो रजते पात्रे घृतमदुहत् । याऽस्य सा तनूरासीत् (७) । तामपाहत । सोऽहोरात्रयोः संधिरभवत्, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्ववद्व्याख्येयम् ।

अथ देवसृष्टिं दर्शयति-

सोऽकामयत प्रजायेयेति । स तपोऽतप्यत । सोऽन्तर्वानभवत् । स मुखाद्देवानसृजत । तेभ्यो हरिते पात्रे सोममदुहत् । याऽस्य सा तनूरासीत् । तामपाहत । तदहरभवत् (८), इति ।

पूर्ववद् व्याख्येयम् ।

अथोक्तानामन्नपयोघृतसोमानां वेदनं प्रशंसति-

एते वै प्रजापतेर्दोहाः । य एवं वेद । दुह एव प्रजाः, इति ।

गोभ्यः क्षीरमिव प्रजाभ्यो धनं लभत इत्यर्थः । देवतावेदनं प्रशंसति-

दिवा वै नोऽभूदिति । तद्देवानां देवत्वम् । य एवं देवानां देवत्वं वेद । देववानेव भवति, इति ।

देवानामुत्पादिका या प्रजापतेस्तनुः सेयमहोरूपेण निष्पन्ना । अतो देवा हर्षादस्माकं दिवैवाभूदित्युच्चारितवन्तः । अतो दिवायोगेन देवत्वं संपन्नम् । तद्वेदिता देववान्प्रकाशवान्भवति ।

तदेतद्देवासुरोत्पादकतनूभ्यामहोरात्रयोर्जन्म, तस्य वेदनं प्रशंसति-

एतद्वा अहोरात्राणां जन्म । य एवमहोरात्राणां जन्म वेद । नाहोरात्रेष्वार्तिमार्च्छति (९), इति ।

"तदसदेव सन्मनोऽकुरुत स्याम् " इति प्रथमभावि परमात्मनो यन्मनः पूर्वमुक्तं तदेतन्मनः प्रशंसति-

असतोऽधि मनोऽसृज्यत । मनः प्रजापतिमसृजत । प्रजापतिः प्रजा असृजत । तद्वा इदं मनस्येव परमं प्रतिष्ठितम् । यदिदं किंच । तदेतच्छ्वोवस्यसं नाम ब्रह्म, इति ।

Digitized by Madhuban Trust, Delhi

यत्किंचिदिदं जगदिदानीं दृश्यते तदिदं सर्वं मूलकारणे परमात्ममनस्येव सम्यक्प्रतिष्ठितम् । सत्संकल्पाधीना असतः सृष्टिस्थितिप्रलयाः । तदेतत्संकल्पितार्थं मनः श्वोवस्यसनामकं ब्रह्म । यदुत्तरो त्तरदिने वसीयोऽतिशयेन श्रेष्ठं श्वोवस्यसम् । द्विविधं हि ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेत्येवंलक्षणं सजातीयविजातीयस्वगतभेदरहितत्वान्निजस्वरूपमात्रे पर्यवसितं सर्वजनैकरूपमेकं ब्रह्म । अत एव तदेतच्छ्वोवस्यसं न भवति । निर्विकारत्वेन तस्य स्त्रष्टृत्वाभावात् । तदेव सर्वसृष्टिगोचरशक्तियुक्तं सत्सोपाधिकत्वेनान्यद्ब्रह्मभवति । संकल्परम्पपरया प्रतिक्षणमुत्तरोत्तराधिकजगत्स्रष्टुत्वादीदृग्ब्रह्मरूपत्वान्मनः प्रशस्तम् ।

तदेतद् वृत्तान्तवेदनं प्रशंसति–

व्युच्छन्ती व्युच्छन्त्यस्मै वस्यसी वस्यसी व्युच्छति । प्रजायते प्रजया पशुभिः । प्र परमेष्ठिनो मात्रामाप्रोति । य एवं वेद (१०), इति ।

अग्निरजायत तदभूयोऽतप्यताभिनदरोदीत्प्रजापती रोदस्त्वमसृजतासृजत घृतमदु ह्याऽम्य सा तनुरासीदहरमवदृच्छति वेद ।।

इदं धूमोऽग्निर्ज्योतिरर्चिर्मरीचय उदारास्तदभ्रं जघनात्सा तमिस्रा सप्तजननात्सा जोत्स्ना स उपपक्षाभ्यां साऽहोरात्रयोः संधिः स मुखात्तदहर्देव वानसतोऽधिमृन्मये दारुमये राजते हरिते तेभ्यस्ताभ्यो द्वे तेऽ न्नं पयो घृतं सोमं य एवं वेदोपैनं तस्य तावभित्र भातृव्यान्नमदुहत्पयोऽदुहद् घृतमदुहत्सोममदुहत् ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

द्वितीयाध्याये नवमोऽनुवाकः ।। ९ ।।

यथोक्तं ब्रह्म सृष्टिप्रकारं विदित्वोपास्तेऽस्मै वेदित्रे प्रतिदिनं प्रभातं कुर्वती देवता पुनरधिकश्रेयस्करा सती प्रभातं करोति । दिने दिने श्रेयोवर्धत इत्यर्थः । इह लोके प्रजयपशुसंपन्नः परलोके परमेष्ठिनः प्रजापतेरैश्वर्यस्य या मात्रा परिच्छित्तिस्तां सर्वामपि प्राप्नोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

द्वितीयप्रपाठके नवमोऽनुवाकः ।। ९ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ द्वितीयप्रपाठके दशमोऽनुवाकः ।

नवमेऽनुवाके होतृसृष्टिप्रसङ्गेन सर्वजगत्सृष्टिरुक्ता । दशमे देवसृष्टिमध्येऽवस्थितस्येन्द्रस्य देवताधिपतित्वमुच्यते । तदर्थमाख्यायिकामाह-

प्रजापतिरिन्द्रमसृजताऽऽनुजावरं देवानाम् । तं प्राहिणोत् । परेहि । एतेषां देवानामधिपतिरेधीति । तं देवा अब्रुवन् । कस्त्वमसि । वयं वै त्वच्छ्रेयाꣳसः स्म इति । सोऽब्रवीत् । कस्त्वमसि वयं वै त्वच्छ्रेयाꣳस स्म इति मा देवा अवोचन्निति, इति ।

प्रजापतिर्देवान्सृष्ट्वा तेषां देवानां मध्य आनुजावरमिन्द्रमसृजत् । यथा भ्रातृणां मध्येऽनुजः पश्चाज्जातोऽवरो निकृष्टस्तद्वदयमित्यनुजावरः । आनुजावरशब्दस्यापि स एवार्थः । सृष्टं तमिन्द्रं देवलोके प्रेषितवान् ह इन्द्र स्वर्गं गच्छैतेषां मया सृष्टानामधिपतिर्भव । प्रेषितमिन्द्रं देवाः पृच्छां कृतवन्तः । प्रजापतिनाऽहं प्रेषितोऽस्मीत्युत्तरे दत्ते ते देवा अब्रुवन्वयं वै त्वच्छ्रेयांसः स्मेति त्वया कल्याणयुक्ता भवेयेति तदानीमेवेन्द्रः परावृत्य प्रजापतिसमीपं गतवान् । प्रजापतिना पृष्टे सति स इन्द्रोऽब्रवीत् । कस्त्वमसि वयं वै त्वच्छ्रेयांसः स्मेति मा वां देवा अवोचन्नब्रुवन्निति । कनामवेत्तुरेद्रधि यजेतुऽऽयधिकारपुरस्सरं वेदनफलं दर्शयति-

अथ या इदं तर्हि प्रजापतौ हर आसीत् (१) । यदस्मिन्नादित्ये । तदेतमब्रवीत् । एतन्मे प्रयच्छ । अथाहमेतेषां देवानामधिपतिर्भविष्यामीति । कोऽहँ स्यामित्यब्रवीत् । एतत्प्रदायेति । एतत्स्या इत्यब्रवीत् । यदेतद्ब्रवीषीति । को ह वै नाम प्रजापतिः । य एवं वेद (२) । विदुरेनं नाम्ना । तदस्मै रुक्मं कृत्वा प्रत्यमुञ्चत् । ततो वा इन्द्रो देवानामधिपतिरभवत् । य एवं वेद । अधिपतिरेव समानानां भवति, इति ।

अथ प्रजापतेरग्रे स्वकीयतिरस्करणादूर्ध्वमेवं वृत्तान्त आसीत् । यदिदमिदानीमस्मिन्नादित्ये संतापकं तेजो दृश्यते तदिदं हरस्तस्मिन्काले प्रजापतावासीत् । यादृश आदित्योऽन्धकारादिभर्त्सने समर्थस्तथा प्रजापतिरपि दुष्टशिक्षायां समर्थ आसीत् । तत्तेज उद्दिश्येन्द्र एनं

Digitized by Madhuban Trust, Delhi

प्रजापतिमब्रवीत् । हे प्रजापते, एतत्तेजो मह्यं प्रयच्छ । अथाहं तेजस्वी सन्नेतेषां देवानामधिपतिर्भविष्यामीति । ततः प्रजापतिरिदमब्रवीत् । एतत्तेजस्तुभ्यं प्रदाय कोऽहं स्यामक्षमं मां को वा गणयेदित्यभिप्रायः । अथेन्द्रः प्रजापतिं प्रत्यब्रवीत्कोऽहमित्यत्र क इत्यनेन शब्देन यदेतद्ब्रवीषीत्येतदेव त्वम् । अत्र यदेतदिन्द्रेणोक्तं तदेतद्युक्तम् । क इत्येतस्य प्रजापतिनामत्वात् । अत्र किंशब्दः कशब्दश्चेति मकारान्ताकारान्तौ द्वौ शब्दौ तयोरुभयोरपि पुंलिङ्गैकवचनं क इत्येवं रूपं वा ब्रूते । अकारान्तस्तु प्रजापतिवाचकः तत्र मकरान्तमभिप्रेत्य प्रजापतिः प्रायुङ्क्त । तेजोबलादेव प्राणिनामपि गौरवम् । तस्मिंश्च तुभ्यं दत्ते सति प्रजापतित्वगौरवस्य गतत्वात्को नामाहं स्यामिति प्रजापतिप्रश्नः । कोऽहं स्यामिति प्रजापतित्वमेव विनश्यतीत्याक्षेपः । इन्द्रस्तु शब्दच्छलादकारान्तत्वमाश्रित्य प्रजापतिरहं स्यामिति यदेतद् ब्रूषे तदेतत्स्याः प्रजापतिरेव भवत्यर्थः । न हि तेजोनिमित्तं तव प्रजापतित्वं प्रजाजनकत्वम् । तेजसोऽनुपादानत्वात् । यतो तेजसोऽपि प्रजास्त्रष्टृत्वात् किंतु स्वाभाविक । अतस्तेजसि दत्ते तत् स्वभावो नापगच्छतीत्यब्रवीत् । य एवं प्रजापतेः क इति नाम वेदैनं सर्वेऽपि नाम्ना विदुः । प्रख्यातो भवतीत्यर्थः । ततः प्रजापतिस्तत्तेजो रुक्मं पट्टाख्यमाभरणं कृत्वा प्रत्यमुञ्चत् । ललाटे बबन्धेत्यर्थः । ततः पट्टबन्धनादिन्द्रो देवानामधिपतिरभवत् । तदेतदाधिपत्यं विद्वान्पुरुषः समानानां पुरुषाणां स्वयमधिपतिर्भवति ।

अथेन्द्रं बहुधा स्तोतुमादौ तावत्तदुपयुक्तं चन्द्रमसरशब्दस्य निर्वचनं दर्शयति-

सोऽमन्यत । किं किं वा अकरमिति । स चन्द्रं म आहरेति प्रालपत् । तच्चन्द्रमसश्चन्द्रमस्त्वम् । य एवं वेद (३) । चन्द्रवानेव भवति, इति ।

स प्रजापतिरेवममन्यत । देवाधिपत्ये स्थापितस्येन्द्रस्यापेक्षितं कार्यं किं किं महत्कार्यं यन्मया कृतं न पर्याप्तं पुनरपि करिष्यामीत्यभिप्रायः । तथाविधं प्रजापतिं दृष्ट्वा स इन्द्रश्चन्द्रमाह्लादकं तेजो मदर्थमाहरेत्येवं बालवत्प्रलापं कृतवान् । तत आह्लादवाची चन्द्रशब्दोच्चारणात्ववाच्यस्मच्छब्दोच्चारणाच्च तदक्षरसदृशं चन्द्रमा इति नाम संपन्नम् । चन्द्रमाह्लादकरं तेजो मीयतेऽत्रेति चन्द्रमाः । एवं वेदिताऽप्याह्लादवानेव भवति ।

अथ सूर्यनामनिर्वचनं दर्शयति-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तं देवा अब्रुवन् । सुवीर्यो मर्या यथा गोपायत इति ।
तत्सूर्यस्य सूर्यत्वम् । य एवं वेद । नैनं दभ्नोति, इति ।

दुष्टशिक्षणक्षमेण सौर्यतेजसा शिष्टपरिपालनक्षमेण चान्द्रतेजसा च पृक्तमिन्द्रं दृष्ट्वा देवाः परस्परमिदमब्रुवन् । हे, अपर्या मरणरहिता देवाः शोभनवीर्योपेतोऽयमिन्द्रोऽस्मान्यथा गोपायते सम्यग्रक्षितुं प्रभवतीत्यर्थः । ततः सुवीर्यशब्दाक्षरसः दृश्यात्सूर्यनाम संपन्नम् । तन्नाप्रवेदिनं पुरुषं वैरी न हिनस्ति ।

इन्द्रशब्दनिर्वचनं दर्शयति–

कश्चनास्मिन्वा इदमिन्द्रियं प्रत्यस्थादिति ।
तदिन्द्रस्येन्द्रत्वम् । य एवं वेद । इन्द्रियाव्येव भवति (४),
इति ।

अस्मिन्नधिपतौ स्थितमिन्द्रियं सामर्थ्यं कश्च कोऽपि न प्रत्यस्थात्प्रत्यवस्थातुं निराकर्तुं न शक्नोतीति देवाः परस्परमूचुः । तत्रेदमिन्द्रियमित्यक्षरसाम्यादिन्द्रनाम संपन्नम् । तन्नामाभिज्ञः । सामर्थ्यातिशयवान्भवति ।

परमेष्ठिनामनिर्वचनं दर्शयति–

अयं वा इदं परमोऽभूदिति । तत्परमेष्ठिनः परमेष्ठित्वम् ।
य एवं वेद । परमामेव काष्ठां गच्छति, इति ।

परमः सर्वोत्तमः प्रजापतिरेवेदमिन्द्ररूपोऽभूदिति देवा अब्रुवन् । तस्मात्परमे स्थित इत्यक्षरसाम्यात्परमष्ठिनाम संपन्नम् । एतन्नामवेदितैश्वर्यस्य काष्ठां प्राप्नोति ।

अथेन्द्रस्य सर्वदेवसेव्यत्वं दर्शयति–

तं देवाः समन्तं पर्यविशन् । वसवः । पुरस्तात् । रुद्रा
दक्षिणतः । आदित्याः पश्चात् । विश्वे देवा उत्तरतः ।
अङ्गिरसः प्रत्यञ्चम् (५) । साध्याः पराञ्चम् । य एवं
वेद । उपैनं समानाः संविशन्ति, इति ।

सभायामुपविष्टं तमिन्द्रं देवाः सर्वतः परिवेष्टयासेवन्त । वस्वादयो

Digitized by Madhuban Trust, Delhi

गणाश्चतसृषु दिक्षु व्यवस्थिता उपविष्टाः । अङ्गिरः प्रभृतयो महर्षयः क्वचिदप्युपवेशनमकृत्वा यदा यन्मुखमिन्द्रं प्रत्यञ्चं संमुखं कृत्वा सेवन्ते । साध्याख्या देवविशेषास्तमिन्द्रं पराञ्चं विमुखं कृत्वा पृष्ठतः कृत्वा सेवन्ते । एवं वेदितारमेनं पुरुषं समानाः सर्वे पुरुषा उपेत्य समीप उपविश्य सेवन्ते ।

अथेन्द्रस्य राजनीत्या प्रजाभ्यः संपादनप्रकारं दर्शयति-

स प्रजापतिरेव भूत्वा प्रजा आवयत् । ता अस्मै नातिष्ठन्तान्नाद्याय । ता मुखं पुरस्तात्पश्यन्तीः । दक्षिणत ः पर्यायन् । स दक्षिणतः पर्यवर्तयत । ता मुखं पुरस्तात्पश्यन्तीः । मुखं दक्षिणतः (६) । पश्चात्पर्यायन् । स पश्चात्पर्यवर्तयत । ता मुखं पुरस्तात्पश्यन्तीः । मुखं दक्षिणतः । मुखं पश्चात् । उत्तरतः पर्यायन् । स उत्तरतः पर्यवर्तयत । ता मुखं पुरस्तात्पश्यन्तीः । मुखं दक्षिणतः । मुखं पश्चात् । मुखमुत्तरतः । ऊर्ध्वा उदायन् । स उपरिष्टान्न्यवर्तयत । ताः सर्वतोमुखो भूत्वाऽऽवयत् । ततो वै तस्मै प्रजा अतिष्ठन्तान्नाद्याय, इति ।

स इन्द्रः स्वयं प्रजापतिरेव प्रजापतिसमानसामर्थ्ययुक्त एव भूत्वा ताः प्रजा आवयत्स्वाधीना अकरोत् । स्वस्वोचितं करं दातुमाज्ञापितवानित्यर्थः । ताः सर्वाः प्रजा अस्मा अस्येन्द्रस्यान्नाद्याय नातिष्ठन्त। अन्नभोगकरं दातुं नाङ्गीकृतवन्त इत्यर्थः । तास्तथाविधाः पूर्वस्यां दिशि वर्तमाना इन्द्रस्य मुखं मुख्यं कंचिदिन्द्रप्रेषितं करस्वीकारक्षमं पूर्वस्यां दिशि पश्यन्त्यस्ततः पलाय्य दक्षिणस्यां दिशि पर्यायन्गताः । ततः स इन्द्रस्तदवगत्य स्वमुखसमानं प्रबलं पुरुषं दक्षिणस्यां दिशि प्रेरितवान् । ततस्ताः प्रजा दिग्द्वयेऽपि मुखं पश्यन्त्यः पश्चिमां दिशं प्राविशन् । एवं पश्चिमोत्तरोर्ध्वदिक्षु योज्यम् । ततः स इन्द्रः पञ्चस्वपि दिक्षु स्वकार्ये भृत्यानवस्थाप्य तद्द्वारा स्वयं सर्वतोमुखो भूत्वा सर्वाः प्रजा वशीकृतवान् । ततः प्रजाः पलायितुं दिगन्तरमलभमाना अस्येन्द्रस्यान्नाद्यरूपं करं दातुमङ्गीकृतवन्तः ।

एतद्विज्ञानं प्रशंसति-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

य एवं विद्वान्परिं च वर्तयते नि चं । प्रजापतिरेव भूत्वा प्रजा अत्ति । तिष्ठन्तेऽस्मै प्रजा अन्नाद्याय । अन्नाद एव भवति (७), इति ।

आसीद्वेदं चन्द्रमस्त्वं य एवं वेदेन्द्रियाण्येव भवति प्रत्यञ्चं मुखं दक्षिणतो मुखं पश्चान्नवं च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
द्वितीयाध्याये दशमोऽनुवाकः ।। १० ।।

यः पुमानेवमिन्द्रस्य परिपालनप्रकारं विद्वान्परिवर्तयते निवर्तयते च शिक्षकस्य प्रेरणं परिवर्तनं शिक्षिताभ्यः प्रजाभ्यः स्व पुरुषनिवारणं निवर्तनं तदुभयकुशलः स्वयं प्रजानां पालको भूत्वा सर्वाः प्रजा अत्यनुभवतीत्यर्थः । ताश्च प्रजा अस्यै करं दातुमभ्युपगच्छन्त्यसावप्यसंशयं भोगसंपन्नो भवति ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
द्वितीयप्रपाठके दशमोऽनुवाकः ।। १० ।।

अथ द्वितीयप्रपाठक एकादशोऽनुवाकः ।

दशमेऽनुवाक इन्द्रस्याऽऽधिपत्यं प्रपञ्चितम् । तमेवं होतृमन्त्रसृष्टिप्रसक्तानुप्रसक्तं प्रसङ्गं परित्यज्यैकादशे प्रकृतानां होतृमन्त्राणामेव पुरुषार्थाः केचित्प्रयोगा अभिधीयन्ते । तत्राऽऽदौ दशहोतृमन्त्रस्य प्रयोगं विधत्ते-

प्रजापतिरकामयत बहोर्भूयान्त्स्यामिति । स एतं दशहोतारमपश्यत् । तं प्रायुङ्क्त । तस्य प्रयुक्ति बहोर्भूयानभवत् । यः कामयेत बहोर्भूयान्त्स्यामिति । स दशहोतारं प्रयुञ्जीत । बहोरेव भूयान्भवति, इति ।

लोके विद्यैश्वर्यादिसंपन्नः पुरुषो बहुरित्युच्यते । ततोऽपि भूयस्त्वं कामयमानः प्रजापतिः "चित्तिः स्रुक्" इत्यादिमन्त्रेण जपहोमरूपं प्रयोगं कृत्वा तथा प्रयुक्त्या भूयानभवत् ।

अथ "पृथिवी होता" इति मन्त्रस्य प्रयोगं विधत्ते -

सोऽकामयत वीरो म आजायेतेति

Digitized by Madhuban Trust, Delhi

स दशहोतुश्चतुर्होतारं निरमिमीत । तं प्रायुङ्क्त १। तस्य प्रयुक्तीन्द्रोऽजायत यः कामयेत वीरो म आजायेतेति । स चतुर्होतारं प्रयुञ्जीत । आऽस्य वीरो, जायते, इति ।

वीरो वैदिकलौकिककर्मसु शूरः पुत्रः । दशहोतुः "चित्तिः स्रुक्" इत्यादिमन्त्राच्चतुर्होतारं "पृथिवी होता" इति मन्त्रं प्रायुङ्क्त। मन्त्रप्रयोगेणेत्यर्थः ।

अथ "अग्निर्होता" इति मन्त्रस्य प्रयोगं विधत्ते-

सोऽकामयत पशुमान्स्यामिति । स चतुर्होतुः पञ्चहोतारं निरमिमीत । तं प्रायुङ्क्त । तस्य प्रयुक्ति पशुमानभवत् । यः कामयेत पशुमान्त्स्यामिति । स पञ्चहोतारं प्रयुञ्जीत (२) । पशुमानेव भवति, इति ।

एकस्य मन्त्रस्यानुष्ठानान्मन्त्रान्तरं सृष्ट्वा तदनुष्ठानेन पश्वादिफलप्राप्तौ प्रजापतेरिच्छैव नियामिका ।

"सूर्यं ते चक्षुः" इति मन्त्रस्य प्रयोगं विधत्ते-

सोऽकामयतर्तवो मे कल्पेरन्निति । स पञ्चहोतुः षड्ढोतारं निरमिमीत । तं प्रायुङ्क्त । तस्य प्रयुक्त्यृतवोऽस्मा अकल्पन्त । यः कामयेतर्तवो मे कल्पेरन्निति । स षड्ढोतारं प्रयुञ्जीत । कल्पन्तेऽस्मा ऋतवः, इति ।

कल्पेरन्स्वस्वोचितफलप्रदा भूयासुरित्यर्थः ।

अथ "महाहविर्होता" इत्यस्य मन्त्रस्य प्रयोगं विधत्ते-

सोऽकामयत सोमपः सौमयाजी स्याम् । आ मे सोमपः सौमयाजी जायेतेति (३) । स षड्ढोतुः सप्तहोतारं निरमिमीत । तं प्रायुङ्क्त । तस्य प्रयुक्ति सोमपः सोमयाज्यजायत् । आऽस्य सोमपः सौमयाज्यजायत । यः कामयेत सोमपः सौमयाजी स्याम् । आ मे सोमपः सौमयाजी जायेतेति । स सप्तहोतारं प्रयुञ्जीत । सोमप एव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

सौमयाजी भवति । आऽस्य सोमपः सौमयाजी जायते, इति ।

परकीययज्ञे स्वयमृत्विकत्वेन सोमस्य पाता सोमपः । स्वयं यागस्य कर्ता सोमयाजी । स्वयं तादृश उभयविधो भूयासम् । स्वपुत्रोऽप्युभयविधो भूयादित्यत्र कामनाभेदः ।

अथ मन्त्रपञ्चकस्य कामधेनुरूपत्वविवक्षया पशुत्वं संपाद्य प्रशंसति–

स वा एष पशुः पञ्चधा प्रतितिष्ठति (४) । पद्भिर्मुखेन, इति ।

यथा लौकिकपशुश्चतुर्भिः पादैरेकेन मुखेन च प्रतिष्ठितो भवति तथाऽयं पञ्चमन्त्रसंघः पशुरूपः । तत्र चत्वारो मन्त्राश्चत्वारः पादाः । पञ्चमो मन्त्रो मुखम् । सोऽयं पशुः पञ्चभिः प्रकारैः फलप्रदो लोके प्रतिष्ठितः ।

अथ कामधेनुरूपान्पशून्स्वर्गप्राप्तिहेतुतया प्रशंसति–

ते देवाः पशून्वित्वा । सुवर्गं लोकमायन्, इति ।

अथ सप्तहोतृमन्त्रं स्वर्गवासप्रदत्वेन विशेषतः प्रशंसति–

तेऽमुष्मिँल्लोके व्यक्षुध्यन् । तेऽब्रुवन् । अमुतः प्रदानं वा उपजिजीविमेति । ते सप्तहोतारं यज्ञं विधायायास्यम् । आङ्गीरसं प्राहिण्वन् । एतेनामुत्र कल्पयेति । तस्य वा इयं क्लृप्तिः (५) । यदिदं किंच । य एवं वेद । कल्पतेऽस्मै । स वा अयं मनुष्येषु यज्ञः सप्तहोता । अमुत्र सद्भ्यो देवेभ्यो हव्यं वहति । य एवं वेद । उपैनं यज्ञो नमति, इति ।

तदेतद्वाक्यं सप्तमानुवाके व्याख्यातम् ।

होतृमन्त्राणामग्निहोत्रादिषु यः प्रयोगो विवक्षितस्तद्वेदनं प्रशंसति–

यो वै चतुर्होतॄणां निदानं वेद । निदानवान्भवति । अग्निहोत्रं वै दशहोतुर्निदानम् । दशपूर्णमासौ चतुर्होतुः ।

Digitized by Madhuban Trust, Delhi

चातुर्मास्यानि पञ्चहोतुः । पशुबन्धः षड्ढोतुः । सौम्योऽध्वरः सप्तहोतुः । एतद्वै चतुर्होतृणां निदानम् । य एवं वेद । निदानवान्भवति, (६), इति ।

अग्निमीत तं प्रायुङ्क्त पञ्चहोतारं प्रयुञ्जीत जायेतेति तिष्ठति क्लृप्तिर्दशहोतुर्निदानँ सप्त च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

द्वितीयाध्याय एकादशोऽनुवाकः ।। ११ ।।

प्रजापतिरकामयत प्रजाः सृजेयेति प्रजापतिरकामयत दर्शपूर्णमासौ सृजेयेति । प्रजापतिरकामयत प्रजायेयेति । स तपः त्रिवृतं प्रजापतिस्तेन दशधाऽऽत्मानं देवा वै वरुणमन्तो वै प्रजापतिस्ताः सृष्टाः समश्लियन्देवा वै चतुर्होतृभिरिदं वा अग्नौ प्रजापतिरिन्द्रं प्रजापतिरकामयत बहोर्भूयानेकादश ।। ११ ।।

प्रजापतिस्तद्ग्रहस्य ग्रहत्वं प्रजापतिरकामयतानयैवैनत्तस्य वा इयं तस्मात्तेषामनाद्यदस्मिन्नादित्ये स षड्ढोतुः सप्तहोतारं त्रिसप्ततिः ।। ७३।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

द्वितीयोऽध्यायः ।। २ ।।

नितरां दीयते प्रयुज्यतेऽस्मिन्निति निदानं तन्मन्त्रप्रयोगस्थानम् । तत्र सूत्रकारेण विशदीकृतम् –"अग्निहोत्रमारभ्यमाणो दशहोतारं मनसाऽनुद्रुत्याऽऽहवनीये हुत्वा सायमग्निहोत्रं जुहोति । दर्शपूर्णमासावारप्स्यमानाश्चतुर्होतारं मनसाऽनुद्रुत्य" इत्यादिना । तदेतदग्निहोत्रादिरूपं होतृणां निदानं यो वेद निदानवान्भवत्युपजीवनस्थानवान्भवति ।

अथास्य प्रश्नस्यानुवाकार्थसंग्रहः-

दशहोतुर्द्वितीयाद्ये पुरुषार्थत्वमीरितम् ।
चतुर्होत्रादिमन्त्राणां क्रत्वर्थत्वं द्वितीयके ।।
तृतीये शुक्लपक्षश्च चतुर्थे होतृमन्त्रतः ।
लोकसृष्टिः पञ्चमे तु ब्राह्मणं स्यात्प्रतिग्रहे ।।
दशमेऽहनि होतृणां प्रयोगः षष्ठ ईरितः ।
सप्तहोतोत्तरे शस्तो यज्ञः सोमाङ्गताऽष्टमे ।।
नवमे स्याज्जगत्सृष्टिर्दशमे त्विन्द्रराजता ।
अन्ते पुमर्थो होतृणां प्रयोगश्च समीरितः ।।

Digitized by Madhuban Trust, Delhi

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे द्वितीयप्रपाठके एकादशोऽनुवाकः ।। ११ ।।

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे द्वितीयप्रपाठकः समाप्तः ।। २ ।।

महिपाल-स्याऽऽज्ञापरिपालकेन श्रीमाधवाचार्य
श्रीमद्दिव्ययोगीन्द्रश्रीमद्राजाधि-
राजमहाराजश्रीवीरशुक्लमहीपाल ।

(मूलक्रमेण-अष्ट. २ अ या. २ (१०) अनु. ११ (१००) । (भाष्यक्रमेण-कां. २ प्रपा. (१०) अनु. ११ (१००) ।

अथ द्वितीयकाण्डे तृतीयप्रपाठकारम्भः ।

तत्र प्रथमोऽनुवाकः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ।।
प्रपाठके द्वितीये हि होतृब्राह्मणमीरितम् ।
तद्ब्राह्मणस्य शेषोऽथ तृतीये समुदीर्यते ।।

तत्र प्रथमानुवाके सर्वेषां होतृमन्त्राणां चतुर्होतृमन्त्रेण व्यवहारं प्रश्नोत्तराभ्यां प्रतिपादयति -

ब्रह्मवादिनो वदन्ति । किं चतुर्होतृणां चतुर्होतृत्वमिति । यद्देवेषु चतुर्धा होतारः । तेन चतुर्होतारः । तस्माच्चतुर्होतार उच्यन्ते । तच्चतुर्होतृणां चतुर्होतृत्वम्, इति ।

चतुर्होतृशब्देन व्यवह्रियमाणानां "चित्तिः स्रुक्" इत्यादिमन्त्राणां चतुर्होतृशब्दवाच्यत्वं कथमित्येवं ब्रह्मवादिनां प्रश्नः । तत्रोत्तरमेतत् । होताऽध्वर्युराग्नीध्रो ब्रह्मेत्येवं चतुर्धा होमकर्तारो यस्मादेषु मन्त्रेषु श्रूयन्ते

तेन कारणेनैते मन्त्राश्चतुर्होतारः । तत्र पृथिवी होता । द्यौरध्वर्युः । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता" इत्येतस्मिन्मुख्ये चतुर्होतृमन्त्रे यथा होत्रादय एवं "अग्निर्होता । अश्विनावध्वर्यू । त्वष्टाऽग्नीत् । मित्र उपवक्ता ।" इत्यादिष्वपि मन्त्रेषु होत्रादयः श्रुताः । तत्रोपवक्ता ब्रह्मा । "चित्तिः स्रुक्" इति मन्त्रे यद्यप्याऽऽग्नीध्रो न श्रुतस्तथाऽपि होत्रादिभिरसावुपलक्षणीयः । यद्यपि "सूर्यं ते चक्षुः" इति मन्त्रे होत्रादयो न श्रुतास्तथाऽपि सृष्टिन्यायेन बाहुल्यात्तेऽप्युपलक्षयितुं शक्यन्ते । यथा "सृष्टीरुपदधाति" इत्येकस्मिन्मन्त्रे सृष्टिलिङ्गाभावेऽप्यन्येषु सृष्टिलिङ्गानां सद्भावात्तत्र हि तेनापि सह सृष्टिशब्दार्थत्वं निर्णीतम्, एवमत्रापि होतृप्रतिपादनरहितेनापि मन्त्रेण सह तत्सहितोत्तरे सर्वे मन्त्राश्चतुर्होतृशब्देन व्यवहर्तुं शक्यन्ते । अस्ति चात्र लौकिको दृष्टान्तः "एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः" इति । यस्मादेवं तस्माद्वैदिकैः सर्व एते मन्त्रश्चतुर्होतार इत्युच्यन्ते । चत्वारो होमकर्तारो येषु मन्त्रेष्विति व्युत्पत्या तेषां मन्त्राणां चतुर्होतृनाम संपन्नम् ।

एतेषां मन्त्राणां तदभिमानिदेवत तादात्म्यज्ञानेन समृद्धिफलं दर्शयति-

सोमो॒ वै च॒तुर्हो॑ता । अ॒ग्निः पञ्च॑होता । धा॒ता षड्ढो॑ता । इन्द्रः॑ स॒प्तहो॑ता (१) । प्र॒जाप॑ति॒र्दश॑होता । य ए॒वं च॒तुर्हो॑तॄ॒णामृ॒द्धिं वेद॑ । ऋ॒ध्नोत्ये॒व, इति ।

यथोक्तसोमादिदेवतारूपत्वमेव मन्त्राणां समृद्धिः ।

पुनरपि चतुर्धाफलप्रदर्शनेन प्रशंसति-

य ए॑षामे॒वं ब॒न्धुता॒ं वेद॑ । बन्धु॑मान्भवति । य ए॑षामे॒वं क्लृ॒प्तिं वेद॑ । कल्प॑तेऽस्मै । य ए॑षा मे॒वमा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान्भवति । य ए॑षामे॒वं प्र॑ति॒ष्ठां वेद॑ (२) । प्रत्ये॒व ति॑ष्ठति, इति ।

बन्धूनां समूहो बन्धुता । यथा लोके ब्राह्मणः क्षत्रिया भारद्वाजगोत्रीया इत्येकैकेनोपाधिना व्यवह्रियमाणाः परस्परं बन्धवः । एवमेतेऽपि मन्त्रा एकेन होतृत्वोपाधिना व्यवह्रियमाणत्वात्परस्परं बन्धवः । तत्समूहे बन्धुभावं यो वेद सोऽयं बहुभिर्बन्धुभिर्युक्तो भवति । क्लृप्तिरनुष्ठानजपहोमादिकम् । तद्वदनेन स्वाभिमतमन्त्रक्रिया । कल्प्यते निष्पाद्यते । आयतनं तदनुष्ठानाधारभूतमग्निहोत्रादिकं कर्म । तच्च

Digitized by Madhuban Trust, Delhi

पूर्वमेवोदाहृतम्-"अग्निहोत्रं वै दशहोतुर्नदानम्" इत्यादिना । तद्वेदिता निवासस्थानं लभते । प्रतिष्ठाफलम्- "अतोऽस्य वीरो जायते" इत्यादिकम् । तद्वेदिता धनादिभिः । प्रतिष्ठितो भवति ।

पूर्व चतुर्होतृशब्देन सर्वेषां व्यवहारकारणमुक्तम् । इदानीं दशहोत्रादिशब्दैः सर्वत्रव्यवहाराभावे कारणं प्रश्नोतराभ्यां दर्शयति-

ब्रह्मवादिनो वदन्ति । दशहोता चतुर्होता । पञ्चहोता षड्ढोता सप्तहोता । अथ कस्माच्चतुर्होतार उच्यन्त इति । इन्द्रो वै चतुर्होता । इन्द्रः खलु वै श्रेष्ठो देवतानामुपदेशनात् । य एवमिन्द्रँ श्रेष्ठं देवतानामुपदेशनाद्वेद । वसिष्ठः समानानां भवति । तस्माच्छ्रेष्ठमायन्तं प्रथमेनैवानुबुध्यन्ते अयमागन् । अयमवासादिति । कीर्तिरस्य पूर्वाऽऽगच्छति जनतामायतः । अथो एनं प्रथमेनैवानुबुध्यन्ते । अयमागन् । अयमवासादिति (३), इति ।

सप्तहोता प्रतिष्ठा वेद बुध्यन्ते षट् च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयाध्याये प्रथमोऽनुवाकः ।। १ ।।

दशहोत्रादयः पञ्च शब्दा विद्यन्ते तेषां मध्ये चतुर्होतृशब्देन यथा सर्वेषामुपलक्ष म्, एवं दशहोत्रादिशब्देनापिच्छत्रिन्यायेनोपलक्षयितुं शक्यत्वात्कुतः शब्दान्तरैर्नोपलक्ष्यन्ते । चतुर्होतृशब्देनैव तदुपलक्षणनियमे किं कारणमिति ब्रह्मवादिनां प्रश्नः । तत्रैतदुत्तरम् । चतुर्होतृमन्त्राणां कारणत्वादयं मन्त्र इन्द्रस्वरूपः । तत्कारणत्वं च पूर्वोक्तम्-"तं चतुर्होत्रा माजनयन्" इति इन्द्रश्च देवतानां मध्ये प्रशस्ततमः । कुतः । उपदेशनात् । उपदिष्टं किं पूर्वस्मिन्प्रपाठक इन्द्रस्य देवाधिपत्यम् । इन्द्ररूपत्वेन चतुर्होता सर्वेषु श्रेष्ठः । ततः श्रेष्ठेनैव सर्वस्य व्यपदेशो युक्तो न त्वन्येन । यः पुमानिन्द्रश्रेष्ठत्वं श्रुत्युपदिष्टं वेद स पुमान्समानानां स्वकीयानां निवासहेतुर्भवति । यस्मादत्र श्रेष्ठेनैव चतुर्होत्रा सर्वेषां व्यपदेशो नेतरेण तस्माल्लोकेऽपि सहस्रसंख्याकैर्जनैः सह समागच्छन्तं श्रेष्ठं राजानममात्यं वा दृष्ट्वा प्रजाः सर्वाः प्रथमेनैव श्रेष्ठपुरुषनाम्नाऽनुबुध्यन्ते व्यवहरन्ति । अयमागन्नयं राजाऽऽगच्छति । अयममात्यः समागच्छतीति । अथापि

Digitized by Madhuban Trust, Delhi

तेन सह सर्वेऽप्यन्ये समागच्छन्ति तथाऽपिच्छत्रधारी समागच्छति चामरधारी समागच्छतीत्येवं श्रेष्ठनाम्ना संघं व्यवहरन्ति । तथा तस्मिन्ग्रामेऽ यमवासीत्। ग्रामस्वामी देवदत्तोऽत्र निवसतीत्येवं श्रेष्ठनाम्ना व्यवहरन्ति । न त्वस्मिन्नगरे दासो निवसति दासी निवसतीति वा कदाऽप्यश्रेष्ठानाम्ना व्यवहरन्ति । किंच दूरदेशादागच्छतो राज्ञः कीर्तिः पूर्वभाविनी सती देशविशेषोऽवस्थितं जनसमूहं प्राप्नोति तदाऽपि मुख्यस्यैव कीर्तिर्न चाश्रेष्ठस्य भृत्यादेः अतोऽपि कारणादेनं जनसंघमायन्तं मुख्यस्य नाम्नैव व्यवहरन्ति -अयं राजा समागच्छतीति । तथाऽस्मि ग्रामेऽयं स्वामी निवसतीति । तस्माल्लोकवदेवात्रापि श्रेष्ठेन चतुर्होत्रा सर्वमन्त्रव्यवहारो नत्वितरैर्दशहोत्रादिभिरित्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठके प्रथमोऽनुवाकः ।। १ ।।

अथ तृतीयप्रपाठके द्वितीयोऽनुवाकः ।

प्रथमानुवाके चतुर्होतृशब्देन सर्वहोतृमन्त्रव्यवहार उपपादितः । द्वितीय होतृमन्त्रेण नैमित्तिका अभिधीयन्ते । तत्राऽऽदौ तावद्दक्षिणाप्रतिग्रहे कंचिद्विशेषं विधत्ते-

दक्षिणां प्रतिग्रहीष्यन्सप्तदशकृत्वोऽपान्यात् । आत्मानमेव समिन्धे । तेजसे वीर्याय । अथो प्रजापतिरेवैनां भूत्वा प्रतिगृह्णाति । आत्मानोऽनार्त्यै, इति

अपान्याद्वायोरन्तराकर्षणरूपं निश्वासं कुर्यात् । तेन शरीरमध्ये स्थितो भवति । तेजः प्रतिग्रहयोग्यता । वीर्यं प्रतिग्रहप्रयुक्त-दोषनिवारणसामर्थ्यम् । तदुभयमनेन निःश्वासेन मध्ये तिष्ठति अपि च प्रजापतेः सप्तदशाक्षरात्मकत्वात्संख्यासाम्येन तद्रूप एव भूत्वा दक्षिणा प्रतिगृह्णाति ततस्त्वात्मन आर्तिः प्रत्यवायरूपो न भवति ।

अथ होतृमन्त्रेण नैमित्तिकं विधत्ते-

यद्येनमार्त्विज्याद्व्रतं सन्तं निर्हरेरन् । आग्नीध्रे जुहुयाद्दशहोतारम् । चतुर्गृहीतेनाऽऽज्येन ।

Digitized by Madhuban Trust, Delhi

पुरस्तात्प्रत्यङ्तिष्ठन् । प्रतिलोमं विग्राहम् (१) । प्राणानेवास्योपदासयति, इति ।

आर्त्विज्यार्थं वृत्तं कंचिदेकं पुरुषमितरे यदि ऽऽर्त्विज्यान्निराकृतवन्तस्तदानीं निराकृतः पुरुषो होमं जुहुयात् । तदा होतृमन्त्रस्य सामाध्वर्युरित्येतद्यदन्तिमे वाक्यं तदारभ्य चित्तिः स्रुगित्यादिवाक्ये समाप्तिः । प्रतिलोमम् । तत्रापि प्रतिवाक्यं विगृह्य पृथक्पृथगाहुतीर्जुहुयात् । एतस्य यो निराकर्ता तस्य प्राणनुपक्षपयति ।

अथ प्रकारान्तरेण नैमित्तिकहोमं विधत्ते-

यद्येनं पुनरुपशिक्षेयुः । आग्नीध्र एव जुहुयाद्दशहोतामरम् । चतुर्गृहीतोनाऽऽज्येन । पश्चात्प्राङासीनः । अनुलोममविग्राहम् । प्राणानेवास्मै कल्पयति, इति ।

यदि तदीयहोमाद्भीताः सन्त एनं निराकृतं पुनरपि स्वीकुर्युस्तानीं विरोधिनिग्रहार्थमनुष्ठानात्पूर्वहोमाद्विपर्ययेणानुग्रहार्थं होमं कुर्यात् । तत्र चित्तिः स्रुगादिरनुलोमपाठः । आहुतिश्चैकैव । न तु विगृह्य होमः । तेन तस्य निराकर्तुः प्राणान्कल्पयति स्वस्थान्करोति ।

अथान्यं प्रयोगं विधत्ते-

प्रायश्चित्ती वाग्घोतेत्यृतुमुख ऋतुमुखे जुहोति । ऋतूनेवास्मै कल्पयति । कल्पन्तेऽस्मा ऋतवः (२) । क्लृप्ता अस्मा ऋतव आयन्ति, इति ।

प्रायश्चित्तं कर्तव्यमित्येवं बुद्धिमान्प्रायश्चित्ती स पुमान्वाग्घोतेत्युनुवाकेन तस्मिनृतुपक्रमे जुहुयात् यदा विहितानुष्ठानं स्वमनसि शङ्कितं भवति प्रतिपदोक्तं च प्रायश्चितं न दृश्यते तदानीं शङ्कितदोषपरिहाराय समनन्तरभाविन ऋतोरुपक्रमदिने तेनानुवाकेन जुहुयात् । स चानुवाक अरण्यकाण्ड एवमाम्नातः-"वाग्घोता । दीक्षा पत्नी । वातोऽध्वर्युः । आपोऽभिगरः । मनो हविः । तपसि जुहोमि । भूर्भुवः सुवः । ब्रह्म स्वयंभूः । ब्रह्मणे स्वयम्भुवे स्वाहा" इति । तत्र वागादिदेवतानां होत्रादिरूपत्वमनुसंधेयम् । होत्रा शस्त्रेषु शस्यमानेषु

Digitized by Madhuban Trust, Delhi

"ओंथामो दैवा" इत्यादिभिर्वाक्यैरध्वर्योर्यः प्रतिगरः स चाब्देवतारूपः। शंसनकाले होताऽध्वर्युमाभिमुख्येनाऽऽह्वयति-"शोंसावोम्" इति। हेऽध्वर्यो शस्त्रं पठामि मदीयशस्त्रपाठकाले प्रतिगराय त्वं सावधानो भव। य एते भूदरायस्त्रयो लोकास्तेषामादिकारणं यत्स्वयंभु ब्रह्म तस्मै जुहुधीति स्वकीया वागाह। अनेन मन्त्रेण होमे सति शङ्कितप्रायश्चित्तपरिह्वारेण सर्वानृतूनस्मै होमकर्त्रे तत्स्वयंभूर्ब्रह्म फलप्रदान्करोति। त ऋतव एतदर्थं फलप्रदानसमर्था भवन्ति। समर्थाः सन्तोऽस्य समीपमागच्छन्ति। तत्र सूत्रकारस्तु- "कल्पन्तेऽस्मै" इत्यादिफलमवलोक्य काम्यप्रयोगत्वेनोदाजहार- "अथैष ऋतमुखी यः षड्ढोता वाग्घोतेति तस्य वदत्यृतुमुख ऋतुमुखे जुहुयादिति स सार्वकामः" इति।

"अथ वाग्घोता" इति मन्त्रं प्रशंसति-

षड्ढोता वै भूत्वा प्रजापतिरिदँ सर्वमसृजत। स मनोऽसृजत। मनसोऽधि गायत्रीमसृजत। तद्गायत्रीं यश आर्च्छत्। तामालभत। गायत्रिया अधि च्छन्दाँस्यसृजत। छन्दोभ्योऽधि साम। तत्साम यश आर्च्छत्। तदालभत (३)। साम्नोऽधि यजूँष्यसृजत। यजुर्भ्योऽधि विष्णुम्। तद्विष्णुं यश आर्च्छत्। तमालभत। विष्णोरध्योषधीरसृजत। ओषधीभ्योऽधि सोमम्। तत्सोमं यश आर्च्छत्। तमालभत। सोमादधि पशूनसृजत। पशुभ्योऽधीन्द्रम् (४)। तदिन्द्रं यश आर्च्छत्। तदेनं नातिप्राच्यवत। इन्द्र इव यशस्वी भवति। य एवं वेद। नैनं यशोऽतिप्रच्यवते, इति।

वाग्घोतेति मन्त्रे होतृपत्न्यादीनां सप्तदशवर्णानां विद्यमानत्वादयं षड्ढोता प्रजापतिस्तन्मन्त्रानुष्ठानेन तद्रूपो भूत्वा सर्वमिदमसृत। आदौ तावत्सर्वसंकल्पक्षमं मनः सृष्ट्वा मनसा संकल्प्य तदूर्ध्वं गायत्रीदेवतामसृजत। तदानीं प्रजापतिसंबन्धि यद्यशः सामर्थ्यं तद्गायत्रीं प्राप्नोत्। ततःप्रजापतिस्तां गायत्रीं पशुवदालभ्य गायत्र्या अधिकान्युष्णिगादीनि च्छन्दांस्यसृजत। तेभ्यच्छन्दोभ्योऽत्यधिकं सप्तस्वरोपेतं सामासृजत। तत सामदेवतां यशः प्राप्नोत्। अथ प्रजापतिस्तदपि साम पशुत्वेनाऽऽलभत।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एवमुत्तरत्र योज्यम् । तत्प्रजापतेर्यशोऽन्तत इन्द्रं प्राप्य तमतिक्रम्य नान्यत्र क्वापि गतम् । तदेवं षड्ढोतृमन्त्रसामर्थ्यादिन्द्राधिपत्यपर्यन्ता सृष्टिरासीत् । ततोऽयमत्यन्तप्रशस्तः । य एवं मन्त्रवृत्तान्तं वेद सोऽपीन्द्रवद्यशस्वी भवति । तद्यशस्तं पुरुषं कदाचिदप्यतिक्रम्य नान्यत्र गच्छति ।

प्रतिग्रहमन्त्रानुवाके-"सोमाय वासः, रुद्राय गाम्" इत्यादिना यानि द्रव्याण्याम्नातानि तद्व्यतिरिक्तद्रव्यविषये प्रतिग्रहमन्त्रं विधत्ते-

यद्वा इदं किंच । तत्सर्वमुत्तान एवाऽऽङ्गीरसः प्रत्यगृह्णात् । तदेनं प्रतिगृहीतं नाहिनत् । यत्किंच प्रतिगृह्णीयात् । तत्सर्वमुत्तानस्त्वाऽऽङ्गीरसः प्रति गृह्णात्वित्येव प्रतिगृह्णीयात् । इयं वा उत्तान आङ्गीरसः । अनयैवैनत्प्रतिगृह्णाति । नैनꣳ हिनस्ति, इति ।

लोके प्रतिग्रहयोग्यं यत्किंचिद् द्रव्यं तत्सर्वमङ्गिरसः पुत्र उत्तानाख्य एव पुरा कदाचित्प्रत्यगृह्णात् । तत्र प्रतिगृहीतं द्रव्यं प्रतिगृहीतारमुत्तानमेनं नैव हिंसेत् । अतोऽन्योऽपि सर्वमुत्तान इति मन्त्रेणैव प्रतिगृह्णीयात् । यथा भूमिः सर्वंसहा तथाऽयमुदानः सर्वप्रतिग्रहसहिष्णुः । ततो भूमिरूपत्वाद्भूम्या सर्वं प्रतिगृहीतं न तु पुरुषेणेत्येनं पुरुषं प्रतिग्रहदोषो न हिनस्ति ।

अथ गवाश्वप्रतिग्रहे विशेषं विधत्ते-

बर्हिषा प्रतीयाद्गां वाऽश्वं वा । एतद्वै पशूनां प्रियं धाम । प्रियेणैवैनं धाम्ना प्रत्यैति (५) । इति ।

विग्राहमृतवस्तदालभतेन्द्रं गृह्णीयात्षट् च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

तृतीयाध्याये द्वितीयोऽनुवाकः ॥ २ ॥

गामश्वं वा प्रतिग्रहीष्यन्पुरुषस्तृणमुष्टिना युक्तः संमुखं गच्छेत् । तृणस्वपशुप्रियवस्तुत्वात्पशुप्रियेणैव वस्तुना सह संमुखो भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

Digitized by Madhuban Trust, Delhi

अथ तृतीयप्रपाठके तृतीयोऽनुवाकः ।

द्वितीये नैमित्तिको होतृमन्त्रहोम उक्तः । तृतीये केशनिवर्तनविषये कंचिद्ध्यानविशेषं दर्शयति । एतच्च होतृमन्त्रप्रयुक्तेषु कर्मसु चातुर्मास्यादिकर्मसु च यत्र यत्र केशनिकृन्तनमस्ति तत्र सर्वत्राङ्गत्वेनैतद्वेदनं द्रष्टव्यम् । तदिदं वेदनमन्त्रव्यतिरेकाभ्यां विधत्ते-

यो वा अविद्वान्निवर्तयते । विशीर्षा स पाप्माऽमुष्मिँल्लोके भवति । अथ यो विद्वान्निवर्तयते । सशीर्षा विपाप्माऽमुष्मिँल्लोके भवति, इति ।

वक्ष्यमाणप्रकारेणाग्न्यादयो देवाः केशनिवर्तनेन यां पुष्टिं संपादितवन्तस्तत्पुष्टिसाधनमिह निवर्तनमित्यविद्विवा यः केशनिवर्तनं प्राप्नोति स स्वर्गे लोके शिरोरहितः पापी भवति । तद्वेदनपूर्वकं तु निवर्तने शिरःसहितः पापरहितो भवति । तस्माद्वेदनं संपादयेत् ।

ता एता अग्न्यादिभिः संपादिताः पुष्टीः क्रमेण दर्शयति-

देवता वै सप्त पुष्टिकामा न्यवर्तयन्त । अग्निश्च पृथिवी च । वायुश्चान्तरिक्षं च । आदित्यश्च द्यौश्च चन्द्रमाः । अग्निर्न्यवर्तयत । स साहस्रमपुष्यत् । (१) । पृथिवी न्यवर्तयत । सौषधीभिर्वनस्पतिभिरपुष्यत् । वायुर्न्यवर्तयत । स मरीचीभिरपुष्यत् । अन्तरिक्षं न्यवर्तयत । तद्वयोभिरपुष्यत् आदित्यो न्यवर्तयत । स रश्मिभिरपुष्यत् । द्यौर्न्यवर्तयत । सा नक्षत्रैरपुष्यत् । चन्द्रमा न्यवर्तयत । सोऽहोरात्रैरर्धमासैर्मासैर्ऋतुभिः संवत्सरेणापुष्यत् । तान्पोषान्पुष्यति । याँस्तेऽपुष्यन् । य एवं विद्वान्नि च वर्तयते परि च (२), इति ।

अपुष्यन्नक्षत्रैरपुष्यत्पञ्च च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके तृतीयाध्याये तृतीयोऽनुवाकः ॥ ३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

न्यवर्तयत स्वकीयान्केशान्नवर्तयत स साहस्रं सहस्रसंख्योपेतं धनमपुष्यत्पुष्टमकरोत् । पृथिव्यादय ओषध्यादिभिर्जगत्पुष्टिं संपादितवन्तः । मरीचिशब्देनाग्नय उपलक्ष्यते । वायुना ह्यग्नयः प्रज्ज्वाल्यन्ते । वयोभिः पक्षिभिः । यः पुमानग्न्या दिदेव ताभिः संपादितां सृष्टिं तत्साधनत्वं च निवर्तनस्य विद्वान्निवर्तयते परिवर्तयते वा केशानां कर्तनं स पुमानग्न्यादिभिर्ये पोषाः संपादतितास्तान्पोषान्सर्वान्प्राप्नोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठके तृतीयोऽनुवाकः ।। ३ ।।

अथ तृतीयप्रपाठके चतुर्थोऽनुवाकः ।

तृतीय केशवपनाङ्गं पुष्टिवेदनमुक्तम् । अथ प्रतिग्रहमन्त्रेषु तत्तन्मन्त्रविज्ञानं चतुर्थेऽभिधीयते । तत्र हिरण्यप्रतिग्रहमन्त्रस्य महिमवेदनमन्वयव्यतिरेकाभ्यां विधत्ते-

तस्य वा अग्नेर्हिरण्यं प्रतिजग्रहुषः । अर्धमिन्द्रियस्यापाक्रामत् । तदेतेनैव प्रत्यगृह्णात् । तेन वै सोऽर्धमिन्द्रियस्याऽऽत्मन्नुपाधत्त । अर्धमिन्द्रियस्याऽऽत्मन्नुपाधत्ते । य एवं विद्वान्हिरण्यं प्रतिगृह्णाति । अथ योऽविद्वान्पतिगृह्णाति । अर्धमस्येन्द्रियस्यापक्रामति, इति ।

पुरा कदाचिदग्निर्मन्त्रमन्तरेण हिरण्यं प्रतिगृहीतवान् । तस्याग्नेः शरीरवर्ति यदिन्द्रियं वीर्यं तस्यार्धमग्नेः सकाशादपगतम् । तदानीं स्वकीयं बलक्षयं दृष्ट्वा तत्परिहाराय-"राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्नं ये हिरण्यम्" इत्येतेनैव मन्त्रेण प्रत्यगृह्णात् । तत्राग्निना पठ्यमाने मन्त्रे योऽयं चतुर्थ्यन्तोऽग्निशब्दस्तस्य कल्पान्तरगतोऽग्निरित्यर्थः । तद् व्यवधानेन प्रतिग्रहे सति तेनैवं मन्त्रेण पूर्वमपगतं स्वकीयवीर्यस्यार्धं स्वस्मिन्नेव पुनःसमाधत्त । यः पुमानेवं मन्त्रमहिमानं विद्वान्प्रतिगृह्णाति तस्येन्द्रियभागो नातिक्रामति-किंतु स्वस्मिन्नेव समाहितो भवति । अविदुषस्तु स भागः स्वस्मादपगच्छति ।

हिरण्यमन्त्रवद्रवस्त्रग्गवाश्वपुरुषतल्पशकटप्रतिग्रहमन्त्राणां षण्णां वेदनमन्वयव्यतिरेकाभ्यां विधत्ते-

Digitized by Madhuban Trust, Delhi

तस्य वै सोमस्य वासः प्रतिजग्रहुषः । तृतीयमिन्द्रियस्यापाक्रामत् (१) । तदेतेनैव प्रत्यगृह्णात् । तेन वै स तृतीयमिन्द्रियस्याऽऽत्मन्नुपाधत्त । तृतीयामिन्द्रियस्याऽऽत्मन्नुपाधत्ते । य एवं विद्वान्वासः प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । तृतीयमस्येन्द्रियस्यापक्रामति । तस्य वै रुद्रस्य गां प्रतिजग्रहुषः । चतुर्थमिन्द्रियस्यापाक्रामत् । तामेतेनैव प्रत्यगृह्णात् । तेन वै स चतुर्थमिन्द्रियस्याऽऽत्मन्नुपाधत्त (२) । चतुर्थमिन्द्रियस्याऽऽ त्मन्नुपाधत्ते । य एवं विद्वान्गां प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । चतुर्थमस्येन्द्रियस्यापक्रामति । तस्य वै वरुणस्याश्वं प्रतिजग्रहुषः । पञ्चममिन्द्रियस्यापाक्रामत् । तमेतेनैव प्रत्यगृह्णात् । तेन वै स पञ्चममिन्द्रियस्याऽऽत्मन्नुपाधत्त । पञ्चममिन्द्रियस्याऽऽत्मन्नुपाधत्ते । य एवं विद्वानश्वं प्रतिगृह्णाति (३) । अथ योऽविद्वान्प्रतिगृह्णाति । पञ्चममस्येन्द्रियस्यापक्रामति । तस्य वै प्रजापतेः पुरुषं प्रतिजग्रहुषः । षष्ठमिन्द्रियस्यापाक्रामत् । तमेते नैव प्रत्यगृह्णात् । तेन वै स षष्ठमिन्द्रियस्याऽऽत्मन्नुपाधत्त । षष्ठमिन्द्रियस्याऽऽत्मन्नुपाधत्ते । य एवं विद्वान्पुरुषं प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । षष्ठमस्येन्द्रियस्यापक्रामति । (४) । तस्य वै मनोस्तल्पं प्रतिजग्रहुषः । सप्तममिन्द्रियस्यापाक्रामत् । तमेतेनैव प्रत्यगृह्णात् । तेन वै स सप्तममिन्द्रियस्याऽऽत्मन्नुपाधत्त । सप्तममिन्द्रियस्याऽऽत्मन्नुपाधत्ते । य एवं विद्वाँ स्तल्पं प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । सप्तममस्येन्द्रियस्यापक्रामति । तस्य वा उत्तानस्याऽ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऽङ्गीरसस्याप्राणत्प्रतिजग्रहुषः । अष्टममिन्द्रियस्यापाक्रामत् (५) । तदेतेनैव प्रत्यगृह्णात् । तेन वै सोऽष्टममिन्द्रियस्याऽऽत्मन्नुपाधत्त । अष्टममिन्द्रियस्याऽऽत्मन्नुपाधत्ते । य एवं विद्वानप्राणत्प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । अष्टममस्येन्द्रियस्यापक्रामति, इति ।

अत्र तृतीयचतुर्थादिशब्दा वीर्यभागपराः । अप्राणत्प्राणवायुरहितमचेतनं शकटमुत्तानायाऽऽङ्गीरसायान इति तत्तत्पर्यायेषु प्रथमपर्यायवद् व्याख्येयम् ।

यदुक्तं द्वितीयानुवाकेनाऽऽम्नातमन्त्राणामुत्तानमन्त्रेण प्रतिग्रह इति तदप्यत्र मन्त्रमहिमवेदनप्रसङ्गेन तदीयवेदनविधानार्थं पुनः पठति-

यद्वा इदं किंच । तत्सर्वमुत्तान एवाऽऽङ्गीरसः प्रत्यगृह्णात् । तदेनं प्रतिगृहीतं नाहिनत् । यत्किंच प्रतिगृह्णीयात् । तत्सर्वमुत्तानस्त्वाऽङ्गीरसः प्रतिगृह्णात्वित्येव प्रतिगृह्णीयात् । इयं वा उत्तान आङ्गीरसः । अनयैवैनत्प्रतिगृह्णाति । नैनꣳहिनस्ति (६), इति ।

तृतीयमिन्द्रियस्यापाक्रामच्चतुर्थमिन्द्रियस्याऽऽत्मन्नुपाधत्ताश्वंप्रतिगृह्णाति षष्ठमस्येन्द्रिस्यापक्रामत्यष्टममिन्द्रियस्यापाक्रा मत्प्रतिगृह्णीयाच्चत्वारि च ।

तस्य वा अग्नेर्हिरण्य सोमस्य वासस्तदेतेन रुद्रस्य गां तामेतेन वरुण स्याश्वं प्रजापतेः पुरुषं मनोस्तल्पं तमेतेनोत्तानस्य तदेतेनाप्राणद्यद्वै । अर्ध तृतीयमष्टमं तच्चतुर्थ तां शेषं तं वै ते सत्रं के ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयाध्याये चतुर्थोऽनुवाकः ।। ४ ।।

पूर्ववद्व्याख्येयम् । एवं मन्त्रमहिमाऽप्यनुसंधेय इति तात्पर्यार्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठके चतुर्थोऽनुवाकः ।। ४ ।।

Digitized by Madhuban Trust, Delhi

अथ तृतीयप्रपाठके पञ्चमोऽनुवाकः ।

चतुर्थे प्रतिग्रहमन्त्रमहिमज्ञानं विहितम् । द्वादशाहगतस्य दशरात्रस्य दशमेऽहन्यध्वर्युप्रभृतयः प्रष्टारो ग्र (गृ) हयतिः प्रतिवक्ता तेषां प्रश्नोत्तरं पञ्चमानुवाकेऽभिधीयते । अत्र प्रश्नोत्तररूपं संवादं विधत्ते-

ब्रह्मवादिनो वदन्ति, इति ।

वक्ष्यमाणप्रश्नोत्तररूपं ब्रह्म तद्वदनशीला ब्रह्मवादिनस्ते परस्परं वदन्ति संवादं कुर्युरित्यर्थः । अत एव सूत्रकारः"ब्रह्मवाद्यं वदन्त इति विज्ञायते" इति शाखान्तरवचनमुदाजहार । उदाहृत्य चैवमुक्तम्- "गृहपतिमेव महर्त्विजः पर्युपविश्य पृच्छेयुः" इति ।

तत्राध्वर्युगृहपत्योः प्रश्नोत्तरं वाक्यं दर्शयति-

यद्दशहोतारः सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् । केन प्रजा असृजन्तेति । प्रजापतिना वै ते गृहपतिनाऽऽर्ध्नुवन् । तेन प्रजा असृजन्त, इति ।

यदा दशहोतृमन्त्राभिमानिनो देवाः सत्रमन्वतिष्ठंस्तदानीं केन गृहपतिना सत्ररूपां समृद्धिं प्राप्नुवन् । प्राप्य च केन गृहपतिना प्रजाः सृष्टवन्तः । सत्रार्थं दीक्षितेषु मध्ये मुख्यो गृहपतिः । इतरेऽध्वर्युप्रभृतय ऋत्विजः । तत्राध्वर्युप्रश्नस्य गृहपतिनोत्तरमेवं दत्तम् । प्रजापतिरिव दशहोतृणां सत्रे गृहपतिरासीत्तेन प्रजापतिना फलसमृद्धिः प्रजोत्पत्तिश्च संपादिता ।

होतुः प्रश्नस्तस्योत्तरं च दर्शयति-

यच्चतुर्होतारः सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् । केनौषधीरसृजन्तेति । सोमेन वै ते गृहपतिनाऽऽर्ध्नुवन् (१) । तेनौषधीरसृजन्त, इति ।

पूर्ववद्व्याख्येयम् ।

यत्पञ्चहोतारः, सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् । केनैभ्यो लोकेभ्योऽनुसुरान्प्राणुदन्त । केनैषां पशूनवृञ्जतेति । अग्निना वै ते गृहपतिनाऽऽर्ध्नुवन् । तेनैभ्यो लोकेभ्योऽसुरान्प्राणुदन्त । तेनैषां पशूनवृञ्जत, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एषामसुराणां पशून्विनाशितवन्तः अन्यत्पूर्ववद् व्याख्येयम् ।

अथ होतृकाणां प्रश्नोत्तरे दर्शयति-

यत्षड्ढोतारः सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् (२) । केनर्तूनकल्पयन्तेति । धात्रा वै ते गृहपतिनाऽऽर्ध्नुवन् । तेनर्तूनकल्पयन्त, इति ।

पूर्ववद्व्याख्येयम् ।

अथोद्गातुः प्रश्नं तस्योत्तरं च दर्शयति-

यत्सप्तहोतारः सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् । केन सुवरायन्। केनेमाँल्लोकान्त्समतन्वन्निति । अर्यम्णा वै ते गृहपतिनाऽऽर्ध्नुवन् । तेन सुवरायन् । तेनेमाँल्लोकान्त्समतन्वन्निति (३), इति ।

सुवरायन्स्वर्गं प्राप्ताः । समतन्वन्संततानविच्छिन्नान्कृतवन्तः । उक्तेषु प्रश्नोत्तरेषु निर्णीतानां गृहपतीनां वेदनं प्रशंसति-

एते वै देवा गृहपतयः । तान्य एवं विद्वान् । अप्यन्यस्य गार्हपते दीक्षते। । अवान्तरमेव सत्रिणामृध्नोति, इति ।

प्राजापतिः सोमोऽग्निर्धाताऽर्यमा चेत्येते देवाः पूर्वोक्तप्रश्नोत्तरेषु निर्णीता गृहपतयः । यः पुमांस्तान्गृहपतीन्विदित्वा ध्यायेत्सोऽन्यस्यापि गार्हपत्ये कर्मणि यदि दीक्षते तदानीमवान्तरमेव पृथगेव सत्रिणां फलं प्राप्नोति । अयमर्थः-दीक्षितेषु सत्रिषु स्वयं गृहपतिर्न भवति । किंत्वध्वर्युप्रभृतिषु कश्चिद्गृहपतिस्त्वन्य एव । तस्यैवान्यवद् गृहपतित्वोपपत्तेः । तस्य यत्फलं तदेव तस्यै भवति । किंच तस्यैव सर्व ऋत्विजो गृहपतित्वोपपत्तिकर्मण्यनुकूला भवन्ति । तथा च तस्य मुख्यत्वाभावेऽपि प्रजापत्यादिगृहपतिवेदनसामर्थ्येन सर्वेषां यावत्फलं तावत्स्वयं पृथगेव प्राप्नोति ।

पूर्वोक्तस्य पञ्चमस्य गृहपतेरर्यमाख्यस्य वेदनं पुनर्विशेषेण प्रशंसति-

यो वा अर्यमणं वेद । दानकामा अस्मै प्रजा भवन्ति ।

Digitized by Madhuban Trust, Delhi

यज्ञो वा अर्यमा । आर्यावसतिरिति वै तमाहुर्यं प्रशंसन्ति, इति ।

योऽयमर्यमा देवेषु गृहपतित्वेनोक्तः सोऽयं यज्ञनिष्पादकत्वाद्यज्ञ एव । एवं तमर्यमणं यो वेदास्य वेदितुः पुत्राद्याः प्रजा दानकामा भवन्ति । स्वकर्तृकं दानं कामयन्ते । दातारो भवन्तीत्यर्थः । आर्याः पूज्या गुर्वादयस्तेषामावसतिः साकल्येन निवासहेतुरित्यनेनैव शब्देन लोके व्यवहरन्ति यं प्रशंसितुमिच्छन्ति । अयमर्थः - दानशीलं राजानममात्यं वा यदा प्रशंसन्ति तदानीमयं राजाऽऽर्याणां साधूनां विदुषां यष्टृणां वा गुरुणां च स्वकीयगृहनिवासहेतुरिति प्रशंसति । तस्मादार्यावमतिशब्दो निरतिशयप्रशंसावाची । अर्यमाशब्दस्याऽऽर्यावसतिशब्दः पर्यायः । आर्याः पूज्यन्ते मन्यन्त इति वा व्युत्पत्तेः ।

प्रकारान्तरेण तमर्यमणं पुनः प्रशंसति-

आर्यावसतिर्भवति । य एवं वेद (४), इति ।

ईदृशमर्यमणं सर्वेषामार्याणां निवासहेतुं यो वेद सोऽप्यार्याणां निवासभूमिर्भवति ।

अथ चतुर्होतृमन्त्रवेदनं प्रशंसति-

यद्वा इदं किंच । तत्सर्वं चतुर्होतारः । चतुर्होतृभ्योऽधि यज्ञो निर्मितः । स य एवं विद्वान्विवदेत । अहमेव भूयो वेद । यश्चतुर्होतृन्वेदेति । स ह्येव भूयो वेद । यश्चतुर्होतृन्वेद, इति ।

यदिदं किंचित्प्रजापतिसृष्टं जगद् दृश्यते तत्सर्वं होतृमन्त्राणां स्वरूपभूतम् । तन्मन्त्रबलादेव तत्सृष्टेः पूर्वप्रपाठके बहुधा प्रपञ्चितत्वात् । किंच चतुर्होतृमन्त्रेभ्य ऊर्ध्वं सर्वोऽपि यज्ञो निर्मितः । तत्तद्यज्ञारम्भे होतृमन्त्रहोमस्य पूर्वं विहितत्वात् । एवं सति यो विद्वान्विवदेत यः कोऽपि होतृमन्त्रमाहात्म्यं विद्वानितरैः सह विवादं कुर्यात् । कीदृशो विवाद इति तदुच्यते-योऽहं होतृमन्त्रान्वेद सोऽहमेव सर्वेषां मध्ये भूयो वेदितेति । तस्मिन्विवादे तस्यैव होतृमन्त्राभिज्ञस्य जय इत्युत्तरवाक्ये प्रसिद्धवाचिना हि शब्देन स्पष्टीकरोति । होतृमन्त्ररहस्यं यो वेत्ति स एव भूयो वेदेत्यतिप्रसिद्धमित्यर्थः ।

अथ होतृमन्त्राभिमानिदेवविषयं वेदनं प्रशंसति-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यो वै चतुर्होतृणाꣳ होतृन्वेद । सर्वासु प्रजास्वन्नमत्ति (५) । सर्वा दिशोऽभिजयति । प्रजापतिर्वै दशहोतृणाꣳ होता । सोमश्चतुर्होतृणाꣳ होता । अग्निः पञ्चहोतृणां होता । धाता षड्ढोतृणाꣳ होता । अर्यमा सप्तहोतृणाꣳ होता । एते वै चतुर्होतृणाꣳ होतारः । तान्य एवं वेद । सर्वासु प्रजास्वन्नमत्ति । सर्वा दिशोऽभिजयति (६), इति ।

आर्ध्नुवन्नाध्वन्नित्येव वेदात्ति सर्वा दिशोऽभिजयति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयाध्याये पञ्चमोऽनुवाकः ।। ५ ।।

होतृमन्त्रैर्होमादिकं निष्पाद्य फलसाधकाः प्रजापत्यादयो मन्त्राणां होतारः । तान्यो वेद सोऽयं सर्वासु प्रजासु यदन्नं तत्सर्वमनुभवति । सर्वाः प्रजा अस्मै प्रशस्तमन्नं समर्पयन्तीत्यर्थः । किंच सर्वदिग्वर्तिन्यः प्रजा अस्य वश्या भवन्ति । प्रजापतिर्वै दशहोतृणामित्यादौ होतृमन्त्रस्यावयवभेदात्मयोगभेदाद्वा बहुवचननिर्देशः । तान्य एवं वेदेत्यादिपुनरुक्तिरूपसंहारार्था ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठके पञ्चमोऽनुवाकः ।। १ ।।

अथ तृतीयप्रपाठके षष्ठोऽनुवाकः ।

पञ्चमेऽनुवाके प्रश्नोत्तररूपो ब्रह्मविषयः संवाद उक्तः । षष्ठे होतृमन्त्रप्रशंसार्थमग्निहोत्रादिकर्मभिः प्रजापतिशरीरनिष्पादनमभिदधानः कर्मविशेषेष्वृत्विग्विशेषनिर्णयोऽभिधीयते । तत्राऽऽदौ तावदग्निहोत्रस्यैकमृत्विजं दर्शयति–

प्रजापतिः प्रजाः सृष्ट्वा व्यस्रꣳसत । स हृदयं भूतोऽशयत् । आत्मन् हा३ इत्यह्वयत् । आपः प्रत्यशृण्वन् । ता अग्निहोत्रेणैव यज्ञक्रतुनोप र्त पर्यावर्तन्त । ताः कुसिंधुमपौहन् । तस्मादग्निहोत्रस्य यज्ञक्रतोः । एक ऋत्विक्, इति ।

Digitized by Madhuban Trust, Delhi

प्रजापतिर्महतः पायसेन प्रजाः सृष्ट्वा तेन प्रयासेन विस्रस्तहस्तपादादिसर्वावयवो हृदयमात्रावशेषः सन्व्यवहर्तुमशक्तः क्वचिच्छयितोऽभूत् । तदानीं ह आत्मन्नित्येवं स्वकीयं शरीररमाहूतवान्। ह्वे शब्दे योऽयमेकारस्तस्य प्लुत आकार इकारशिरस्क आदेशो भवति । दूरादाह्वानार्थः प्लुतः । आत्मशब्दः शरीरवाची । तदेतच्छरीराह्वानमब्देवता श्रुत्वाऽग्निहोत्रेण सह प्रजापतिसमीपे समागत्य कुसिंघं शिरोऽव्यतिरिक्तं देहमुपायन् । कुसिमात्मशोकं दधातीति कुसिंघः । यद्यपि यूपवन्तो यज्ञक्रतवस्तथाऽप्यग्निहोत्रस्य तद्रूपत्वमुपचरितम् । यस्मात्सकृदाह्वानिराद्भिः सहाग्निहोत्रमागतं तस्मादग्निहोत्रस्याध्वर्युरेक ऋत्विक् ।

अथ दर्शपूर्णमासयोर्ब्रह्मा होताऽध्वर्युरग्निरिति चतुर ऋत्विज इति दर्शयति-

च॒तुष्कृत्वोऽह्वयत । अ॒ग्निर्वा॒युरादि॒त्यश्च॒न्द्रमाः १) । ते प्रत्यशृण्वन् । ते दर्शपूर्णमा॒साभ्यामे॒व यज्ञक्र॒तुनोपप॒र्यावर्तन्त । त उपौहँ श्चत्वा॒र्यङ्गानि । तस्माद्दर्शपूर्णमा॒सयोर्यज्ञक्र॒तोः । च॒त्वार ऋ॒त्विजः, इति ।

अग्न्यादयो देवा दर्शपूर्णमासाभ्यां सदाऽऽगत्य द्वौ हस्तौ द्वौ पादावित्येवं चत्वार्यङ्गान्यानीतवन्तः . ततो दर्शपूर्णमासयोश्चत्वार ऋत्विजः संपन्नाः ।

अथ चतुर्मास्यानां प्रतिप्रस्थात्रा सह पूर्वोक्तांश्चतुर ऋत्विजो दर्शयति-

प॒ञ्च॒कृत्वोऽह्वयत् । प॒शव॒ः प्रत्यशृण्वन् । ते चातुर्मा॒स्यैरे॒व यज्ञक्रतुनोपप॒र्यावर्तन्त । त उपौ हँल्लोम च्छ॒वीं मा॒ँसमस्थि म॒ज्जानम् । तस्माच्चातुर्मा॒स्यानां यज्ञक्र॒तोः (२) । पञ्च॒र्त्विजः, इति ।

यथा प्रथमे पर्यायं शरीरस्य सकृदाह्वानं यथा च द्वितीयपर्याये चतुराह्वानम् । तथा तृतीये प्रर्याये पञ्चवारमाह्वानम् । तदेतत्पश्वभिमानिनो देवाः श्रुत्वा चातुर्मास्ये सहाऽऽगत्य लोमादीन्यानीतवन्तः । छविस्त्वक् । यद्यपि प्रथमपर्याय एव कबन्धमानीतवन्तस्थापि तत्र कण्ठस्याधस्तन ऊरूभ्यामूर्ध्ववर्तिमध्यभाग

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एव विवक्षितः । अतो द्वितीयपर्याये हस्तपादानयनम् । तत्रोभयत्राऽऽकारमात्रं संपन्नं न तु लोभादिपरिपूर्तिः । सा चास्मिन्पर्याय एव कृता । यस्मात्पञ्चवारमाह्वानं यस्माच्च हेमादिपञ्चकसंपत्तिस्तस्मात्तत्साधनभूतानां चातुर्मास्यानामृत्विजः पञ्चसंख्याकाः ।

अथ निरूढपशुबन्धादौ मैत्रावरुणेन सहितान्पूर्वोक्तान्पञ्चर्त्विजो दर्शयति-

षट्कृत्वोऽह्वयत् । ऋतवः प्रत्यशृण्वन् । ते पशुबन्धेनैव यज्ञक्रतुनोपपर्यावर्तन्त । त उपौहंस्तनावाण्डौ शिनवाञ्चं प्राणम् । तस्मात्पशुबन्धस्य यज्ञक्रतोः । षड्त्विजः, इति ।

षड्वारमाह्वानात्स्तनादीनामपि षट्त्वात्तत्साधनभूते पशुबन्धे षड्र्त्विजः संपन्ना ।

अथ सोमयागे होता मैत्रावरुणो ब्राह्मणाच्छंसी नेष्टा पोताऽऽग्नीध्रोऽच्छावाकश्चेति सप्त होत्रान्द (द) र्शयति-

सप्तकृत्वोऽह्वयत् । होत्राः प्रत्यशृण्वन् । ताः सौम्येनैवाध्वरेण यज्ञक्रतुनोपपर्यावर्तन्त (३) । ता उपौहन्त्सप्तशीर्षण्यान्प्राणान् । तस्मात्सौम्यस्याध्वरस्य यज्ञक्रतोः । सप्तहोत्राः प्राचीर्वषट्कुर्वन्ति, इति ।

सप्तवारमाह्वानाच्छिरोनिष्ठसप्तच्छिद्रवर्तिप्राणानयनात्तत्साधने सोमाध्वरे सप्तहोत्राः संपन्नाः । ताश्च प्राङ्मुखत्वेनावस्थिता याज्यान्ते वौषट् शब्दान्पठन्ति ।

अथ संवत्सरसत्रे गवामयने सर्व क्रत्वन्तर्भावं दर्शयति-

दशकृत्वोऽह्वयत् । तपः प्रत्यशृणोत् । तत्कर्मणैव संवत्सरेण सर्वैर्यज्ञक्रतुभिरुपपर्यावर्तत। तत्सर्वमात्मानमपरिवर्गमुपौहत् । तस्मात्संवत्सरे सर्वे यज्ञक्रतवोऽवरुध्यन्ते, इति ।

दशवारमाह्वानं तपोभिमानी देवः । श्रुत्वा संवत्सरसत्ररूपेण सह कर्मणा तदवयवभूतैश्च सर्वैर्यज्ञक्रतुभिः सहाऽऽगत्य प्रजापतेरात्मानं देहं

Digitized by Madhuban Trust, Delhi

सर्वमप्यपरिवर्गमानयत् । यथा किंचिदपि वर्जितं न भवति । तस्मात्संपूर्तिसाधनं संवत्सरसत्रम् । तत्राग्निष्टोमेक्थ्यादयः सर्वेऽपि क्रतवेऽन्तर्भवन्ति ।

अथैकेनाध्वर्युणा निष्पाद्यमग्निहोत्रं प्रथमभावित्वेन प्रशंसति-

तस्माद्दशहोता चतुर्होता । पञ्चहोता षड्ढोता सप्तहोता । एकहोत्रे बलिꣳ हरन्ति । हरन्त्यस्मै प्रजा बलिम् । ऐनमप्रतिख्यातं गच्छति । य एवं वेद (४), इति ।

चन्द्रमाश्चातुर्मास्यानां यज्ञक्रतोरध्वरेण यज्ञक्रतुनोपपर्यावर्तन्त सप्तहोता चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयाध्याये षष्ठोऽनुवाकः ।। ६ ।।

यस्मादेवमग्निहोत्रेणैकहोत्रा प्रथमं कुसिंघ उपानीते सति पश्चाद्दर्शपूर्णमासादिभिरङ्गेषूपकृतं तस्माद्दशहोत्रादयः पञ्चाप्यात्मविशेषा एकहोत्रे परमात्मने बलिं हरन्ति पूजां कुर्वन्ति । य एवं परमात्मपूज्यत्वं वेद तस्मै सर्वाः प्रजाः पूजां समर्पयन्ति । अप्रतिख्यातमवमानरहिता कीर्तिश्चैनं वेदितारं प्राप्नोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठके षष्ठोऽनुवाकः ।। ६ ।।

अथ तृतीयप्रपाठके सप्तमोऽनुवाकः ।

षष्ठे होतृप्रशंसाप्रसङ्गेन क्रतूनामृत्विग्विशेषं व्यवस्थाप्याग्निहोत्रस्य तन्मध्ये प्राशस्त्यं दर्शितम् । अथ तस्मिन्नग्निहोत्रे सर्वक्रतुसद्भावसंपादनेन तदग्निहोत्रं सप्तमे प्रशंसति । तत्राऽऽदौ होतृमन्त्राणां प्रजापतेः । शरीररक्षकत्वं दर्शयति-

प्रजापतिः पुरुषमसृजत । सोऽग्निरब्रवीत् । ममायमन्नमस्त्विति । सोऽबिभेत् । सर्वं वै माऽयं प्रधक्ष्यतीति । स एताश्चतुर्होतॄनात्मस्परणानपश्यत् । तान् जुहोत् । तैर्वै स आत्मानमस्पृणोत् , इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिः पूर्वमशरीरः सन्पूर्वानुवाकोक्तक्रमेण कुसिंघदिलोमान्तैः सर्वैश्चैकं पुरुषाकारं देहमसृजत । तदानीमग्निस्तं देहं दृष्ट्वा सोऽयं पुरुषो ममान्नमस्त्वित्यब्रवीत् । ततः स प्रजापतिः पुरुषाकारं मामेव सर्वमप्ययमग्निर्धक्ष्यतीतिभयमापन्नो होतृमन्त्रानात्मस्मरणान्स्व-शरीररक्षकत्वेन प्रीतिहेतूनपश्यत् । तान्हुत्वा तैः स्वदेहं पीतमकरोदरक्षदित्यर्थः ।

होतृमन्त्रेषु च दशहोतुः प्रथमभावित्वात्तस्याग्नि-होत्रक्रमरूपत्वादग्निहोत्रहोमेनैव सर्वरक्षां विवक्षुरादौ कुसिंघरक्षां दर्शयति-

यदग्निहोत्रं जुहोति । एकहोतारमेव तद्यज्ञक्रतुमाप्नोत्यग्निहोत्रम् (३) । कुसिंघं चाऽऽत्मनः स्पृणोति । आदित्यस्य च सायुज्यं गच्छति, इति ।

यदा पुरुषोऽग्निहोत्रं जुहोति तदा पूर्वोक्तरीत्या तस्यैकहोतृकत्वादेकहोतृकं यज्ञक्रतुं प्राप्नोति । तत्फलभूतमादित्यस्य च सायुज्यं गच्छत्यात्मनः कुसिंघं च स्पृणोति । रक्षतीत्यर्थः ।

अथाग्निहोत्र एव चतुर्होतृफलं दर्शयति-

चतुरुन्नयति । चतुर्होतारमेव तद्यज्ञक्रतुमाप्नोति दर्शपूर्णमासौ । चत्वारि चाऽऽत्मनोऽङ्गानि स्पृणोति । आदित्यस्य च सायुज्यं गच्छति, इति ।

यदेतदग्निहोत्रे चतुर्वारं स्रुवपूरणं तेन चतुःसंख्यासाम्याच्चतुर्होतृकदर्शपूर्णमासक्रतुं प्राप्य हस्तपादाङ्गचतुष्टयरक्षापूर्वमादित्यसायुज्यप्राप्तिश्च संपद्यते ।

अथ पञ्चहोतृफलं दर्शगति-

चतुरुन्नयति । समित्पञ्चमी । पञ्चहोतारमेव तद्यज्ञक्रतुमाप्नोति चातुर्मास्यानि । लोमच्छवीं मा ँ सस्थि मज्जानम् (२) । तानि चाऽऽत्मनः स्पृणोति । आदित्यस्य च सायुज्यं गच्छति, इति ।

अग्निहोत्रे यच्चतुर्वारं स्रुक्पूरणं या चाऽऽहुत्याधारभूता

Digitized by Madhuban Trust, Delhi

समित्तदुभयनिष्ठया पञ्चत्वसंख्यया पञ्चहोतृकचातुर्मास्यफलप्राप्ति-र्लोमादिपञ्चावयवप्राप्तिरादित्यसायुज्यं च ।

अथ षड्ढोतृफलं दर्शयति-

चतुरुन्नयति । द्विर्जुहोति । षड्ढोतारमेव तद्यज्ञक्रतुमाप्नोति पशुबन्धम् । स्तनावाण्डौ शिश्नमवाञ्च प्राणम् । तानि चाऽऽत्मनः स्पृणोति । आदित्यस्य च सायुज्यं गच्छति, इति ।

उन्नयनहोमगतषट्संख्यया षड्ढोतृफलमादित्यस्य सायुज्यं च ।

अथ सप्तहोतृफलं दर्शयति-

चतुरुन्नयति । द्विर्जुहोति (३) समित्सप्तमी । सप्तहोतारमेव तद्यक्रतुमाप्नोति सौम्यमध्वरम् । सप्त चाऽऽत्मनः शीर्षण्यान्प्राणान्स्पृणोति । आदित्यस्य च सायुज्य गच्छति, इति ।

उन्नयनहोमसमिद्गतया सप्तसंख्यया सप्तहोत्रादिफलम् ।

अथ दशहोतृफलं दर्शयति-

चतुरुन्नयति । द्विर्जुहोति । द्विर्निमार्ष्टि । द्विः प्राश्नाति । दशहोतारमेव तद्यज्ञक्रतुमाप्नोति संवत्सरम् । सर्वं चाऽऽत्मानमपरिवर्गँ स्पृणोति । आदित्यस्य च सायुज्य गच्छति (४), इति ।

अग्निहोत्रं मज्जानं द्विर्जुहोत्यपरिवर्गँ स्पृणोत्येकं च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयाध्याये सप्तमोऽनुवाकः ।। ७ ।।

यदेतच्चतुर्वारं स्रुक्पूरणं यच्चाऽऽहुतिद्वयं यद्यपि बर्हिषि भूमौ च द्विर्लेपनिमार्जनं यदप्याहुतिद्वयशेषयोर्द्विः प्राशनं तद्गतया दशसंख्यया तत्साध्यसंवत्सरमत्रप्राप्तया तदन्तर्गतकृत्स्नक्रतुप्राप्तिरादित्यसायुज्यं च । तदेवं पूर्वानुवाक एकक्षेत्रे बलिं हरन्तीत्येकहोतृकाग्निहोत्रप्रशंसनं यत्संक्षेपेणोक्तं तदिहाग्निहोत्रे सर्वहोतृकसर्वक्रतुसंपादनेन प्रपञ्चितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठके सप्तमोऽनुवाकः ।। ७ ।।

अथ तृतीयप्रपाठकेऽष्टमोऽनुवाकः ।

सप्तमेऽनुवाक एकहोतृकाग्निहोत्रे सर्वयज्ञक्रतुहोतृफलान्तर्भवद्वारेण सर्वर्त्विक्ष्वनुगत एकहोता प्रशंसितः । अथाष्टमे होतृमन्त्रसामर्थ्यं प्रशस्यते । तत्र तावदासुरसृष्टिं दर्शयति–

प्रजापतिरकामयत प्रजायेयेति । स तपोऽतप्यत । सोऽन्तर्वानभवत् । स हरितः श्वावोऽभवत् । तस्मात्स्त्र्यन्तर्वत्नी । हरिणी सती श्यावा भवति । स विजायमानो गर्भेणाताम्यत् । स तान्तः कृष्णः श्यावोऽभवत् । तस्मात्तान्तः कृष्णः श्यावो भवति । तस्यासुरेवाजीवत् (१) । तेनासुनाऽसुरानसृजत् । तदसुराणामसुरत्वम् । य एवमसुराणामसुरत्वं वेद । असुमानेव भवति । नैनमसुर्जहाति, इति ।

प्रजामुत्पादयितुं कामयमानः, प्रजापतिर्होतृमन्त्रानुष्ठानरूपं तपः कृत्वा स्वोदरे गर्भं धृत्वा हरित्श्यावो नीलश्वेतमिश्रवर्णोऽभवत् । अत एव लोके गर्भिणी स्त्री तादृग्वर्णा दृश्यते । स प्रजापतिर्विजायमानो गर्भस्थितजन्तुविशेषेण प्रसवकालेऽताम्यद्ग्लानिं प्राप्नोत् । तदा ग्लानिवशात्कृष्णश्वेतमिश्ररूपोऽभवत् । अत एव लोके मार्गश्रमरोगश्रमादिना तादृग्वर्णो भवति । तस्य तादृशस्य ग्लानिं प्राप्तस्य प्रजापतेरसुरेवाजीवच्छ्वासमात्रं स्वव्यापारक्षममभूत् । न तु हस्तपादादयः स्वव्यापारक्षमाः तदानीं तेनासुना प्राणवायुना बलाधिकानसुरानसृजत् । बलहेतुरसुः प्राणवायुरेषामस्तीति व्युत्पत्या तेषामसुरनाम संपन्नम् । एतस्य वेदिता बलकारिणा प्राणेन युक्तो भवति । स च प्राण एनं वेदितारमपमृत्युना परित्यजति ।

अथ पितृसृष्टिं दर्शयति–

सोऽसुरान्सृष्ट्वा पितेवामन्यत । तदनु पितृनसृजत ।

Digitized by Madhuban Trust, Delhi

तत्पितृणां पितृत्वम् । य एवं पितृणां पितृत्वं वेद । पितवैव स्वानां भवति (२) । यन्त्यस्य पितरो हवम्, इति ।

स प्रजापतिरसुरान् सृष्ट्वा पितृत्वाभिमानमकरोत् । यथा नव्यं गृहादिकं निर्माय गृहस्य पिताऽहमिति न मन्यते । पुत्रानुत्पाद्य तथा मन्यते । एवमयं प्रजापतिरपि गिरिनद्याद्यचेतनं सृष्ट्वा पितृत्वं न मन्यते । चेतनानसुरान्सृष्ट्वा पितृत्वं मन्यते । अतः पितृत्ववासनावासितं तन्मनः सृष्टावपि पितृलोकस्वामिनः पितृनसृजत । पितृत्वाभिमानेन सृष्टत्वात्पितृनाम संपन्नम् । एवं वेदिता स्वकीयानां सर्वेषां पितेव मान्यो भवति । अपि चास्य वेदितुः स्वयं मृताः पितरः सर्वे हवं यन्त्याह्वानं प्राप्नुवन्ति । एतेन स्वापादावाहूताः सन्तः फलप्रदानेनानुगृह्णन्तीत्यर्थः ।

अथ मनुष्यसृष्टिं दर्शयति-

स पितृन्त्सृष्ट्वाऽमनस्यत् । तदनु मनुष्यानसृजत । तन्मनुष्याणां मनुष्यत्वम् । य एवं मनुष्याणां मनुष्यत्वं वेद । मनस्व्येव भवति । नैनं मनुर्जहाति, इति ।

स प्रजापतिः पितृसृष्टेरूर्ध्वं किमिदानीमन्यत्सृजामीत्यवगमनस्यत्सृष्टिविषयं मनोऽकरोत् । तन्मनोऽनुसृत्य मनुष्यानसृजत् । यस्मान्मनोनुसारेणोत्पन्नास्तस्मात्तन्मनुष्यनाम संपन्नम् । य एवं वेदिता मनस्वी सर्वकार्येषु स्थिरचित्तो भवति । मनुर्मननशक्तिः कदाचिदप्येनं न जहाति ।

अथ देवसृष्टिं दर्शयति-

तस्मै मनुष्यान्त्ससृजानाय । दिवा देवत्राऽभवत् । तदनु देवानसृजत । तद्देवानां देवत्वम् । य एवं देवानां देवत्वं वेद । दिवा हैवास्य देवत्रा भवति, इति ।

यो मनुष्यान्ससृजानः सृष्टवान्प्रजापतिस्तस्मै प्रजापतये दिवा देवत्राऽभवत् । दिवसो द्योतनशीलोऽभवत् । सृष्टैर्मनुष्यैर्लौकिकवैदिकव्यवहारे सर्वस्मिन्क्रियमाणे सति दिवसः सर्वोऽपि व्यवहारैर्द्योत्यते तदेतद्देवनमनुसृत्य देवानसृजत । देवनानुसारेणोत्पन्नत्वाद्देवानां देवत्वं संपन्नम् । एवं वेदितुः सर्वोऽपि दिवसः सर्वैर्व्यवहारैः प्रकाशितो भवति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उक्तां सृष्टिं निगमयति-

तानि वा एतानि चत्वार्यम्भा ँसि । देवा मनुष्याः पितरोऽसुराः, इति ।

यानि चत्वारि देवादिस्थानानि तानि सर्वाण्यम्भांसि जलसदृशानि । यथा तडागनद्यादिहलं स्नानपानाद्युपयुक्तमेवमेतानि भोगोपयुक्तानीत्यर्थः ।

एतद्वेदनं प्रशंसति-

तेषु सर्वेष्वम्भो नभ इव भवति । य एवं वेद (३) , इति ।

अजीवत्स्वानां भवति देवानसृजत सप्त च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयाध्यायेऽष्टमोऽनुवाकः ।। ८ ।।

सर्वेषु देवादिस्थानेष्वम्भः शब्दोपलक्षितो भोग आकाशवद्व्यापः संपूर्णो भवतीत्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठकेऽष्टमोऽनुवाकः ।। ८ ।।

अथ तृतीयप्रपाठके नवमोऽनुवाकः ।

अष्टमे सृष्टिसाधनत्वेन होतृमन्त्राः । अथ नवमे वायुरूपत्वज्ञानेन मन्त्राणां प्रशंसा क्रियते । तदेतज्ज्ञानं विधातुमादौ ब्रह्मवादिवाक्येन तस्मिन्होतृरूपवायुविज्ञाने श्रद्धामुत्पादयति-

ब्रह्मवादिनो वदन्ति । यो वा इमं विद्यात् । यतोऽयं पवते । यदभिपवते । यदभिसंपवते । सर्वमायु रियात् । न पुराऽऽयुषः प्रमीयेत । पशुमान्त्स्यात् । विन्देत प्रजाम्, इति ।

होतृमन्त्रस्य सामर्थ्यमेव वाय्वाकारेण परिणतं सल्लोके संचरति तदेतदुपासकानां प्रसिद्धम् । अत एवान्यत्र श्रूयते-‘ ‘वायोरात्मानं कवयो निचिक्युः” इति । सोऽयं वायुर्यतः कारणाद्वाति यदभिलक्ष्य वाति तस्मिन्नभिलक्ष्ये वस्तूनि यत्सम्यग्वाति तादृशसंचारोपेतमिमं वायुं यः

Digitized by Madhuban Trust, Delhi

पुमान्विद्यात्सोऽयमायुरादिफलचतुष्टयं प्राप्नुयात् । अयमर्थः-वायुर्हि किंचित्प्रयोजनमुद्दिश्य स्वनति किंचिद्वस्तुषु संचरति संचरंस्तेषु किंचिदुपयोगं करोति । तत्प्रयोजनं तद्वस्तुगतमुपयोगं च यो विदित्वा ध्यायति सोऽयं सर्वमायुः प्राप्नोति । अत एवापमृत्योरभावादायुषः पुरा न म्रियते सोऽयं प्रजापशुसंपत्तिश्च तस्य भवतीत्येवं ब्रह्मवादिनो वायुध्यानमहिमानं परस्परं कथयन्ति ।

तदेवं ब्रह्मवादिवाक्यं विद्वांसं प्रमाणत्वेनोपन्यस्येदानीं श्रुतिः स्वयं विधत्ते-

यो वा इमं वेद (१) । यतोऽयं पवते । यदभिपवते । यदभिसंपवते । सर्वमायुरेति । न पुराऽऽयुषः प्रमीयते । पशुमान्भवति । विन्दते प्रजाम्, इति ।

ब्रह्मावादिवक्यवाद्विधिवाक्यं व्याख्येयम् ।

ध्यानविदा ध्यातव्यं निरूपयति-

अद्भ्यः पवते । अपोऽभिपवते । अपोऽभिसंपवते (२), इति ।

अद्भ्यो निमित्तभूताभ्यो वाति । जलव्यवहारनिर्वाहो वायुसंचारस्य प्रयोजनमित्यर्थः । तथाऽपोऽभिलक्ष्य संचरति । वायुसंचारविषयभूतं वस्तु जलमित्यर्थः । तथाऽपोऽभिप्रपद्य सम्यक्पवते । यत्र निम्नदेशे गन्तव्यं तत्र तदा गमयति । यत्र शोषणीयं तदा शोषयति । यदा वृष्टिरपेक्षिता तदा वर्षयति । सोऽयं वायुसंचारस्योपयोगी जलव्यवहारनिर्वाहः प्रयोजनं जलमेव संचारस्य विषयो निम्नदेशादिप्रेरणमुपयोग इत्येतन्नयं व यौ ध्यातव्यम् ।

एवं पृथिव्यग्न्यन्तरिक्षादित्यद्युदिग्विषये ध्यातव्यं दर्शयति-

अस्याः पवते । इमामभिपवते । इमामभिसंपवते । अग्नेः पवते । अग्निमभिपवते । अग्निमभिसंपवते । अन्तरिक्षात्पवते । अन्तरिक्षमभिपवते । अन्तरिक्षमभिसंपवते । आदित्यात्पवते (३) । आदित्यमभिपवते । आदित्यमभिसंपवते । द्योः पवते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

दिवमभिपवते। दिवमभिसंपवते। दिग्भ्यः पवते। दिशोऽभिपवते, इति।

जलपर्यायवदेते पर्याया व्याख्येयाः।

अथ प्राच्यादिभेदेन प्राणादिनामानि वायौ ध्यातव्यानि। तत्र प्राणनामध्यानं विधत्ते-

दिशोऽभिसंपवते। स यत्पुरस्ताद्वाति। प्राण एव भूत्वा पुरस्ताद्वाति (४)। तस्मात्पुरस्ताद्वान्तम्। सर्वाः प्रजाः प्रतिनन्दन्ति। प्राणो हि प्रियः प्रजानाम्। प्राण इव प्रियः प्रजानां भवति। य एवं वेद। स वा एष प्राण एव, इति।

स वायुर्यदा पूर्वस्यां दिशि संचरति तदा प्राणरूपो भूत्वा संचरति। यस्मात्पूर्वस्यां दिशि संचरन्वायुः प्राणत्वेन प्रजानां प्रियस्तस्मात्पूर्वस्यां दिशि संचरन्तं वायुं प्रति सर्वाः प्रजा हृष्यन्ति। वायो समागते सति शरीरस्वेदः शुष्यति दृष्टिर्भविष्यतीत्येवं प्रजानां संतोषः। य एवं वायोः प्राणरूपत्वं वेद स प्रजानां प्राणवत्प्रियो भवति.। जन्मान्तरे च स एव प्राणदेवतारूप एव भवति।

मातरिश्वनामध्यानं विधत्ते-

अथ यद्दक्षिणतो वाति। मातरिश्वैव भूत्वा दक्षिणतो वाति। तस्माद्दक्षिणतो वान्तं विद्यात्। सर्वा दिश आवाति (५)। सर्वा दिशोऽनुविवाति। सर्वा दिशोऽनुसंवातीति। स वा एष मातरिश्वैव, इति।

यदा वायुर्दक्षिणस्यां दिशि संचरति तदा मातरिश्वेति तस्य नाम ध्यातव्यम्। मातर्यन्तरिक्षे श्वयति वर्धते मातृवन्नयतीति वा मातरिश्वा सर्वेषामाप्यायनकारीत्यर्थः. यस्मादयमेवंविधो मातरिश्वनामकस्तस्माद्दक्षिणस्यां दिशि संचरन्तं वायुमेनं विद्यात्। सर्वा मातरिश्वनामकोऽयं वायुः सर्वा अपि दिश आभिमुख्येन गच्छति। सर्वा अपि दिशोऽकूलः सन्विशेषेण संचरति तथा सर्वा दिशोऽनुप्राप्य सम्यक्संचरति। यत्र यादृशो वायुरपेक्षितस्तत्र तादृश एव संचरतीत्यर्थः। एवं वेदिता मातरिश्वैव भवति।

अथ पवमाननामध्यानं विधत्ते-

Digitized by Madhuban Trust, Delhi

अथ यत्पश्चाद्वाति । पवमान एव भूत्वा पश्चाद्वाति । पूतमस्मा आहरन्ति । पूतमुपहरन्ति । पूतमश्नाति । य एवं वेद । स वा एष पवमान एव (६), इति ।

यदा स वायुः पश्चिमायां दिशि संचरति, तदा पवमान इति तस्य नाम । शोधक इत्यर्थः । यः पुमानेवंविधं वायुं ध्यायति तस्मै विदुषे पूतं दोषरहितं धनादिकमाहरन्ति । तथा पूतं शुद्धमन्नमुपहरन्ति समीपे समर्पयन्ति । स्वयमपि तत्पूतमेवाश्नाति । तदेतदैहिकफलम् । आमुष्मिकं तु पवमानप्राप्तिरूपम् ।

सवितृनामध्यानं विधत्ते-

अथ यदुत्तरतो वाति । सवितैव भूत्वोत्तरतो वाति । सवितेव स्वानां भवति । य एवं वेद । स वा एष सवितैव, इति ।

यदा स वायुरुत्तरस्यां दिशि संचरति तदा सवितेति तस्य नाम । सर्वस्य प्रेरक इत्यर्थः एवं वेदिता स्वकीयानां सर्वेषामिह प्रेरको भवति । परत्रायं सवितेव भवति ।

एवं वायुध्यानं कुर्वता ध्यानाङ्गत्वेन निन्दानुग्रहं विधित्सुः प्रथमं तावत्साधने कांचिदुपपत्तिं दर्शयति-

ते य एनं पुरस्तादायन्तमुपवदन्ति । य एवास्य पुरस्तात्पाप्मानः । तास्तेऽपघ्नन्ति । पुरस्तादितरान्पाप्मनः सचन्ते, इति ।

पूर्वस्यां दिश्यागच्छन्तमेनं वायुध्यायिनं ते लोकप्रसिद्धा निन्दका दाम्भिकोऽयमित्यादिभिर्दुर्वाक्यैर्निन्दन्ति । तदानीमस्य ध्यातुः पूर्वस्यां दिशि ये केचित्संभाविताः । पाप्मानस्तदन्तर्वास्ते निन्दका आघ्नन्ति । अस्य ध्यातुस्तया निन्दया पापजयो भवति । निन्दकास्तु न एतन्निन्दाजन्यानितरान्मपाप्मनः प्राप्नुवन्ति ।

पूर्वस्यां दिश्युक्तं ध्यातुः पापक्षयं निन्दकस्य पापसंबन्धं च दिगन्तरेष्वपि क्रमेण दर्शयति-

अथ य एनं दक्षिणत आयन्तमुपवदन्ति (७)। य एवास्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

दक्षिणतः पाप्मानः । ता ँ स्तेऽपघ्नन्ति । दक्षिणत इतरान्पाप्मनः सचन्ते । अथ य एनं पश्चादायन्तमुपवदन्ति । य एवास्य पश्चात्पाप्मानः । ता ँ स्तेऽपघ्नन्ति । पश्चादितरान्पाप्मनः सचन्ते । अथ य एनमुत्तरत आयन्तमुपवदन्ति । य एवास्यौत्तरतः पाप्मानः । ता ँ स्तेऽपघ्नन्ति (८) । उत्तरत इतरान्पाप्मनः सचन्ते, इति ।

प्रथमपर्यायवदितरपर्यायित्रयं व्याख्येयम् ।

तदेवंनिन्दया अनुग्राहकत्वेन सहनयोग्यत्वं प्रतिपाद्य निन्दितेन ध्यात्राऽनुष्ठेयं विधत्ते-

तस्मादेवं विद्वान् । वीवं नृत्येत् । प्रेवं चलेत् । व्यस्यैवाक्ष्यौ भाषेत् । मण्टयेदिव । क्राथयेदिव । शृङ्गायेतेव, इति ।

यस्मादन्यैः स्वस्मिन्प्रयुक्ता निन्दा निन्दकानामेव प्रत्यवायोत्पत्तिहेतुस्तस्मादेव विद्वानुपासको निन्दां श्रुत्वा विशेषेण नृत्येदिव । यथा लोके कांचित्प्रियकरीं पुत्रजन्मादिवार्तां श्रुत्वा हृष्यन्तः स्वमनोगतं हर्षं द्योतयितुं बाह्यैर्मुखविकासादिभिर्नृत्यन्तीव दृश्यन्त एवमयमपि स्वमुखं विकासयेदित्यर्थः । तथा प्रहृष्टमिव चरेत् । यथा लोके नृत्यन्तः प्रमोदन्तः पदविन्यासादिकं कुर्वन्ति । तद्वदयमपि पद्भ्यां तमभिनयेत् । तथाऽक्ष्यौ चक्षुषी व्यस्येव विकास्येव हर्षविकसिते कृत्वा समीचीनानि प्रियवचनानि निन्दकेन सह भाषेत् । एवं मोक्षशास्त्रेषु स्मर्यते-" तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित्' इति । किंच मण्टयेदिव, उन्माद्येदिव । मटि उन्माद इति धातुः । अत एव जाबालोपनिषदि श्रूयते-"अव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्ति" इति । उन्मादनटनमेव स्पष्टीक्रियते- क्राथयेदिव । क्रथ हिंसायामिति धातुः । क्वचित्कान्तां ताडयितुमिव गच्छेत् । शृङ्गायेतेव । महावृषभः शृङ्गाभ्यां मृदमुत्क्षिप्योद्धृत्य स्वपृष्ठे विक्षिप्य क्रीडति तदिदं क्रीडनं शृङ्गायितम् । तथाऽयं क्रीडेत् । तस्य चोत्पादनटनस्य जनैः सङ्गाभावः प्रयोजनम् ।

अत एव स्मर्यते-

Digitized by Madhuban Trust, Delhi

तथा चरति वै योगी सतां धर्ममदूषयन् ।
जना यथा न मन्येरन्गच्छेयुर्नैव संगतिम् ।। इति ।

निंदां सहमानस्याभिप्रायः स्पष्टीक्रियते-

उ॒त मोप॑वदेयुः उ॒त मे॑ पा॒प्मान॒मप॑हन्यु॒रिति॑, इति ।

किमेते मा निन्देयुः । किंवा मांपाप्मानं विनाशयेयुरिति । अस्याश्च वाचो भङ्ग्याऽयमर्थः-नैते निन्दन्ति किंतु पाप्मानमेव विनाशयन्ति ।

अथास्य भिक्षाटनप्रकारं दर्शयति-

स यां दिश॑ꣳ स॒नि॒मे॒ष्यन्त्स्यात् । य॒दा तां दिश॒ं वातो॑ वा॒यात् । अथ॒ प्रवे॒यात् । प्र वा॑ धावयेत् । सा॒तमे॒व र॑दि॒तं व्यू॑ढं गन्धम॒भिप्रच्य॑वते । आऽस्य॒तं ज॑नप॒दं पूर्वा॑ की॒र्तिर्ग॑च्छति, इति ।

स वायूपासको यां दिशमभिप्रेत्य सनिमेष्यन्भैक्ष्यं प्राश्नामीत्येवंबुद्धिः स्यात् । दानवाची सनिशब्दोऽत्र स्वत्वत्यागपूर्वकं परैर्देयं भैक्ष्यमुपलक्षयति । यस्यां दिशि भैक्ष्यं लप्स्यत इत्येवंबुद्धिर्योगी तां दिशमनुकूलो वायुर्यदा वायात्तदा प्रवेयात्मकम्पेत्तस्यां दिशि गन्तुं प्रचलेदित्यर्थः । स्वयं सहसा गन्तुमशक्तश्चेच्छिष्यं वा प्रकर्षेण धावयेत् । तदानीं सातादिविशेषविशिष्टमेव भैक्ष्यमभिलक्ष्यायं प्रच्यवते प्रकर्षेण गच्छति । सातं स्वयं लब्धं प्रागवेदितमित्यर्थः रदितमिति । रद विलेखन इति धातुः रदितं विलेखितं कृतमर्यादमित्यर्थः । व्यूढं विभक्तं साधारं पात्रे पृथक्पृथगुदवृत्तमित्यर्थः । गन्धं यादृशं तादृशगन्धोपेतम् । एवंविधैर्नियमैरुपेतस्य योगिनः कीर्तिस्तस्मात्पूर्वैव जनपदमागच्छति । ईदृशो महात्माऽभिज्ञः । समायातीत्येवं सर्वे जनपदवासिनो भक्तिं कुर्वन्तीत्यर्थः ।

भिक्षाटनवृत्तान्तज्ञानं प्रशंसति-

दान॑कामा अस्मै प्र॒जा भ॑वन्ति । य ए॒वं वेद (९), इति ।

वेद संपवत आ॒दित्यात्प॑वते वा॒त्या वा॑त्येष पव॑मान ए॒व द॑क्षिणत आ॒यन्त॒मप॒वद॒न्ति य ए॒वास्यौत्त॒रतः॑ पा॒प्मान॒स्त ꣳस्तेऽप॑घ्न॒न्तीत्यष्टौ च॑ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयाध्याये नवमोऽनुवाकः ।। ९ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठके नवमोऽनुवाकः ।। ९ ।।

अथ तृतीयप्रपाठके दशमोऽनुवाकः ।

नवमेऽनुवाके सर्वहोतृमन्त्रसमष्टिदेवस्य वायोरुपासनमुक्तम् । अथ दशमे होतृमन्त्राणां कश्चित्काम्यप्रयोगोऽभिधीयते । तं विधातुमादावुपाख्यानमाह–

प्रजापतिः सोम राजानमसृजत । तं त्रयो वेदा अन्वसृज्यन्त । तान्हस्तेऽकुरुत । अथ ह सीता सावित्री । सोम राजानं चकमे । श्रद्धामु स चकमे । सा ह पितरं प्रजापतिमुपससार । त हौवाच । नमस्ते अस्तु भगवः । उप त्वाऽयानि (१) । प्र त्वा पद्ये । सोमं वै राजानं कामये । श्रद्धामु स कामयत इति । तस्या उ ह स्थागरमलंकारं कल्पयित्वा । दशहोतारं पुरस्ताद्व्याख्याय । चतुर्होतारं दक्षिणतः । पञ्चहोतारं पश्चात् । षड्ढोतारमुत्तरतः । सप्तहोतारमुपरिष्टात् । संभारैश्च पत्निभिश्च मुखेऽलंकृत्य (२) । आऽस्यार्धं वव्राज । ता होदीक्ष्योवाच । उप मा वर्तस्वेति । त हौवाच । भोगं तु म आचक्ष्व । एतन्म आचक्ष्व । यत्ते पाणाविति । तस्या उ ह त्रीन्वेदान्प्रददौ । तस्मादु ह स्त्रियो भोगमेव हारयन्ते, इति ।

प्रजापतिः सोमं सृष्ट्वा तमनु त्रीन्वेदानसृजत । स च सोमस्तान्वेदान्स्वमुष्टिमध्ये गोपायामास । तदानीं सवितुः प्रजापतेः पुत्री काचिन्नामतः सीता सावित्रीति सोमो मे भर्ताऽस्त्वित्यकामयत । स सोमः श्रद्धाख्यां कांचिदन्यां प्रजापतेर्दुहितरं कामितवान्न त्वेतां सीताम् । सा तु सीता प्रजापतिसमीपमागत्य नमस्कारं कृत्वा त्वत्समीपे कार्यार्थं समागताऽस्मि त्वां भजे सर्वदेत्येवमुवाच । ततः प्रजापतिना किं कार्यमिति पृष्टा सती सोमविषयां कामनामुवाच । ततः प्रजापतिस्तस्याः सीतायाः सोमवशीकरणार्थं कंचित्प्रयोगं कृतवान् । स्थागरो नाम

Digitized by Madhuban Trust, Delhi

कश्चित्सुगन्धद्रव्यविशेषस्तं पिष्ट्वा तत्संबन्धिनमलंकारं मण्डनविशेषं कल्पयित्वा तस्य पूर्वादिदिक्षु दशहोत्रादिमन्त्रान्पठित्वा "अग्निर्यजुर्भिः" इत्यादिभिः संभारमन्त्रैः, "सेनेन्द्रस्य" इत्यादिभिर्देवपत्नीमन्त्रैश्चाभिमन्त्रितेन स्थागरपिष्टेन तस्याः सीताया मुखे तिलकाद्यलंकारं चकार। सा च सीता तस्य सोमस्य समीपे प्रत्याजगाम। स च सोमस्तां दृष्ट्वा परवशो मां प्रति समीपे समागच्छेत्युवाच। सा च तदीयां प्रीतिं परीक्षितुमेवमुवाच। अहमागमिष्यामि त्वं तु भोगमाचक्ष्व सर्वदा भोगं करिष्यामीति प्रतिजानीहि। किं यत्ते पाणौ मुष्टिमध्ये गोप्यं वस्तु वर्तत एतन्मह्यमवञ्चनं कृत्वा कथय। ततः सोमोऽपि प्रीत्यतिशयेन तस्यै सीतायै त्रीन्वेदान्प्रददौ वेदमन्त्रलाञ्छितं किंचिद्गुटिकाद्रव्यं दत्तवानित्यर्थः। यस्मादियं सीता प्रियं वस्तु ययाचे तस्माँल्लोकेऽपि स्त्रियो भोगमुद्दिश्य प्रियं दायं पुरुषमाहारयन्ते।

तदेवमुपाख्यानेन प्रयोगं प्रशस्य तं प्रयोगं विधत्ते-

स यः कामयेत प्रियः स्यामिति (३)। यं वा कामयेत प्रियः स्यादिति। तस्मा एत स्थागरमलंकारं कल्पयित्वा। दशहोतारं पुरस्ताद्व्याख्याय। चतुर्होतारं दक्षिणतः। पञ्चहोतारं पश्चात्। षड्ढोतारमुत्तरतः सप्तहोतारमुपरिष्टात्। संभारैश्च पत्नीभिश्च मुखेऽलंकृत्य। आऽस्यार्धं व्रजेत्। प्रियो हैव भवति (४), इति।

अयान्यलंकृत्य स्यामिति भवति।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयाध्याये दशमोऽनुवाकः॥ १०॥

अहमेव तस्यै राज्ञे प्रियो भविष्यामीति वा पुरुषोऽयं राज्ञे प्रियो भवत्विति वा कामनायां सत्यां प्रीतिविषयस्य स्वस्य परस्य च मुखे पूर्वोक्तप्रकारेण स्थागरपिष्टतिलकादिकं कृत्वा तस्य राज्ञः समीपे गच्छंन्नयं तिलकधारी तस्य राज्ञः प्रियो भवति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठके दशमोऽनुवाकः॥ १०॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ तृतीयप्रपाठक एकादशोऽनुवाकः ।

दशमे होतृमन्त्रैः काम्यप्रयोग उक्तः । अथैकादशे दशहोत्रादिमन्त्रनाम्नां प्रवृत्तिनिमित्तमुच्यते । तत्राऽऽदौ दशहोतृशब्दस्य प्रवृत्तिनिमित्तं दर्शयति–

ब्रह्माऽऽत्मन्वदसृजत । तदकामयत । समात्मना पद्येयेति । आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै दशमꣳ हूतः प्रत्यशृणोत् स दशहूतोऽभवत् । दशहूतो ह वै नामैषः । तं वा एतं दशहूतꣳ सन्तम् । दशहोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः (१), इति ।

यदेतज्जगत्कारणं परं ब्रह्म तदेतदादिसृष्टावात्मन्वज्जीवात्मोपेतं दशहोतृमन्त्राभिमानिदेवतानां शरीरमसृजत । तत्सृष्ट्वा चान्तरमनेन जीवात्मना संपद्येय संगतो मयेयमिति विचार्य तं जीवात्मानमुद्दिश्याऽऽत्मन्निति संबोध्याऽऽमन्त्रितवान् । द्विरुक्तिर्बह्वर्या बहुकृत्वाऽऽहूतवानित्यर्थः । एवं ब्रह्मण्याह्वयति सति दशमे पर्याये समाहूतो जीवात्मा प्रत्यशृणोत् । भो इति प्रत्युत्तरं दत्तवान् । तावता तस्य दशहोतेति नाम संपन्नम् । सोऽयं वस्तुतो दशहूत एव । एतमेव वास्तवं नामविशेषमाच्छाद्यपरेण वर्णान्तरव्यवहृतेन दशहोतेति नाम्ना व्यवहरन्ति । यस्माद्देवाः पूज्याः पित्राचार्यादयः स्वकीयं वास्तवं नाम परित्यज्य हे तात हे आचार्येति परोक्षेणाऽऽह्वानं कुर्वन्ति । तस्माद्युक्तः परोक्षनामव्यवहारः ।

अथ सप्तहोत्रादिनामप्रवृत्तिं दर्शयति–

आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै सप्तमꣳ हूतः प्रत्यशृणोत् । स सप्तहूतोऽभवत् । सप्तहूतो ह वै नामैषः । तं वा एतꣳ सप्तहूतꣳ सन्तम् । सप्तहोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः । आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै षष्ठꣳ हूतः प्रत्यशृणोत् । स षड्ढूतोऽभवत् (२) । षड् ढूतो ह वै नामैषः । तं वा एतꣳ षड्ढूतꣳ सन्तम् । षड्ढोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः । आत्मन्नात्मन्नित्यामन्त्रयत ।

Digitized by Madhuban Trust, Delhi

तस्मै पञ्चम ँ हूतः प्रत्यशृणोत् । स पञ्चहूतोऽभवत् ।
पञ्चहूतो ह वै नामैषः । तं वा एतं पञ्चहूत ँ सन्तम् ।
पञ्च होतेत्याचक्षते परोक्षेण (३) परोक्षप्रिया इव हि देवाः
आत्मनात्मन्नित्यामन्त्रयत । तस्मै चतुर्थ ँ हूतः
प्रत्यशृणोत् । स चतुर्हूतोऽभवत् । चतुर्हूतो ँ ह वै नामैषः ।
तं वा एतं चतुर्हूत सन्तम् । चतुर्होतेत्याचक्षते । परोक्षेण ।
परोक्षप्रिया इव हि देवाः, इति ।

सप्तहोतृषड्ढोतृपञ्चहोतृचतुर्होतृनामनिर्वचनवाक्यानि दशहोतृवाक्यवद्व्याख्येयानि ।

अथ चतुर्होतृमन्त्राभिमानिनं पुरुषं विशेषतः प्रशंसति–

तमब्रवीत् । त्वं वै मे नेदिष्ठं ँ हूतः प्रत्यश्रौषीः ।
त्वयैनानाख्यातार इति । तस्मान्नु हैनाश्चतुर्होतार
इत्याचक्षते । तस्माच्छुश्रूषुः पुत्राणा ँ हृद्यतमः । नेदिष्ठो
हृद्यतमः । नेदिष्ठो ब्रह्मणो भवति । य एवं वेद (४),
इति ।

देवाः षड्ढूतोऽभवत्पञ्चहोतेत्याचक्षते परोक्षेणाश्रौषीः षट् च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयाध्याय एकादशोऽनुवाकः ।। ११ ।।

ब्रह्मवादिनः किं दक्षिणां यो वा अविद्वांस्तस्य वै ब्रह्मवादिनो यद्दशहोतारः प्रजापतिर्व्यस्त्रं प्रजापतिः पुरुषं प्रजापतिरकामयत स तपः सोऽन्तर्वान्ब्रह्मवादिनो यो वा इयं विद्यात्प्रजापतिः सोम ँ राजानं ब्रह्माऽऽत्मन्वदेकादश ।। ११ ।।

ब्रह्मवादिनस्तस्य वा अग्नेर्यद्वा इदं किंच. प्रजापतिरकामयत सोऽन्तर्वान्य एवास्य दक्षिणतः पञ्चाशत् ।। ५० ।।

हरिः ऊँ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
तृतीयोऽध्यायः ।। ३ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्होतृमन्त्राभिमानिनं देवं प्रजापतिरेवमब्रवीत् । त्वमेवैको मया समाहूतः सन्मदीयं वाक्यं यन्नेदिष्ठमतिसमीपं यथा भवति तथा श्रुत्वा प्रत्युत्तरं दत्तवान् । चतुर्थमामन्त्रणं त्वया श्रुतमितरे न तथा सहसा श्रुतवन्तः । तस्मात्त्वयैव सर्वानेतान्हि जनाः कथयिष्यन्ति । एते चतुर्होतार इत्येवं त्वन्नाम्नैव व्यवहारो भविष्यतीत्यर्थः । यस्मादेवं प्रजापतिना वरो दत्तस्तस्मादेतान्दशहोत्रादीन्सर्वानपि चतुर्होतार इत्येव वचनं वैदिका आचक्षते । यस्मादेवं शीघ्रं वाक्यं श्रुतवतश्चतुर्होतुः प्रजापतेर्वरलाभस्तस्माल्लोकेऽपि पुत्राणां मध्ये यः पितुर्वाक्यमादरेण श्रोतुमिच्छति स एव पितुर्हृद्यतमोऽत्यन्तं प्रियः । योऽतिप्रियः स नेदिष्ठोऽतिसमीपवर्ती भवति । यः पुमानेवं चतुर्होतृब्रह्मसमीपवर्तित्वं वेद स स्वयमपि ब्रह्मणोऽतिसमीपवर्ती भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयप्रपाठक एकादशोऽनुवाकः ।। ११ ।।

अस्य प्रपाठकस्यानुवाकार्थं संग्रह–

होतृब्राह्मणशेषेऽस्मिंस्तृतीये हि प्रपाठके ।
आद्यानुवाके सर्वेषां चतुर्होतृत्वमीरितम् ।।
नैमित्तिकं द्वितीये स्यात्तृतीये वपनं भवेत् ।
विद्वत्प्रतिग्रहस्तुर्येऽन्यस्मिन्प्रश्नोत्तरद्वयम् ।।
ऋत्विग्विभागः षष्ठेस्मिन्नग्निहोत्रं तथोत्तरे ।
अष्टमे सृष्टिरन्यस्मिन्वायूपासनमीरितम् ।।
वश्यप्रयोगो दशमे दशहोत्रादिनामसु ।
निरुक्तिरन्तिमे प्रोक्ता तृतीयोऽयं प्रपाठकः ।।
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ।।

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये
वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
तृतीयःप्रपाठकः समाप्तः ।।३ ।।

– (मूलक्रमेण–अष्ट. २ अध्या. ३ (११)अनु. ११ (१११)
भाष्यक्रमेण–का. २ प्रपा. ३ (११) अनु. ११ (१११) ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ द्वितीयकाण्डे चतुर्थप्रपाठकारम्भः ।

तत्र प्रथमोऽनुवाकः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ।।
होतृब्राह्मणशेषो यः स तृतीये समापितः ।
चतुर्थ उपहोमानां पूर्वभागोऽभिधीयते ।।

अत्र भरद्वाजेनोक्तम् - उपहोमा अच्छिद्रकाण्डमिति लिङ्गविनियोज्यानि । ततः श्रौते स्मार्ते वा यत्र मन्त्रापेक्षा तत्र तदुचितं लिङ्गं पर्यालोच्य स मन्त्रो बुद्धिमद्भिर्विनियोजनीयः । यत्र विशेषविनियोगो नोपलभ्यते तत्र लिङ्गानुसारात्तद्देवतायुक्ते कर्मणि समाख्याबलादुपहोमार्था मन्त्राः । समाख्याऽपि श्रुतिलिङ्गादिवद्विनियोगेषु प्रमाणम् । तत्र प्रथमानुवाके प्रथमामृचमाह-

हरिः ॐ ।

जुष्टो दमूना अतिथिर्दुरोणे । इमं नो यज्ञमुपयाहि विद्वान् ।
विश्वा अग्नेऽभियुजो विहत्य । शत्रूयतामाभरा भोजनानि;
इति ।

हेऽग्ने त्वं जुष्टो देवमनुष्यैः सेवितः । दमूनाः शत्रूणां दमयिता । दुरोणे यजमानगृहेऽतिथिसदृशो विद्वान्सर्वज्ञस्त्वं नोऽस्मदीयं यज्ञमिममुपयाहि शत्रूयतामस्मासु शात्रवमिच्छतां पुरुषाणां विश्वा अभियुजः सर्वानभियोगान्विहत्य विनाश्य भोजनानि भोक्तुं योग्यानि द्रव्याण्याभरास्मान्प्रत्याहर । अस्या ऋचो विनियोगो बोधायनगृह्येऽभिहितः- "यज्ञियात्काष्ठादग्निं मथित्वा श्रोत्रियागाराद्वाऽऽहृत्य व्याहृतिभिर्नियुज्योपसमाधायोपप्रतिष्ठते जुष्टो दमूनाः" इति ।

अथ द्वितीयामृचमाह-

अग्ने शर्ध महते सौभगाय । तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यँ सुयममाकृणुष्व । शत्रूयतामभितिष्ठा महाँसि,
इति ।

हेऽग्नेस्माकं महते सौभाग्याय शर्ध, उत्सहस्व । तव संबन्धिन्युत्तमानि मणिमुक्तादीन्यस्माकं सन्तु । जास्पत्यं जायापतिभाव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुयमं सुष्ठु नियतं समाकृणुष्व सम्यक्संपादय । शत्रूयतां शात्रवमिच्छतां पुरुषाणां महांसि तेजांस्यभितिष्ठाभित आक्रमस्व । अस्य मन्त्रस्य वैमृधेष्टौ स्विष्टकृत पुरोनुवाक्यारूपेण विनियोगमापस्तम्बो दर्शयति-"शर्धवत्यौ संयाज्ये अग्ने शर्ध महते सौभगाय" इति ।

अथ तृतीयामाह-

अग्ने यो नोऽभितो जनः । को वारो जिघांसति (१) । तास्त्वं वृत्रहञ्जहि । वस्वस्मभ्यमाभर, इति ।

हेऽग्ने यः शत्रुजनो वृको वृकसदृश आरण्यश्वा यथोपद्रवकारी तथोपद्रवकारीत्यर्थः । अत एव वारोऽस्मद्व्यवहारस्य निवारकः सन्सर्वतोऽस्माञ्जिघांसति हन्तुमिच्छति । हे वृत्रहन्वैरिघातिन्नग्ने तान्वृकसदृशाञ्जहि मारय । अस्मभ्यं तु वसु धनमाभर संपादय ।

अथ चतुर्थीमाह-

अग्ने यो नोऽभिदासति । समानो यश्च निष्टयः । इध्मस्येव प्रक्षायतः । मा तस्योच्छेषि किंचन, इति ।

हेऽग्ने यः प्रबलः । शत्रुर्नोऽस्मानभिदासति हिनस्ति । यश्चान्यः समानबलो निष्टयः शत्रुत्वेनावस्थितो हिनस्ति । तस्य द्विविधस्य शत्रोः संबन्धि द्रव्यं किंचन किमपि नोच्छेष्यवशिष्टं मा कुरु । अत्र दृष्टान्तः - इध्मस्येव प्रक्षायतः । यथाऽग्नौ प्रक्षिप्तस्य प्रदाहेन क्षीयमाणस्येध्मस्य न कोऽप्यंशोऽवशिष्यते तद्वत् । ता एताश्चतस्र आग्नेयकर्मणि विनियोज्याः ।

अथ पञ्चमीमाह-

त्वमिन्द्राभिभूरसि । देवो विज्ञातवीर्यः । वृत्रहा पुरुचेतनः, इति ।

इ इन्द्र त्वमभिभूः शत्रूणामभिभविताऽसि । कीदृशस्त्वम् । देवो द्योतमानो विज्ञातवीर्यः । प्रख्यातशौर्यो वृत्रहा वृत्राख्यस्यासुरस्य हन्ता पुरुचेतनो महाप्रज्ञः ।

अथ षष्ठीमाह-

अप प्राच इन्द्र विश्वा अमित्रान् (२) । अपापाचो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभिभूते नुदस्व । अपोदीचो अपशूराधराच ऊरौ । यथा तव शर्मन्मदेम, इति ।

इ इन्द्र प्राचः पूर्वदिग्वर्तिनो विश्वासर्वानमित्राञ्शत्रूनपनुदस्व निराकुरु । हेऽभिभूतेऽभिभवशक्तियुक्तापाचः पश्चिमदिग्वर्तिनः । शत्रूनपनुदस्व । उदीच उत्तरदिग्वर्तिनोऽप्यपनुदस्व । हे शूराधराचोऽधोदिग्वर्तिनस्तदुपलक्षितदक्षिणदिग्वर्तिनश्चापनुदस्व । तव पितृस्थानीयस्योरवुत्सङ्गे पुत्रस्थानीया वयं शर्मन्सुखकर्मणि सुखे प्राप्ते सति मदेम हृष्येम । शत्रुनिराकरणेन तथा कुरु ।

अथ सप्तमीमाह -

तमिन्द्रं वाजयामसि । महे वृत्राय हन्तवे । स वृषा वृषभोऽभुवत्, इति ।

महे वृत्राय महतः शत्रोर्हन्तवे हननाय तं प्रसिद्धमिन्द्रं वाजत्रामस्यर्थयामः । स इन्द्रो वृषा कामानां वर्षिता सन्वृषभो लौकिकवृषभ इवाप्रधृष्योऽभुवद्भवतु-

अथाष्टमीमाह -

युजे रथं गवेषणं हरिभ्याम् । उप ब्रह्माणि जुजुषाणमस्थुः । विवाधिष्टस्य रोदसी महित्वा । इन्द्रो वृत्राण्यप्रतीजघन्वान् (३), इति ।

गवेषणं सोमयागान्वेषणपरमिन्द्रस्य रथं हरिभ्यां तदीयाभ्यामश्वाभ्यां युजे योजयामि । ब्रह्मणि परिवृढानि मदीयानि स्तोत्राणि जुजुषाणं प्रीति युक्तमिन्द्रमुपास्थुरुपप्राप्तानि भवन्तु । अस्य संबन्धी रथो महित्वा स्वकीयेन महत्त्वेन रोदसी द्यावापृथिव्यौ विवाधिष्ट विशेषेण बाधितवान् । अत एवान्यत्राऽऽम्नातम्-"अन्तान्दिवो बाधते वर्तनिभ्याम्" इति सोऽ यमिन्द्रो वृत्राणि शत्रून्प्रति यथा प्रतिपक्षयुक्ता न भवन्ति तथा जघन्वान्हतवान् । "त्वमिन्द्राभिभूः" इत्यादयश्चत्वारो मन्त्रा ऐन्द्रे कर्मणि विनियोज्याः । "युजे रथम्" इति मन्त्रस्तु संहितायामैन्द्रमिति विहिते पशौ वपायां याज्यात्वेनापि विनियुक्तः । अत एव सूक्तेष्वाम्नातः-"इन्द्रं नरो युजे रथम्" इति ।

अथ नवमीमाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हव्यवाहमभिमातिषाहम् । रक्षोहणं पृतनासु जिष्णुम् । ज्योतिष्मन्तं दीद्यतं पुरंन्धिम् । अग्निꣳस्विष्टकृतमाहुवेम, इति ।

अग्निं देवमाहुवेम कर्मण्याह्वयाम । कीदृशमग्निम् । हव्यवाहं हविषां वोढारमभिमातिषाहं पाप्मनोऽभिभवितारं रक्षोहणं रक्षसां हन्तारं पृतनासु जिष्णुं परकीयसेनासु जयशीलं ज्योतिष्मन्तं रश्मिरूपेण ज्योतिषा युक्तंदीद्यन्तंस्वशरीरेऽपि दीप्यमानं पुरन्धिं पुरुष्वाहवनीयाद्यायतनेष्ववस्थितं स्विष्टकृतं वैकल्यपरिहारेण स्विष्टत्वसंपादकम् ।

अथ दशमीमाह-

स्विष्टमग्ने अभि तत्पृणाहि । विश्वा देव पृतना अभिष्य । उरुं नः पन्थां प्रदिशन्विभाहि । ज्योतिष्मद्धेह्यजरं न आयुः, इति ।

हेऽग्ने स्विष्टं वैकल्यराहित्येन सुष्ठु प्रक्षिप्तं तद्धविरभिपृणाह्यभितः पालय पूरय वा । स्विष्टत्वसंपादनमेव पालनम् । हे देव विश्वाः पृतनाः सर्वाः शत्रुसेना अभिष्य सर्वतो निराकुरु । नोऽस्माकमुरुं पन्थां विस्तीर्णं मार्गं प्रदिशन्नुपदिशन्विभाहि विशेषेण दीप्यस्व । ज्योतिष्मदुज्ज्वलमजरं जरारहितमायुर्नोऽस्मभ्यं धेहि संपादय । अस्य मन्त्रद्वयस्य 'अग्नये तन्तुमतेऽष्टा कपालं निर्वपेत्' इत्यस्यामिष्टौ स्विष्टकृतः संयाज्यारूपेण विनियोग आपस्तम्बेनोक्तः । बौधायनस्तु नक्षत्रेष्टिषु विनियोगमुदाजहार-"स्विष्टवत्यौ संयाज्ये हव्यवाह ꣳस्विष्टम्" इति । अ । एव तदीययाज्यानुवाक्याकाण्डे हव्यवाह ꣳ स्विष्टमिति प्रतीकद्वयमाम्नातम् । तथा दिवश्येनीयेष्वेधूतुषु चेष्टिषु तत्प्रतीकद्वयमाम्नातम् ।

अथैकादशीमाह-

त्वामग्ने हविष्मन्तः । देवं मर्तास ईडते (४) । मन्ये त्वा जातवेदसम् । स हव्या वक्ष्यानुषक्, इति ।

हेऽग्ने त्वां देवं हविष्मन्तो हविर्युक्ता मर्तासो मनुष्या ईडते स्तुवन्ति । अहं तु त्वां जातवेदसमुत्पन्नसर्वजगदभिज्ञं मन्ये । स त्वं हव्या हवींष्यानुषगनुक्रमेण देवेषु यथा सक्तानि भवन्ति तथा वक्षि वह । अस्य मन्त्रस्य काम्येष्टिषु विकल्पितसंयाज्यारूपेण विनियोगमापस्तम्ब

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उदाजहार- "अनुष्टुभौ संयाज्ये त्वां चित्रश्रवस्तमस्त्वामग्ने हविष्मन्तः" इति ।

अथ द्वादशीमाह-

विश्वा॑नि नो दु॒र्गहा॑ जातवेदः । सिन्धुं॒ न ना॒वा दु॑रिता॒ऽति॑पर्षि । अग्ने॑ अत्रि॒वन्मन॑सा गृ॒णानः । अ॒स्माकं॑ बोध्यवि॒ता त॒नूना॑म्, इति ।

हे जातवेदो नोऽस्मदीयानि दुर्गहा । दुष्परिहराणि विश्वानि सर्वाणि दुरितानि पापान्यतिपर्ष्यतीत्य पालय । तत्र दृष्टान्तः-"नावा सिंधुं न, यथा लोके नदीं नावाऽतिलङ्घयति तद्वत् । हेऽग्ने, अत्रिवदत्रिणा महर्षिणा चतूरात्रे कर्मणि यथा स्तूयसे तथाऽस्माभिर्मनसा गृणानः स्तूयमानोऽस्माकं तनूनामविता रक्षिता भूत्वा बोध्यस्मद्भक्तिं बुध्यस्व । अयं मन्त्रः क्वाप्याग्नेये कर्मणि विनियोक्तव्यः ।

अथ त्रयोदशीमाह-

पूषा गा अन्वे॑तु नः । पूरा रक्ष॒त्वर्व॑तः । पूषा वाज॒ꣳ सनोतु नः, इति ।

पूषाख्यो देवो नोऽस्मदीया गा अन्वेतु रक्षणार्थमनुगच्छतु । तथाऽर्वतोऽस्मदीयानश्वान्पूषा रक्षतु । तथा पूषा देवो नोऽस्मभ्यं वाजमन्नं सनोतु ददातु । एतस्य मन्त्रस्य वृषोत्सर्गे विनियोगं बौधायन उदाजहार- "पक्वाज्जुहोति पूषा गा अन्वेतु न इति पुरोनुवाक्यामनुच्य" इति ।

अथ चतुर्दशीमाह-

पूषेमा आशा॒ अनु॑वेद॒ सर्वाः॑ (५) । सो अ॒स्माँ अभ॑यतमेन नेषत् । स्व॒स्ति॒दा अघृ॑णि॒ः । सर्व॑वीरः । अप्र॑युच्छन्पुर ए॑तु प्रजा॒नन्, इति ।

पूषा देव इमाः सर्वा आशा दिशोऽनुवेद क्रमेण जानाति स पूषा देवोऽस्मानभयतमेनात्यन्तं भयरहितेन मार्गेण नेषन्नयतु । सोऽयं स्वस्तिदा भद्रस्य दाताऽघृणिरसोढव्यदीप्तिः । न ह्येतस्य दीप्तिः केनापि विरोधिना सोढुं शक्यते । सर्ववीरः सर्वैर्भृत्यैर्युक्तोऽप्रयुच्छंन्प्रमादमकुर्वन्प्रजानन्नस्मदभिप्रायं प्रकर्षेण जानन्पुर एतु पुरतो गच्छतु । अयं मन्त्रः "पौष्ण ꣳश्याममालभेत " इत्यस्य पशोः पुरोडाशस्य याज्यारूपेण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विनियुक्तः । तथा च सूक्ते तत्प्रतीकमाम्नातम्-"शुक्रं ते अन्यत्पूषेमा आशाः" इति ।

अथ पञ्चदशीमाह-

त्वमग्ने सप्रथा असि । जुष्टो होता वरेण्यः । त्वया यज्ञं वितन्वते, इति ।

हेऽग्ने सप्रथाः ख्यातियुक्तो जुष्टो यजमानानां प्रियो होता देवानामाह्वयिता वरेण्यो वरणीयश्चासि । त्वया त्वदनुग्रहेण यज्ञं वितन्वते विस्तारयन्ति । एतस्य मन्त्रस्य प्रायश्चित्तविशेषे विनियोगो द्रष्टव्यः । तथा च ब्राह्मणे-"यस्यानो वा रथो वाऽन्तराऽग्नी याति' ' इत्युपक्रम्यान्ते मन्त्रोऽयमुदाहृतः - "त्वमग्ने सप्रथा असीत्याह" इति ।

अथ षोडशीमाह -

अग्नी रक्षा ँ सि सेधति । शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्यः, इति ।

अयमग्नी रक्षांसि प्रतिषेधति । कीदृशोऽग्निः । शुक्रशोचिर्निर्मलदीप्तिरमर्त्यो मरणरहितः शुचिः शुद्धः पावकोऽन्येषामपि शोधक ईड्यः स्तुत्यः । एतस्य विनियोगमापस्तम्बोऽग्नी रक्षांसीत्युपक्रम्य दर्शयति-" शुचिः पावक ईड्य इत्यरणी अभिमन्त्र्य" इति ।

अथ सप्तदशीमाह-

अग्ने रक्षा णो अ ँ हसः (६) । प्रति ष्म देव रीषतः । तपिष्ठैरजरो दह, इति ।

हेऽग्ने त्वं नोऽस्मानंहसः । पापाद्रक्ष । हे देव त्वमजरः सन्रीषतो हिंसकाञ्शत्रूंस्तपिष्ठैरतिशयेन तापकैर्ज्वालाविशेषैः प्रतिदहस्व (स्म) प्रत्येकं सर्वथा दह ।

अथाष्टदशमीमाह-

अग्ने ह ँसि न्यत्रिणम् । दीद्यन्मर्त्येष्वा । स्वे क्षये शुचिव्रत, इति ।

हेऽग्ने त्वमत्रिणं पापपुरुषं निहंसि नितरां जहि । हे शुचिव्रत शुद्धस्य कर्मणो निष्पादक स्वे क्षये स्वकीये यज्ञगृहे मर्त्येष्वासर्वेषु मनुष्येष्वपि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दीप्यत्प्रकाशमानस्तिष्ठ। एतयोर्मन्त्रयोः पूर्वेण मन्त्रेण सह विनियोगं बौधायन उदाजहार-"यदि मथ्यमानो न जायेत राक्षोघ्नीरनुब्रूयात्कृणुष्व पाज इति पञ्च, अग्नी रक्षांसि सेधतीति तिस्रः" इति।

अथैकोनविंशीमाह-

आ वातवादि भेषजम्। वि वात वाहि यद्रपः। त्वँहि विश्वभैषजः। देवानां दूत ईयसे, इति।

हे वात वायो भोजनं यथा भवति तथा आ वाह्यस्मान्प्रति सर्वतो वातं कुरु। हे वात यद्रपः पापमस्ति तद्विवाहि विश्लिष्य गच्छ। यस्मात्त्वं विश्वभेषजो विश्वस्य चिकित्सको देवानां दूतश्च सन्नीयसे गच्छसि।

अथ विंशीमाह-

द्वाविमौ वातौ वातः (७)। आ सिन्धोरा परावतः। दक्षं मे अन्य आवातु। पराऽन्यो वातु यद्रपः, इति।

इमौ लोके दृश्यमानौ द्वौ वातावासिन्धोः समुद्रसहिते प्रदेश आपरावती दूरवर्तिलोकयुक्ते देशे वातः संचरतः। शान्तो वायुरेकस्तीव्रऽपरस्तयोर्मध्य एकः शान्तो मे मम दक्षमावातु सुखं संपादयतु। अन्यस्तीव्रो वायुर्यद्रूपोमम यत्पापममस्ति तत्परावातु विनाशयतु।

अथैकविंशीमाह-

यददो वात ते गृहे। अमृतस्य निधिर्हितः। ततो नो देहि जीवसे। ततो नो धेहि भेषजम्। ततो नो मह आवह, इति।

हे वात ते गृहे यददो योऽसावमृतस्य निधिर्हितः स्थापितस्ततो निधेः सकाशान्नोऽस्माकं जीवसे जीवनाय देहि कियदप्यमृतं प्रयच्छ। ततोऽमृतान्नोऽस्माकं भेषजं धेहि संपादय। ततस्तस्माद्भेषजान्नोऽस्माकं मह आवह तेजः संपादय।

अथ द्वाविंशीमाह -

वात आवातु भेषजम्। शंभूर्मयोभूर्नो हृदे (८)। प्र ण आयूँषि तारिषत्, इति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अयं वातो भेषजं यथा भवति तथाऽऽवातु । नोऽस्माकं हृदे मनसि शंभूरनिष्टशान्तिं भावयन्मयोभूः सुखं च भावयन्वर्तताम् । "आ नोऽस्माकमायूंषि चिरकालजीवनानि प्रतारिषत्प्रकर्षेण वर्धयतु । "आ वात वाहि" इत्यादिकं मन्त्रचतुष्टयं कस्मिंश्चिद्वायव्ये कर्मणि विनियोज्यम् ।

अथ त्रयोविंशीमाह-

त्वमग्ने अयासि । अयासन्मनसा हितः ।
अयासन्हव्यमूहिषे । अया नो धेहि भेषजम्, इति ।

हेऽग्ने त्वमयासि सर्वगतोऽसि । अयासन्सर्वगत एव सन्यजमानस्य मनसा क्वचित्प्रदेशविशेष आहितः । अयासन्स्वभावतः सर्वगत एव सन्हव्यमूहिषे क्वाचित्क इव देशान्तरे हविर्वहसि । अयाः सर्वगतः सन्नोऽस्माकं भेषजं धेहि संपादय । आपस्तम्बः-"जुह्वा स्रुवेण वा सर्वप्रायश्चित्तानि जुहोति" इति विधाय होममन्त्रेषु -"त्वमग्ने अयासि" इत्येतमपि पठितवान् ।

चतुर्विंशीमाह-

इष्टो अग्निराहुतः । स्वाहाकृतः पिपर्तु नः । स्वगा देवेभ्य
इदं नमः, इति ।

अयमग्निरिष्टो दर्शपूर्णमासादियागैः पूजित आहुतोऽग्निहोत्रादिहोमैस्तर्पितः स्वाहाकृतोऽग्निमग्नौ स्वाहेति प्रणयनकाले स्वाहाकारेण प्रतिष्ठापितस्तादृशोऽस्मान्पिपर्तु पालयतु । देवानामर्थ (र्था) येदं हविः स्वगा स्वगतं कृतं देवेभ्यो दातुं त्वया स्वात्मनि स्थापितमित्यर्थः । तादृशाय तुभ्यं नमोऽस्तु । अयं मन्त्र आग्नेयकर्मणि विनियोज्यः।

अथ पञ्चविंशीमाह-

कामो भूतस्य भव्यस्य । सम्राडेको विराजति(९) । स इदं
प्रतिपप्रथे । ऋतूनुत्सृजते वशी, इति ।

योऽयं कामाभिमानी देवः सोऽयं भूतस्य भव्यस्य च सम्राट् समीचीनो राजा भूत्वा स्वयमेको विराजति विशेषेण दीप्यते । स च काम इदं सर्वं जगत्प्रतिलक्ष्य पप्रथे पृथितोऽभूत् । वशी स्ववशः सन्नृतून्वसन्तादीनुत्सृजत् उत्कर्षेण निर्मिमीते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षड्विंशीमाह-

कामस्तदग्ने समवर्तताधि । मनसो रेतः प्रथमं यदासीत् । सतोबन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषा, इति ।

ईश्वरकामस्तुतिरियम् । "तस्यान्तर्मनसि कामः समवर्तत, इदं सृजेयम्" इति हि ब्राह्मणम् । प्रजापतेः कामस्तदानीमग्ने जगत्सृष्टिसमये समवर्तत प्रादुरभूदिदं सर्वं सृजेयमिति । प्रजापतेर्मनसः प्रथमं यद्रेत आसीत्कामरूपं तत्सतो जगतः कार्यभूतस्य बन्धुं निदानभूतमसति कारणभूते प्रजापतौ स्थितं कवयो निरविन्दन्निष्कृष्यादिन्दन् केनोपायेनेति तदुच्यते । हृदि प्रतीष्या कवयःस्वे स्वे हृदये मनीषया योगसंस्कृतया बुद्ध्या प्रतीष्या जगत्कारणमिति निश्चितवन्तः । प्रजापतेः काम एव सृष्टिकारणमिति कारणमव्यक्तत्वादसदित्युच्यते । कार्यं तु व्यक्तत्वात्सदित्युच्यते । एतच्च मन्त्रद्वयं दिवःश्येनीष्टिषु द्वितीयस्यामिष्टौ याज्यानुवाक्यारूपेण विनियोजनीयम् । अत एव तत्र प्रतीकद्वयमाम्नातम्-"कामो भूतस्य " "कामस्तदग्ने" इति ।

अथ सप्तविंशीमाह-

त्वया मन्यो सरथमारुजन्तः । हर्षमाणासो घृषता मरुत्वः । तिग्मेषव आयुधा सꣳशिशानाः । उपप्रयन्ति नरो अग्निरूपाः (१०) , इति ।

मरुच्छब्देन वेगो लक्ष्यते । हे मरुत्वो वेगयुक्त मन्यो क्रोध त्वया प्रेरिता नरो मनुष्या उपप्रयन्ति युद्धसमीपं प्राप्नुवन्ति । कीदृशा नराः । सरथमारुजन्तो रथसहितं शत्रुं सर्वतो हिंसन्तो हर्षमाणासः शत्रुवधेन हर्षयुक्ता धृषता भीत्यभावेन धाष्ट्र्ययुक्तास्तिग्मेषवस्तीक्ष्णबाणयुक्ता आयुधा संशिशाना आयुधानि सम्यक्तीक्ष्णीकुर्वन्तोऽग्निरूपा अग्निवदुग्ररूपाः ।

अथाष्टाविंशीमाह-

मन्युर्भगो मन्युरेवाऽऽस देवः । मन्युर्होता वरुणो विश्ववेदाः । मन्युं विश ईडते देवयन्तीः । पाहि नो मन्यो तपसा श्रमेण, इति ।

योऽयं मन्युः क्रोधाभिमानी देवः सोऽयं भगादिरूपेण प्रशस्यते । यो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भगो देवः सोऽपि मन्युस्वरूपः । यश्चान्यो देव इन्द्रादिः सोऽपि मन्युरेवाऽऽस बभूव । होता देवानामाह्वाताऽग्निरपि मन्युस्वरूपः । विश्ववेदाः सर्वज्ञो वरुणोऽपि मन्युस्वरूपः । देवयन्तीर्देवान्कामयमाना विशः प्रजा मन्युमीडते स्तुवन्ति । हे मन्यो श्रमेण श्रमहेतुना तपसा युक्तानस्मान्पाहि रक्ष । क्रोधेनास्माकं तपोनाशो मा भूदित्यर्थः । भगादीनां मन्युरूपत्वं क्रोधाधीनप्रवृत्तियुक्तत्वादवगन्तव्यम् । एतच्च मन्त्रद्वयं मन्युदेवताके कर्मणि विनियोजनीयम् । तादृशं कर्म नरमेधे श्रूयते-"मन्यवेऽयस्तापम्" इति । अयस्तापं लोह (हा) कारं पुरुषं मन्युदेवतार्थमालभेतेत्यर्थः ।

अथैकोनत्रिंशीमाह-

त्वमग्ने व्रतभृच्छुचिः । देवा आसादया इह । अग्ने हव्याय वोढवे, इति ।

हेऽग्ने त्वं व्रतभृदनुष्ठीयमानकर्मपोषकः शुचिः शुद्धः । अत एव देवानिह कर्मण्यासादयाऽऽनीय स्थापय । हेऽग्ने हव्याय वोढवे हविषां वहनाय देवानां सदनं कुरु ।

अथ त्रिंशीमाह-

व्रता नु बिभ्रद्व्रतपा अदाभ्यः । यजानो देवा अजरः सुवीरः । दधद्रत्नानि सुविदानो अग्ने । गोपाय नो जीवसे जातवेदः (११), इति ।

जिघा सत्यमित्रां जघ्न्वानीडते सर्वा अ हँसो वातो हृदे राजत्य ग्निरूपाः सुविदानो अग्न एकं च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

चतुर्थाध्याये प्रथमोऽनुवाकः ।। १ ।।

जातं जगद्वेत्तीति जातवेदः । तादृश हेऽग्ने जीवसे जीवनाय गोपाय । कीदृशस्त्वम् । व्रता व्रतानि कर्माणि तु बिभ्रदवश्यं धारयन्व्रतपाः कर्मणः पालकोऽदाभ्यः केनाप्यतिरस्कार्यो देवान्यजानः पूज्यमानोऽजरो जरारहितः सुवीरः शोभनापत्यप्रदो रत्नानि मणिमुक्तादीनि दधद्धारयन्सुविदानः सम्यगभिज्ञः । एतच्च मन्त्रद्वयमौपवसथ्येऽहन्य-श्रुपातप्रायश्चित्तेष्टौ याज्यानुवाक्यारूपेणाऽऽ- पतस्तम्बो विनियुक्तवान् -"अग्नये व्रतभृदष्टाकपालं यद्यार्तिजमश्रु कुर्यात्त्वमग्ने व्रतभृच्छुचिः" इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ चतुर्थप्रपाठके द्वितीयोऽनुवाकः ।

अथ द्वितीयानुवाके प्रथमामृचमाह-

चक्षुषो हेते मनसो हेते । वाचो हेते ब्रह्मणो हेते । यो माऽघायुरभिदासति । तमग्ने मेन्याऽमेनिं कृणु, इति ।

हेऽग्ने यो मामभिचरति तस्य शत्रोश्चक्षुषो मनसो वाचश्च ब्रह्मणःप्राणस्यहेतिरायुधं त्वमसि । हे हेते तादृशो यः शत्रुरघायुरघमनिष्टं कर्तुमिच्छन्मामभिदासति हिनस्ति । तं शत्रुं मेन्या त्वदीयेन क्रोधेनामेनिं कृणु क्रोधरहितं कुरु । मेनिशब्दः क्रोधवाची । तथा च वाजसनेयिनः कस्यचिन्मन्त्रस्य ब्राह्मणे समामनन्ति-"अमेन्यस्मासु ब्रह्माणि धारयेत्यक्रुध्यन्नस्मासु ब्रह्मणि धारयेत्यवैतदाह" इति ।

अथ द्वितीयामाह-

यो मा चक्षुषा मनसा । यो वाचा ब्रह्मणाऽघायुरभिदासति । तयाऽग्ने त्वं मेन्या । अमुममेनिं कृणु, इति ।

यो मां स्वकीयश्चक्षुरादिभिरघायुः पापमिच्छन्हिनस्ति तं शत्रुं तथा मेन्या त्वदीयेन क्रोधेन क्रोधरहितं कुरु ।

अथ तृतीयामाह-

यत्किंचासो मनसा यच्च वाचा । यज्ञैर्जुहोति यजुषा हविर्भिः (१) । तन्मृत्युर्निर्ऋत्या संविदानः । पुरा दिष्टादाहुतीरस्य हन्तु,इति ।

असौ मच्छत्रुर्यत्किंच मनसा मद्विषये दुरितं करोति यच्च वाचा यज्ञैर्हविर्भिश्च यजुषा मच्छासनार्थं जुहोति तत्सर्वं निर्ऋत्या संविदान ऐकमत्यं गतो मृत्युर्हन्तु नाशयतु । पुरा दिष्टात् । दिष्टं दैवम् । शत्रोरनुकूलस्य दैवस्य प्रवृत्तेःपुराऽस्य शत्रोराहुतिं हन्तु नाशयतु ।

अथ चतुर्थीमाह-

Digitized by Madhuban Trust, Delhi

यातुधाना निर्ऋतिरादु रक्षः । ते अस्य घ्नन्त्वनृतेन सत्यम् । इन्द्रेषिता आज्यमस्य मथ्यन्तु । मा तत्समृद्धि यदसौ करोति, इति ।

यातुधानाः क्रूरा भूतविशेषा या च निर्ऋतिः क्रूरदेवताऽऽद्वन्तरं च यद्रक्षो राक्षसजातिस्ते सर्वेऽस्य शत्रोः सत्यमवैतथ्यं कृतं कर्मानृतेन दुष्टेन व्यापारेण हविरुपघातेन घ्नन्तु । तदेव पुनराह-इन्द्रेषिता यातुधानादयस्तस्य शत्रोराज्यं हविर्भूतं केशकीटाद्यशुचिमिश्रणेन दूषयन्तु यदसौ शत्रुः करोति तत्कर्म मा समृद्धिं समृद्धं मा भवतु ।

अथ पञ्चमीमाह-

हन्मि तेऽहं कृत हविः । यो मे घोरमचीकृतः । अपाञ्चौ त उभौ बाहू । अपनह्याभ्यास्यम् (२) इति ।

हे शत्रो यस्त्वं मे घोरमभिचाररूपं कर्माचीकृतोऽकार्षीर्घोरं कर्तनमदृष्टरूपेणाकार्षीरित्यर्थः । हे शत्रो ते तव कृतं संस्कृतं हविरहमिन्द्रेण प्रेषितैर्भूतैर्हन्मि । तव द्वावपि बाहू अपाञ्चावपगतौ पृष्ठतः कृत्वाऽपनह्यामि दृढं बध्नाम्यास्यं मुखं च पृष्ठतः कृत्वा बध्नामि ।

अथ षष्ठीमाह-

अपनह्यामि ते बाहू । अपनह्याम्यास्यम् । अग्ने- र्देवस्य ब्रह्मणा । सर्वं तेऽवधिषं कृतम्, इति ।

पादद्वयं पूर्ववत् । अग्नेर्देवस्य ब्रह्मणाऽऽग्नेयसूक्तरूपेण स्तोत्रेण सर्वं कर्म तव कृतमवधिषमहं हतवानस्मि ।

अथ सप्तमीमाह-

पुराऽमुष्य वषट्कारात् । यज्ञं देवेषु नस्कृधि । स्विष्टमस्माकं भूयात् । माऽस्मान्प्रापन्नरातयः, इति ।

अमुष्य शत्रोर्वषट्कारात्पूर्वमेवास्माकं यज्ञं देवेषु कृधि स्थापय । हेऽग्नेऽस्माकं यज्ञकर्म स्विष्टमस्तु मा शत्रोः । अपि च कदाचिदप्यरातयोऽस्मान्मा प्रापन्मा प्राप्नुवन्तु ।

अथाष्टमीमाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्ति दूरे सतो अग्ने । भ्रातृव्यस्याभिदासतः (३) ।
वषट्कारेण वज्रेण । कृत्याꣳ हन्मि कृतामहम्, इति ।

हेऽग्ने मम भ्रातृव्यस्य शत्रोरभिदासतो हिंसतोऽन्ति समीपे दूरे वा सतोऽवस्थितस्य कृतामुत्पादितां कृत्यामहं वषट्कारेण वज्रेण हन्मि नाशयामि ।

अथ नवमीमाह–

यो मा नक्तं दिवा सायम् । प्रातश्चाह्नो निपीयति । अद्या तमिन्द्र वज्रेण । भ्रातृव्यं पादयामसि, इति ।

यः शत्रुरह्नोऽहोरात्रयोः सायंप्रातःकालयोश्च मां निपीयति बाधते तं शत्रुहं इन्द्रं त्वदीयेन वज्रेणच्छित्वा पातयामः । त एते नव मन्त्रा एतयैव यजेताभिचर्यमाण इत्यादिष्विष्टिषूपहोमार्थत्वेन विनियोक्तव्याः ।

अथ दशमीमाह–

इन्द्रस्य गृहोऽसि तं त्वा । प्रपद्ये सगुः साश्वः । सह यन्मे अस्ति तेन, इति ।

अत्रेन्द्रशब्देन परमैश्वर्ययोगादादित्व उच्यते । तथा च ब्राह्मणम्–"असौ वा आदित्य इन्द्र एव प्रजापतिः" इति । ह आदित्यमण्डलत्वमिन्द्रस्य गृहोऽस्यादित्यनिवासस्थानमसि । तं तादृशमादित्यगृहं त्वामहं प्रपद्ये प्राप्नोति । कीदृशोऽहम् । सगुर्गोसहितःसाश्वोऽश्वसहितोऽन्यदपि मे यद्वस्तु विद्यते तेन सह त्वां प्रविशामि । अयं मन्त्र आत्मरक्षायां विनियोक्तव्यः ।

अथैकादशीमाह–

ईडे अग्निं विपश्चितम् (४) । गिरा यज्ञस्य साधनम् । श्रुष्टीवानं । धितावानम्, इति ।

अग्निमीडे गिरास्तौमि । कीदृशम् । विपश्चितमभिज्ञं यज्ञस्य साधनं होमाधारत्वेन यज्ञनिष्पादकम् । श्रुष्टीवानमन्नान्तम् । गिरा च श्रुष्टिरित्यादावन्नपरत्वेन प्रयोगात् । धितावानं धारणवन्तम् ।

अथ द्वादशीमाह–

Digitized by Madhuban Trust, Delhi

अग्नें शकेम ते वयम् । यमं देवस्यं वाजिनः । अति द्वेषाꣳसि तरेम, इति

हेऽग्ने वाजिनो देवाय तुभ्यं हविर्यमं दातुं शकेम । यमशब्दो णमुलन्तो दानवाची । तेन दानेन द्वेषांसि रक्षांस्यतितरेव । एतच्च मन्त्रद्वयमाग्नेयकर्मणि विनियोज्यम् ।

अथ त्रयोदशीमाह-

अवंतं मा समनसौ समोंकसौ । सचेंतसौ सरेतसौ । उभौ मामंवतं जातवेंदसौ । शिवौ भंवतमद्य नः, इति ।

योऽयमाहवनीयोऽग्निर्यश्च तत्र प्रह्रियमाणोऽग्निस्तावुभौ हेऽग्नी समानमनस्कौ परस्परप्रीतियुक्तौ समानस्थानावेकत्रैव निवसन्तौ सचेतसौ समानज्ञानौ सरेतसावेककर्मप्रवर्तकौ भूत्वा मामवतं रक्षतम् । तादृशौ हे जातवेद सावद्यास्मिन्कर्मणि नोऽस्मान्प्रति शिवौ शान्तौ भवतम् । अयं मन्त्र आहवनीयमथिताग्न्योर्मेलने विनियोजनीयः ।

अथ चतुर्दशीमाह -

स्वयं कृण्वानः सुगमप्रंयावम् (५) । तिग्मशृङ्गो वृषभः शोशुचानः । प्रत्नꣳ सधस्थमनुपश्यमानः । आ तन्तुमग्निर्दिव्यं ततान, इति ।

अयमग्निर्दिव्यं दिवि भवं तन्तुं तन्यमानं यज्ञमाततानाऽऽसमन्ताद्विस्तृतवान् । कीदृशोऽग्निः गन्तुं सुशकमप्रयावं प्रमादरहितं मार्गं स्वयमेव कृण्वानः कुर्वाणः । तिग्मशृङ्गस्तीक्ष्णज्वालो वृषभः कामाभिवर्षकः शोशुचानोऽत्यन्तं दीप्यमानःप्रत्नं चिरकालसिद्धं सधस्थं सर्वेषां देवानां सहावस्थानयोग्यमाहवनीयायतनमनुपश्यमानो निरन्तरं द्रष्टा ।

अथ पञ्चदशीमाह-

त्वं नस्तन्तुरुत सेतुरग्ने । त्वं पन्थां भवसि देवयानः । त्वयाऽग्ने पृष्ठं वयमारुहेम । अथां देवैः सधमादं मदेम, इति ।

हेऽग्नेत्वं नोऽस्माकं तन्तुरविच्छिन्नो यज्ञो भवसि । उतापि च सेतुरनु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ष्ठानमर्यादानामसांकर्याय सेतुवद्विधारकोऽसि। तथा त्वं देवयानो देवैर्गन्तुं योग्यः पन्था भवसि तत्साधनत्वात्तद्रूपत्वम्। त्वया त्वत्प्रसादेन वयं यजमानाः पृष्ठं स्वर्गस्थोपरिभागमारुहेम। अथानन्तरं तत्रावस्थितैर्देवैः सधमादं सहैकविधो हर्षो यथा भवति तथा मदेम हृष्यास्म। तदेतन्मन्त्रद्वयं प्रायश्चित्तेष्टौ याज्यानुवाक्यारूपेण सूत्रकारो विनियुक्तवान्–"यस्याग्निहोत्रं विच्छिद्येत्तद्व्यहे त्र्यहे चतुरहे वाऽग्नये तन्तुमतेऽष्टाकपालं निर्वपेत्स्वयं कृण्वानः" इति।

अथ षोडशीमाह–

उदुत्तमं मुमुग्धि नः। वि पाशं मध्यमं चृत। अवाधमानि जीवसे (६), इति।

हे वरुण नोऽस्माकमुत्तमं त्वदीयं पाशमुन्मुमुग्ध्युत्कर्षेण मोचय। मध्यमं पाशं विचृत वियोजय। जीवसेऽस्माकं जीवनार्थमधमानि बन्धनान्यवचृत विनाशय। सोऽयं मन्त्रो बन्धनमोक्षे विनियोज्यः।

अथ सप्तदशीमाह–

वयꣳ सोम व्रते तव। मनस्तनूषु बिभ्रतः। प्रजावन्तो अशीमहि, इति।

हे सोम तव व्रते कर्मणि वयं वर्तमानास्तनूषु शरीरेषु मनो बिभ्रतो विचारक्षमं मनो धारयन्तः प्रजावन्तः पुत्रपौत्रादियुक्ता अशीमहि भोगान्भुञ्जीमहि। अस्य मन्त्रस्याग्न्युपस्थाने मुखमार्जने विनियोगं सूत्रकार आह–" अशीमहीति मुखं विसृष्टे" इत्यन्तेन वाक्येन।

अथाष्टादशीमाह–

इन्द्राणी देवी सुभगा सुपत्नी। उदꣳशेन पतिविद्ये जिगाय त्रिꣳशदस्या जघनं योजनानि। उपस्थ इन्द्रꣳ स्थविरं बिभर्ति, इति।

येयमिन्द्राणीन्द्रस्य भार्या सेयं देवी द्योतमाना सुभगा सौभाग्ययुक्ता सुपत्नी शोभनपतियुक्ता सती पतिविद्ये पत्युरिन्द्रस्य लाभे स्नेहे सत्यंशेन सेनाया एकदेशेनैव शत्रुमुज्जिगायोत्कर्षेण जितवती। अस्या ईदृश्या इन्द्राण्या जघनं पृष्ठभागगवर्ति सैन्यं त्रिंशद्योजनानि त्रिशत्संख्याकेषु

CC-0. Shri Vipin K

Digitized by Madhuban Trust, Delhi

योजनेषु व्याप्यावतिष्ठते सेयमिन्द्राणी स्थविरं स्थैर्ययुक्तं निर्भयमिन्द्रं स्वपतिमुपस्थे सेनामुखे बिभर्ति धारयति ।

अथैकोनविंशीमाह-

सेना ह नाम पृथिवी धनंजया । विश्वव्यचा अदितिः सूर्यत्वक् । इन्द्राणी देवी प्रासहा ददाना (७) । सा नो देवी सुहवा शर्म यच्छतु, इति ।

सेना ह नाम देवानां सेनाऽत्यन्तं प्रसिद्धा । सा च पृथिवी विस्तीर्णा धनंजया शत्रूणां धनं जेतुं समर्था विश्वव्यचा सर्वव्यापिन्यदितिरखण्डनीया सूर्यत्वक्सूर्यवदुज्ज्वलरूपा । तथा सेनया युक्तेन्द्राणी देवी प्रासहा प्रकृष्टेन बलेनाऽऽददाना शत्रूणां धनं स्वीकुर्वाणा वर्तते । सा तादृशी सुहवा सुखेनाऽऽह्वातुं शक्या देवी नोऽस्मभ्यं शर्म यच्छतु सुखं ददातु । एते ऋचौ "इन्द्राण्यै चरुं निर्वपत्" इत्यत्र विकल्पिते याज्यानुवाक्ये द्रष्टव्ये ।

अथ विंशीमाह-

आ त्वाऽहार्षमन्तरभूः । ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु । मा त्वद्राष्ट्रमधिभ्रशत्, इति ।

शत्रुभिरपरुद्धो वाऽपरुध्यमानो वा हे राजन्, त्वामाहार्षं स्वकीये राज्ये समानीतवानस्मि । अन्तरभूस्तस्मिन्नाज्येऽन्तर्भव । तत्र ध्रुवः स्थिरः सन्नविचाचलिः कदाचिदपि चलनरहितस्तिष्ठ । सर्वा विशः प्रजास्त्वां वाञ्छन्तु । इदं राष्ट्रं त्वन्मा भ्रंशत्त्वत्तो भ्रष्टं मा भूत् ।

अथैकविंशीमाह-

ध्रुवा द्यौर्ध्रुवा पृथिवी । ध्रुवं विश्वमिदं जगत् । ध्रुवा ह पर्वता । इमे । ध्रुवो राजा विशामयम्, इति ।

यथा पृथिव्यादयो लोके ध्रुवा एवमयं विशां प्रजानां राजा ध्रुवो भवतु । अथ द्वाविंशीमाह-

इहैवैधि मा व्यथिष्ठाः (८) । पर्वत इवाविचाचलिः । इन्द्र इवेह ध्रुवस्तिष्ठ । इह राष्ट्रमु धारय, इति ।

हे राजन्निहैव राष्ट्र एधि स्थिरो भव । मा व्यथिष्ठा व्यथां भयं मा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राप्नुहि । पर्वतो यथा चलनरहितस्तथा त्वं निश्चलो भव । इन्द्रो यथा द्युलोके ध्रुवस्तिष्ठति तथा त्वमिह राष्ट्रे ध्रुवस्तिष्ठेदैव स्थित्वा तदेतद्राष्ट्रम् सर्वमपि धारय पोषय ।

अथ त्रयोविंशीमाह-

अभितिष्ठ पृतन्यतः । अधरे सन्तु शत्रवः । इन्द्र इव वृत्रहा तिष्ठ । अपः क्षेत्राणि संजयन्, इति ।

पृतनामस्मद्विरोधिनीं सेनामात्मन इच्छन्तीति पृतन्यतस्तान्वैरिणोऽभितिष्ठाभिक्रम्य निगृह्य स्थिरो भव । ते च शत्रवस्त्वत्तोऽधरे नीचाः सन्तु । इन्द्रवदवृत्रहा शत्रुघाती तिष्ठ । किं कुर्वन् । अपः सस्योपकारीणि जलानि क्षेत्राणि च संजयन्सम्यक्जयेन संपादयन् ।

अथ चतुर्विंशीमाह-

इन्द्र एणमदीधरत् । ध्रुवं ध्रुवेण हविषा । तस्मै देवा अधिब्रुवन् । अयं च ब्रह्मणस्पतिः (९), इति ।

हविर्भिरास्यमभिदासतो विपश्चितमप्रयावं जीवसे ददाना व्यथिष्ठाब्रुवन्नेके च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
चतुर्थाध्याये द्वितीयोऽनुवाकः ।। २ ।।

योऽयमिन्द्रोऽस्ति स एनं राजानं ध्रुवो यथा भवति तथाऽदीधरद्धारयतु । ध्रुवेण स्थिरेण यथाशास्त्रमनुष्ठितेन हविषा तुष्टा देवास्तस्मै यजमानार्थमविब्रुवन्नधिकोऽयमिति ब्रुवन्तु । यो ब्रह्मणस्पतिर्देवोऽयं चाधिब्रवीतु । "आत्वा हार्षम्" इत्याद्या ऋच पञ्चेन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपदपरुद्धो वाऽरुध्यमानो वेत्यत्रोपहोमार्था द्रष्टव्याः ।

इति श्रीमत्सायणाचार्यविरचिते वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
चतुर्थप्रपाठके द्वितीयोऽनुवाकः ।। २ ।।

अथ चतुर्थप्रपाठके तृतीयोऽनुवाकः ।

तृतीयानुवाके प्रथमामृचमाह-

Digitized by Madhuban Trust, Delhi

जुष्टी नरो ब्रह्मणा वः पितृणाम् । अक्षमव्ययं न किला रिषाथ । यच्छक्वरीषु बृहता रवेण । इन्द्रे शुष्ममदधाथा वसिष्ठाः, इति ।

हे वसिष्ठा वसिष्ठस्य मम पुत्रा यद्यस्मात्कारणाच्छक्वरीषु "प्रोष्ट्वस्यै पुरो रवम्" इत्यादिकासु शक्वरीच्छन्दोयुक्तास्तृक्षु बृहता रवेण महता सामध्वनिनेन्द्रे शुष्यं बलमदधाथाः संपादितवन्तः । तस्मात्काणाद्धे नरो यत्पुत्राः पुरुषा वो युष्मसंबन्धिनां पितृणां ब्रह्मणा जुष्टी भवदीयेन परिवृढेन स्तोत्रेण प्रीतानामक्षं क्रुद्धंचक्षुरिन्द्रियमव्ययं वसिष्ठोऽहमाच्छादितवानस्मि । इतः परं यूयं न रिषाय किल सर्वथा हिंसिता न भवथ । अयमर्थः- सौदासनामकैरसुरैर्यदा वसिष्ठो हतपुत्रोऽभूत्तदानीं पुत्राभावादेतदीयाः पितरो रक्तवर्णेन चक्षुषा युक्ताः क्रुद्धा दृश्यन्ते [स्म] । तदानीं वसिष्ठः पुत्रानुत्पादितवान् । ते च पुत्रा विद्याधिकाःसन्तः सामगानेनेन्द्रं तोषितवन्तः । तदीयपितृणां क्रुद्धमक्षं क्रोधपरित्यागेन शान्तं संपन्नम् । सोऽयं वृत्तान्तो वसिष्ठेन स्वपुत्रान्प्रत्यभिहित इति । अयं मन्त्रो रक्षार्थे द्रष्टव्यः ।

अथ द्वितीयामाह-

पावका नः सरस्वती । वाजेभिर्वाजिनीवती । यज्ञं वष्टु धिया वसुः, इति ।

इयं सरस्वती नोऽस्मदीयं यज्ञं धिया स्वबुद्ध्या वष्टु कामयताम् । कीदृशी पावका शोधिका । वाजेभिर्नानाविधैरन्नैर्युक्तत्वेन वाजिनीवती बह्वन्ना । वसुः सर्वेषां निवासयित्री। अयं मन्त्रोऽङ्गहीनपशूपाकरणप्राय श्चित्तत्वेन सूत्र विनियुक्तः- "सारस्वतीं बार्हस्पत्यामिति च हुत्वा प्रयोजयेत्" इति ।

अथ तृतीयामाह-

सरस्वत्यभि नो नेषि वस्यः । मा पस्फरीः पयसा मा न आधक् । जुषस्व नः सख्या वेश्या च (१) । मा त्वत्क्षेत्राण्यरणानि गन्म, इति ।

हे सरस्वति नोऽस्मान्वस्योऽभि श्रेयः प्रति नेषि नय । मा पस्फरीर्वा हिंसीः । पयसा नदीरूपायास्तव जलेन नोऽस्मान्मा धक्सर्वतो या धार्क्षीर्याविनाशय । सख्या सखित्वेन वेश्या च गृहत्वस्थानेन च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नोऽस्मान्प्रति जुषस्व । त्वत्तव प्रसादादरणानि रणरहितानि क्लेशकारणानि क्षेत्राणि मृत्युस्थानानि या गन्म मा प्राप्नवाम । अयं च पादोऽन्यत्र ब्राह्मणेन व्याख्यातः–"मा स्वत्क्षेत्राण्यरणानि गन्मेत्याह । मृत्योर्वै क्षेत्राण्यरणानि । तेनैव मृत्योः क्षेत्राण्येव गच्छति" इति । तस्मिन्नेव ब्राह्मणे मन्त्रोऽप्ययं विनियुक्तः– "सरस्वत्यभि नो नेषि वस्य इति पुरोरुचं कुर्यात्" इति । तत्रोक्थ्याग्रान्गृह्णातीत्युपक्रान्तत्वात्तदीयेयं पुरोरुक् । तथा सूक्तेऽपि–"सारस्वतीं मेषीम् लभेत" इत्यस्य पशोर्हविषः पुरोनुवाक्यारूपेण प्रतीकमाम्नातम्–" सरस्वत्यभि नो नेषि" इति ।

अथ चतुर्थीमाह–

वृ॒ञ्जे ह॒विर्नम॑सा ब॒र्हिर॒ग्नौ । अया॑मि॒ स्रुग्घृ॒तव॑ती सु॒वृ॒क्तिः । अम्य॑क्षि॒ सद्म॒ सद॑ने पृथि॒व्याः । अश्रा॑यि य॒ज्ञः सूर्ये॒ न चक्षुः॑, इति ।

अग्नौ हविः प्रस्तररूपेण होतव्यं बर्हिर्यदस्ति तदेतन्नमसा नमनेन विनयेन सह वृञ्जे यामि । लुनामीत्यवर्जर्थः । आच्छेत्ता ते मा रिषमित्याद्युक्तिर्विनयः । घृतवती घृतसंपूर्णा सुवृक्तिः सुप्रदाना स्रुग्जुहूरयामि होमार्थमस्माभिरग्राहि । पृथिव्याः संवन्विनि सदने देवयजने सद्म प्राग्वंशादिरूपमम्यक्ष्यस्माभिरप्रापि । यज्ञोयमस्माभिरश्रायि । सूर्ये न सूर्येऽपि चक्षुरस्मदीयमश्रायि सूर्यावलोकनं कृतमित्यर्थः । सोऽयं मन्त्रः क्वचिद्याजमानजये विनियोक्तव्यः ।

अथ पञ्चमीमाह–

इ॒हार्वाञ्च॒मति॑ह्वये । इन्द्रं॒ जैत्रा॑य॒ जेत॑वे । अ॒स्माक॑मरतु॒ केव॑लः, इति ।

इह कर्मणीन्द्रमर्वाञ्चमस्मदभिमुखमतिह्वयेऽन्यान्यजमाना-नातैलङ्घय प्रथममेवाऽऽह्वयामि । क्रियार्थम् । जैत्राय जेतवे जेतव्यस्य जपार्थम् । स इन्द्रोऽस्माकं केवलोऽस्त्वस्मास्वेव पक्षपातवान्भवतु ।

अथ षष्ठीमाह–

अ॒र्वाञ्च॒मिन्द्र॑म॒मुतो॑ हवामहे । यो

CC-0. Shri Vipin K

Digitized by Madhuban Trust, Delhi

गोजिद्धनजिदश्वजिद्यः (२) । इमं नो यज्ञं विहवे जुषस्व । अस्य कुर्मो हरिवो मेदिनं त्वा, इति ।

अर्वाञ्चमस्मदभिमुखमिन्द्रममुतः स्वर्गादाह्वयामः । य इन्द्रो गोजिच्छत्रुसंबन्धिनीर्गा जयेन संपादयति यश्च तथैव धनजिदश्वजिच्च तमिन्द्रं हवामहे, इति पूर्वत्रैवान्वयः । हे हरिवो हरिनामकाभ्यामश्वाभ्यां युक्तेन्द्र विहवे विविधाह्वाने सत्यस्मदीयमिमं यज्ञं जुषस्व सेवस्व । अस्यानेन यज्ञेन त्वां मेदिनं स्निग्धशरीरं कुर्मः । एते ऋचौ कस्मिंश्चिज्जयहेतावैन्द्रे हविषि याज्यानुवाक्ये द्रष्टव्ये ।

अथ सप्तमीमाह–

असंसृष्टो जायसे मातृवोः शुचिः । मन्द्रः कविरुदतिष्ठो विवस्वतः । घृतेन त्वा वर्धयन्नग्न आहुत । धूमस्ते केतुरभवद्दिवि श्रितः, इति ।

हेऽग्ने त्वमकृतसंमार्जन एव सन्मातृवोर्मात्रोररण्योः शुचिरेव जायसे । स्रुगादयो हि संमार्जनतः शुध्यन्ति । त्वं पुनरसंमृष्ट एव शुचिर्भवसि । मन्द्रो हर्षयुक्तः कविर्विद्वांस्त्वं विवस्वतः परिचरतो यजमानान्प्रत्युदतिष्ठोत्स्थितोऽभूः । आहुतिभिराहुत हेऽग्ने यजमानास्त्वां घृतेनावर्धयन् । ते तव धूमो दिविश्रित आकाशे व्याप्तः सन्केतुरभवत् । अग्निमानयं प्रदेश इति ज्ञानस्य हेतुरभवत् । अयं च मन्त्रो मथनजन्याग्न्यभिमन्त्रेण क्वचिद्विनियोक्तव्यः ।

अथाष्टमीमाह–

अग्निरग्रे प्रथमो देवतानाम् । संयातानामुत्तमो विष्णुरासीत् यजमानाय परिगृह्य देवान् । दीक्षयेद हविरागच्छतं नः (३), इति ।

यजमानं प्रति संयातानां पौर्वापर्येणाऽऽगच्छन्तीनां देवतानामग्निः प्रथमोऽग्रे पुरतो मार्गप्रदर्शको गच्छति । विष्णुरुत्तमः पश्चादागच्छति । एतदुक्तं भवति–"अनपक्रमणार्थं पङ्क्तिरूपेणाऽऽगच्छतां देवानामग्नि प्रथमो विष्णुरुत्तमश्चरमः" इति । तावुभौ सर्वान्देवान्मुखतः पृष्ठतश्च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजमानार्थं परिगृह्य दीक्षादेवतया सह तावग्नाविष्णू युवां नोऽस्मदीयमिदं हविरुद्दिश्याऽऽगच्छतम् ।

अथ नवमीमाह-

अग्निश्च विष्णो तप उत्तमं महः । दीक्षापालेभ्यो वनत हि शक्रा । विश्वैर्देवैर्यज्ञियैः संविदानौ । दीक्षामस्मै यजमानाय धत्तम्, इति ।

हे विष्णो त्वं चाग्निश्चोभौ युवां दीक्षाख्यव्रतपालकेभ्यो देवेभ्यः सकाशाद्यजमानार्थं मह उत्तमं तपो वनतं याचतम् । हे शक्रा, इन्द्रसमानौ युवां हि प्रसिद्धौ यज्ञयोग्यैः, सर्वैर्देवैः सह संविदानावैकमत्यं गतावस्मै यजमानाय दीक्षारूपं संस्कारं संपादयतम् । एतच्चोभयं दीक्षणीयायामिष्टौ याज्यानुवाक्यारूपेण विनियोज्यम् ।

अथ दशमीमाह-

प्र तद्विष्णुः स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा, इति ।

तत्तस्मिन्कर्मणि यजमानानां वीर्यार्थं विष्णुः प्रस्तवते प्रकर्षेण स्तूयते । कुचरो भूमौ वर्तमानो भीमो भयंकरो मृगो न सिंहो यथोर्ध्वमुत्प्लुत्य गिरिष्ठाः पर्वतस्थो भवति । तथा यस्य विष्णोः पूर्वं वामनस्य पश्चाधिविक्रमत्वं गच्छत ऊरुषु विस्तीर्णेषु त्रिषु विक्रमणेषु विश्वा भुवनानि सर्वे लोका अधिक्षियन्त्याधिक्येन निवसन्ति । स विष्णुः स्तूयत इति पूर्वत्रान्वयः ।

अथैकादशीमाह-

नू मर्तो दयते सनिष्यन्यः । विष्णव उरुगायाय दाशत् (४) । प्र यः सत्राचा मनसा यजातै । एतावन्तं नर्यमाविवासात्, इति ।

यो यजमानः सनिष्यन्हविर्दास्यन्नुरुगायाय महाकीर्तये विष्णवे दाशद्ददाति । यश्च सत्राचा सत्यगामिना मनसा प्रयजातै प्रकर्षेण यजते । एतावन्तं पूर्वोक्तविक्रमत्रयसामर्थ्योपेतं नर्यं नरेभ्यो हितं

Digitized by Madhuban Trust, Delhi

विष्णुमाविवासात्स्तुत्यादिना सर्वतः परिचरति स मर्तो मनुष्यो नू क्षिप्रं दयते स्वात्मानं जगच्च रक्षति ।

अथ द्वादशीमाह-

विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । उरुक्षितिँ सुजनिमा चकार, इति ।

एष विष्णुः पृथिवीमेतां पृथिव्युपलक्षितमिदं लोकत्रयं विचक्रमे विशेषेण पादैराक्रान्तवान् । किं कुर्वन्, मनुषे मनुष्याणां क्षेत्राय निवासार्थं दशस्यन्प्रदातुमिच्छन् । अस्य विष्णोः कीरयो जनासः कीर्तिपरा जना ध्रुवासः स्थिरा भवन्ति । स विष्णुः पुनः सुजनिमा शोभनेन वामनरूपेण जन्मना युक्त उरुक्षितिं प्राणिनां निवासाय विस्तीर्णं स्थानं चकार ।

अथ त्रयोदशीमाह-

त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्र विष्णुरस्तु तवसस्तवीयान् । त्वेषँ ह्यस्य स्थविरस्य नाम (५), इति ।

एष विष्णुर्देवः शतर्चसं शतविधगतियुक्तामेतां पृथिवीं पृथिव्युपलक्षितलोकत्रयं महित्वा स्वमहिम्ना त्रिर्विचक्रमे त्रिवारं पादेनाऽऽक्रान्तवान् । तवसस्तवीयान्महतो महीयान्विष्णुः मास्तु प्रकृष्टो भवतु । स्थविरस्यात्यन्तं प्रवृद्धस्यास्य विष्णोर्नाम त्रिविक्रमादिरूपं त्वेषं हि प्रदीप्तं प्रसिद्धमित्यर्थः । उक्तानां मन्त्राणां "वैष्णवं वामनमालभेत" इत्येतस्य पशोः सूक्ते प्रतीकान्याम्नातानि, "प्र तद्विष्णुर्विचक्रमे त्रिर्देवः" इति । "नू मर्तः" इति मन्त्रस्तु प्र तद्विष्णुरित्यनेन सह विकल्प्यते ।

अथ चतुर्दशीमाह-

होतारं चित्ररथमध्वरस्य । यज्ञस्य यज्ञस्य केतुँ रुशन्तम् । प्रत्यर्धिं देवस्य देवस्य मह्ना । श्रिया त्वग्निमतिथिं जनानाम्, इति ।

श्रिया स्वकीयया संपदा युक्तमग्निं त्विममग्निमेव यजामह इति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शेषः । कीदृशमग्निम् । होतारं देवानामाह्वातारं चित्ररथं विचित्रेण रथेन युक्तमध्वरस्य हिंसारहितस्य यज्ञस्य यज्ञस्य केतुं सर्वस्यापि यज्ञस्य ज्ञापकं रूशन्तं दीप्तिमन्तं मह्ना स्वकीयेन महिम्ना देवस्य देवस्य सर्वस्यापि देवस्य प्रत्यर्थि प्रत्येकमर्धेन हविषा युक्तम् । अत एव सूत्रकार आह-"सर्वेषां ँ हविषामुत्तरार्धात्सकृत्सकृत्स्विष्टकृतेऽवद्यति" इति । जनानां यजमानानामतिथिमतिथिवत्पूजनीयम् । अयं मन्त्र आतिथ्येष्टौ स्विष्टकृतः पुरोनुवाक्या । तथा चाऽऽश्वलायन आह-"होतारं चित्ररथमध्वरस्य प्र प्रायमग्निर्भरतस्य शृण्व इति संयाज्ये" इति ।

अथ पञ्चदशीमाह-

आ नो विश्वाभिरूतिभिः सजोषाः । ब्रह्म जुषाणो हर्यश्व याहि । वरीवृजत्स्थविरेभिः सुशिप्र । अस्मे दधद् वृषण ँ शुष्ममिन्द्र, इति ।

हे हर्यश्व हरिनामकाभ्यामश्वाभ्यामुपेतेन्द्र ब्रह्म जुषाणोऽस्मदीयस्तोत्रं सेवमानः सजोषा अस्माभिः समानप्रीतिः सन्विश्वाभिरुतिभिः सर्वैरपि रक्षणप्रकारैः सह नोऽस्मान्प्रत्यायाह्यागच्छ किं कुर्वन्, हे सुशिप्र शोभनहविर्युक्त स्थविरेभिर्वृद्धैर्देवैः सह वरीवृजत्सर्वमशुभमत्यन्तं वर्जयन् । हे इन्द्र वृषणं कामवर्षणक्षमं शुष्मं बलमस्मे दधदस्मासु संपादयन्वर्तस्व ।

अथ षोडशीमाह-

इन्द्रः सुवर्षा जनयन्नहानि । जिगायोशिग्भिः पृतना अभिश्रीः (६) प्रारोचयन्मनवे केतुमह्नाम् । अविन्दज्ज्योतिर्बृहते रणाय, इति ।

अयमिन्द्र उशिग्भिर्विजयं कामयमानैर्देवैः सह पृतना वैरिसेना जिगाय जयं प्राप्तवान् । कीदृश इन्द्रः । सुवर्षाः स्वर्गप्रदोऽभिश्रीरभिमतश्रीकः । किं कुर्वन्नहानि जनयन्स्वर्भानुसंज्ञिनाऽसुरेण सूर्ये तमसा विद्धे सति तदसुरविनाशनेन प्रकाशभूतान्यहान्युत्पादयन्मनवे मनुष्यार्थमह्नां केतुं सूर्यं प्रारोचयन्प्रकर्षेण दीपितवान् । ततो बृहते रणाय महतेरणाय क्रीडार्थं ज्योतिरविन्दत्सूर्यरश्मिरूपं प्रकाशं लब्धवान् । एते ऋचौ कस्मिंश्चिदैन्द्रे कर्मणि याज्यानुवाक्ये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्तदशीमाह-

अश्विनावर्वसे निह्वये वाम् । आ नूनं यातं सुकृताय विप्रा । प्रातर्युक्तेन सुवृता रथेन । उपागच्छतमवसाऽऽगतं नः, इति ।

हेऽश्विनौ वां युवामवसेऽस्मद्रक्षणार्थं निह्वये नितरामाह्वयामि । हे विप्रा मेधाविनाश्विनौ सुकृताय शोभनकर्मसिद्ध्यर्थं नूनमायातमवश्यमागच्छतम् । प्रातर्युक्तेन प्रातः कालेऽश्विभ्यां संयुक्तेन सुवृत्ता शोभनवर्तनेन रथेनोपागच्छतं समीपे समागच्छतम् । समागमने कारणमुच्यते-अस्माकमवसा रक्षणेनाऽऽगतमागच्छतम् ।

अथाष्टादशीमाह-

अविष्टं धीष्वश्विना न आसु । प्रजावद्रेतो अह्रयं नो अस्तु । आवां तोके तनये तूतुजानाः । सुरत्नासो देववीतिं गमेम (७), इति ।

हेऽश्विनावासु धीषु कर्मानुष्ठानबुद्धिषु नोऽस्मानविष्टमवतं रक्षतम् । नोऽस्माकं रेतः प्रजावदपत्ययुक्तं सदह्रयमलज्जाकरमस्तु । अपत्याभावे निषिक्तं रेतो लज्जाकरमेव स्यात् । आवां वयं तोके तनये पुत्रे पौत्रे च तूतुजानाः क्षिप्रं यतमानाः सुरत्नासः शोभनरत्नोपेता देववीतिं देवैः काम्यमानं यज्ञं गमेय प्राप्नुयाम । एते ऋचावाश्विने कर्मणि याज्यानुवाक्ये ।

अथैकोनविंशीमाह-

त्वं सोम क्रतुभिः सुक्रतुर्भूः । त्वं दक्षैः सुदक्षो विश्ववेदाः । त्वं वृषा वृषत्वेभिर्महित्वा । द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः, इति ।

हे सोम त्वं क्रतुभिरस्मदनुष्ठितैः कर्मभिः सुक्रतुर्भूः शोभनकर्मा भव । त्वं दक्षैरस्मदीयैर्बलैः सुदक्षः शोभनबलोपेतो विश्ववेदाः । सर्वज्ञश्च भव । तथा त्वं वृषत्वेभिः सेचनयुक्तैरस्माभिर्वृषा सेचनयुक्तो महित्वा महिमोपेतश्च भव । द्युम्नेभिरस्मदीयैर्धनैर्द्युम्नी धनवान् भूत्वा नृचक्षा अभवो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मनुष्येषु ख्यातः संपन्नोऽस्मदीयोत्कर्षमेव त्वदीयोत्कर्षत्वेन भावयेत्यर्थः ।

अथ विंशीमाह-

अषाढं युत्सु पृतनासु पप्रिम् । सुवर्षामप्स्वां वृजनस्य गोपाम् । भरेषुजा ँसुक्षिति ँसुश्रवसम् । जयन्तं त्वामनु मदेम सोम, इति ।

हे सोम त्वामनु वयं मदेम हृष्वास्म । कीदृशम् । युत्स्वषाढं युद्धेषु केनाप्यतिरस्कार्यं पृतनासु स्वकीयसेनासु पप्रिं पालकं पूरकं वा सुवर्षां स्वर्गप्रदमप्स्वां जलप्रदं वृजनस्य गोपां बलस्य रक्षकं भरेषुजां संग्रामेषु रक्षणाय प्रादुर्भवन्तं सुक्षितिं शोभननिवासं सुश्रवसं शोभनकीर्तिं जयन्तं जयोपेतम् । एतयोर्ऋचो "सौम्यं बभ्रुं ज्योगामयावी" इत्यस्य पशोः सूक्ते प्रतीकद्वयमाम्नातम् "अषाढं युत्सु त्व ँसोम क्रतुभिः" इति ।

अथैकविंशीमाह-

भवा मित्रो न शेव्यो घृतासुतिः । विभूतद्युम्न एवया उ सप्रथाः (८) । अधा ते विष्णो विदुषाचिदृध्यः । स्तोमो यज्ञस्य राध्यो हविष्मतः, इति ।

हे विष्णो त्वं मित्रो न मित्र इव शेव्यः सुखहेतुर्भव । कीदृशस्त्वम् । घृतासुतिर्घृतदानो विभूतद्युम्नः प्रभूतधनयुक्त एवया एव एतव्यो गन्तव्यदेश स्तत्र गन्ता सप्रथा च कीर्तिसहितोऽपि । अघेत्यथशब्दार्थः । अनन्तरं हे विष्णो विदुषाचिद्यष्टुमशक्तेन केवलविद्यायुक्तेनापि ते स्तोम ऋध्यस्त्वदीयं स्तोत्रं संपादनीयम् । हविष्मतो हविर्युक्तस्य यष्टुं शक्तस्य यज्ञस्य राध्यो यज्ञेन त्वमाराधनीयः। द्रव्याभावादनुष्ठातुमशक्तस्य तज्जपेनैवानुष्ठानसंपूर्तिः । अत एवान्यत्राऽऽम्नायते-"यं यं क्रतुमधीते तेन तेनास्येष्टं भवति" इति ।

स्मृतिरपि--

जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ।। इति ।

अथ द्वाविंशीमाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यः पूर्व्याय वेधसे नवीयसे । सुमज्जानये विष्णवे ददाशति । यो जातमस्य महतो महि ब्रवात् । सेदुः । श्रवोभिर्युज्यंचिदभ्यसत्, इति ।

यः पुमान्विष्णवे ददाशति हविर्ददाति । कीदृशाय विष्णवे । पूर्व्याय जगतः पूर्वमेव भवाय वेधसे जगतो विधात्रे नवीयसे रामकृष्णाद्यवतारैरत्यन्तं नूतनाय सुमज्जानये सुष्टु माद्यन्ती हृष्यन्ती लक्ष्म्याख्या जाया यस्यासौ सुमज्जानिस्तस्मै । यश्चान्यः पुरुषोऽस्य महतो विष्णोर्जातं रामकृष्णादिजन्म विशेषं महि ब्रवान्महत्वेन सर्वदा ब्रवीति सेदुः स एवोभयविधः पुमान्, श्रवोभिः श्रवणीयैर्हविर्दानमन्त्रैः । स्तोत्रविशेषैश्च युज्यंचित्सर्वदा स्वेन युक्तमपि कामक्रोधलोभरूपं शत्रुमभ्यसदभितो निरस्यति । अत एव स्मर्यते-

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।। इति ।

अथ त्रयोविंशीमाह-

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य । गर्भं हविषा पिपर्तन । आऽस्य जानन्तो नाम चिद्विवक्तन । बृहत्ते विष्णो सुमतिं भजामहे (९), इति ।

हे स्तोतारः पुरुषाः पूर्व्यं जगतः पूर्वमेवावस्थितं तमु तमेव विष्णुं यथा विद यथावज्जानीत । ज्ञात्वा चर्तस्य सत्यस्य देवस्य गर्भं गर्भवदन्तःस्थितं वेदप्रतिपाद्यमित्यर्थः । तादृशं विष्णुं हविषा पिपर्तन पालयत पूरयतवा । तत्राशक्तौ यूयमस्य विष्णोर्नामचित्केशवनारायणादीनिनामानिजानन्तः शास्त्राचार्यमुखादवगच्छन्त आविवक्तन समन्ताद्विशेषेण ब्रूत निरन्तरं जपतेत्यर्थः । हे विष्णो ते सुमतिं त्वदीयामनुग्रहबुद्धिं वृहद्भजामहे निरन्तरं सेवामहे इत्यर्थः । एतास्तिस्र ऋचो वैष्णवे कर्मण्युपहोमार्थाः ।

अथ चतुर्विंशीमाह-

इमा धाना घृतस्नुवः । हरी इहोपवक्षतः । इन्द्रं सुखतमे रथे, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

घृतस्नुवो घृतं क्षरन्त्य इमा धाना भर्जितयवरूपा अस्माभिरुपक्लृप्ता इति शेषः । सुखतमेऽतिशयेन सुखप्रदे रथे समारुढमिन्द्रं हरी तदीयावश्वाविह धानायुक्ते कर्मण्युपवक्षतः समीपं प्रापयतः । अयं मन्त्रः प्रातःसवन उन्नीयमानसूक्तेऽन्तर्भावनीयः । अत एव बह्वृचैः "आ त्वा वहन्तु" इति सूक्तेऽन्तर्भाव्याऽऽम्नातः ।

अथ पञ्चविंशीमाह-

एष ब्रह्मा प्र ते महे । विदथे शꣳसिषꣳ हरी व ऋत्वियः प्र ते वन्वे । वनुषो हर्यतं मदम् । इन्द्रो नाम घृतं न यः । हरिभिश्चारु सेचते । श्रुतो गण आ त्वा विशन्तु (१०) । हरिवर्पसं गिरः, इति ।

द्वयोर्ऋचोर्व्यतिषक्तरूपोऽयं मन्त्रः । प्रयोगकाले हि तदुभयं व्यतिषज्य शंसनीयम् । अत एवात्र व्यतिषज्याऽऽम्नातः । अर्थस्तु विभज्यैवावबोद्धव्यः । तत्रैका द्विपदाऽनुष्टुप् । इतरा चतुष्पदा जगती । तत्र द्विपदायाः पाठस्तु-"एष ब्रह्मा य ऋत्वियः । इन्द्रो नाम श्रुतो गणे" इति । तस्यायमर्थः । इन्द्रो नाम यो देवतागणे श्रुतः प्रसिद्ध ऋत्विय ऋतावृत्तौ तत्तत्कर्मकाले तत्तत्कर्म कर्तुमाविर्भवति, एष एवंभूत इन्द्रः सदा ब्रह्म प्रजापतिरेवेति । अयं द्विपदो मन्त्र एवमेवाच्छिद्रकाण्डे समाम्नातः । जगत्या पाठस्तु-'प्र ते महे विदथे शꣳसिषꣳ हरी । प्र ते वन्वे वनुषो हर्यतं मदम् । घृतं न यो हरिभिश्चारु सेचते । आ त्वा विशन्तु हरिवर्पसं गिरः,, इति । ह इन्द्र महे विदथे महति यज्ञे हरी त्वदीयावश्वौ प्रशंसिपं प्रकर्षेण स्तुतवानस्मि । हर्यतं हरणीयं मदं मदहेतुं सोमं वनुषः प्रार्थितवन्तः । ते तव प्रवन्वे प्रकर्षेण ददामि । चारु घृतं न समीचीनं घृतमिव महत्तं सोमं हरिभिरश्वैर्युक्तोऽयमिन्द्रः हरितवर्णवपुर्युक्तं सेचते समवेति संबन्ध्यानुभवतीत्यर्थः । हरिवर्पसं हरिवर्णपपुर्युक्तं च पूर्वोक्तगणयुक्तं त्वा त्वां मदीया स्तुतिरूपा गिर आविशन्त्विति । एतयोर्ऋचोर्व्यतिषङ्गपाठः केवलमदृष्टार्थ एवोपहोमेष्वाम्नातः । अयं च व्यतिषक्तो मन्त्रो विहृतषोडशस्तोत्रेऽन्तर्भावनीयः ।

अथ षड्विंशीमाह-

आ चर्षणिप्रा वृषभो जनानाम् । राजा कृष्टीनां पुरुहूत इन्द्रः । स्तुतः श्रवस्यन्नवसोपमद्रिक् । युक्त्वा हरी वृषणाऽऽयाह्यर्वाङ्, इति ।

CC-0. Shri Vipin Kumar

Digitized by Madhuban Trust, Delhi

हे इन्द्र त्वं वृषणा सेचनसमर्थौ हरी अश्वौ युक्त्वा रथे संयोज्यार्वाङस्मदभिमुख आयाह्यागच्छ । कीदृशस्त्वमासमन्ताच्चर्षणि माश्चर्षणीनां मनुष्याणां यजमानरूपाणां फलैः पूरयिता जनानां देवलोक स्थानां मध्ये वृषभः श्रेष्ठः कृष्टीनां मनुष्याणां सर्वेषां स्वामी पुरूहूतः पुरुषु बहुषु यज्ञेष्वाहूत इन्द्रः परमैश्वर्ययुक्तः स्तुतो यागकाले स्तोत्रैः स्तुतः श्रवस्यं श्रवोऽन्नं हविस्तदिच्छन्नवसाऽस्मदीयरक्षणेन निमित्तेनो- पमद्रिङ्गत्समीपे द्रुवन्प्राप्नुवन् । अयं च मन्त्रः सौत्रामण्यामैन्द्रस्य पशोर्वपायाः पुरोनुवाक्या । अत एव तत्र प्रतीकमाम्नातम्-"आ चर्षणिप्रा विवेषयन्मा" इति ।

अथ सप्तविंशीमाह-

प्र यत्सिन्धवः प्रसवं यदायन् । आपः समुद्र ँ रथ्येव जग्मुः । अतश्चिदिन्द्रः सदसो वरीयान् । यदी ँ सोमः पृणाति दुग्धो अ ँ शुः, इति ।

यद्यदा सिन्धवो नद्यः प्रसवमिन्द्रस्यानुज्ञां प्रकर्षेणाऽऽयन्प्राप्नुवन् । द्वितीयो यच्छब्दस्तच्छब्दार्थे वर्तमान उत्तरत्रान्वेति । तत्तदा रथ्येव नदीप्रवाहगता आपः समुद्रं जग्मुः । यथा राजमार्गे रथपङ्क्तिरिव रथपङ्क्तिः शीघ्रं ग्रामान्तरं प्राप्नोप्ति तद्वन्नदीगतो जलप्रवाहः सहसा समुद्रं प्राप्नोति । यद्यस्मात्कारणादीमिममिन्द्रं दुग्धोऽभिषुतः सोमोंऽशुः सोमरसभागः पृणाति पूरयति तद्वत् । अतश्चिदत एव कारणादयमिन्द्रः सदसः सभागताद्देव समूहाद्वरीयानतिशयेन श्रेष्ठः ।

अथाष्टाविंशीमाह-

ह्वयामसि त्वेन्द्र याह्यर्वाङ् (११), अरं ते सोमस्तनुवे भवति । शतक्रतो मादयस्वा सुतेषु । प्रा स्मा ँ अव पृतनासु प्र युत्सु, इति ।

हे इन्द्र त्वां ह्वयामस्यस्मिन्कर्मण्याह्वयामः । अर्वाङ्भिमुखो याहि कर्मभूमिं गच्छ । ते तनुवे त्वदीयाय शरीराय सोमोऽस्माभिर्दीयमानोऽरं भवाति-अलं संपूर्णो भवति । हे शतकाले सुतेषु सोमेषु मादयस्व तं पीत्वा हृष्टो भव । पृतनासु परकीयसेनासु प्रकर्षेणास्मानव रक्ष । युत्सु युद्धेषु च प्रकर्षेण रक्ष ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथैकोनत्रिंशीमाह-

इन्द्राय सोमाः प्रदिवो विदानाः ऋभुर्येभिर्वृषपर्वा विहायाः । प्रयम्यमाणान्प्रति षु गृभाय । इन्द्र पिब वृषधूतस्य वृष्णः, इति ।

प्रदिव इति पुरातननामसु पठितः, प्रदिवः सोमाः पुरातनाः सोमा इन्द्राय विदाना इन्द्रार्थत्वेनैव विज्ञाताः । ऋभुरिन्द्रो येभिर्यैः सोमैर्वृषपर्वा वृषभवत्पीवराङ्गो विहाया विशेषेण कार्श्यं हित्वाऽवस्थितः प्रति प्रत्येकं प्रयम्यमाणान्प्रकर्षेणास्माभिर्दीयमानान्सोमान्सुष्ठु गृभाय गृहाण । ह इन्द्र वृषधूतस्य वृषभवद्वीर्यवद्भिर्ग्रावभिरभिषुतस्य वृष्णो वीर्यवतः सोमस्य रसं पिब ।

अथ त्रिंशीमाह-

अहेडमान उपयाहि यज्ञम् । तुभ्यं पवन्त इन्दवः सुतासः । गावो न वज्रिन्त्स्वमोको अच्छ (१२) । इन्द्राऽऽगहि प्रथमो यज्ञियानाम्, इति ।

ह इन्द्राहेडमानोऽक्रुध्यन्सन्नस्मदीययज्ञमुपयाहि सुतासोऽभिषुता इन्दवः सोमास्तुभ्यं त्वदर्थं पवन्ते दशापवित्रेण शोधिता भवन्ति । हे वज्रिन्निन्द्र यज्ञियानां यज्ञार्हाणां देवानां मध्ये प्रथम सन्स्वमोकोऽच्छ स्वकीयं स्थानमभिलक्ष्याऽऽगह्यागच्छ । गावो न यथा गावः स्वकीयां गोशालां प्रत्यागच्छन्ति तद्वत् ।

अथैकत्रिंशीमाह-

या ते काकुत्सुकृता या वरिष्ठा । यया शश्वत्पिबसि मध्व ऊर्मिम् । तया पाहि प्र ते अध्वर्युरस्थात् । सं ते वज्रो वर्ततामिन्द्र गव्युः, इति ।

ह इन्द्र या ते काकुज्जिह्वा सुकृता प्रजापतिना सुष्ठु निर्मिता । अत एव या जिह्वा वरिष्ठाऽतिशयेन श्रेष्ठा । यया जिह्वया मध्वो मधुरस्य सोमस्योर्मि तरङ्गं तरङ्गाकारं रसं शश्वन्निरन्तरं पिबसि । तया जिह्वया पाहि । अध्वर्युरयं ते तव यागार्थं प्रास्थात्प्रस्थितः । ह इन्द्र ते वज्रो गव्युर्गा इच्छन्संवर्ततां सम्यक्प्रवर्तताम् । "प्र यत्सिन्धवः" इत्यादयः

Digitized by Madhuban Trust, Delhi

पञ्चेन्द्रलिङ्गका मन्त्रा माध्यंदिनसवने शुक्रामन्थिग्रहप्रचारात्पूर्वं प्रस्थितयाज्या द्रष्टव्याः ।

अथ द्वाविंशीमाह-

प्रातर्युजा विबोधय । अश्विना वेह गच्छतम् । अस्य सोमस्य पीतये, इति ।

हे होतः प्रातर्युजा प्रातःकालभोजनीयावश्विनौ विबोधय मन्त्रविशेषेण प्रबुद्धौ कुरु । हेऽश्विनाविह कर्मण्यस्य सोमस्य पानाय युवां गच्छतम् । अयं मन्त्र आश्विनग्रहस्य पुरोनुवाक्या ।

अथ त्रयस्त्रिंशीमाह-

प्रातर्यावाणा प्रथमा यजध्वम् । पुरा गृध्रादररुषः पिबाथः । प्रातर्हि यज्ञमश्विना दधाते । प्रश ंसन्ति कवयः पूर्वभाजः, इति ।

ह ऋत्विजः प्रातर्यावाणा प्रातःसवनं गच्छन्तावश्विनौ प्रथमा प्रथममेवयजध्वम् । हेऽश्विनौ गृध्रात्सोमयुक्तादरपुरुषोऽररुर्नामकाद-सुरात्पुरा पिबाथ इमं सोमरसं पिबतम्,हि यस्मात्कारणादेतावश्विनौ प्रातःकाले यज्ञं दधाते आश्विने शस्त्रे चमसगणे यज्ञमश्विनौ धारयस्तस्मात्कारणात्पूर्वभाजः पूर्वमेव देवान्भजमानाः कवयो विद्वांस ऋत्विज एतावश्विनौ प्रशंसन्ति ।

अथ चतुस्त्रिंशीमाह-

प्रातर्यजध्वमश्विना हिनोत । न सायमस्ति देवया अजुष्टम् । उतान्यो अस्मद्यजते विचायः । पूर्वः पूर्वो यजमानो वनीयान् (१३), इति ।

चाश्वजिद्यो गच्छतं नोदाशन्नामाभिश्रीर्गमेम सप्रथा भजामहे विशन्तु याह्यर्वाङच्छ पिबाथः षट् च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
चतुर्थाध्याये तृतीयोऽनुवाकः ।। ३ ।।

ह ऋत्विजः प्रातःकालं यजध्वमेतावश्विनौ हिनोत प्रीणयत । सायंकाले देवया देवार्थं यागो नास्ति । यस्मात्सायंकाले

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

हुतमजुष्टमप्रियम् । उतापि चास्मदन्यः कश्चिद्यजमानो विचार्यो विशेषेण पूजायुक्तो यद्यपि यजते तथाऽपि पूर्वः पूर्वो यजमानो वनीयानत्यन्तं संभजनीयस्तस्मादहमेव सर्वेभ्यः पूर्वो यजामीत्यभिप्रायः । एते ऋचावाश्विने कर्मणि विकल्पिते याज्ये ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीय ब्राह्मणभाष्ये द्वितीयकाण्डे
चतुर्थप्रपाठके तृतीयोऽनुवाकः ।। ३ ।।

अथ चतुर्थप्रपाठके चतुर्थोऽनुवाकः ।

चतुर्थानुवाके प्रथमामृचमाह-

नक्तं जाताऽस्योषधे । रामे कृष्णे असिक्नि च । इदं रँजनि रजय । किलासं पलितं च यत्, इति ।

अथ पञ्चभिर्मन्त्रैः श्वेतकुष्ठरोगं विनाशयति-शरीरं रमणीयं करोतीति रामा स्वयं कृष्णवर्णा श्वैत्यविनाशनेनासितं कृष्णवर्णं तस्मिन्प्रदेशे संपादय तीत्यसिक्नी । तथाविधे हे नील्याख्यौषधे त्वं नक्तं जाताऽसि । अत एवान्धकारवन्नीलवर्णा दृश्यसे । हे रजनि स्वकीयेन वर्णेन रञ्जनक्षम ओषध इदं श्वेतं शरीरं रजय स्वकीयवर्णेन रञ्जितं कुरु । यत्किलासं श्वेतरोगग्रस्तमङ्गं यच्च पलितं रोमादिकं तदिदं रजयेति पूर्वत्रान्वयः । अत्र हरिद्रा रजनीति केचित् ।

अथ द्वितीयामाह-

किलासं च पलितं च । निरितो नाशया पृषत् । आ नः स्वो अश्नुतां वर्णः । परा श्वेतानि पातय, इति ।

किलासं श्वित्ररोगस्तं पलितं चेत्येवं पृषद्यच्चित्ररूपं तदितः शरीरान्निःशेषेण नाशय । स्वो वर्णो देहस्य स्वकीयः पूर्वसिद्धो वर्णो नोऽस्मानासमन्तादश्नुतां व्याप्नोतु । श्वेतानि रोगरूपाणि परापातय विनाशय ।

अथ तृतीयामाह-

असितं ते निलयनम् । आस्थानमसितं तव (१) । असिक्नियस्योषधे । निरितो नाशया पृषत्, इति ।

Digitized by Madhuban Trust, Delhi

हे ओषधे ते तव निलयनं निःशेषेण लयनं लयप्राप्तिस्थानमङ्गमसितं कृष्णं भवति । न केवलं देहावयवः किंतु तव यदास्थानं वसतिरूपं तदसितं कृष्णं भवति । आ समन्तात्तिष्ठत्यत्रेत्यास्थानं नीलिपक्षेणेन वस्त्रं कृष्णं भवतीति प्रसिद्धमेतत् । अतो हे ओषधे त्वमसिक्न्यसि तद्वृत्प्रापिकाऽसि । अस्मत्पृषन्तं बहुविधं रूपमितो ऽस्मदीयशरीरान्निःशेषेण नाशय ।

अथ चतुर्थीमाह-

अस्थिजस्यं किलासंस्य । तनूजस्यं च यत्त्वचि । कृत्ययां कृतस्य ब्रह्मणा । लक्ष्मं श्वेतमंनीनशम्, इति ।

अस्थिजन्यं यत्किलासं श्वित्रं तनूजं मांसजन्यं यत्किलासं त्वचि यत्किलासं वर्तते यच्च कृत्यया परकीयाभिचारेण कृतं संपादितं किलासं तस्य सर्वस्य संबन्धि श्वेतं लक्ष्म श्वेतवर्णलाञ्छनं ब्रह्मणा परमेशेणानुगृहीतोऽहमनीनशं नाशितवानस्मि ।

अथ पञ्चमीमाह-

सरूंपा नाम ते माता । सरूंपो नामं ते पिता । सरूंपाऽ स्योषधे सा । सरूपमिदं कृधि, (२), इति ।

हे ओषधे ते माता तव मातृस्थानीया भूमिः सरूपा नाम । त्वया समानरूपैव कृष्णभूमिरित्यर्थः । ते पिता तव पितृस्थानीयो बीजविशेषः । सरूपो नाम कृष्णवर्णतया समानरूपः । एताभ्यामुत्पन्ना सा त्वमपि सरूपाऽसि कृष्णवर्णतया तयोर्मातापित्रोः । समानरूपाऽसि । तस्मादिदं श्वेतरूपरोगग्रस्तं शरीरं सरूपं कृधि त्वया समानरूपं कृष्णवर्णं कुरु । एतेषां पञ्चानां मन्त्राणां श्वेतरोगनिवारणौषध्यभिमन्त्रणे विनियोगो द्रष्टव्यः ।

अथ षष्ठीमाह-

शुनं हुंवेम मघवानमिन्द्रंम् । अस्मिन्भरे नृतंमं वाजंसातौ । शृण्वन्तंमुग्रमूतयें समत्सु । घ्नन्तं वृत्राणिं संजितं धनांनाम्, इति ।

वाजसातावन्नप्रदेशेऽस्मिन्भरे भरणीये संग्राम इन्द्रं हुवेमाऽऽह्वयाम । कीदृशम । शुनं सुखरूपं मघवानं धनयुक्तं नृतमं पुरुषश्रेष्ठं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

शृण्वन्तमस्मदाह्वानस्य श्रोतारं समत्सु युद्धेषूतयेऽस्मद्रक्षार्थमुग्रं कोपयुक्तं वृत्राणिघ्नन्तं शत्रून्मारयन्तं धनानां संजितं सम्यक्संपादकम्। अयं मन्त्रो विजयार्थेन्द्रकर्मण्युपहोमार्थः ।

अथ सप्तमीमाह-

धूनुथ द्यां पर्वतान्दाशुषे वसु । नि वो वना जिहते यामनो भिया । कोपयथ पृथिवीं पृश्निमातरः । युधे यदुग्राः पृषतीरयुग्ध्वम्, इति ।

हे पृश्निमातरः पृश्नेरुत्पन्ना मरुतः । तथा च ब्राह्मणम्- "पृश्नियै वै पयसो मरुतो जाताः" इति । तादृशा यूयं यद्यदा युधे युद्धार्थमागताः सन्तः पृषतीर्भवदीया अश्वा अयुग्ध्वं रथे योजितवन्तस्तदानीमेव द्यां धूनुथ द्युलोकं कमयथ, तथा पर्वतान्धूनुथ। दाशुषे हविर्दत्तवते यजमानाय वसु धनं धूनुथ प्रयच्छथेत्यर्थः । वो युस्माकं यामनो गमनवेगाद्वनानि सर्वाणि भिया भीत्यैव निजिहते न्यग्भूतानि पतन्ति। तथा पृथिवीं कोपयथ भूमिं क्षोभयथ ।

अथाष्टमीमाह-

प्रवेपयन्ति पर्वतान् । विविञ्चन्ति वनस्पतीन् (३) प्रोऽवारात मरुतो दुर्मदा इव । देवासः । सर्वया विशा, इति ।

हे मरुतो भवन्तः पर्वतान्प्रवेपयन्ति कम्पयन्ति, तथा वनस्पतीन्विविञ्चन्ति विविधमुन्मीलयन्ति । प्रो प्रकर्षेणावारत धावत । कीदृशा भवन्तः, सर्वथा विशा प्रजया सह देवासो दीप्यमानाः । एते ऋचौ "पृश्नियै दुग्धे प्रैयंगवं चरुं निर्वपेत्" इत्येतस्मिन्कर्मणि याज्यानुवाक्ये द्रष्टव्ये ।

अथ नवमीमाह-

पुरुत्रा हि सदृङ्ङसि । विशो विश्वा अनु प्रभु । समत्सु त्वा हवामहे, इति ।

हेऽग्ने त्वं पुरुत्रा बहुषु स्थानेषु सदृङ्ङसि 'समानोऽसि । स्थित्वाऽप्यलिप्तोऽसीत्यर्थः । तथाऽऽहुः-"श्मशानेष्वपि तेजस्वी पावकोऽस्मिन्न लिप्यते" इति । विशे विश्वा अनु सर्वाः प्रजा अनुसृत्य प्रभु

Digitized by Madhuban Trust, Delhi

प्रकर्षेण दाहपाकादिनोपकारको भवसि । समत्सु युद्धेषु त्वां हवामह आह्वयामः ।

अथ दशमीमाह-

समत्स्वग्निमवसे । वाजयन्तो हवामहे । वाजेषु चित्रराधसम् , इति ।

वाजयन्तोऽन्नमिच्छन्तो वयं समत्सु युद्धेष्ववसेऽस्माकं रक्षणायाग्निं हवामह आह्वयामः । कीदृशम् । वाजेष्वन्नेषु विषयेषु चित्रराधसमाश्चर्यं यथा भवति तथा साधकम् । एतच्च मन्त्रद्वयं विजयार्थाग्नेये कर्मणि द्रष्टव्यम् ।

अथैकादशीमाह -

संगच्छध्व ँसंवदध्वम् । सं वो मनांसि जानताम् (४) । देवा भागं यथा पूर्वे । संजानाना उपासत, इति ।

समानैः सह विप्रिया हे पुरुषा यूयं संगच्छध्वं संगता भवत । संवदध्वं संवादं कुरुत । एको भोक्तुं कार्यमिव (?) वो युष्माकं मनांसि संजानता परस्परं संमतिं जानन्तु । यथा पूर्वे देवाः संजानानाः परस्परसंगतिं जानन्तो भागमुपासत स्वस्वभागमविघ्नेनानुभूतवन्तस्तद्वत् ।

अथ द्वादशीमाह-

समानो मन्त्रः समितिः, समानी । समानं मनः सह चित्तमेषाम् । समानं केतो अभि स ँरभध्वम् । संज्ञानेन वो हविषा यजामः, इति ।

मन्त्रो मन्त्रालोचनं कार्यविचारः समान एकरूपोऽस्तु । तथा समितिः समान्योन्यसंगमोऽप्येकरूपोऽस्तु । मनः समानमेकविषयमस्तु । एषां चित्तं सह तिष्ठतु । ऊहापोहस्थमन्तःकरणं मनः । वस्तुज्ञानावस्थितमन्तः-करणं चित्तम् । समानं केतोऽभि सहवासस्थानमभिलक्ष्य संरभध्वं प्रयतध्वम् । वो युष्माकं विप्रतिपन्नानां देवानां संज्ञानेन संप्रतिपत्तिनिमित्तेन हविषा यजामः ।

अथ त्रयोदशीमाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

समानी व आकूतिः । समाना हृदयानि वः । समानमस्तु वो मनः । यथा वः सुसहासति (५), इति ।

तो युष्माकमाकूतिः समानी संकल्प एकरूपोऽस्तु । वो युष्माकं हृदयानि कार्यनिश्चायकान्यन्तःकरणानि समानैकरूपाणि भवन्तु । वो युष्माकं मन ऊहापोहरूपं मननसामर्थ्यं च समानमेकरूपमस्तु । किं बहुना वो युष्माकं सर्वं कार्यं सुसहा (ह) सुखेन सहावस्थितं यथाऽसत्यतिशयेन प्रकारेण भवति तथाऽस्तु ।

अथ चतुर्दशीमाह–

संज्ञानं नः स्वैः । संज्ञानमरणैः । संज्ञानमश्विना युवम् । इहास्मासु नियच्छतम्, इति ।

नोऽस्माकं स्वैः स्वकीयैः पुरुषैः सह संज्ञानमैकमत्यमस्तु । अरणैर्गमनैर्व्यवहारविशेषैः संज्ञानमैकमत्यमस्तु । हेऽश्विनौ युवामिह लोकेऽस्मासु सर्वेष्वपि संज्ञानमैकमत्यं नियच्छतं नियतं कुरुतम् ।

अथ पञ्चदशीमाह–

संज्ञानं मे बृहस्पतिः । संज्ञान ँ सविता करत् । संज्ञानमश्विना युवम् । इह मह्यं नियच्छतम्, इति ।

बृहस्पतिर्देवो मे मदीयसंघस्य संज्ञानमैकमत्यं करोतु । सविता च संज्ञानमैकमत्यं करोतु । हेऽश्विनौ युवां मह्यं मदर्थमिह मदीये जने संज्ञानं नियच्छतम् । संगच्छध्वमित्यादयः । पञ्च मन्त्राः “यः समानैर्मिथो विप्रियः स्यात्तमेतया संज्ञान्या याजयेत्” इत्यस्मिन्कर्मणि द्रष्टव्याः ।

अथ षोडशीमाह–

उप च्छायामिव घृणेः । अगन्म शर्म ते वयम् (६), अग्ने हिरण्यसंदृश, इति ।

हेऽग्ने हिरण्यसदृशः सुवर्णवत्सम्यग्दृश्यमानस्य ते तव शर्म शरणं गृहमुपसमीपे वयमगन्म प्राप्ताः स्मः । दृष्टान्तो घृणेश्छायामिव यथा लोक आदित्यस्य रश्मेश्छायाभूतां शालां प्राप्नुवन्ति तद्वत् । अयं मन्त्र आग्नेयकर्मणि द्रष्टव्यः ।

अथ सप्तदशीमाह–

Digitized by Madhuban Trust, Delhi

अद॑ब्धेभिः सवितः पा॒युभि॒ष्ट्वम् । शि॒वेभि॑र॒द्य परि॑ पाहि नो॒ गय॑म् । हिर॑ण्यजिह्वः सुवि॒ताय॒ नव्य॑से । रक्षा॒ माकि॑र्नो अ॒घ ँ॑ स ईशत, इति ।

हे सवितस्त्वमदब्धेभिरहिंसकैः शिवेभिः शान्तैः पायुभिः पालनोपायैरद्यास्मिन्कर्मणि नो गयमस्मदीयं गृहं परिपाहि सर्वतः पालय । हिरण्यजिह्वःस्वर्णसदृशजिह्वायुक्तः सन्नव्यसेऽत्यन्तं नूतनाय सुविताय शोभनगमनाय सम्यगनुष्ठानाय विघ्नान्परिहर । अघश (शं) सो नोऽस्मदीयमघं शं शंसन्निन्दां कुर्वन्यो वैरी वर्तते स नोऽस्माकं माकिरीशत बाधितुं समर्थो मा भूत् । अयं मन्त्रः सावित्रे कर्मणि द्रष्टव्यः ।

अथाष्टादशीमाह-

मदे॑ मदे॒ हि नो॑ द॒दुः । यू॒था गवा॑मृजुक्रतुः॑ संगृ॑भाय पु॒रुश॒ता । उ॒भ॒या ह॒स्त्या वसु॑ । शि॒शी॒हि रा॒य आभ॑र (७), इति ।

ऋजुक्रतुरकुटिलकर्माऽयमिन्द्रो नोऽस्माकं मदे मदे तदा तदा हर्षनिमित्तं गवां यथा ददुर्गोसमूहान्प्रयच्छति । ह इन्द्रोभया हस्त्योभयोर्हस्तयोः पुरुशता बहूनि शतानि संगृभाय सम्यग्गृहीत्वा वसु धनं शिशीह्यस्मभ्यं प्रयच्छ । पुनरपि रायो धनान्याभर संपादय ।

अथैकोनविंशीमाह-

शिप्रि॑न्वाजानां पते । शची॑व॒स्तव॑ द॒ ँ॑सना॑ । आ तू न॑ इन्द्र भाजय । गोष्वश्वे॑षु शु॒भ्रिषु॑ । सह॒स्रे॑षु तुवीमघ, इति ।

शिप्रशब्दो हनुवाचकः । शोभनहनुयुक्तः शिप्री । वाजानां पतिरन्नपालकः । शचीवाञ्शक्तिमांस्तुवीमघो बहुलधनस्तादृश ह इन्द्र तव दशना त्वत्संबन्धिनि दंसनशब्दाभिधेयेऽस्मिन्कर्मण्यनुष्ठिते सति शुभ्रषु निर्मलेषु सहस्रेषु सहस्रसंख्याकेषु गोष्वश्वेषु च नोऽस्माना तु भाजय समन्तात्सदा भागिनः कुरु । एतच्च मन्त्रद्वयमैन्द्रे कर्मणि द्रष्टव्यम् ।

अथ विंशीमाह-

यद्दे॑वा दे॒व हेड॑नम् । देवा॑सश्चकृ॒मा व॒यम् । आदि॑त्या॒स्तस्मा॑न्मा यू॒यम् । ऋ॒तस्य॒र्ते॑न मुञ्चत, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

हे देवासो दीप्यमाना आदित्या देवा देवहेलनं देवावज्ञारूपं पापं यदवयं चकृम यूयमादित्या ऋतस्य यज्ञस्यर्तेन सत्येन शास्त्रीयेणास्मदनुष्ठानेन मां तस्मात्पापान्मुञ्चत मुक्तं कुरुत ।

अथैकविंशीमाह-

ऋतस्यर्तेनाऽऽदित्याः (८) । यजत्रा मुञ्चतेह मा । यज्ञैर्वो यज्ञ वाहसः । आशिक्षन्तो न शेकिम, इति ।

हे आदित्या यजत्रा यष्टव्या यूयमिहास्मिँल्लोके ऋतस्यर्तेन सम्यगनुष्ठानेन मां पापादस्मान्मुञ्चत । हे यज्ञवाहसो यज्ञनिर्वाहका देवा वो युष्मत्संबन्धिभिर्यज्ञैः शेकिम पापं नाशयितुं शक्ता भवेम । तत्र दृष्टान्तः- आशिक्षन्तो न यथा यज्ञसंबन्धिनीं सर्वतः शिक्षां कुर्वन्त आचार्याः शक्तास्तद्वत् ।

अथ द्वाविंशीमाह-

मेदस्वता यजमानाः । स्रुचाऽऽज्यैन जुह्वतः । अकामा वो विश्वे देवाः । शिक्षन्तो नोपशेकिम, इति ।

हे विश्वे देवा मेदस्वता सारयुक्तेनाऽऽज्येन पूर्णया स्रुचा जुह्वतो होमं कुर्वन्तोऽकामाः फलकामनारहिता यजमाना वयं वो युष्माकं प्रसादादुपशेकिम पापं नाशयितुं सर्वथा शक्ताः स्मः । शिक्षन्तो नेति दृष्टान्तः पूर्ववत् ।

अथ त्रयोविंशीमाह-

यदि दिवा यदि नक्तम् । एन एनस्योऽकरत् । भूतं मा तस्माद्भव्यं च । द्रुपदादिव मुञ्चतु , इति ।

एन इच्छतीत्येनस्यः पूर्वं पापप्रवृत्तोऽहं रात्रौ दिवसे वैनोऽकरत्पापं कृतवानस्मि । कीदृशमेनः । भूतं भव्यं च । किंचिदेनः पूर्वमेव निष्पन्नमन्यत्तु कर्तुमुद्युक्तम् । तस्मात्सर्वस्मात्पापान्मामादित्यो मुञ्चतु । तत्र दृष्टान्तः-द्रुपदादिवापराधिनां पादे प्रतिमोचितं काष्ठं द्रुपदं यथा कृपालुः स्वाम्यस्माद्बन्धनादपराधिनं मोचयति तद्वत् ।

अथ चतुर्विंशीमाह -

Digitized by Madhuban Trust, Delhi

द्रुपदादिवेन्मुमुचानः । स्विन्नः स्नात्वी मलादिव । पूतं पवित्रेणेवाऽऽज्यम् । विश्वे मुञ्चन्तु मैनसः, इति ।

विश्वे सर्वे देवा मामेनसः पापान्मुञ्चन्तु मुक्तं कुर्वन्तु । तत्र दृष्टान्तत्रयम्- द्रुपदात्पादबन्धनरूपात्काष्ठान्मुमुचान इवेद्यथा तथेत्यर्थः । स्विन्नः स्वेदव्याप्तगात्रः स्नात्वी स्नानं कृत्वा यथा मलान्मुच्यते तद्वत् । पवित्रेणोत्पवनसाधनेनाऽऽज्यं यथा पूतं तद्वत् ।

अथ पञ्चविंशीमाह-

उद्वयं तमसस्परि । पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यम् । अगन्म ज्योतिरुत्तमम् (९), इति ।

तवं कृधि वनस्पतीञ्जानतामसति वयं मराऽऽदित्याश्च नव च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्र ह्मणे द्वितीयाष्टके
चतुर्थाध्याये चतुर्थोऽनुवाकः ।। ४ ।।

तमसस्परि तमसोऽन्धकारात्पर्यूर्ध्वमुत्तरमुत्कृष्टं ज्योतिरुपत्पश्यन्त उत्कर्षेण पश्यन्तो वयं देवत्रा देवेषु देवं द्योतमानं सूर्यरूपमुत्तमं ज्योतिरगन्म प्राप्ताः स्मः । "यद्देवा देवहेडनम्" इत्येताः षडृच पापक्षयार्थे कर्मणि द्रष्टव्याः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
चतुर्थप्रपाठके चतुर्थोऽनुवाकः ।। ४ ।।

अथ चतुर्थप्रपाठके पञ्चमोऽनुवाकः ।

अथ पञ्चमानुवाके प्रथमामृचमाह-

वृषा सो अꣳशुः पवते हविष्मान्त्सोमः । इन्द्रस्य भाग ऋतयुः शतायुः । समा वृषाणां वृषभं कृणोतु । प्रियं विशा सर्ववीरꣳ सुवीरम् । इति ।

सोमो वल्ल्यात्मकः पवते शुद्धो भवति । कीदृशः सोमः । वृषा कामानां वर्षयिता स प्रसिद्धोऽंशुर्बहुभिरंशुभिर्युक्तो हविष्मान्हविषो निष्पादक इन्द्रस्य भागो भक्षणीय ऋतयुर्यज्ञहेतुः शतायुः शतसंवत्सरस्याऽऽयुषः प्रदाता तादृशः सोमो मां यजमानं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

वक्ष्यमाणविशेषणोपेतं कृणोतु । कैर्विषणैरुपेतम् वृषाणं सेचकं वृषभं श्रेष्ठं विशां प्रजानां प्रियं प्रीतिहेतुं सर्ववीरं सर्वेषां मध्ये वीर्योपेतं सुवीरं शोभनैर्वीरैः पुत्रैर्युक्तम् ।

अथ द्वितीयामाह-

कस्य वृषा सुते सचा । नियुत्वान्वृषभो रणत् । वृत्रहा सोमपीतये, इति ।

कस्योदकस्य वृषा वर्षिता सुतेऽभिषुते सोमे सचा समवेतो नियुत्वान्नियुद्भिरश्वविशेषैर्युक्तो वृषभः श्रेष्ठो वृत्रहा वैरिघातक इन्द्रः सोमपीतये सोमपानाय रणद्रमते ।

अथ तृतीयामाह-

यस्ते शृङ्गवृषो नपात् । प्रणपात्कुण्डपाय्यः । न्यस्मिन्दध्र आ मनः (१), इति ।

शृङ्गादिशब्दैस्त्रिभिः सोमः संबोध्यते । अथवेन्द्रस्य संबोधनानि । शृङ्गवच्छ्रेष्ठकामाभिवर्षको ऽस्माकमविनाशहेतुरीदृशं इन्द्रो योऽयं कुण्डपाय्य एतन्नामकः सोमयागविशेषः प्रणपात्प्रकर्षेण न पातयिता तृप्तिहेतुरित्यर्थः । अस्मिन्क्रतौ ते मनो नितरामासमन्ताद्दद्ध्रे धृतवान् ।

अथ चतुर्थीमाह-

तँ सध्रीचीरूतयो वृष्णियानि । पौँस्यानि नियुतः सश्चुरिन्द्रम् । समुद्रं न सिन्धव उक्थशुष्माः । उरुव्यचसं गिर आविशन्ति, इति ।

सध्रीचीः सह प्रवर्तमाना ऊतयो रक्षाहेतवः कर्मविशेषाः पौंस्यानि पुंसंबन्धीनि वृष्णियानि सेचनानि कामवर्षणानि वा नियुतोऽश्वाश्च तमिन्द्रं सश्चुःसंबध्नन्ति । तत्र दृष्टान्तः- समुद्रं न सिन्धवो यथा समुद्रं नद्यः शस्त्रैः शुष्माः प्रबला गिरोऽस्मदीयाः स्तुतिरूपा वाच उरुव्यचसमत्यन्ततृप्तियुक्तमिन्द्रमाविशन्ति ।

अथ पञ्चमीमाह-

इन्द्राय गिरो अनिशितसर्गाः । अपः प्रैरयन्त्सगरस्य

Digitized by Madhuban Trust, Delhi

बुध्नात्। यो अक्षेणेव चक्रिया शचीभिः। विष्वक्तस्तम्भ पृथिवीमुत द्याम्, इति।

य इन्द्रः शचीभिः शक्तिभिः पृथिवीं विष्वक्तस्तम्भ सर्वतः स्तम्भितवान्। उतापि च द्यां द्युलोकमपि विष्वक्तस्तम्भ। तत्र दृष्टान्तः-अक्षेणेव चक्रिया यथा रथस्याक्षेण चक्रिया चक्रद्वयं स्तम्भितं तद्वत्। तादृशायेन्द्रायास्माभिः प्रयुज्यमानाः स्तुतिरूपा गिरोऽनिशितसर्गा अतीक्ष्णस्वभावा अपः सगरस्य समुद्रसमानस्य मेघस्य बुध्नान्मूलात्प्रेरयन्। अस्मदीयाभिः स्तुतिभिः स्तूयमान इन्द्रो वृष्टिं प्रयच्छतीत्यर्थः। "आपो वै शान्ताः" इति श्रुतेरनुभवा च्चापामतीक्ष्णस्वभावत्वम्।

अथ षष्ठीमाह-

अक्षोदयच्छवसा क्षाम बुध्नम्। वार्णवातस्तविषीभिरिन्द्रः (२)। दृढान्यौघ्नदुशमान ओजः। अवाभिनत्ककुभः पर्वतानाम्, इति।

अयमिन्द्रः शवसा स्वकीयेन बलेन क्षामं क्षीणं बुध्नं मेघमूलमक्षोदयदुदकपूरणं कृत्वा प्रेरितवान्। तत्र दृष्टान्तः-वार्णवातो वार्णवायुर्जलं यथा प्रेरयति तद्वत्। ओजो बलमुशमानः कामयमानो दृढानि मेघमूलान्यौघ्नाद्धतवान्वज्रेण भिन्नवान्। पर्वतानां ककुभः शिखराणि महावृष्ट्या वज्रेण वाऽभिनद्भिन्नान्यकरोत्। वृषा स इत्यादयः षण्मन्त्रा ऐन्द्रे सौमिके कर्मणि द्रष्टव्याः। "तं सध्रीचीः" इत्यस्य तु सौत्रामण्यामैन्द्रे पशावप्यस्ति विनियोगः। अत एव तत्र प्रतीकमाम्नातम्-"तँ सध्रीचीः" इति।

अथ सप्तमीमाह-

आ नो अग्ने सुकेतुना। रयिं विश्वायुपोषसम्। मार्डीकं धेहि जीवसे, इति।

हेऽग्ने सुकेतुना शोभनेन ज्ञानेन युक्तस्त्वं विश्वायुपोषसं विश्वस्याऽऽयुषः पोषणे क्षमं रयिं धनं मार्डीकमतिशयेन सुखसाधनभूतं जीवसेऽस्माकं जीवनायाऽऽधेहि सर्वतः संपादय।

अथाष्टमीमाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

त्व ँसोम म॒हे भ॒र्गम् । त्वं यूने ऋताय॒ते । दक्षं दधासि जी॒वसे, इति ।

हे सोम त्वं महे महते वृद्धाय भगं सौभाग्यं दधासि संपादयसि । तथा त्वमृतायते यज्ञमिच्छते यूने यौवनोपेताय यजमानाय जीवसे जीवनार्थं दक्षं समर्थं धनं दधासि संपादयसि । एते उभे ऋचौ चातुर्मास्य (स्या) न्तर्गतमहापितृयज्ञ आज्यभागयोः पुरोनुवाक्ये । तथा च सूत्रकार आह-"जीवदन्तावाज्यभागौ यजत्या नो अग्ने सुकेतुना" इति ।

अथ नवमीमाह-

रथं युञ्जते मरुतः शु॒भे सु॒गम् । सू॒रो न मित्रावरुणा॒ गवि॑ष्टिषु (३) । रजा ँसि चि॒त्रा विच॑रन्ति त॒न्यवः । दि॒वः सम्राजा॒ पय॑सा न उक्षतम्, इति ।

मरुतो देवाः शुभे कर्मणि सुगं शोभनं गमनसाधनं रथं युञ्जतेऽश्वैर्योजयन्ति । तत्र दृष्टान्तः- सूरो न यथा सूर्यो रथं युनक्ति तद्वत् । हे मित्रावरुणौ गविष्टिषु भूमाविष्यमाणाः क्षेत्रादिसंपत्तयो गविष्टयस्तासु निमित्तभूतासु चित्रा विचित्राणि रजांसि रञ्जनीयानि जलानि वितन्यवो विस्तारयन्तो मरुतो विविधं चरन्ति । तद्व्द्युवामपि दिवः सकाशात्सम्राजा पयसा सम्यग्राजमानेन क्षेत्रोपकारिणा जलेन नोऽस्मानुक्षतं सिञ्चतम् ।

अथ दशमीमाह-

वाच॒ ँसुमित्रावरुणा॒विरा॑वतीम् । प॒र्जन्य॑श्चि॒त्रां व॑दति॒ त्विषी॑मतीम् । अ॒भ्रा व॑सत मरुतः सु मा॒यया॑ । द्यां व॑र्षयतमरु॒णाम॑रे॒पस॑म्, इति ।

हे मित्रावरुणावयं पर्जन्य इरावतीमन्नसाधनभूता चित्रां बहुविधां त्विषीमतीं त्विड्भिर्विद्युद्भिर्युक्तां । वाचं गर्जनध्वनिरूपां वदति करोतीत्यर्थः । अरुणा विद्युद्भिर्युक्तत्वेनारुणवर्णामरेपसं रेपसा वृष्टिप्रतिबन्धकेन पापादिना रहितां द्यां मेघयुक्तां दिवं वर्षयतम्, हे मित्रावरुणौ युवां वृष्टियुक्तां कुरुतम् । हे मरुतो यूयमपि मायया धूमज्योतिरादिभिर्मेघनिष्पादिकया भवदीयया मायाशक्त्याऽभ्रा विचित्राण्यभ्राणि सुवसत सुष्ठु वासयत संपादयते व्यर्थः । एतच्च मन्त्रद्वयं वृष्टिहेतौ मैत्रावरुणकर्मणि विनियोक्तव्यम् ।

Digitized by Madhuban Trust, Delhi

अथैकादशीमाह-

अयुक्त सप्त शुन्ध्युवः । सूरो रथस्य नप्त्रियः । ताभिर्याति स्वयुक्तिभिः, इति ।

सूरः सूर्यो रथस्य स्वकीयस्य नप्त्रियोऽ पातनहेतून्रथमविनाशयितॄञ्शुन्ध्युवः शुद्धान्सप्तसंख्याकानयुक्त रथे योजितवान् । स्वयुक्तिभिः स्वेन योजिताभिः सह याति प्रतिदिनं गच्छति ।

अथ द्वादशीमाह-

वहिष्ठेभिर्विहरन्यासि तन्तुम् (४) । अवव्ययन्नसितं देव वस्वः । दविध्वतो रश्मयः सूर्यस्य । चर्मेवावाधुस्तमो अप्स्वन्तः, इति ।

हे देव सूर्य वहिष्ठेभिरतिशयेन वहनक्षमैरश्वैर्विहरंस्तत्र तत्र क्रीडंस्तन्तुं रश्मिविस्तारं यासि प्राप्नोषि । किं कुर्वन्नसितमन्धकारमवव्ययन्विनाशयन् । वस्वां वासयितारमाच्छादकमन्धकारं दविध्वतो दोधूयमाना विनाशनसमर्थाः सूर्यस्य रश्मयोऽप्स्वन्तरन्तरिक्षमध्ये तमोऽन्धकारमबाधुर्विनाशितवन्तः । अप्शब्दोऽप्यन्तरिक्षनामसु पठितः । तमोविनाशने दृष्टान्तः-चर्मेव यथा दृष्टेरावरकं पटलरूपं चर्मापनयति तद्वत् । एतच्चोभयं सौर्ये कर्मणि द्रष्टव्यम् ।

अथ त्रयोदशीमाह-

पर्जन्याय प्रगायत । दिवस्पुत्राय मीढुषे । स नो यवसमिच्छतु, इति ।

हे ऋत्विजः पर्जन्याय पर्जन्यदेवार्थं प्रगायत प्रकर्षेण गानं कुरुत । कीदृशाय । दिवस्पुत्राय स्वर्गलोकस्य पुत्रस्थानीयाय मीढुषे सेचनसमर्थाय । स च पर्जन्यो नोऽस्मदर्थं यचसं तृणसस्यादिकमिच्छतु दृष्टिद्वारेण संपादयत्वित्यर्थः ।

अथ चतुर्दशीमाह-

अच्छा वद तवसं गीर्भिराभिः । स्तुहि पर्जन्यं नमसा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

विवास । कनिक्रदद्वृषभो जीरदानुः । रेतो दधात्वोषधीषु गर्भम् (५), इति ।

हे पर्जन्यदेव तवसमच्छाऽस्मद्धितं बलमभिलक्ष्य वद गर्जनरूपं शब्दं कुरु। येन गर्जनेन वृष्टिद्वाराऽस्माकं बलं संपद्यते तथा गर्जनं कुरु । हे ऋत्विक्समूहऽऽभिर्गीर्भिर्वैदिकीभिः स्तुतिभिः पर्जन्यदेवं स्तुहि । नमसा विवास सर्वो जनो नमस्कारेण परिचर्यां चकार । कनिक्रदत्पुनः पुनर्गर्जन्वृषभो वर्षणक्षमो जीरदानुरस्मज्जीवनहेतुरयं पर्जन्य ओषधीषु गर्भं रेतो गर्भकारणबीजं दधातु स्थापयु ।

अथ पञ्चदशीमाह-

यो गर्भमोषधीनाम् । गवां कृणोत्यर्वताम्, पर्जन्यः पुरुषीणाम्, इति ।

यः पर्जन्य ओषधीनां गवामर्वतामश्वानां पुरुषीणां मनुष्यस्त्रीणां च गर्भं कृणोति करोति स पर्जन्योऽभीष्टं साधयत्विति शेषः ।

अथ षोडशीमाह-

तस्मा इदास्यै हविः । जुहोता मधुत्तमम् । इडां नः संयतं करत्, इति ।

यः पर्जन्यदेवो गर्भप्रदस्तस्मा इत्तस्यैव पर्जन्यस्य देवस्याऽस्ये सुखे हे ऋत्विजो हविर्जुहोत । कीदृशं हविः। मधुरम् । स च पर्जन्योऽस्माकं संयतं सम्यङ्नियतमिडामन्नं करत्करोतु । पर्जन्यायेत्यादिमन्त्रचतुष्टयं पर्जन्यदेवताके कर्मणि द्रष्टव्यम् । अत एव सूत्रकारश्चा- तुर्मास्येष्वन्वारम्भणीयेष्टौ पर्जन्यचरुं विधाय तत्र पर्जन्यायेति मन्त्रद्वयं विनियुक्तवान् ।

अथ सप्तदशीमाह-

तिस्रो यदग्ने शरदस्त्वामित् । शुचिं घृतेन शुचयः सपर्यन् नामानि चिद्दधिरे यज्ञियानि । असूदयन्त तनुवः सुजाताः (६), इति ।

हेऽग्ने यद्यस्मात्कारणात्तिस्रः शरदस्त्रीन्संवत्सराञ्शुचयः शुद्धामरुतः शुचिं त्वामिच्छद्धात्मानं त्वामेव घृतेन सपर्वन्परि(र्य)वरन् ।

Digitized by Madhuban Trust, Delhi

तस्मात्कारणाद्यज्ञियानि यज्ञयोग्यानि नामानि चिद्दधिरे नामान्यपि धृतवन्तः । तानि च मरुतां नामान्यन्यत्राऽऽम्नातानि "ईजङ् चान्यादृङ् च" इत्यादीनि । ते च मरुतः सुजातास्तनुवः सुष्ठु समुत्पन्नाः स्वकीयास्तनूरसूदयन्तान्तरिक्षे प्रेरितवन्तः । अयं मन्त्र आग्नेयकर्मणि द्रष्टव्यः ।

अथाष्टादशीमाह-

इन्द्रश्च नः शुनासीरौ । इमं यज्ञं मिमिक्षतम् । गर्भं धत्तं स्वस्तयै, इति ।

शुनो वायुः सीर आदित्यः । हे शुनासीरौ नोऽस्मदीयमिमं यज्ञं मिमिक्षतं घृतादिद्रव्येण सेक्तुमिच्छतम् । भवत्स्वामी योऽयमिन्द्रः सोऽपि सक्तुमिच्छतु । तथा शुनासीरौ युवां स्वस्तये क्षेमाय गर्भं धत्तं संपादयतम् ।

अथैकोनविंशीमाह-

ययोरिदं विश्वं भुवनमाविवेश । ययोरानन्दो निहितो महश्च । शुनासीरावृतुभिः । संविदानौ । इन्द्रवन्तौ हविरिदं जुषेथाम्, इति ।

ययोः शुनासीरयोरिदं विश्वं भुवनमाविवेश प्रविष्टमाश्रितमित्यर्थः । तथा ययोः शुनासीरयोरानन्दो निहितोऽवस्थितो महश्च तेजोऽप्याश्रितम् । तौ शुनासीरावृतुभिर्वसन्तादिदेवैः सह संविदानावैकमत्यं गताविन्द्रवन्ताविन्द्रेण युक्तौ युवामिदं हविर्जुषेथाम् । एतच्चोभयं शुनासीर्ये कर्मणि द्रष्टव्यम् ।

अथ विंशीमाह-

आ घा ये अग्निमिन्धते । स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा, इति ।

ये यजमाना ऋत्विज आ समन्तादग्निमिन्धते प्रज्वलयन्ति । घशब्दः पादपूरणार्थः प्रसिद्ध्यर्थो वा । प्रसिद्धा ऋत्विज इत्यर्थः । तथाऽऽनुषगनुषक्तं बर्हिर्ये स्तृणन्ति । तथा येषां यजमानादीनां युवा नित्यतरुण इन्द्रः सखा सखिवत्सुलभो भवति । ते यजमानादयः कर्मानुतिष्ठन्त्विति शेषः । अनेन मन्त्रेण सुत्यादिने महारात्रे बुद्ध्वा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

सदोऽभिमृशेत् । तथा च सूत्रकारेणोक्तम्-"आ घा ये अग्निमिन्धत इति सदः" इति ।

अथैकविंशीमाह-

अग्न इन्द्रश्च मेदिना । हथो वृत्राण्य प्रति । युव ँहि वृत्रहन्तमा, इति ।

हेऽग्ने त्वं चेन्द्रश्च मेदिना मेदस्वन्तौ बलवन्तौ वृत्राणि शत्रून्प्रति प्रतिकूलत्वं यथा (न) भवति तथा हथो मारयथः । हि यस्मात्कारणाद्युवं युवामुभौ वृत्रहन्तमऽतिशयेन शत्रुघातिनौ ।

अथ द्वाविंशीमाह-

याभ्या ँसुवरजयन्नग्र एव । यावातस्थतुर्भुवनस्य मध्ये । प्रचर्षणी वृषणा वज्रबाहू । अग्नी इन्द्रा वृत्रहणा हुवे वाम् (७), इति ।

मन इन्द्रो गविष्टिषु तन्तुं गर्भ ँ सुजाताः सखा सप्त च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

चतुर्थाध्याये पञ्चमोऽनुवाकः ।। ४ ।।

याभ्यामिन्द्राग्निभ्यामग्र एवेतः पूर्वमेवानुगृहीता यजमानाः सुवरजयन्स्वर्गं जितवन्तः । यौ चेन्द्राग्नी भुवनस्य मध्ये सर्वत्राऽऽतस्थतुः आगत्य स्थितौ । ताविन्द्राग्नी वां युवां हुवेऽस्मिन्कर्मण्याह्वयामि । कीदृशौ । प्रचर्षणी प्रकृष्टैश्चर्षणीभिर्मनुष्यैर्यागकर्तृभिर्युक्तौ वृषणा कामानां वर्षयितारौ वज्रबाहू हस्ते वज्रं धारयन्तौ वृत्रहणा वैरिघातिनौ । एतच्चोभयमैन्द्राग्ने कर्मणि द्रष्टव्यम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

चतुर्थप्रपाठके पञ्चमोऽनुवाकः ।। ५ ।।

अथ चतुर्थप्रपाठके षष्ठोऽनुवाकः ।

षष्ठेऽनुवाके प्रथमामृचमाह-

उत नः प्रिया प्रियासु । सप्तस्वसा सुजुष्टा । सरस्वती स्तोम्याऽभूत्, इति ।

Digitized by Madhuban Trust, Delhi

इयं सरस्वती स्तोम्या स्तोत्रयोग्याऽभूत्। कीदृशी। प्रियासु देवतासु मध्येऽत्यन्तं प्रियोतापि च नोऽस्माकं विशेषतः प्रिया, सप्तसंख्याका ब्राह्मीमाहेश्वरीत्याद्या देवताः स्वसारो भगिन्यो यस्याः सा सप्तस्वसा सुजुष्टा सुष्ठु सेविता।

अथ द्वितीयामाह-

इमा जुह्वाना युष्मदा नमोभिः। प्रति स्तोमं सरस्वति जुषस्व। तव शर्मन्प्रियतमे दधानाः उपस्थेयाम शरणं न वृक्षम्, इति।

हे सरस्वति युष्मद्युष्मांस्त्वामित्यर्थः। इमे यजमाना नमोभिर्नमस्कारैः सहाऽऽजुह्वानाः सर्वतो होममाह्वानं वा कुर्वन्तो वर्तन्ते। स्तोमं त्वदीयं स्तोत्रं प्रति प्रातिस्विकमसाधारणं जुषस्व सेवस्व। तव प्रियतमेऽतिप्रिये वृक्षवदुपकारके शर्मञ्शरणे गृहे दधाना हविर्धारयन्तो वयमुपस्थेयामोपस्थानं करवाम। एतदुभयं सारस्वते कर्मणि द्रष्टव्यम्। तथा "सारस्वतीं मेषीमालभेद" इत्यस्य पशोः सूत्रे प्रतीकमाम्नातम् -"इमा जुह्वाना यस्ते स्तनः" इति।

अथ तृतीयामाह-

त्रीणि पदा विचक्रमे। विष्णुर्गोपा अदाभ्यः। ततो धर्माणि धारयन् (१), इति।

गोपाः सर्वस्य जगतो रक्षकोऽदाभ्यः केनाप्यतिरस्कार्यो विष्णुः कृत्स्नेऽपि जगति त्रीणि पदा विचक्रमे पदत्रयं निदधौ। किं कुर्वंस्ततस्तस्मात्पदत्रयाद्धर्माणि धारयितव्यानि सर्वाणि वस्तूनि धारयन्।

अथ चतुर्थीमाह-

तदस्य प्रियमभि पाथो अश्याम्। नरो यत्र देवयवो मदन्ति। उरुक्रमस्य स हि बन्धुरित्था। विष्णोः पदे परमे मध्व उत्सः, इति।

देवयवो देवानिच्छन्तो नरो यजमाना यत्र भागीरथीजले मदन्ति हृष्यन्ति। अस्य विष्णोः प्रियं तत्पाथो भागीरथीजलमभ्यश्यामाभितो व्याप्तवान्। उरुक्रमस्य विस्तीर्णपादस्य विष्णोः परमे पदे तृतीये पादे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

बन्धुः संबद्धो मध्वो मधुर उत्सो भागीरथीप्रवाह इत्या हि एवंविधः । हि शब्दः सर्वलोकप्रसिद्धिद्योतनार्थः ।

अथ पञ्चमीमाह-

क्रत्वा दा अस्तु श्रेष्ठः । अद्य त्वा वन्वन्त्सुरेक्णाः । मर्त आनाश सुवृक्तिम्, इति ।

क्रत्वा क्रतौ कर्मणि दा हविषो दाता श्रेष्ठः सर्वेषां मध्ये प्रशस्तोऽस्तु भवतु । हेऽग्नेऽद्यास्मिन्कर्मणि त्वां वन्वन्याचमानः सुरेवणाः शोभनधनो मर्तो मनुष्यः सुवृक्तिं सुष्ठु दारिद्र्यवर्जनमानाशाऽऽनशे व्याप्नोति । अयं मन्त्र आग्नेये कर्मणि द्रष्टव्यः ।

अथ षष्ठीमाह-

इमा ब्रह्म ब्रह्मवाह । प्रिया त आ बर्हिः सीद । वीहि सूर पुरोडाशम् (२), इति ।

ब्रह्माणि वेदान्वहतीति ब्रह्मवादो वेदैरविनाभूतः सूर्यः । अत एवान्यत्राऽऽम्नातम्-"वेदैरशून्यस्त्रिभिरेवि सूर्यः" इति । तादृश सूर हे सूर्येमाब्रह्मेमानि ब्रह्माणि वेदवाक्यानि कर्मण्यस्मिन्नुच्चार्यमाणानि ते प्रिया तव प्रियाणि । अतस्त्वं बर्हिरासीद यज्ञमागच्छ पुरोडाशं वीहि भक्षय । अयं मन्त्रः सौर्ये कर्मणि द्रष्टव्यः ।

अथ सप्तमीमाह-

उप नः सूनवो गिरः । शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः, इति ।

अमृतस्य सूनवः क्षीरस्य पुत्रा ये मरुतः सन्ति । तथा च ब्राह्मणमाम्नातम्-"पृश्नियै वै पयसो मरुतो माता" इति । हे मरुतो नोऽस्मदीया गिरः स्तुतिरूपा वाच उपशृण्वन्तु । ततो नोऽस्माकं सुमृडीकाः सुखहेतवो भवन्तु । अयं मन्त्रो मारुते कर्मणि द्रष्टव्यः ।

अथाष्टमीमाह-

अद्या नो देव सवितः । प्रजावत्सावीः सौभगम् । परा दुष्वप्निँ सुव, इति ।

हे सवितर्देवाद्यस्मिन्कर्मणि नोऽस्माकं प्रजावत्पुत्रपौत्राद्युपेतं सौभगं

Digitized by Madhuban Trust, Delhi

सौभाग्यं सावीरनुजानीहि । दुष्ष्वप्रियं दुःस्वप्ननिमित्तं दोषं परासुव विनाशय ।

अथ नवमीमाह-

विश्वानि देव सवितः । दुरितानि परासुव । यद्भद्रं तन्म आसुव, इति ।

हे सवितर्देव विश्वानि दुरितानि परासुव विनाशय। यद्भद्रं कल्याणमस्ति तन्मे ममाऽऽसुव सर्वतोऽनुजानीहि । एतदुभयं सावित्रे कर्मणि द्रष्टव्यम् ।

अथ दशमीमाह-

शुचिमर्कैर्बृहस्पतिम् (३), अध्वरेषु नमस्यत । अनाम्योज आचके, इति ।

हे ऋत्विजः शुचिं शुद्धं बृहस्पतिमध्वरेषु यागेष्वर्कैरर्चनैः सह नमस्यत नमस्कुरुत । तस्य बृहस्पतेः प्रसादादहमनामि कस्याप्यवशमोजो बलमाचके सर्वतः प्राप्नवानि । अयं मन्त्रो बार्हस्पत्ये कर्मणि द्रष्टव्यः ।

अथैकादशीमाह-

याऽधारयन्त देवा सुदक्षा दक्षपितारा । असुर्याय प्रमहता, इति ।

देवाः सर्वेऽपीन्द्रादयो देवाः सुदसा सुष्ठु दक्षौ कुशहौ दक्षपितारा दक्षस्य कर्मणः पालकौ यौ मित्रावरुणौ प्रमहसा प्रकृष्टेन तेजसाऽसुर्यायासुर संबन्धिने विनाशाय (या)धारयन्त चित्ते वृतवृन्तो मित्रावरुणावेवासुरान्विनाशयत इत्येवं निश्चितवन्तः । अयं मन्त्रो मैत्रावरुणशस्त्रेऽन्तर्भावनीयः ।

अथ द्वादशीमाह-

स इत्क्षेति सुधित ओकसि स्वे । तस्मा इडा पिन्वते विश्वदानीं । तस्मै विशः स्वयमेवाऽऽनमन्ति । यस्मिन्ब्रह्मा राजनि पूर्व एति, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

यस्मिनराजनीन्द्रे ब्रह्मा बृहस्पतिः पूर्व एति पुरतो गच्छति स इत्स एवेन्द्रो राजा स्वे स्वकीय ओकसि स्थ ने सुधितः सुखं प्राप्तः सन्क्षेति सीदति । तस्मै राज्ञ इडा धेनुर्विश्वदानी सर्वदा पिन्वते प्रीतिं जनयति । तस्मै राज्ञे विशः प्रजाः स्वयमेवाऽऽनमन्ति वशी भवन्ति । अत्र राजशब्देनेन्द्रो मनुष्यो वा विवक्षितव्यः । अयं मन्त्रो बार्हस्पत्ये कर्मणि द्रष्टव्यः ।

अथ त्रयोदशीमाह –

सकूतिमिन्द्र सच्युतिम् । सच्युतिं जघनच्युतिम् (४) ।
कनात्काभां न आभर । प्रयप्स्यन्निव सक्थ्यौ, इति ।

हे इन्द्र कनात्काभां कनकवद्भासमानां रूपवतीं कन्यां नोऽस्मदर्थमाभराऽऽनय । कीदृशीम् । सकूतिं कूतिराकूतिः संकल्पस्तेन सहितामस्मास्वनुरक्तामित्यर्थः । सच्युतिं च्युतिः क्षरणं वीर्यस्यन्दनं तेन सहिताम् । अनुरागातिशयेन हि सहसा वीर्यं स्यन्दति । एतदेव पुनः सच्युतिमित्यनूद्य जघनच्युतिमित्यनेन व्याख्यायते । आहरणे दृष्टान्तः – सक्थ्यौ प्रयप्स्यन्निव यथाऽत्यन्तं कामुक ऊरुद्वयं प्रति यब्धुमुद्युक्तोऽत्यन्तादरेण स्त्रियमाहरति तद्वत् ।

अथ चतुर्दशीमाह –

वि न इन्द्र मृधो जहि । कनीखुनदिव सापयन् । अभि नः
सुष्टुतिं नय, इति ।

हे इन्द्र मृधोऽस्मद्विवाहप्रतिबन्धकान्शत्रून्विजहि विविधं मारय । कनीखुनदिव सापयन्यथा पूर्वभूमौ निक्षिप्तं द्रव्यमतिशयेन खनित्वा स पुरुषः स्वपुत्रं प्रत्यानीय संयोजयति तद्वत्त्वमपि कन्यारत्नमस्मासु संयोजयन्नोऽस्मदीयां सुष्टुतिं शोभनां कीर्तिमभि सर्वतो नय प्रापय। एतच्च मन्त्रद्वयं कन्यालभार्थे विनियोज्यम् ।

अथ पञ्चदशीमाह –

प्रजापतिः स्त्रिया यशः । मुष्कयोरदधान्सपम् । कामस्य
तृप्तिमानन्दम् । तस्याग्ने भाजयेह मा, इति ।

योऽयं प्रजपातिर्जगतः स्रष्टा स्त्रियां यशो भार्यायां गर्भरूपेण यशसः कारणं यद्वीर्यं तन्मुष्कयोरण्डयोः सर्पसंबन्धमदधात्स्थापितवान । तस्यैव

Digitized by Madhuban Trust, Delhi

स्थापितस्य विशेषणानि कामस्य तृप्तिं तृप्तिकारणम्। तस्मिन्गलिते सति योषिन्मे भूयादिति कामो निवर्तते तन्निवृत्तिरेव तृप्तिः । अत एवाऽऽनन्दं सुखकारणम् । हेऽग्न इह विवाहे कर्मणि मां तस्य वीर्यस्य सुखं भाजय प्रापय ।

अथ षोडशीमाह–

मोदः प्रमोद आनन्दः (५), मुष्कयोर्निहितः सपः । सृत्वेव कामस्य तृप्याणि । दक्षिणानां प्रतिग्रहे, इति ।

मोदादयस्त्रयस्तारतम्येनावस्थिताः सुखावान्तरविशेषाः । वार्ताजन्यः सुखविशेषो मोदः । दर्शनजन्यः प्रमोदः । भोगजन्य आनन्दः । तेषां सर्वेषां सपः समवायहेतुर्मुष्कयोर्निहितः स्थापितः दक्षिणानां प्रतिग्रहे सति कामस्य सृत्वेव कामितार्थं प्राप्येव तृप्याणि तृप्तो भवानि । अयमर्थः– ऋत्विजां दक्षिणाकाले कन्याऽपि दीयते । अत एवाऽऽपस्तम्बधर्मेषु स्मर्यते–"दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेत्" इति । दैवे विवाहे चिकीर्षिते सति यज्ञप्रयोगमध्य ऋत्विजे कन्यां समर्पयेत् । आश्वलायनोऽपि दक्षिणारूपायाः कन्याया अभिमर्शनं विधत्ते–"अभिमृशेदप्राणि कन्यां च" इति । तस्माद्दक्षिणानां प्रतिग्रहे सति कन्यां प्राप्तस्य यादृशी तृप्तिस्तादृशी तृप्तिर्भवति ।

अथ सप्तदशीमाह–

मनसश्चित्तमाकूतिम् । वाचः सत्यमशीमहि । पशूनाꣳ रूपमन्नस्य । यशः श्रीः श्रयतां मयि, इति ।

मनसः संबन्धि चित्तं विज्ञानमाकूतिं संकल्पं वाचः संबन्धि सत्यवदनं चाशीमहि प्राप्नुयाम । तथा पशूनां गवादीनां रूपमनेकविधं स्वरूपमन्नस्य संबन्धि यशः कीर्तिं चाशीमहि । मयि श्रीधनसमृद्धिः श्रयतां सेवताम् ।

अथाष्टादशीमाह–

यथाऽहमस्या अतृपꣳस्त्रियै पुमान् । यथा स्त्री तृप्यति पुꣳसि प्रिये प्रिया। एवं भगस्य तृप्याणि (६)। यज्ञस्य काम्यः प्रियः इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अस्यै स्त्रिया अस्यां विवाहेन लब्धायां स्त्रियां पुमानहं यथाऽतृपं येन प्रकारेण तृप्तोऽस्मि यथा च प्रिया स्त्री प्रिये पुंसि तृप्यत्येवमहं भगस्य तृप्याणि सौभाग्येन तृप्तो भवानि । कीदृशोऽहम् । यज्ञस्य काम्यो यज्ञो हि स्वानुष्ठानाय मां कामयते । अत एव यज्ञस्याहं प्रियः ।

अथैकोनविंशीमाह-

ददामीत्यग्निर्वदति । तथेति वायुराह तत् । हन्तेति सत्यं चन्द्रमाः । आदित्यः सत्यमोमिति, इति ।

एतां कन्यामहं ददामीत्येवमग्निर्ब्रूते । तत्तथाऽस्त्विति वायुरप्याह । चन्द्रमास्तु तत्सत्यं हन्त ममायं हर्ष इत्याह । आदित्यः सत्यमोमित्यवश्यमङ्गीकरोमीति ब्रूते ।

आपस्तत्सत्यमाभरन् । यशो यज्ञस्य दक्षिणाम् । असौ मे कामः समृध्यताम्, इति ।

यज्ञस्य दक्षिणां यज्ञसंबन्धिदक्षिणारूपं यशो यशसः कारणं तत्कन्यारूपं वस्त्वापः सत्यमाभरन्नब्देवता अवश्यमानयन् । तस्मादसौ पुत्रोत्पादनरूपो मे कामः समृध्यतां समृद्धो भवतु । प्रजापतिरित्यादिमन्त्रषट्कस्य कन्याप्रतिग्रहे विनियोगमाह बौधायनः-"अथ यदि दक्षिणाभिः सह दत्ता स्यान्नात्र वरान्प्रहिणुयात्तां प्रतिगृह्णीयात्प्रजापतिः स्त्रियां यश इत्येताभिः षड्भिरनुच्छन्दसम्" इति । आपस्तम्बमतानुसारिणस्तु वध्वोः शिरसि तण्डुलप्रक्षेपे विनियोगमाहुः ।

अथैकविंशीमाह-

न हि स्पशमविदन्नन्यमस्मात् । वैश्वानरात्पुर एतारमग्नेः (७) । अथैममन्थन्नमृतममूराः । वैश्वानरं क्षैत्रजित्याय देवाः, इति ।

वैश्वानरनामकादस्मादग्नेरन्यं देवं स्पशं रक्षसां बाधकं पुर एतारं देवानां पुरतो गन्तारं न ह्यविदन्देवाः सर्वथा नालभन्त । अथानन्तरममूरा अमूढा देवाः क्षेत्रजित्याय कर्मानुष्ठानाङ्गक्षेत्रजयाय तन्मार्गजयाय वाऽमृतं केनाप्यतिरस्कृतमीं वैश्वानरमिमं वैश्वानराख्यमग्निममन्यन्नरण्यो- र्मथितवन्तः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ द्वाविंशीमाह-

येषामिमे पूर्वे अर्मास आसन् । अयूपाः सद्म विभृता पुरूणि । वैश्वानर त्वया ते नुत्ताः । पृथिवीमन्यामभितस्थुर्जनासः, इति ।

येषां जनानां यजमानानामयूपा विमोहरहिता इमे वैश्वनरस्य मन्थितारो देवाः पूर्वेऽर्मासः पूर्वभाविनो गन्तार आसन् । पुरूणि सद्म बहूनि यज्ञगृहाणि च येषां यजमानानां विभृतानि विशेषेण संपादितानि ते जनासो जना यजमाना हे वैश्वानर त्वया नुत्ताः प्रेरिताः सन्तोऽन्यां कांचिद्यज्ञयोग्यां पृथिवीमभितस्थुरभिगम्यावस्थिताः । एतच्चोभयं वैश्वानरदेवत्ये कर्मणि द्रष्टव्यम् ।

अथ त्रयोविंशीमाह-

पृथिवीं मातरं महीम् । अन्तरिक्षमुप ब्रुवे । बृहतीमूतये दिवम्, इति ।

इमां पृथिवीं महीं महतीं मातरं मातृसमानामहमुपब्रुवे । यथा माता पालयति तथा त्वं पालयेति ब्रुवे प्रार्थये । अन्तरिक्षमप्यवकाशदानाय प्रार्थये । बृहतीं प्रौढां दिवमप्यूतये वृष्टिप्रदानेन रक्षणाय प्रार्थये ।

अथ चतुर्विंशीमाह-

विश्वं बिभर्ति पृथिवीम् (८), अन्तरिक्षं विपप्रथे । दुहे द्यौर्बृहती पयः, इति ।

इयं पृथिवी विश्वं सर्वं जगद्बिभर्ति धारयति पोषयति च । अन्तरिक्षमप्यवकाशप्रदानाय विपप्रथे विस्तीर्णमभूत् । बृहती द्यौ पयो दुहे जलं दोग्धि । एतच्च मन्त्रद्वयं लोकेष्टौ द्रष्टव्यम् । तथा चाऽऽश्वलायन आह-"लोकेष्टिः पृथिव्यन्तरिक्षं द्यौरिति देवताः पृथिवीं मातरम्" इति ।

अथ पञ्चविंशीमाह-

न ता नशन्ति न दभाति तस्करः । नैना अमित्रो व्यथिरादधर्षति । देवाꣳश्च याभिर्यजते ददाति च । ज्योगित्ताभिः सचते गोपतिः सह, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

याभिर्गोभिर्देवानुदिश्य यजते च यागमपि करोति ददाति च गवां दानमपि करोति ता गावो न नशन्ति नैव नाशं प्राप्नुवन्ति । तस्करश्चोरोऽपि ता गा न दभाति न हिनस्ति । व्यथिर्व्यथाहेतुरमित्रः शत्रुरप्येना गा नाऽऽदधषात नैव धृष्टो भवति ताडयितुं प्रगल्भो न भवति । ताभिर्गोभिः सह गोपतिर्गवां स्वामी ज्योगिच्चिरमेव सचते स्वर्गे समधेतो भवति ।

अथ षड्विंशीमाह-

न ता अर्वा रे॒णुक॑काटो अश्नुते । न स॑ᳪ॑स्कृ॒त॒त्रमुप॑यन्ति॒ ता अ॒भि । उ॒रु॒गा॒यमभ॑यं॒ तस्य॒ ता अनु॑ । गावो॒ मर्त्य॑स्य॒ विच॑रन्ति॒ यज्व॑नः(९), इति ।

रेणुककाटो रेणोर्भूधूलेः ककाट उत्थापकस्तीव्रगतियुक्त इत्यर्थः । अर्वातादृशोऽश्वास्ता गा नाश्नुते न व्याप्नोति, अश्वादपि शीघ्रगतय इत्यर्थः । अत एव ता अभ्येतादृशीर्गा अभिलक्ष्य संस्कृतत्रं संस्कारेण युक्तं रक्षार्थं दण्डं नोपयन्ति गोपाला हस्ते दण्डं न स्वीकुर्वन्ति । शक्त्याधिक्येनाश्वादपि शीघ्रं गच्छन्तीनां गवां ताडनार्थो दण्डो नापेक्षितः । यज्वनो यागशीलम्य तस्यमर्त्यस्य मनुष्यस्य ता गाव उरुगायं विस्तीर्णगतियोग्यं भयरहितं स्थानं प्राप्य विचरन्ति विस्रम्भेण चरन्ति । एतच्च मन्त्रद्वयं ब्रह्मण ऋषभमिति विहितस्य पशोरुपहोमार्थे गोसूक्तेऽन्तर्भूतम् । अत एव तत्र प्रतीकद्वयमाम्नातम् - "न ता नशन्ति न ता अर्वा" इति ।

अथ सप्तविंशीमाह-

रात्री॒ व्य॑ख्यदाय॒ती । पु॒रु॒त्र दे॒व्य॑क्षभिः॑ । विश्वा॒ अधि॒श्रियो॑ऽधित, इति ।

पुरुत्रा पुरुषु बहुषु दिवसेष्वायती पुनः पुनरागच्छन्ती रात्री देवी रात्र्यभिमानिनी देवताऽक्षभिः सर्वेषां प्राणिनां चक्षुर्भिर्व्यख्यद्वि- ख्याताऽभूत् । अन्वकारं ज्योत्स्नां वा दृष्ट्वा रात्रिरियमिति निश्चीयते । सा च देवी विश्वाः श्रियः सर्वाः संपदोऽधिष्ठायाधित धारितवती ।

अथाष्टाविंशीमाह-

उप॑ ते॒ गा इ॒वाक॑रम् । वृ॒णी॒ष्व दु॑हितर्दिवः । रात्रि॒ स्तोम॑ न जि॒ग्युषी, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिवो दुहितर्द्युलोकदेवतायाः पुत्रि हे रात्रि गा इव गोभिरुपलक्षिताभ्यो महिषादीन्सर्वानपि पशूंस्त उपाकरं तव समीपे कृतवानस्मि। उतोवृणीष्व रक्षार्थं सर्वानपि गवादीन्स्वीकुरु। रात्रौ हि पशवः शालासु रक्ष्यन्ते। इयं रात्री देवी स्तोमं नास्माभिः कृतं स्तोत्रमपि जिग्युषी जितवती वशीकृतवती। एतच्च मन्त्रद्वयमपरिष्टदर्शनेषु होमेषु विनियोक्तव्यम्। तथा च बह्वृचा आरण्यकाण्डे संहितोपनिषदि प्रत्यक्षाणि स्वप्नगतानि चारिष्टान्युपन्यस्यानन्तरमिदमामनन्ति "स यद्यतेषां किंचित्पश्येत्। उपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रिसूक्तेन प्रत्यृचं हुत्वा" इति।

अथैकोनत्रिंशीमाह-

देवीं वाचमजनयन्त देवाः। तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्जं दुहाना। धेनुर्वागस्मानुप सुष्टुतैतु (१०), इति।

देवाः सर्वे वाचं देवीमजनयन्त। तां वाचं विश्वरूपा द्विपाच्चतुष्पात्त दवान्तरभेदेन बहुविधाः पशवः स्वस्वभाषारूपेण वदन्ति। सा वाग्रूपा धेनुर्नोऽस्मदर्थमिषमन्नमूर्जं क्षीरादिरसं दुहाना संपादयन्ती सुष्टुताऽस्माभिः सुष्ठु वैदिकैः स्तोत्रैः स्तुता मन्द्रा हृष्टा सत्यस्मान्प्रत्यागच्छतु।

अथ त्रिंशीमाह-

यद्वाग्वदन्त्यविचेतनानि। राष्ट्री देवानां निषसाद मन्द्रा। चतस्र ऊर्जं दुदुहे पयांसि। क्व स्विदस्याः परमं जगाम, इति।

यद्वाग्या वाग्देवताऽविचेतनान्यचेतनसदृशान्मूकान्प्राणिनो वदन्त्यभिवदनक्षमान्कुर्वती। देवानां सर्वेषां राष्ट्री राष्ट्रप्रदा मन्द्रा हृष्टा सती निषसादास्मदीये कर्मण्युपविष्टा। यस्या वाग्देव्याः प्रसादाच्चतस्रो दिग्देवता ऊर्जं क्षीरादिरसद्रव्यं पयांसि जलानि न दुदुहे दुहन्ति संपादयन्ति। अस्या वाग्देव्याः परमं पदं मनुष्यः क्वस्विज्जगाम कुत्र वा प्राप्तवांस्तदीयस्थानं प्राप्तुं न कोऽपि क्षम इत्यर्थः। इदं च मन्त्रद्वयं "वाचे वेहतम्" इति विहिते पशौ विनियोक्तव्यम्। अत एव तदीये स्तोत्रे प्रतीकद्वयमाम्नातम्-"देवीं वाचमजनयन्त यद्वाग्वदन्ति" इति। अथैकत्रिंशीमाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

गौरी मिमाय सलिलानि तक्षती । एकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी । सहस्राक्षरा परमे व्योमन् इति ।

परमे व्योम्नि ब्रह्मणि प्रतिष्ठिता गौरी गौरवर्णा वाग्देवी सृष्ट्युपक्रमे सलिलसदृशानि वर्णपदवाक्यानि तक्षती सृजन्ती मिमाय शब्दमकरोत् । कथम् । प्रथमं प्रणवात्मनैकपदी ब्रह्मणो मुखान्निर्गता । अनन्तरं व्याहृतिरूपेण सावित्रीरूपेण च द्विपदी । ततो वेदचतुष्टयरूपेण चतुष्पदी । ततो वेदाङ्गैः षड्भिः पुराणधर्मशस्त्राभ्यां चाष्टापदी । ततो मीमांसान्यायसांख्ययोगपाञ्चरात्रपाशुपतायुर्वेदधनुर्वेदगान्धर्वैर्नवपदी । ततोऽनन्तैर्वाक्यसंदर्भैः सहस्राक्षराऽनन्तविधा वभूवुषी संपन्ना ।

अथ द्वात्रिंशीमाह-

तस्या समुद्रा अधि विक्षरन्ति । तेन जीवन्ति प्रदिशश्चतस्रः (११) । ततः क्षरत्यक्षरम् । तद्विश्वमुपजीवति, इति ।

तस्यां वाग्देवतायामधिश्रिताः समुद्राः समुद्रसमाना वेदाविक्षरन्ति विविधं प्रवर्तन्ते । तेन प्रवर्तनेन चतस्रः प्रदिशश्चतुर्विधाः प्राच्यदिदिगवस्थिताः प्राणिनो जीवन्ति वेदोक्तमनुष्ठायैहिकमामुष्मिकं च प्राप्नुवन्ति । ततो वेदादेवाक्षरं प्रणवात्मकं प्रवर्तते । तदेतदक्षरं विश्वमुपजीवति सर्वे जनाः प्रणवानुष्ठानेन स्वापेक्षितं फलं प्राप्नुवन्ति । एतच्च मन्त्रद्वयं "वाचे वेहतम्" इत्यत्रैवोपहोमार्थं द्रष्टव्यम् ।।

अथ त्रयस्त्रिंशीमाह-

इन्द्रा सूरा जनयन्विश्वकर्मा । मरुत्वा अस्तु गणवान्त्सजातवान् । अस्य स्नुषा श्वशुरस्य प्रशिष्टिम्, सपत्ना वाचं मनसा उपासताम्, इति ।

इन्द्रा परमैश्वर्ययुक्तः सूरा सूर्यो विश्वकर्मा सर्वव्यापारयुक्तो विश्वं जनयन् । मरुत्वान्मरुद्भिर्युक्तो गणवान्वसुरुद्रादित्यगणैः सहितः सजातवान्सजातैः स्वेन समानजन्मभिः सर्वैः सहितश्च सन्यजमानस्यानुग्राहकोऽस्तु । ततश्चास्य यजमानस्य श्वशुरस्थानीयस्य सपत्नाः शत्रवः स्नुषा श्रुवावान्निलीयमानाः सन्तः प्रशिष्टि प्रशासनरूपां वाचं मनसोपासतां मनःपूर्वं सेवता(न्ता) म् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुस्त्रिंशीमाह-

इन्द्रः सूरो अतरद्रजांसि । स्नुषा सपत्नाः श्वशुरोऽयमस्तु । अयं शत्रूञ्जयतु जर्हृषाणः । अयं वाजं जयतु वाजसातौ, इति ।

इन्द्रः परमैश्वर्ययुक्तः सूरः सूर्यो रजांसि रञ्जकानि प्राणिजातान्यतरत्तीर्णवान्वशी कृतवानित्यर्थः । तत्प्रसादाद्यजमानस्य सपत्नः शत्रवः स्नुषावत्स्वाधीनाः सन्तु । अयं तु यजमानः श्वशुरोऽस्तु श्वशुरवत्स्वामी भवत स्वामित्वादेवायं यजमानो जर्हृषाणोऽत्यन्तं हृष्यञ्शत्रूञ्जयतु । पुनरप्ययं यजमानो वाजसातौ स्वकीयेभ्योऽन्नदाने निमित्ते सति वाजं जयतु वैरिसंबन्ध्यन्नं वशं करोतु एते ऋचौ स्नुषाश्वशुरीयायामिष्टौ याज्यानुवाक्ये ।

अथ पञ्चविंशीमाह-

अग्निः क्षत्रभृदनिभृष्टमोजः सहस्रियो दीप्यतामप्रयुच्छन् विभाजमानः समिधान उग्रः । आऽन्तरिक्षमरुहदगन्द्याम् (१२), इति ।

धारयन्पुरोडाशं बृहस्पतिं जघनच्युतिमानन्दो भगस्य तृप्याण्यग्नेः पृथिवी यज्वन एतु प्रदिशयतस्रो वाजसातौ चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

चतुर्थाध्याये षष्ठोऽनुवाकः ।। ६ ।।।

अयमग्निः क्षत्रभृद्बलं धारयन्ननिभृष्टमोजः केनाप्यतिरस्कृतं बलमस्मभ्यं प्रयच्छन्निति शेषः ।। सहस्रियो देवसहस्रेण संमितोऽप्रयुच्छन्प्रमादमकुर्वन्दीप्यताम् । विभ्राजमानो दीप्यमानः समिधानः समिद्भिर्युक्त उग्रस्तीव्रः समन्तरिक्षमरुहदारोढुर्महति । ततो द्यामगन्दिवं गच्छतु । अयं मन्त्र आग्नेये कर्मणि द्रष्टव्यः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

चतुर्थप्रपाठके षष्ठोऽनुवाकः ।। ६ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथ चतुर्थप्रपाठके सप्तमोऽनुवाकः ।

सप्तमे प्रथमामृचमाह–

वृषाऽस्य॒ꣳशुर्वृ॑ष॒भायै॑ गृह्यते । वृषा॒ऽयमु॒ग्रो नृ॒चक्ष॑से । दि॒व्यः कर्म॒ण्यो हि॒तो बृ॒हन्नाम॑ । वृ॒ष॒भस्य॒ या क॒कुत, इति ।

अंशुर्लतात्मकः सोमस्त्वं वृषाऽसि वीर्यवानसि । स त्वं वृषभाय श्रेष्ठायैन्द्रायाभिषेचार्थं गृह्यसे । अयमुपांशुसवनाख्य उग्रः कठिनो ग्रावा वृषा वीर्यवान्भूत्वा नृचक्षसे नृणां द्रष्ट्रे तस्मा इन्द्राय कर्मण्योऽभिषवकर्मणि कुशलो हितोऽभिषवार्थमुपरं निहितः, स च दिव्यो द्योतनात्मको बृहच्छब्दस्तस्य वापाणस्य नाम । अत एवान्यत्राऽऽम्नातः–"बृहन्नसि बृहद्ग्रावा" इति । वृषभस्य श्रेष्ठस्य हिमवदादिपर्वतस्य या [ककुत्] ककुत्सादृशं शृङ्गं यदस्ति तद्रूपोऽयं पाषाणः । अत एव सन्नानां ग्राव्णामभिमन्त्रणमन्त्र एवमाम्नातः– "पर्वतानां ककुभः प्रयुज्यते" इति ।

अथ द्वितीया [माह]--

वि॒षू॒वान्विष्णो भवतु । अ॒यं यो माम॒को वृषा । अथो॒ इन्द्र॑ इव दे॒वे॒भ्यः॑ । विब्र॑वीतु॒ जने॑भ्यः, इति ।

हे विष्णो व्याप्तसोमायं यजमानो विषूवाञ्श्रेष्ठो भवतु । यो यजमानो मामको मदीयो वृषा यागद्वारेण फलाभिवर्षणहेतुः सोऽयमिति पूर्वत्रान्वयः । अपि च यथैवेन्द्रो देवेभ्यः कार्याणि विविच्य ब्रवीति तथाऽयं यजमानो जनेभ्यो विविच्य ब्रवीतु । अयं मन्त्रः क्वचित्कर्मणि यजमानाभिमन्त्रणार्थः।

अथ तृतीया [माह]--

आयु॑ष्मन्तं॒ वर्च॑स्वन्तम् । अथो॒ अधि॑पतिं वि॒शाम् (१)। अ॒स्याः पृ॒थि॒व्या अध्य॑क्षम् । इ॒ममि॑न्द्र वृ॒ष॒भं कृ॑णु, इति ।

ह इन्द्रेमं यजमानं वृषभं कृणु श्रेष्ठं कुरु । वृषभत्वमेव प्रपञ्च्यते– आयुष्मन्तं दीर्घेणाऽऽयुषा युक्तं वर्चस्वन्तमधिकेन बलेन युक्तमपि च विशां प्रजानामधिपतिमस्याः पृथिव्या अध्यक्षं स्वामिनम् । अयं मन्त्र आशीर्वादरूपे कर्मणि द्रष्टव्यः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थी [माह] --

यः सुशृङ्गः सुवृषभः । कल्याणो द्रोण आहितः । कार्षीवलप्रगाणेन । वृषभेण यजमाहे, इति ।

योऽयमिन्द्रार्थमालभ्यमानः पशुः सोऽयं सुशृङ्गः शोभनशृङ्गोपेतः सुवृषभः सुष्ठु सेचनसमर्थः कल्याणो रमणीयो द्रोणो मुद्गमाषादिभक्षः परिपूर्णे काष्ठपात्र आहितो भक्षणाय नित्यं स्थापितः कार्षीवलप्रगाणेन कृषीवलैः कृतं कार्षीवलं तादृशं प्रगाणं प्रशंसनं यस्यासौ कार्षीवलप्रगाणस्तादृशेन तेन वृषभेण यजामह इन्द्रं पूजयामः।

अथ पञ्चमी [माह]--

वृषभेण यजमानाः अक्रूरेणेव सर्पिषा । मृधश्व सर्वा इन्द्रेण । पृतनाश्च जयामसि (२), इति ।

यथाऽक्रूरेण स्वादुतमेन सर्पिषा यागः क्रियते तथैव वृषभेणानेन यजमाना वयमिन्द्रेणानुगृहीताः सन्तो मृधश्च शत्रूनपि सर्वाः पृतनाश्च परकीय सेना अपि जयामसि वशी कुर्मः ।

अथ षष्ठी [माह]--

यस्यायमृषभो हविः । इन्द्राय परिणीयते । जयाति शत्रुमायन्तम् । अथो हन्ति पृतन्यतः, इति ।

यस्य यजनानस्यायमृषभो हविर्भूत्वेन्द्रार्थं परितो नीयते स यजमान आयन्तमागच्छन्तं शत्रुं जयति । अपि च पृतन्यतोऽस्मद्विरोधिनीं सेनामिच्छतः पुरुषान्सर्वानपि हन्ति ।

अथ सप्तमी [माह]-

नृणामहं प्रणीरसत् । अग्र उद्भिन्दतामसत्, इति ।

अयं वृषभयाजी नृणां मनुष्याणां प्रणीरसत्प्रकर्षेण नेता भवतु । अहापि चोद्भिन्दतां विरोविर्जनोद्भेदनं कुर्वतां पुरुषाणां मध्येऽयमग्रेऽसत्प्रथमप्रवृत्तो भवतु । "यः सुशृङ्गः" इत्यादयश्चत्वारो मन्त्राः "ऐन्द्रमृषभमालभेत" इत्येतस्मिन्पशावुपहोमार्थाः ।

अथाष्टमी [माह] --

इन्द्र शुष्मं तनुवा मेरयस्व । नीचा विश्वा अभितिष्ठाभिमातीः । निशृणी ह्याबाधं यो नो अस्ति । उरुं नो लोकं कृणुहि जीरदानो (३), इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

हे इन्द्र तनुवाऽस्मच्छरीरेषु शुष्मं बलं मेरयस्व प्रेरय । विश्वा अभिमातीः पाप्मनो नीचैः कृत्वाभिऽतिष्ठाभितोऽवस्थितं कुरु । योऽयं नोऽस्माकमपरैः संपादित आबाधोऽस्ति तमाबाधं निशृणीहि नितरां शीर्णं कुरु । हे जीरदानो जीवनहेतविन्द्र नोऽस्माकमुरुं विस्तीर्णं कृणुहि कुरुष्व ।

अथ नवमीमाह-

प्रेह्य॒भिप्रेहि॒ प्रभ॑र॒ा सह॑स्व । मा वि॑वे॑नो॒ वि॑शृ॒णु॑ष्वा॒ जने॑षु । उदी॑डि॒तो वृ॒ष॒भ तिष्ठ॒ शुष्मैः॑ । इन्द्र॒ शत्रू॒न्पुरो अ॒स्माकं युध्य, इति ।

हे इन्द्र प्रेहि विजयार्थं गच्छ । गमनकालेऽप्यभिप्रेहि शत्रोरभिमुखो गच्छ । गत्वा च प्रभरणं मुख्यानां प्रहारं कुरु । सहस्वेतरानभिभव । किंचिदपि शत्रुं मा विवेनोऽयमेको रक्षणीय (इति) विशेषेणाऽऽदरं मा कुरु । ततो जनेषु महतीं मदीयां स्तुतिं शृणुष्व । हे वृषभेडितः स्तुतः सन्पुनरपि शुष्मैर्बलैः सह शत्रून्हन्तुमुत्तिष्ठ, शत्रून्पुरत एव युध्य संप्रहर एतच्चोभयं विजयार्थमेन्द्रे कर्मणि द्रष्टव्यम् ।

अथ दशमीं [माह]--

अग्ने॒ जेता॒ त्वं जय । शत्रू॒न्त्सह॒ ओज॑सा । वि शत्रू॒न्विमृधो॑ नुद, इति ।

हेऽग्ने जेता जयशीलस्त्वं शत्रूञ्जय । तथौजसा बलेन सहसेऽभिभव । शत्रून्विनुदु विशेषेण निराकुरु । मृधोऽन्यानपि बाधकान्विनुद ।

अथैकादशीं [माह]--

ए॒तं ते॒ स्तोमं॑ तुविजात॒ विप्रः॑ । रथ॒ं न धीर॒ः स्वपा॑ अतक्षम् । यदीद॑ग्ने॒ प्रति॒ त्वं दे॑व॒ हर्याः॑ (४) । सुवर्वतीर॒प ए॑ना जयेम, इति ।

तुविजात प्रभूतजन्म हेऽग्ने ते तवैतं स्तोमं स्तोत्रं विप्रो यजमानोऽहमतक्षं तक्षणवत्संपादनमकार्षम् । तत्र दृष्टान्तः-धीरो बुद्धिमान्स्वपाः शोभनकर्मा शिल्पी रथं न यथा रथं तक्षति तद्वत् । हेऽग्ने

Digitized by Madhuban Trust, Delhi

देव यदीद्यदिदं स्तोत्रं त्वं प्रतिहर्या आद्रियेथास्तर्हि वयं सुवर्वतीः सुवः कामयुता अप एनैतेन स्तोत्रेण जगेम। एतदुभयमाग्नेये कर्मणि द्रष्टव्यम्।

अथ द्वादशीमाह-

यो घृतेनाभिमानितः। इन्द्र जैत्राय जज्ञिषे। स नः संकासु पारय। पृतनासाह्येषु च, इति।

हे इन्द्र यस्त्वं घृतेनाभिमानितोऽभितः, पूजितः सञ्जैत्राय शत्रुजयाय जज्ञिषे जायसे जयसमर्थ इत्यर्थः। स त्वं संकासु परकीयसेनासु नोऽस्मान्पारय पालय। तथा पृतनासाह्येषु च सेनानामभिभवेष्वपि समर्थान्कुर्विति शेषः।

अथ त्रयोदशी [माह] --

इन्द्रो जिगाय पृथिवीम्। अन्तरिक्ष ँसुवर्महत्। वृत्रहा पुरुचेतनः, इति।

पुरुचेतनो बहुविधज्ञानयुक्तो वृत्रहा शत्रुघातक इन्द्रः पृथिवीमन्तरिक्षं महान्तं स्वर्गं च जिगाय वशीकृतवान्।

अथ चतुर्दशीमाह-

इन्द्रो जिगाय सहसा सहा ँसि। इन्द्रो जिगाय पृतनानि विश्वा (५)। इन्द्रो जातो वि पुरो रुरोज। स नः परस्पा वरिवः कृणोतु, इति।

अयमिन्द्रः सहसा स्वकीयबलेन सहांसि परकीयबलानि जिगाय जितवानयमिन्द्रो विश्वा पृतनानि सर्वाणि सैन्यानि जिगाय। अयमिन्द्रो जातमात्र एव पुरः परकीयाणि पुराणि विरुरोज विशेषेण भग्नानि कृतवान्। स इन्द्रो नोऽस्माकं परस्पाऽतिशयेन पालयिता सन्वरिवः कृणोतु धनं करोतु। इदं मन्त्रद्वयमैन्द्रे कर्मणि द्रष्टव्यम्।

अथ पञ्चदशी [माह]--

अयं क्रतुरगृभीतः। विश्वजिदुद्भिदित्सोमः। ऋषिर्विप्रः काव्येन, इति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

कृत्नुर्नाम कश्चिदृषिर्विप्रो ब्राह्मणः कविनाम्ना साम्नानिष्पन्नं स्तोत्रं काव्यं तेन स्तोत्रेणायमृषिर्विश्वजित्सर्वस्य विश्वस्य जेतोद्भिदित्पर्वस्य विरोधिन उद्भेदक एव सन्सोमः सोमसदृशः सर्वस्योपकारकः स चागृभीतः केनाप्यनभिभूतः । अस्य मन्त्रस्य क्वचिज्जपे विनियोगो द्रष्टव्यः ।

अथ षोडशीमाह]--

वायुरग्रेगा यज्ञप्रीः । साकं गन्मनसा यज्ञम् । शिवो नियुद्भिः शिवाभिः, इति ।

अयं वायुरग्रेगाः प्रथमगामी यज्ञप्रीर्यज्ञेन प्रीयमाणः शिवाभि र्नियुद्भिर्नियुन्नामिकाभिः स्वकीयाभिर्वडवाभिः साकं शिवः स्वयमपि शान्तः सन्मनसा गन्ध्यानमात्रेण यज्ञं गच्छतु ।

अथ सप्तदशीमाह-

वायो शुक्रो अयामि ते । मध्वो अग्रं दिविष्टिषु (६) । आयाहि सोमपीतये । स्वारुहो देव नियुत्वता, इति ।

हे वायो शुक्रो निर्मलो मध्वो मधुरः सोमरसो योऽस्ति तमग्रं श्रेष्ठं दिविष्टिषु दिवि वासेच्छा येषां देवानां ते दिविष्टयस्तेषु मध्ये ते त्वदर्थयया[illegible]मि । ततो हे देव नियुक्ता त्वदीययाऽश्वजात्या सह स्वारुहः सुष्ठु रथमारूढः सोमपीतये सोमपानार्थमायाहि । एतदुभयं वायव्ये कर्मणि द्रष्टव्यम् । वायुरग्रेगा इत्यादयस्तु प्रउगशस्त्रेऽप्यन्तर्भूताः ।

अथाष्टादशमाह-

इममिन्द्र वर्धय क्षत्रियाणाम् । अयं विशां विश्पतिरस्तु राजा । अस्मा इन्द्र महि वर्चाँसि धेहि । अवर्चसं कृणुहि शत्रुमस्य, इति ।

ह इन्द्र क्षत्रियाणां मध्य इमं पुरोवर्तिनं राजानं वर्धय । अयं राजा विशां प्रजानां मध्ये विश्पतिरतिशयेन प्रजापालकोऽस्तु । विशां मध्ये या उत्तमा विशस्तासामपि पालकोऽस्त्वित्यर्थः । ह इन्द्रास्मै राज्ञे महिवर्चांसि महन्ति बलानि धेहि संपादय । अस्य शत्रुमवर्चसं कृणुहि बलहीनं कुरु ।

Digitized by Madhuban Trust, Delhi

अथैकोनविंशी [माह]--

इममाभज ग्रामे अश्वेषु गोषु । निरमुं भज यो मित्रो । अस्य वर्ष्मन्क्षत्रस्य ककुभि श्रयस्व । ततो न उग्रो विभजा वसूनि (७), इति ।

ह इन्द्रेमं राजानं सर्वस्मिन्ग्रामेऽश्वेषु गोषु चा ऽऽभज सर्वतो भागिनं कुरु । अस्य राज्ञोऽमित्रः शत्रुर्योऽस्त्यमुं निर्भज भागरहितं कुरु । क्षत्रस्य क्षत्रियजातेर्वर्ष्मञ्शरीरे ककुभिरु (उ)त्तमाङ्गे श्रयस्वेन्द्रस्य प्रसादाश्रितो भव । सर्वोऽपि क्षत्रियजातिस्त्वां नमस्करोत्वित्यर्थः । अथवैनं राजानं श्रयस्व स्थापय । तत ऊर्ध्वं नोऽस्माकमुग्रस्त्वं वसूनि परकीयाणि धनानि विभज विशेषेण संपादय । परेषु कुपितस्तदीयं धनमस्मभ्यं प्रयच्छेत्यर्थः ।

अथ विंशी [माह]--

अस्मे द्यावापृथिवी भूरि वामम् । संदुहाथां धर्मदुघेव धेनुः । अय ँ राजा प्रिय इन्द्रस्य भूयात् । प्रियो गवामोषधीनामुतापाम्, इति ।

प्रवर्ग्यार्थं या पयो दुग्धे धर्मदुघा । तादृशी धेनुरिव हे द्यावापृथिव्यावस्मेऽस्मदर्थं संदुहाथामपेक्षितस्य कामस्य । युवा दोहनं कुरुतम् । अयं च राजा युवयोः प्रसादादिन्द्रस्य प्रियो भूयात् । तथा गवामोषधीनामपां च प्रियो भूयात् । ताः सर्वा अस्मिन्नमन्तामित्यर्थः ।

अथैकविंशी [माह]--

युनज्मि त उत्तरावन्तमिन्द्रम् । येन जयासि न पराजयासै । स त्वाऽकरेकवृषभ ँ स्वानाम् । अथो राजन्नुत्तमं मानवानाम्, इति ।

उत्तर उत्कृष्टो ज्ञानैश्वर्यादिर्यस्येन्द्रस्य सोऽयमुत्तरावांस्तादृशमिन्द्रं हे राजंस्ते त्वदर्थं युनज्मि त्वया सह संयोजयामि येनेन्द्रेष यजासि सर्वदा त्वं जेष्यसि । न पराजयासै कदाचिदपि पराजयं न प्राप्स्यसि । स इन्द्रस्त्वां स्वानां ज्ञातीनां मध्य एकवृषभमेकमेव श्रेष्ठमकः करोतु । अथो अपि च हे राजन्मानवानां त्वामुत्तमं करोतु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथ द्वाविंशीमाह-

उत्तरस्त्वमधरे ते सपत्नाः । एकवृषा इन्द्रसखा जिगीवान् (८), विश्वा आशाः पृतनाः सं जयं जयन् । अभितिष्ठ शत्रूयतः सहस्व, इति ।

हे राजंस्त्वमुत्तर उत्कृष्टो भव । ते सपत्नाः शत्रवोऽधरे निकृष्टाः सन्तु । त्वमेकवृषैक पर श्रेष्ठ इन्द्रसखेन्द्रस्य सख्ये प्राप्तो जिगीवान्सर्वदा जयं प्राप्तो विश्वा आशाः सर्वा अपि दिशः संजयन्सम्यग्वशीकुर्वन्विश्वाः पृतनाश्च जयन्नभितिष्ठाभिक्रम्य स्थिरो भव । शत्रूयतः शात्रवमिच्छतो मनुष्यान्सहस्वाभिभव । इममिन्द्र वर्धयेत्यादिमन्त्रपञ्चकमाशीर्वादरूपं राजनि पुरोहितेन प्रयोक्तव्यम् ।

अथ त्रयोविंशी [माह]--

तुभ्यं भरन्ति क्षितयो यविष्ठ । बलिमग्ने अन्तित ओत दूरात् । आ भन्दिष्ठस्य सुमतिं चिकिद्धि । बृहत्ते अग्ने महि शर्म भद्रम्, इति ।

हे यविष्ठ युवतमाग्ने क्षितयो भूमिष्ठाः सर्वे मनुष्या अन्तितः समीपदेशा दोतोत दूरदेशाच्च बलिं पूजामाभरन्त्यानीय प्रयच्छन्ति । भन्दिष्ठस्यातिशयेन स्तोतुर्मम सुमतिं शोभनमतिमाचिकिद्धि सर्वतोऽनुगृहाण । हेऽग्ने ते तव शर्म शरणं बृहन्मह्यधिकं कर्मभिः पूज्यं भद्रं कल्याणम् ।

अथ चतुर्विंशी [माह]--

यो देह्यो अनमयद्वधस्नैः । यो अर्यपत्नीरुषसश्चकार । स निरुध्या नहुषो यह्वो अग्निः । विशश्चक्रे बलिहृतः सहोभिः (९), इति ।

योऽग्निर्देह्यो देहिनीः प्रजा वधस्नैर्वधबन्धनैश्च । स्ना वेष्टन इति धातोरुत्पन्नत्वाद्बन्धनमुच्यते । अनमयत्स्ववशीकृतवान् । यश्चाग्निरुषसो देवीरर्यपत्नीः सूर्यभार्याश्चकार सोऽग्निर्यह्वो महान्नहुषो बन्धको भूत्वा विशः प्रजा निरुध्य बलिहृतश्चक्रे । बलिहरणं नाम देवेभ्यो हविर्दानम् । सहोभिः स्वकीयैर्बलैस्तया चक्रे । एतच्चोभयं दिवश्येनीष्टिषु-"अग्नये

Digitized by Madhuban Trust, Delhi

बलिमते चरुम्'' इत्यत्र याज्यानुवाक्ये। तथा च तत्र प्रतीकद्वयमाम्नातम् –"तुभ्यं भरन्ति यो देह्यः" इति।

अथ पञ्चविंशी [माह] --

प्र सद्यो अग्ने अत्येष्यन्यान्। आविर्यस्मै चारुतरो बभूथ। ईडेऽन्यो वपुष्यो विभावा। प्रियो विशामतिथिर्मानुषीणाम्, इति।

हेऽग्ने यस्मै यजमानाय त्वं चारुतरः प्रियतर आविर्बभूथ प्रत्यक्षदृष्टोऽभूस्तस्य यजमानस्यार्थे सद्यस्तदानीमेवान्यान्सर्वान्यजमानान्प्रकर्षेणात्येष्यतिक्रमिष्यसि। चारुतरत्वमेव स्पष्टीक्रियते- ईडेऽन्यः सर्वैः स्तुत्यो वपुष्य उज्ज्वलरूपो विभावा दीप्यमानो मानुषीणां विशा प्रजानां प्रियोऽतिथिः। सोऽयं मन्त्र आग्नेये कर्मणि द्रष्टव्यः।

अथ षड्विंशी [माह]--

ब्रह्म ज्येष्ठा वीर्या संभृतानि। ब्रह्माग्रे ज्येष्ठं दिवमाततान। ऋतस्य ब्रह्म प्रथमोत जज्ञे। तेनार्हति ब्रह्मणा स्पर्धितुं कः, इति।

हे ज्येष्ठा वृद्धतमाः प्रजापतिमभूतमः शृणुत यानि वीर्याणि ज्ञानैश्वर्यादीनि युष्मासु संभृतानि संपादितानि सर्वाणि ब्रह्मैव। अत एव स्मर्यते –

> यद्यद्विभूतिमत्सत्त्वं श्रीपदूर्जतमेव वा।
> तत्तदेवावगच्छ त्वं मम तेजोशंसंभवम्।। इति।

किंच ज्येष्ठं लोके वृद्धतमं ब्रह्माग्रे प्रथमादिकाले दिवमाततान द्युलोकं विस्तारयति स्म। कि बहुना यदृतं सत्यं सर्वकारणकारणं वस्तु तस्यापि ब्रह्म प्रथमं जज्ञे प्रादुरभूत्। स्वस्य स्वयमेवाऽऽविर्बभूव। स्वप्रकाशत्वेन भासत इत्यर्थः। तेनैवंभूतेन ब्रह्मणा कोऽन्यः पुमान्स्पर्धितुं शक्नोति।

अथ सप्तविंशी [माह] --

ब्रह्म स्रुवो घृतवतीः। ब्रह्मणा स्वरवो मिताः (१०)। ब्रह्म यज्ञस्य तन्तवः। ऋत्विजो ये हविष्कृतः, इति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

घृतवतीर्घृतसंपूर्णाः स्रुचोऽपि ब्रह्मैव मिता यूपे प्रक्षिप्ताः स्वरवः शकलविशेषा अपि ब्रह्मैव । यज्ञस्य तन्तवो विस्तारा अपि ब्रह्मैव । हविष्कृतो हविःसंपादका य ऋत्विजः सन्ति तेऽपि ब्रह्मैव । एतच्चोभयं ब्रह्मण ऋषभमिति विहिते पशौ द्रष्टव्यम् ।

अथाष्टाविंशीमाह–

शृङ्गाणीवेच्छृङ्गिणा ँ संददृश्रिरे । चषालवन्तः स्वरवः पृथिव्याम् । ते देवासः स्वरवस्तस्थि वा ँसः । नमः सखिभ्यः सन्नान्माऽवगात, इति ।

चषाल यूपाग्रवर्तिनः कटकाः स्वरवो यूपरशनास्वासञ्जिताः शकलाश्चषालैः स्वरुभिश्च युक्ता यूपाः पृथिव्या वेद्या संददृश्रिरे सम्यग्दृष्टाः । तत्र दृष्टान्तः शृङ्गिणां वृषभाणां शृङ्गाणीवेच्छृङ्गाणि यथा दृश्यन्ते तथैवेत्यर्थः । स्वरुमन्तस्ते यूपास्तस्थिवांसो देवासः स्थैर्येणावस्थिता देवा एव । अत एव "स वः एष यूपेभ्यो नमोऽस्तु । हे यूपाः सन्नादस्मत्सदनान्माऽवगात माऽपगच्छत । एतस्य मन्त्रस्य विनियोगं सूत्रकार आह–"यूपं यजमान उपतिष्ठते नमः सखिभ्यः" इति ।

अथैकोनविंशी [माह]--

अभिभूरग्निरतरद्रजा ँ सि । स्पृधो विहत्य पृतना अभिश्रीः । जुषाणो म आहुतिं मा महिष्ट । हत्वा सपत्नान्वरिवस्करं नः, इति ।

अभिभूरभिभवनशीलोऽयमग्नी रजांसि रञ्जनात्मकाल्लोकान-तरदत्यक्रामत् । स्पृधो बाधिकाः पृतनाः शत्रुसेना विहत्य तत एवाभिगतश्रीः सोऽयं जुषाणं प्रियमाणो मे ममाऽऽहुतिं मा महिष्ट श्रद्धातु । अस्मत्सपत्नान्हत्वा वरिवस्तदीयं धनं नोऽस्माकं करोतु ।

अथ त्रिंशी [माह]--

ईशानं त्वा भुवनानामभिश्रियम् । स्तौम्यग्न उरु कृत ँ सुवीरम् । हविर्जुषाणः सपत्ना ँअभिभूरसि । जहि शत्रू ँ रपः मृधो नुदस्व (११), इति ।

Digitized by Madhuban Trust, Delhi

विशां जंयामसि जीरदानो हर्या विश्वा दिविंष्टिषु वसूंनि जिगीवान्त्स हौंभिर्मितानश्चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

चतुर्थाध्याये सप्तमोऽनुवाकः ।। ७ ।।

हेऽग्ने त्वां स्तौमि कीदृशम् । भुवनानामीशानमभिगतश्रियमुरुकृतं प्रभूतकर्मकारिणं सुवीरं शोभनापत्यहेतुम् । हेऽग्ने त्वं हविर्जुषाणः सपत्नाञ्शत्रूनभिभवितुं समर्थोऽसि । अतः शत्रूञ्जहि मृधो बाधकानपनुदस्व । एतदुभयमाग्नेये कर्मणि द्रष्टव्यम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

चतुर्थप्रपाठके सप्तमोऽनुवाकः ।। ७ ।।

अथ चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ।

अष्टमेऽनुवाके सर्वमप्याग्रयणसूक्तम् । तद्विनियोगं सूत्रकार आह-"स प्रत्नवदिति द्वे धाय्ये चतस्र आज्यभागयोर्दश हविषां द्वे स्विष्टकृतः" इति ।

तत्र प्रथमामृचमाह-

स प्रत्नवन्नवींयसा । अग्ने द्युम्नेनं संयता । बृहत्तं तन्य भानुना, इति ।

हेऽग्ने स त्वं प्रत्नवत्प्रत्नेन पुराणेन भानुनेव नवीयसाऽत्यन्तं नवतरेण द्युम्ने दीप्तेन संयता समू (से) ह्य गृहीतेन भानुना तेजसेदानीं बृहन्महद न्तरिक्षं ततन्थ तव यागानुरूपं नवतरं तेजः प्रसारयेत्यर्थः ।

अथ द्वितीया [माह] --

नवं नु स्तोमंमग्नयें । दिवः श्येनायं जीजनम् । वसोः कुविद्वनाति नः, इति ।

दिवो द्युलोकाच्छ्येनाय श्येनवत्क्षिप्रमागच्छतेऽग्नये नवं स्तोममभिनवं स्तोत्रं नु क्षिप्रं जीजनमुत्पादितवानस्मि । वसोर्धनस्य क्वचित्प्रभूतं भोगं नोऽस्माकं वनाति ददाति । एते उभे धाय्ये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथ तृतीया [माह]--

स्वारुहा यस्य श्रिये दृशे । रयिर्वीरवतो यथा । अग्रे यज्ञस्य चेततः, इति ।

यज्ञस्याग्र उपक्रमे सर्वं कर्तव्यं चेततश्चेतयमानस्य यस्याग्नेः श्रियः स्वारुहाः स्वस्मादेव प्ररूढा अपराधीना इत्यर्थः । दृशे दर्शनीयाः श्रियो भवन्ति । वीरवन्तः पुत्रवतः पुरुषस्य रयिर्धनं दर्शनीयं यथा भवति तद्वत्सोऽग्निः श्रीमानिति भावः ।

अथ चतुर्थी [माह]--

अदाभ्यः पुर एता (१) । अग्निर्विशां मानुषीणाम् । तूर्णी रथः सदानवः, इति ।

मानुषीणां विशां देवपरिचरभूतानामग्निः पुरत एताऽग्रेसरः केनचिदप्यदाभ्यो हिंसितुमशक्यस्तूर्णिस्तरणहेतुः । "सर्वं ह्येष तरति" इति ब्राह्मणम् । रथो रथस्वामी, अत एव "रथीरध्वराणाम्" इत्याम्नातम् । सदा सर्वदा नवोऽभिनवः ।

अथ पञ्चमी [माहं] --

नवꣳ सोमाय वाजिने । आज्यं पयसोऽजनि । जुष्टꣳ शुचितमं वसु, इति ।

वाजिनेऽन्नवते सोमाय नवं नूतनमाज्यं पयसोऽजन्युत्पन्नं तच्च जुष्टं प्रियं शुचितममत्यन्तं शुद्धं वसु श्रेष्ठम् ।

अथ षष्ठी [माह]--

नवꣳसोम जुषस्व नः । पीयूषस्येह तृप्णुहि । यस्ते भाग ऋता वयम्, इति ।

हे सोम नवमिदमाज्यं जुषस्व । नोऽस्मदीयस्य पीयूषस्यामृतसमानस्याऽऽज्यस्य भो (भा) गेनेह कर्मणि तृप्णुहि तृप्तो भव । यस्तवास्मिन्नृतौ कालविशेषे देवैः कल्पितो भागः सोऽयमाज्यरूपः । एताश्चतस्र आज्यभागयोः ।

Digitized by Madhuban Trust, Delhi

अथ सप्तमीमाह–

नवस्य सोम ते वयम् । आ सुमतिं वृणीमहे (२) । स नो रास्व सहस्रिणः, इति ।

हे सोम नवस्य नूतनमूर्तियुक्तस्य ते तव सुमतिमनुग्रहबुद्धिं वचमा समन्ताद्वृणीमहे । स त्वमस्मभ्यं सहस्रिणः सहस्रसंख्यस्य धनस्य भोगं रास्व देहि ।

अथाष्टमीमाह–

नव ँ हविर्जुषस्व नः । ऋतुभिः सोम भूतमम् । तदङ्ग प्रतिहर्य नः । राजन्त्सोम स्वस्तये, इति ।

हे सोमर्तुभिः कालैर्भूतममतिशयेन निष्पन्नं सुपक्वं नवं नूतनं श्यामाकरूपं नोऽस्मदीयं हविर्जुषस्व । अङ्गशब्दः प्रियसंबोधनवाची । अङ्ग सोमराजन्नोऽस्माकं स्वस्तये तद्धविः प्रतिहर्य श्रद्धस्व । एत उभे सौम्यस्य श्यामाकहविषो याज्यापुरोनुवाक्ये ।

अथ नवमी [माह] --

नव ँ स्तोमं नव ँ हविः । इन्द्राग्निभ्यां निवेदय । तज्जुषेता ँ सचेतसा, इति ।

नवं स्तोत्रं नवं हविश्चेन्द्राग्निभ्यामध्वर्यो निवेदय । तद्धविः सचेतसा समानचेतसाविन्द्राग्नी जुषेतां सेवेताम् ।

अथ दशमी [माह]--

शुचिं नु स्तोमं नवजातमद्य । इन्द्राग्नी वृत्रहणा जुषेथाम् (३) । उभा हि वा ँ सुहवा जोहवीमि । ता वाज ँ सद्य उशते धेष्ठा, इति ।

वृत्रहणौ शत्रुघातिनौ ह इन्द्राग्नी अद्यास्मिन्कर्मणि नवजातमभिनवत्वेनोत्पन्नं शुचिं नु स्तोमं स्तोत्रं जुषेयां हि यस्मादहं सुहवा सुखेनाऽऽह्वातुं शक्यौ वामुभा युवामुभौ जोहवीमि पुनः पुनराह्वयामि । तौ तथाविधौ युवामुशते कामयमानाय यजमानाय वाजमन्नं सद्यो धेष्ठा तस्मिन्नेव क्षणे संपादयतम् । एते उभे ऐन्द्राग्नस्य द्वादशकपालस्य याज्यानुवाक्ये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथैकादशी [माह]--

अग्निरिन्द्रो नवस्य नः । अस्य हव्यस्य तृप्यताम् । इह देवौ सहस्रिणौ, इति ।

अग्निश्चेन्द्रश्च नोऽस्मदीयस्य नवस्य नूतनस्यास्य हव्यस्य भागेन तृप्यतामिह कर्मणि तौ देवौ द्योतमानौ सहस्रिणौ सहस्रसंख्याकधनप्रदौ स्ताम् ।

अथ द्वादशी [माह]--

यज्ञं न आ हि गच्छताम् । वसुमन्तꣳसुवर्विदम् । अस्य हव्यस्य तृप्यताम् । अग्निरिन्द्रो नवस्य नः, इति ।

अग्निश्चेन्द्रश्चोभौ नोऽस्मदीयस्य नवस्यास्य हव्यस्य तृप्यतां तदर्थं नोऽस्मदीयं यज्ञमा हि गच्छतां सर्वथैवाऽऽगच्छताम् । कीदृशं यज्ञम् । वसुमन्तं बहुधनप्रदं सुवर्विदं स्वर्गलाभसाधनम् । अत्र यद्विकल्पितं हविरैन्द्राग्नं द्वादशकपालमाग्नेन्द्रं वेति तत्रैन्द्राग्नस्य पूर्वे ऋचावाग्नेन्द्रस्य त्वेते उभे याज्यानुवाक्ये ।

अथ त्रयोदशी [माह]--

विश्वान्देवाꣳस्तर्पयत (४) । हविषोऽस्य नवस्य नः । सुवर्विदो हि जज्ञिरे, इति ।

हे ऋत्विजो नोऽस्मदीयस्य नवस्यास्य हविषो भागेन विश्वान्देवांस्तर्पयत । यस्मात्ते विश्वे देवाः सुवर्विदो जज्ञिरे स्वर्गलाभहेतवो जाताः ।

अथ चतुर्दशी [माह]--

एदं बर्हिः सुष्टरीमा नवेन । अयं यज्ञो यजमानस्य भागः । अयं बभूव भुवनस्य गर्भः । विश्वे देवा इदमद्याऽऽगमिष्ठाः, इति ।

इदं बर्हिः सुष्टरीम सुष्ठु स्तीर्णं सर्वतोऽभूत् । नवेन हविषा युक्तो यजमानस्यायं यज्ञो भागो विश्वैर्देवैर्भजनीयः । सोऽयं यज्ञो भुवनस्य भूतजातस्य गर्भो रक्षकत्वेनान्तरवस्थितो बभूव । हे विश्वे देवा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अद्यास्मिन्कर्मणीदमास्तीर्णं बर्हिः प्रत्यागमिष्ठा आगच्छत । एते उभे वैश्वदेवस्य हविषो याज्यानुवाक्ये ।

अथ पञ्चदशी [माह]--

इमे नु द्यावापृथिवी समीची । तन्वाने यज्ञं पुरुपेशसं धिया । आस्मै पृणीतां भुवनानि विश्वा । प्रजां पुष्टिममृतं नवेन (५), इति ।

इमे न्विमे एव द्यावापृथिव्यौ समीची परस्परेण संगते सत्यौ पुरुपेशसं बहुरूपं यज्ञं धिया स्वबुद्ध्या तन्वाने विस्तारयन्त्यावस्मै यजमानाय विश्वा भुवनानि सर्वाणि भूतजातान्यापृणीतां सर्वतः पालयेताम् । तथा प्रजां पुष्टिममृतमन्नं च नवेन हविषा स्वीकृतेन तत्सर्वं संपादयेताम् ।

अथ षोडशी [माह]--

इमे धेनू अमृतं ये दुहाते । पयस्वत्युत्तरामेतु पुष्टिः । इमं यज्ञं जुषमाणे नवेन । समीची द्यावापृथिवी घृताची, इति ।

ये द्यावापृथिव्यावमृतं वृष्ट्यन्नरूपं दुहाते इमे द्यावापृथिव्यौ सर्वेषां प्राणिनां धेनुस्थानीये पुष्टिर्धनसमृद्धिरुत्तरामुत्तरोत्तरातिशयावस्थामेत्वा गच्छतु । कीदृशी पुष्टिः । पयस्वती प्रभूतवृष्ट्युदकयुक्ता नवेन नूतनेन हविषेमं यज्ञं जुषमाणे सेवमाने समीची परस्परानुकूले द्यावापृथिव्यौ घृताची घृतमुदकं क्षरन्त्यौ भवेताम् । एते उभे ऋचौ द्यावापृथिव्यामेककपालमित्यस्य याज्यानुवाक्ये ।

अथ सप्तदशी [माह]--

यविष्ठो हव्यवाहनः । चित्रभानुर्घृतासुतिः । नवजातो विरोचसे । अग्ने तत्ते महित्वनम्, इति ।

हेऽग्ने त्वं यविष्ठो युवतमो हव्यवाहनो हविषो वोढा चित्रभानुर्विचित्रदीप्तिर्घृतासुतिर्घृतादशनो नवजातः प्रतिक्षणं नूतनज्वालारूपेणोत्पन्नो विरोचसे विशेषेण दीप्यसे तन्महित्वनं तदेतन्माहात्म्यं ते तवैव न त्वन्यस्यास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथाष्टादशी [माह]--

त्वमग्ने देवताभ्यः। भागे देव न मीयसे (६)। स एनां विद्वान्यक्ष्यसि । नवं स्तोमं जुषस्व नः, इति ।

हेऽग्ने त्वं देवताभ्यः सर्वाभ्यो भागे त्वयोह्यमानेऽपि न मीयसे न हिंस्यसे । यथा तव भ्रातरो देवेभ्यो हव्यं वहन्तो मृता न तथा त्वमित्यर्थः । स त्वमेना देवता विद्वान्यजानो यक्ष्यस्यस्मदीयं नवं स्तोमं स्तोत्रं जुषस्व । एते उभे स्विष्टकृतः संयाज्ये ।

अथैकोनविंशी [माह]--

अग्निः प्रथमः प्राश्नातु । स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः । कृणोतु विश्वचर्षणिः, इति ।

अयमग्निरिमं हविःशेषं मत्तः प्रथमभावी सन्प्राश्नातु । स ह्यग्निर्यथेदं हविः संभूतं यथा चोपभोज्यं तथा वेद जानाति । अस्मभ्यं विश्वचर्षणिर्विश्वस्य द्रष्टाऽग्निरोषधीः शिवाः सुखकराः कृणोतु करोतु । अयं मन्त्रः श्यामाकवरुहविषः प्राशने विनियुक्तः ।

अथ विंशी [माह]--

भद्रान्नः श्रेयः समनैष्ट देवाः । त्वया वसेन समशीमहि त्वा । स नो मयोभूः पितो आविश शस्व । शं तोकाय तनुवे स्योनः, इति ।

हे देवा नोऽस्माकं भद्राद्वर्तमानाच्छ्रेयसोऽप्यधिकं श्रेयः संमनैष्ट सम्यगानयत । हे पितोऽन्न त्वया वसेन त्वद्रूपेण रक्षकेण पाथेयेन त्वां समशीमहि सम्यगश्नुवीमहि । संवत्सरपर्यन्तं त्वयैव जीवाय इत्यर्थः । स त्वं नोऽस्माकं मयोभूः सुखं भावयन्नाविशस्वोदरं प्रविश । तोकाय पुत्राय तनुवे शरीराय च शं भव शान्तो भव । स्योनः सुखकरश्च भव । अयं मन्त्रो व्रीह्याग्रयणस्य शेषभक्षणे विनियोज्यः -

अथैकविंशीमाह-

एतमु त्यं मधुना संयुतं यवम् । सरस्वत्या अधिमनावचर्कृषुः । इन्द्र आसीत्सीरपतिः शतक्रतुः । कीनाशा आसन्मरुतः सुदानवः (७), इति ।

Digitized by Madhuban Trust, Delhi

पुर एता वृणीमहे जुषेथां तर्पयतामृतं ऽनवेन मीयसे स्योनश्चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
चतुर्थाध्यायेऽष्टमोऽनुवाकः ॥ ८ ॥

जुष्टश्चक्षुषो जुष्टीनरो नक्तंजाता वृषास उत नो वृषास्य ँशुः स प्रत्नवदष्टौ ॥ ८ ॥

जुष्टी मन्युर्भगो जुष्टीनरो हरिवर्पसं गिरः शिप्रिन्वाजानामुत नो यद्वाग्वदन्ती विश्वा आशा अशीतिः ॥ ८० ॥

हरिः ॐ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे
द्वितीयाष्टके चतुर्थोऽध्यायः

अधिमनौ युगादिभूते मनौ प्रजापतौ राजनि सति तस्मिन्काले कृषिकाः सरस्वत्या नद्या मधुरेण जलेन संयुतमेतम्विदानीं पुरतो दृश्यमानमेव यवं त्वं ह्यवधान्यविशेषमचर्कृषुः क्षेत्रेषूप्तवन्तो योऽयं यव इदानीं दृश्यते तस्य यवस्य कृषिमादिकाले प्रारब्धवन्त इत्यर्थः । के कर्षकाः कश्च तत्स्वामीति तदुभयमुच्यते । इन्द्रः शतक्रतुः शतसंख्याकैरश्वमेधैर्लब्धपदो यः सोऽयं सीरपातिर्हलस्वाम्यासीत् । सुदानवः सुष्ठु दातारो मरुतः कीनाशाः कृषिकर्मकरा आसन् । अयं मन्त्रो यवाग्रयणस्य शेषभक्षणे विनियोज्यः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारनन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये
वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये
द्वितीयकाण्डे चतुर्थः प्रपाठकः समाप्तः ॥ ४ ॥

(मूलक्रमेण-अष्ट. २ अध्या. ४ (१२) अनु.य८ (११९)।
(भाष्यक्रमेण-कां. २ प्रपा. ४ (१२) अनु. ८ (११९)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथ द्वितीयकाण्डे पञ्चमप्रपाठकारम्भः

तत्र प्रथमोऽनुवाकः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
चतुर्थ उपहोमार्था मन्त्रा बहव ईरिताः ।
प्रपाठके पञ्चमेऽस्मिंस्तच्छेष उपवर्ण्यते ॥

तत्र प्रथमानुवाके प्रथमामृचमाह-

प्राणो रक्षति विश्वमेजत् । इर्यो भूत्वा बहुधा बहूनि ।
स इत्सर्वं व्यानशे, इति ।

योऽयं मुखनासिकावर्ती प्राणवायुः सोऽयं बहुधा भूत्वा प्राणापानादिवृत्तिभेदेनानेकप्रकारो भूत्वा बहूनि जीवजातानि प्रतीर्यः प्रेरकः सन्नेजत्कम्पमानं जंगमरूपं जगद्रक्षति स इत्स एव प्राणः सर्व जगद्व्यानशे व्याप्तवान् ।

अथ द्वितीयमाह-

यो देवो देवेषु विभूरन्तः । आवृदूदात्क्षेत्रियं ध्वगद्वृषा ।
तमित्प्राणं मनसोपशिक्षत । अग्रं देवानामिदमत्तु नो हविः,
इति ।

दीव्यन्तीति देवाः प्राणचक्षुः श्रोत्रादयस्तेषु देवेषु मध्ये यो मुख्यो देवः प्राणः श्वासकर्ता सोऽयमन्तरावृदूदात्पुनः पुनरन्तर्धहिश्चाऽऽवर्तमानत्वात् । विभुः कृत्स्नदेहव्यापी क्षेत्री शरीरं तस्य स्वामी वृषा श्रेष्ठः । तस्य दृष्टान्तः-अध्वगद्यथा लोकेऽध्वगो नाऽऽध्वगो नाऽऽलस्यगमनं करोत्येवमयं प्राणः प्रतिक्षणमुच्छ्वासनिश्वासौ करोति तमित्तमेव प्राणं मनसोपशिक्षत भक्तिपुरःसरमुपचरत । स प्राणो देवानां मध्येऽग्रं प्रथमं नोऽस्मदीयमिदं हविरत्तु भक्षयतु । यदुक्तमैतरेयब्राह्मणे-"चक्षुः श्रोत्रं मनो वाक्प्राणस्ता एताः पञ्च देवता इमं विश्लिष्टाः पुरुषम्" इति । तदेतन्मन्त्रद्वयं प्राणदेवताविषयं द्रष्टव्यम् ।

अथ तृतीयामाह-

Digitized by Madhuban Trust, Delhi

मनसश्चित्तेदम् । भूतं भव्यं च गुप्यते । तद्धि देवेष्वग्रियम् (१), इति ।

यदिदं मनोऽन्तःकरणमस्ति तस्य चित्ता चित्तेन वृत्तिविशेषेणेदं दृश्यमानं भूतं भव्यं चातीतमनागतं च सर्वं गुप्यते रक्ष्यते । यत्पूर्वं निष्पन्नं पुत्रभृत्यादि चेतनं धनधान्याद्यचेतनं यश्चेतः परं संपादनीयं चेतनमचेतनं च तत्सर्वं मनसैव परिरक्ष्यते । तद्रक्षोपायानां मनसा चिन्त्यमानत्वात् । हि यस्मात्कारणात्तन्मनो देवेषु दीप्यमानेष्विन्द्रियेष्वग्रियं श्रेष्ठं तस्मात्तेन रक्षणमुचितम् ।

अथ चतुर्थीमाह–

आ न एतु पुरश्चरम् । सह देवैरिम हवम् । मनः श्रेयसि श्रेयसि । कर्मन्यज्ञपतिं दधत, इति ।

तन्मनो देवैर्दीप्यमानैरन्यैरिन्द्रियैः सह पुरश्चरं स्वयमग्रगामि भूत्वा नोऽस्मदीयमिमं हवमाह्वानं प्रत्येत्वाभिमुख्यं प्राप्नोतु । किं कुर्वञ्श्रेयसि श्रेयसि कर्मस्तस्मिंस्तस्मिन्प्रशस्ते कर्मणि यज्ञपतिं दधद्यजमानं स्थापयतु सर्वेषु पुण्यकर्मसु प्रवर्तयत्वित्यर्थः । तदेतन्मन्त्रद्वयं मनोदेवताविषयं द्रष्टव्यम् ।

अथ पञ्चमीमाह–

जुषतां मे वागिद हविः । विराड् देवी पुरोहिता । हव्यवाडनपायिनी, इति ।

इदं पुरोवर्ति मे हविर्वाग्देवी सेवताम् । कीदृशी । विराड् विविधं राजत इति विराड्विराजमाना देवी देवताविग्रहा पुरोहिता प्रथमतः प्रवृत्ता । यद्यपि पुरश्चरत्वं मनस उक्तं तथाऽपि कायव्यापारापेक्षया पूर्वभावित्वं प्रथमप्रवृत्तिर्वचसो युक्ताऽत एव व्यवहारक्रमोऽन्यत्राऽऽम्नातः–"यदि मनसा ध्यायति तद्वाचा वदति तत्कर्मणा करोति" इति । हव्यवाट् वाचा हि मन्त्रमुच्चार्य हविर्दीयते तस्माद्वागियं हविर्वहतीत्युपचर्यते । अनपायिनी सर्वेष्वपि व्यवहारेष्वनुगता । न हि वागिन्द्रियमन्तरेणातीतानागतविषयो व्यवहारः संभवति ।

अथ षष्ठीमाह –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

यया रूपाणि बहुधा वदन्ति । पेशाᳬसि ᳬ देवाः परमे जनित्रे । सा नो विराडनपस्फुरन्ती (२) । वाग्देवी जुषतामिदᳬहविः, इति ।

यान्येतानि देवतिर्यङ्मनुष्यादिरूपाणि यानि च नीलपीतशुक्लकृष्णादिरूपाणि तानि सर्वाणि यया वाचा मनुष्या बहुधा वदन्ति इदं समीचीनमिदमसमीचीनमित्येताद्दशं बहुधा वदन्ति तथा परमे जनित उत्तमे जन्मानि वर्तमाना देवाश्च पेशांसि रमणीयानि रूपाणि यथा वाचा वदन्ति सा वाग्देवी नोऽस्मदीयमिदं हविर्जुषताम् । कीदृशीवागर्थप्रकाशकत्वेन विविधं राजत इति विराट् । अपस्फुरणमर्थाभिधाने कुण्डीभावस्तद्राहित्यादनपस्फुरयन्ति । तदिदं मन्त्रद्वयं वाग्देवताविषयं द्रष्टव्यम् ।

अथ सप्तमीमाह -

चक्षुर्देवानां ज्योतिरमृते न्यक्तम् । अस्य विज्ञानाय बहुधा निधीयते । तस्य सुम्नमशीमहि । मा नो हासीद्विचक्षणम्, इति ।

देवानां दीव्यमानानामिन्द्रियाणां मध्ये चक्षुरिन्द्रियं ज्योतिर्विस्पष्टभासकं तच्चामृते मरणरहित आदित्यस्वरूपे न्यक्तं निर्लीनम् । अत एव बह्वृचा आमनन्ति- आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् । इति । तदिदं चक्षुरस्य सर्वस्य नीलपीतादिरूपजातस्य बहुधा विज्ञानाय नानाविधज्ञानसिद्धये निधीयते पजापतिना व्यवस्थाप्यते । तस्य चक्षुरिन्द्रियस्य सुम्नं सुखं तेन चक्षुरिन्द्रियेण रूपप्रकाशने सति यत्सुखं जायते तत्सर्वमशीमह्यश्नुवीमहि प्राप्नुयाम । विचक्षणं विशेषेण प्रकाशकं तच्चक्षुरिन्द्रियं नोऽस्मान्मा हासीत्कदाचिदपि मा परित्यजतु ।

अथाष्टमीमाह-

आयुरिन्नः प्रतीर्यताम् । अनन्धाश्चक्षुषा वयम् । जीवा ज्योतिरशीमहि । सुवर्ज्योतिरुतामृतम्, इति ।

चक्षुर्देवताप्रसादेन नोऽस्मदीयमायुरित्यप्रतीर्यतां सर्वथा वर्धताम् । अनेन चक्षुषा युक्ता वयं जीवाः क्वाप्यनन्धाः सन्तो रूपाभिव्यक्तवृत्तिलक्षणं ज्योतिरशीमहि प्राप्नुयाम । उतापि च सुवः

Digitized by Madhuban Trust, Delhi

स्वर्गस्थममृतं ज्योतिर्विनाशरहितमादित्यप्रकाशमशीमहि चक्षुषा पश्येम । तदिदं मन्त्रद्वयं चक्षुर्देवताविषयं द्रष्टव्यम् ।

अथ नवमीमाह-

श्रोत्रेण भद्रमुत शृण्वन्ति सत्यम् । श्रोत्रेण वाचं बहुधोद्यमानाम् । श्रोत्रेण मोदश्च महश्च श्रूयते । श्रोत्रेण सर्वा दिश आशृणोमि, इति ।

यद्भद्रं कल्याणं यच्च सत्यं वचनं तत्सर्वं श्रोत्रेणैव सर्वे शृण्वन्ति । येयं वाक्प्राणिभिर्बहुधोच्यते तां सर्वां वाचमनेन श्रोत्रेन्द्रियेण सर्वो जनः शृणोति । किंच योऽयं मोदो हर्षविषयो वृत्तान्तो यच्च महः पूजाविषयो वृत्तान्तः स सर्वोऽपि श्रोत्रेणैव श्रूयते । किंच सर्वा दिशो योऽयं सर्वदिग्विषयो वृत्तान्तस्तमप्यहं श्रोत्रेण आशृणोमि ।

अथ दशमीमाह-

येन प्राच्या उत दक्षिणा । प्रचीत्य दिशः शृण्वन्त्युत्तरात् । तदिच्छ्रोत्रं बहुधोद्यमानम् । अरान्न नामः परि सर्वं बभूव (३), इति ।

अग्रियमनपस्फुरन्ती ँ सत्य ँ सप्त च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
पञ्चमाध्याये प्रथमोऽनुवाकः ।। १ ।।

येन श्रोत्रेण प्राच्यादिदिग्भ्य आगतं शब्दं शृण्वन्ति तदेव श्रोत्रं बहुधोद्यमानमुच्यमानं शब्दजातं सर्वं परिबभूव परिगृह्य वर्तते । रथनेमिरिव सर्वा नरांश्चक्रस्य वहिर्वलग्रो नेमिस्तदन्त्वर्तिनोऽयववाः कालसंज्ञा अराः । एतच्च मन्त्रद्वयं श्रोत्रविषयं द्रष्टव्यम् । एतेषां मन्त्राणां जातकर्मणि विनियोगं बौधायन आह-"अथैनं दधि मधु घृतमिति समुदाहृत्य हिरण्येन प्राशयति प्राणो रक्षति विश्वमेजदित्यनुवाकेन प्रत्यृचम्" इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
पञ्चमप्रपाठके प्रथमोऽनुवाकः ।। १ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथ पञ्चमप्रपाठके द्वितीयोऽनुवाकः ।

द्वितीयेऽनुवाके प्रथमामृचमाह-

उदेहि वाजिन्यो अस्यप्स्वन्तः । इदꣳ राष्ट्रमाविश सूनृतावत् । या रोहितो विश्वमिदं जजान । स नो राष्ट्रेषु सुधितां दधातु, इति ।

हे वाजिन्नश्वमेधे कर्मणि प्रयुज्यमान हेऽश्वोदेहि जलमध्यादुद्गच्छ । अत्राश्वमेधे भारद्वाजसूत्रम् -"अश्वमपोऽवगाह्य स्नपयित्वा समू(मु)ह्य ततो ह्यस्तार मनुदकमुदानयति उदेहि वाजिन्नित्यष्टाभिः" इति । अतोऽत्राश्वमेधगतमश्वं संबोध्योच्यते योऽयमश्वोऽप्स्वन्तर्वर्तते स त्वमुदेह्युदगत्य च सूनृतावत्प्रीतियुक्तमिदं राष्ट्रमाविश । इहाऽऽस्यतामिह भुज्यतामित्येवंरूपा वाणी सूनृता । अस्य चाश्वस्य प्रजापतिजन्यत्वेन तद्रूपत्वमुपचर्य प्रशस्यते-योऽश्वः स्वकारणभूतप्रजापतिरूपेण रजोगुणयुक्ताद्रोहितः सन्निदं विश्वं जजानोत्पादयामास स प्रजापतिरूपोऽश्वो नोऽस्माननेतेषु राष्ट्रेषु सुधितान्सुखयुक्तान्कृत्वा स्थापयतु ।

अथ द्वितीयामाह-

रोह ँरोह रोहित आरुरोह । प्रजाभिर्वृद्धिं जनुषामुपस्थम् । ताभिः सꣳरब्धो अविदत्षडुर्वीः । गातुं प्रपश्यन्निह राष्ट्रमाहाः, इति ।

हे रोहित रोहिद्वर्ण प्रजापतिस्वस्वरूपाश्व रोहं रोहं भौमं भोगं स्वर्गभोग मारुरोहाऽऽरोहणं कुरु । काभिः प्रजाभिः सह । कमिव, वृद्धिमिच्छतां प्रजानां संबन्ध्युपस्थं प्रत्यारोहणमिव ताभिः प्रजाभिः सह संरब्ध उत्साहयुक्तः सन्षदुर्वीरविदज्ज्ञातवानसि । उर्वीर्गातुं गन्तुं प्रपश्यन्निह राष्ट्रमाह राहृवानसि । तव प्रेक्षणवशाद्राष्ट्रस्था जनाः संनिहिता इत्यर्थः ।

अथ तृतीयामाह-

आहार्षीद्राष्ट्रमिह रोहितः । मृधो व्यास्थदभयं नो अस्तु (१) । अस्मभ्यं द्यावापृथिवी शक्वरीभिः । राष्ट्रं दुहाथामिह रेवतीभिः, इति ।

रोहितस्त्वं राष्ट्रमिहाहार्षीदाहृतवानसि । व्यास्थद्विरोधि-

Digitized by Madhuban Trust, Delhi

निष्पाद्यान्मृधो युद्धादश्वाभिन्नप्रजापते । तव प्रसादान्नोऽभयमस्तु । अश्वाभिन्नप्रजापते तव प्रसादाद् द्यावापृथिवी द्यावापृथिव्यौ शक्वरीभिः शक्वरीछन्दोयुक्ताभी रेवतीभिः सामाभिमानिनीभिर्देवताभिः । सहास्मभ्यमस्मदर्थं राष्ट्रं दुहाथां पूरयन्त्यौ ।

अथ चतुर्थीमाह–

विर्ममर्श रोहितो विश्वरूपः । समाचक्राणः प्ररुहो रुहश्च । दिवं गत्वाय महता महिम्ना । वि नो राष्ट्रमुनत्तु पयसा स्वेन, इति ।

स रोहितः प्रजापतिर्विममर्श कृतवाननेनेदं कर्म कृतमयस्य फलस्य योग्य इति परामर्शः । कीदृशः प्रजापतिर्विश्वरूपः सर्वजगदाकारेण वर्तमानस्तथा समाचक्राणः सम्यगासमन्ताद्यजमानान्फल-विशेषान्कुर्वाणः । ते च फलविशेषाः प्ररुहो रुहश्चेति शब्दद्वयेन निर्दिश्यन्ते । प्रकर्षेण रुह्यन्ते प्राप्यन्त इति प्ररुहः स्वर्गभोगा रुहो मानुषा भोगास्तदुभयं कुर्वाणः स प्रजापतिर्दिवं गत्वाय स्वर्गं प्राप्य महता महिम्ना स्वकीयेनातिधिक्येन माहात्म्येन नोऽस्मदर्थमिदं राष्ट्रं स्वेन पयसा स्वकीयेन वृष्टिजलेन व्युनत्तु विशेषेण क्लेदयतु ।

अथ पञ्चमीमाह–

यास्ते विशस्तपसा संबभूवुः । गायत्रं वत्समनु तास्त आगुः । तास्त्वा विशन्तु महसा स्वेन । सं माता पुत्रो अभ्यैतु रोहितः । (२), इति ।

हे रोहित प्रजापते त्वदीयेन तपसा या विशः प्रजाः संबभूवुः । तथा ह्यन्यत्राऽऽम्नायते–"स तपोऽतप्यत । स तपस्तप्त्वा इदं सर्वमसृजत" इति ते त्वदीयास्ताः प्रजा गायत्रं वत्समन्वागुः । "एष वै गायत्र्यै वत्सो यदाग्रयणः" इति श्रुत्यन्तरात् । आग्रयणग्रहो गायत्र्याख्य-धेनोर्वत्सस्थानीयः । तमाग्रयणाख्यं वत्समश्वमेधस्य मध्यमेऽहन्यनुष्ठितवन्तः । ताः प्रजाः स्वेन । स्वकीयेनानुष्ठितेन महिमाख्यग्रहेण त्वां विशन्तु । किं बहुना । माता सर्वभूतानां सम्यङ्निर्माता पुत्रवद्रक्षको रोहितोऽश्वरूपः । प्रजापतिरभ्यैत्वनभिलक्ष्याऽऽगच्छतु ।

अथ षष्ठीमाह–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

यूयमुग्रा मरुतः पृश्निमतारः । इन्द्रेण सयुजा प्रमृणीथ शत्रून् । आ वो रोहितो अशृणोदभिद्यवः । त्रिसप्तासो मरुतः स्वादुसंमुदः, इति ।

हे मरुतो यूयं सयुजा युष्माभिः सहावस्थितेनेन्द्रेण साकमस्मदीयाञ्शत्रून्प्रमृणीथ निराकुरुत । रोहितः प्रजापतिरूपोऽयमश्वो वो युष्मानाशृणोच्छत्रुक्षयकारिण एत इति भवदीयां कीर्तिं सर्वदा शृणोति । कीदृशा मरुतः उग्राः शत्रुविषये कोपयुक्ताः । पृश्निमर्तैषां ते पृश्निमातरः । 'पृश्नेः पुत्रा उपमासः' इति हि मन्त्रान्तरम् । "पृश्नियै वै पयसो मरुतो जाताः" इति च ब्राह्मणम् । अभिद्यवोऽभितो द्योतमानास्त्रिसप्तासस्त्रिविधाः । सप्त संख्या येषां ते त्रिसप्तासः । "सप्तगणा वै मरुतः" इति ब्राह्मणाम्नानात् । सप्तगणाः सप्तसंख्याकाः । तत्र धृनिश्च ध्वान्तश्चेत्यरण्यकानुवाकोक्तो गणो मध्यमः । तस्मात्पूर्ववर्तिन ईदृङ्चेत्यादिनोक्तास्त्रयो गणाः ऋतश्च सत्यश्चेत्यादिनोक्ता उत्तरभाविनस्त्रयो गणास्तत्रैकस्मिन्गणत्रये तिस्रः सप्तसंख्या इति स्वादुसंमुद्रः । अत्र मरुत इति संबुद्धयन्तं पदं द्विराम्नातम्, तच्च वाक्यद्वये योजनीयम् । हे मरुतः शत्रून्प्रमृणीथ । हे मरुतो युष्मान्रहितोऽशृणोदिति योजना ।

अथ सप्तमीमाह-

रोहितो द्यावापृथिवी जजान । तस्मिꣳस्तन्तुं परमेष्ठी ततान । तस्मिञ्छिश्रिये अज एकपात् । अदृꣳहद् द्यावापृथिवी बलेन, इति ।

योऽयं रोहितोऽश्वरूपः प्रजापतिः स एव पुरा द्यावापृथिव्यावुत्पादितवान् । तस्मिन्रोहितेऽश्वे परमेष्ठी प्रजापति स्तन्तुमश्वमेधतन्तुपरम्परां ततान विस्तारितवान् । एक एव पद्यते गच्छतीत्येकपात् । तथा च मन्त्रान्तरम् -"सूर्य एकाकी चरति" इति । स च मनुष्यवत्सृष्टिमध्ये पुनः पुनर्जन्मरहितत्वादजस्तादृशः सूर्योऽपि तस्मिन्रोहितेऽश्वे शिश्रिय आश्रितवान् । रोहिताश्वस्य प्रजापतिद्वारा जगत्सृष्टिकर्तृत्वात्सूर्यस्य तदाश्रितत्वं युक्तम् । स च रोहितः प्रजापतिः स्वकीयेन बलेन द्यावापृथिव्यावदृंहद्दृढीचकार ।

अथाष्टमीमाह-

रोहितो द्यावापृथिवी अदृꣳहत् । तेन सुवः स्तभितं तेन

Digitized by Madhuban Trust, Delhi

नाकः () । सो अन्तरिक्षे रजसो विमानः । तेन देवाः सुवरन्वयबिन्दन्, इति ।

रोहितः प्रजापतिर्द्यावापृथिव्यौ दृढीकृतवांस्तेन रोहितेन सुवः स्तभितं स्वर्गलोको यथाऽधो न पतति तथा स्तम्भितस्था नाकनामा स्वर्गविशेषोऽपि तेन स्तम्भितः । स एव रोहितोऽन्तरिक्षे रजसो रञ्जकस्य ज्योतिर्गणस्योदकस्य वा विमानो निर्माता । तेन रोहितेन देवा इन्द्रादयोऽपि सुवरन्वविन्दन्स्वर्गं लब्धवन्तः एवमेतैरष्टभिर्मन्त्रैरश्वमेधग-तस्याश्वस्य जलमध्यादुद्गमनं कुर्यात् ।

अथ नवमीमाह-

सुशेवं त्वा भानवो दीदिषा ँ सम् । समग्रासो जुह्वो जातवेदः । उक्षन्ति । त्वा बाजिनमाघृतेन । स ँ समग्ने युवसे भोजनानि, इति ।

हे जातवेदो जुह्वो जुह्वाद्याः स्रुचः समग्रा घृतपूर्णाः सत्यः स्विष्टेन घृतेन त्वामुक्षन्ति । कीदृश्यो जुह्वाद्याः भानवो घृतपूर्णत्वाद्भासमानाः । कीदृशं त्वाम् । सुशेवं सुखेन शक्यं दीदिवांसमत्यन्तं वातजिनं वेग वन्तम् । अत्र त्वेति पदं द्वितीयान्तं द्विराम्नातम् । तत्रैकं प्रथमान्तरेनोपरि नेतव्यम् । हेऽग्ने त्वं भोजनानि भोक्तुं योग्यान्यस्मदीयवर्हीषि संसमत्यन्तसम्यक्त्वेन युवसे मिश्रयसि स्वीकरोषीत्यर्थः ।

अथ दशमीमाह-

अग्ने महते सौभगाय । तव द्युम्नान्युत्तमानि सन्तु । सं जास्पत्य ँ सुयमाकृणुष्व । शत्रूयतामभितिष्ठा महा ँसि (४), इति ।

अस्त्वेतु रोहितो नाको महा ँसि ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके पञ्चमाध्याये द्वितीयोऽनुवाकः ।। २ ।।

हेऽग्नेस्माकं महते सौभगाय सौभाग्याय शर्धोत्सहस्व । तव संबन्धीति द्युम्नान्युत्तमानि मणिमुक्तादीनि धनान्यस्माकं सन्तु । जास्पत्यं जायापति भावं सुयमं सुष्ठु नियतं समाकृणुष्व सम्यक्संपादय । शत्रूयतां शात्रवमिच्छतां पुरुषाणां महांसि तेजांस्यभितिष्ठाभित आक्रमस्व । इदं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

मन्त्रद्वयमाग्नेये कर्मणि द्रष्टव्यम्। तत्रोत्तरस्य विवाहकर्मण्यपि विनियोगं बोधायन आह- "अथ तथोपविश्यान्वारब्धायामुपयमनीर्जुहोत्यग्ने शर्ध महते सौभगाय" इति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

अथ पञ्चमप्रपाठके तृतीयोऽनुवाकः।

तृतीयानुवाके प्रथमामृचमाह-

पुनर्न इन्द्रो मघवा ददातु। धनानि शक्रो धन्यः सुराधाः। अर्वाचीनं कृणुतां याचितो मनः। श्रुष्टी नो अस्य हविषो जुषाणः, इति

अस्मदीयानि धनानि यानि नष्टानि तानि सर्वाणि पुनरपि नोऽस्मभ्यमिन्द्रो ददातु। कीदृश इन्द्रः। मघवा धनवाञ्छक्रः शक्तियुक्तो धन्यो धनदानार्हः सुराधाः। शोभनान्नयुक्तस्तादृशोऽयमिन्द्रो याचितोऽस्माभिः प्रार्थितः सन्स्वकीयं मनोऽर्वाचीनं कृणुतामस्मदभिमुखं करोतु। नोऽस्मदीयस्यास्य हविषो भागं श्रुष्टी जुषाणः शीघ्रं सेवमानः स इन्द्रोऽस्मदभीष्टं करोतु।

अथ द्वितीयामाह-

यानि नो जिनन्धनानि। जहर्थ शूर मन्युना। इन्द्रानुविन्द नस्तानि। अनेन हविषा पुनः, इति।

हे शूरेन्द्र त्वं विहितस्याननुष्ठानान्निषिद्धसेवनाद्वा पापयुक्तान्नोऽस्माञ्जिनञ्शिक्षार्थं हिंसन्मन्युनाऽस्मासु क्रोधेन यान्यस्मदीयानि धनानि जहर्थाहपहृतवानसि। अनेनास्मदीयेन हविषा तुष्टः सन्पुनरपि नोऽस्माकं तानि धनान्यनुविन्दानुग्रहेण लभस्व। देहीत्यर्थः। एतदुभयं नष्टधनस्य पुनः प्राप्त्यर्थे कस्मिंश्चिदैन्द्रे कर्मणि द्रष्टव्यम्।

अथ तृतीयामाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्र आशाभ्यः परि । सर्वाभ्योऽभयं करत् (१) । जेता शत्रुन्विचर्षणिः, इति ।

विचर्षणिर्विविच्य द्रष्टा शत्रूणां जेतेन्द्रः, सर्वाभ्यो दिग्भ्यः परितो वर्तमानाभ्योऽस्माकमभयं करत्करोतु । अयं मन्त्र पूर्वत्रैवोपहोमार्थः ।

अथ चतुर्थीमाह—

आकूत्यै त्वा कामाय त्वा समृधे त्वा । पुरो दधे अमृतत्वाय जीवसे, इति ।

हे इन्द्राऽऽकूत्यादिसिद्ध्यर्थं त्वां पुरो दधे पुरस्कृत्य सेवे । आकूतिः संकल्पः कामो भोगः ससृत्समृद्धिरमृतत्वमपमृत्युराहित्यं जीवनमन्नादिसंपत्तिः ।

अथ पञ्चमीमाह—

आकूतिमस्यावसे । काममस्य समृद्ध्यै । इन्द्रस्य युञ्जते धियः, इति ।

लोके बुद्धिमन्तः कर्मणे वसे रक्षणार्थं समृद्ध्यै धनादिसमृद्ध्यर्थं चास्येन्द्रस्याऽऽकूतिं संकल्पं काममिच्छां धियो बुद्धिविशेषाश्च युञ्जत आश्रयन्ति । न त्विन्द्रनैरपेक्ष्येण स्वतन्त्रानाकृत्यादीँल्लभन्ते ।

अथ षष्ठीमाह—

आकूतिं देवीं मनसः पुरो दधे । यज्ञस्य माता सुहवा मे अस्तु । यदिच्छामि मनसा सकामः । विदेयमेनद्धृदये निविष्टम् (२), इति ।

अहमाकूतिं संकल्पाभिमानिनीं देवीं कार्येषु कुर्वाणस्य मनसः पुरो दधे संकल्पपूर्वमेव सर्वं कार्यं मदीयेन मनसा क्रियत इत्यर्थः । सेयमाकूतिर्यज्ञस्य मातृस्थानीया सती मे मम सुहवा सुखेनाऽऽह्वातुं शक्याऽस्तु । सकामः कामसहितोऽहं मदीयेन मनसा । यत्कार्यं कर्तुमिच्छामि मदीये हृदये निविष्टमेनत्तत्कार्यं विदेयं लभेयम् । अस्य मन्त्रस्य कर्मणामादौ संकल्पे विनियोगं बौधायन आह—"अस्य मन्त्रस्य कर्मणामादौ संकल्पे विनियोगं बौधायन आह—"आकूत्या वेदनं करोति । आकूत्यै त्वा कामाय त्वा समृधे त्वा" इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथ सप्तमीमाह-

सेदग्निरग्नी ँ र त्यैत्यन्यान् । यत्र वाजी तनयो वीडुपाणिः । सहस्रपाथा अक्षरा समेति, इति ।

यत्र यस्मिन्नग्नौ यजमानेनोपचरिते सति तनयः पुत्रो वाज्यन्नवान्वीडुपाणिर्यागदानादिषु दृढहस्तः सहस्रपाथाः सहस्रसंख्याकेनान्नेन युक्तः सन्नक्षराऽ क्षरेणाप्यविनाशेन जीवनेन समेति संगच्छते । सेदग्निः स एवोपचरितोऽ ग्निरन्यानितरयजमान-संबन्धीनग्नीनत्येत्यतिक्रामति । सोऽयं मन्त्रः प्रायणीयेष्टौ स्विष्टकृतः पुरोनुवाक्या ।

अथाष्टमीमाह-

आशानां त्वाशापालेभ्यः । चतुर्भ्यो अमृतेभ्यः । इदं भूतस्याध्यक्षेभ्यः । विधेम हविषा वयम्, इति ।

हे पशो त्वामाशानां दिशां मध्य आशापालेभ्यो विशिष्टानां दिशां पालेभ्यश्चतुर्भ्य इन्द्रयमवरुणसोमेभ्योऽमृतेभ्यो देवेभ्यः समर्पयामीति शेषः । भूतस्यास्मिन्कर्मणि प्राप्तस्य पशोरध्यक्षेभ्यः स्वामिभ्यो देवेभ्यो वयं हविषेदं विधेम शीघ्रमेव परिचरेम ।

अथ नवमीमाह -

विश्वा आशा मधुना स ँ सृजामि । अनमीवा आप ओषधयो भवन्तु । अयं यजमानो मृधो व्यस्यताम् । अगृभीताः पशवः सन्तु सर्वे, इति ।

विश्वा आशाः सर्वा दिशोऽहं मधुना मधुरेण वृष्ट्युदकेन संसृजामि संयोजयामि । तेनाऽऽप ओषधयश्चानमीवा रोगरहिता भवन्तु । अयं च यजमानो मृधः शत्रून्व्यस्यतां निरस्यतु । सर्वे पशवोऽगृभीता व्याघ्रतस्करादिभिरस्वीकृताः सन्तु । इदं मन्त्रद्वयं पशौ संज्ञप्यमाने यजमानेन जप्यम् । तथा दिवाश्येनीसंज्ञिकास्विष्टिषु "आशायै चरुम्" इत्यस्य याज्यानुवाक्ये । तथा च तयोः प्रतीकद्वयाम्नातम्-"आशानां त्वा विश्वा आशाः" इति ।

अथ दशमीमाह-

Digitized by Madhuban Trust, Delhi

अग्निः सोमो वरुणो मित्र इन्द्रः बृहस्पतिः सविता यः सहस्री । पूषा नो गोभिरवसा सरस्वती । त्वष्टा रूपाणि समनक्तु यज्ञः, इति ।

अग्न्यादयस्त्वष्टृदेवपर्यन्ता ये दश देवाः सन्ति तेषां मध्य एकैक एव नोऽस्माकमवसा रक्षणाय गोभिः समनक्तु संयोजयतु । यज्ञैश्च समनक्तु त्वष्टा देवो रूपाणि पुत्रपौत्रादिशरीराण्यपि समनक्तु । यः सहस्रीति सवितृविशेषणम् । यः सहस्रसंख्याकरश्मियुक्तः सोऽयं सवितेति योज्यम् ।

अथैकादशीमाह-

त्वष्टा रूपाणि दधती सरस्वती । पूषा भगꣳसविता नो ददातु । बृहस्पतिर्ददिन्द्रः सहस्रम् । मित्रो दाता वरुणः सोमो अग्निः (३), इति ।

करन्निविष्टमस्यतां नव च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
पञ्चमाध्याये तृतीयोऽनुवाकः ।। ३ ।।

अयं त्वष्टा रूपाणि पुत्रादिशरीराणि ददातु । सरस्वती दधती धारयित्री भूयात् । पूषा सविता बृहस्पतिश्च प्रत्येकं नोऽस्मभ्यं भगं सौभाग्यं ददातु । इन्द्रः सहस्र सहस्रसंख्याकं गोधनादिकं ददद्ददातु । मित्रवरुणसोमाग्निष्वेकैकः सहस्रस्य-दाता भवतु । एतच्च मन्त्रद्वयं मित्रविन्दायामिष्टौ याज्यानुवाक्ये । तथाऽऽश्वलायनः-"मित्रविन्दा महावैराजी" इत्यादिनोदाजहार ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
पञ्चमप्रपाठके तृतीयोऽनुवाकः ।। ३ ।।

अथ पञ्चमप्रपाठके चतुर्थोऽनुवाकः।

चतुर्थानुवाके, प्रथमामृचमाह-

आ नो भर भगमिन्द्र द्युमन्तम् । नि ते देष्णस्य धीमहि प्ररेके । उर्व इव पप्रथे कामो अस्मे । तमापृणा वसुपते वसूनाम्, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

हे इन्द्र द्युमन्तं दीप्यमानं भगं धनादिसौभाग्यं नोऽस्मभ्यमाभर संपादय । ते तव देष्णस्य दानस्य प्ररेकेऽतिशये सत्यतिरिक्तं धनं यागार्थं तुभ्यं निधीमहि । उर्व इव वाडवाग्निरिवास्माकं कामः पप्रथे प्रथितोऽभूत् । वसूनां वसुपते बहुधनस्वामिस्त्वं काममापृणाः सर्वतः पूरय ।

अथ द्वितीयामाह-

इमं कामं मन्दया गोभिरश्वैः । चन्द्रवता राधसा पप्रथश्च । सुवर्यवो मतिभिस्तुभ्यं विप्राः । इन्द्राय वाहः कुशिकासो अक्रन्, इति ।

हे इन्द्रेममस्माकं कामं गोभिरश्वैस्त्वया दत्तैर्मन्दय हर्षहेतुं कुरु । चन्द्रवता हिरण्यवता राधसा रत्नादिधनेन च कामं पप्रथः प्रचय । सुवर्यवः स्वर्गमिच्छन्तो विप्रा ये मेधाविनः कुशिकासः कुशिकास्तुः विश्वामित्रस्य पुत्रा मतिभिः स्तोत्रैस्तुभ्यमिन्द्राय वाहोऽक्रन्वाहमकुर्वंस्तदीया स्तुतिरेव त्वदागमनहेतुत्वाद्वाहनामित्यर्थः । एतच्चोभयमैन्द्रे कर्मणि द्रष्टव्यम् ।

अथ तृतीयामाह-

इन्द्रस्य नु वीर्याणि प्रवोचम् । यानि चकार प्रथमानि वज्री (१) । अहन्नहिमन्वपस्ततर्द । प्रवक्षणा अभिनत्पर्वतानाम्, इति ।

वज्री वज्रहस्त इन्द्रः प्रथमानि मुख्यानि यानि वीर्याणि शौर्याणि चकार, इन्द्रस्य, संबन्धीनि तानि वीर्याणि नु क्षिप्रं प्रवोचं प्रवक्ष्यामि । प्रथमं तावदहिं वृत्राख्यमसुरमहन्हतवान् । अनु तदनन्तरमपस्ततर्द मेघस्थितं जलं मेघभेदेन पृथिव्यां व्यापितवान् । अयं पर्वतानां वक्षणा पक्षान्प्राभिनत्प्रकर्षेण भिन्नवान् ।

अथ चतुर्थीमाह -

अहन्नहिं पर्वते शिश्रियाणम् । त्वष्टाऽस्मै वज्रं स्वर्यं समुद्रमवजग्मुरापः, इति ।

पर्वते पर्वतसमाने मेघे शिश्रियाणमाश्रितमहिं जलनिरोधकमहिनामानमसुरमहन्हतवान् । त्वष्टा देवोऽस्मा इन्द्राय स्वर्यं

Digitized by Madhuban Trust, Delhi

स्वर्गाय हितं वज्रं ततक्ष तीक्ष्णीकृतवान्। ततो वज्रेण वृष्टिनिरोधके शत्रौ हते सति स्यन्दमाना आपः समुद्रं समुद्रसमानं भूप्रदेशमञ्जः समञ्जसं यथा भवति तथाऽवजग्मुः प्राप्ताः । अपां दृष्टान्तः- वाश्रा धेनव इव यथा वत्समाकारयितुं शब्दं कुर्वत्यो धेनवो दुहन्ति तद्वत् ।

अथ पञ्चमीमाह-

वृषायमाणो वृणीत सोमम् । त्रिकद्रुकेष्वपिबत्सु तस्य । आसायकं मघवाऽऽदत्त वज्रम्। अहन्नेनं प्रथमजामहीनाम् (२), इति ।

वृषायमाणो घासं जिघृ (घ) त्सुर्वृषभ इव बलवान्देवानां पानार्थमिन्द्रः सोममवृणीत । ततस्त्रिकटुकेषु ज्योतिर्गौरायुरित्येतेषु त्रिकद्रुकनामकेषु यज्ञेषु सुतस्याभिषुतस्य सोमस्य रसमयमिन्द्रोऽपिब तथा मघवेन्द्रः सायकं बाणवत्तीक्ष्णं वज्रमादत्त स्वीकृतवान् । आदाय चाहीनामसुराणां मध्ये प्रथमजां प्रथमोत्पन्नमेनं वृत्रमहन्हतवान् ।

अथ षष्ठीमाह-

यदिन्द्राहन्प्रथमजामहीनाम् । आन्मायिनाममिनाः प्रोत मायाः । आत्सूर्यं जनयन्द्यामुषासम् । तादीक्ना शत्रून्न किलाऽऽविवित्से, इति ।

ह इन्द्र यद्यदा त्वमहीनां प्रथमजां हतवानसि । आदनन्तरं मायिनां मायायुक्तानामसुराणां माया उत सर्वा अपि मायाः प्रामिनाः प्रकर्षेण विनाशितवानसि । आदनन्तरं सूर्यं जनयन्स्वर्भानुसंज्ञकेनासुरेण प्रयुक्ते तमसि मग्नं सूर्यं प्रादुर्भावयन्, तथोपायं द्यां जनयन्नुषः कालं दीप्तं कुर्वन्वर्तसे । तादीक्ना तादृशाञ्शत्रून्कदाचिदपि त्वं नाऽऽविवित्से किल सर्वथा न लभसे ।

अथ सप्तमीमाह-

अहन्वृत्रं वृत्रतरं व्यंसम् । इन्द्रो वज्रेण महता वधेन । स्कन्धांसीव कुलिशेना विवृक्णा । अहिः शयत उपपृक्पृथिव्याम्, इति ।

अयमिन्द्रो महता प्रौढेन वधेन वज्रसाधनभूतेनानेन वज्रेण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

वृत्रमहन्वृत्रनामकमसुरं हतवान्। कीदृशं वृत्रम्। वृत्रतरमतिशयेन लोकत्र यावरकम्। "स इमाल्लँलोकानवृणोत्" इति ब्राह्मणम्। व्यंसं छेदनेनांसरहितम्। ततोऽयमहि वृत्राख्योऽसुर इन्द्रेण हतः सन्पृथिव्यामुपपृगुपसंपृक्तः पतितोऽशयिष्ट। तत्र दृष्टान्तः-कुलिशेन कुठारेण विवृक्णा विशेषतश्छिन्नानि स्कन्धांसीव वृक्षस्य स्कन्धा यथा भूमौ निपतन्ति तद्वत्।

अथाष्टमीमाह-

अयोध्येव दुर्मद आ हि जुह्वे। महावीरं तुविबाधमृजीषम् (३)। नातारीरस्य समृतिं वधानाम्। स रुजानाः पिपिष इन्द्रशत्रुः, इति।

दुर्मदो मदान्धो वृत्र इन्द्रमाजुह्वे हि युद्धार्थमाहूतवान्किल। तत्र दृष्टान्तः- अयोध्येव यथा लोके योद्धुमशक्तौ वृथैव वाचा युद्धार्थं गर्जनं करोति तद्वत्। कीदृशमिन्द्रम्। महावीरं शूरेषु मध्येऽत्यन्तमेव शूरम्। विबाधं बाधरहितम्। ऋजीषं सोमसंबन्धिनम्। ऋजीषस्यापि भक्षकत्वादृजीषरूपम्। तादृशस्यैवेन्द्रस्य शत्रुर्वृत्रोऽस्येन्द्रस्य बधाना समृतिं संगमं वातारीर्न प्राप्तवान्। इन्द्रं हन्तुं न शक्त इत्यर्थः। प्रत्युत रुजाना भङ्गं प्राप्नुवतीः स्वकीया एव सेनाः संपिपिषे सम्यक्पिष्टवान्वज्रेण इतो भूमौ पतन्सन्समीपवर्तिनः। सर्वाञ्शूरांञ्चूर्णीकृतवानित्यर्थः। "इन्द्रस्य तु वीर्याणि" इत्यारभ्य षण्मन्त्रा निष्केवल्यशस्त्रेऽन्तर्भावनीयाः।

अथ नवमीमाह -

विश्वो विहाया अरतिः। वसुर्दधे हस्ते दक्षिणे। तरणिर्न शिश्रथत्। श्रवस्यया न शिश्रथत्। विश्वस्मा इदिषुध्यते। देवत्रा हव्यमूहिषे। विश्वस्मा इत्सुकृते वारमृण्वति। अग्निर्द्वारा व्यृण्वति (४), इति।

अयमग्निर्विश्वो विश्वात्मको विहाया विशिष्टगतियुक्तोऽरतिरुपरतिरहितः। हविर्वहनाय पुनः पुनरागमने नास्त्यस्योपरतिः। वसुर्निवासहेतुस्तादृशोऽयमग्निर्ब्राह्मणस्य दक्षिणे हस्ते दधे धृत आसीत्। अत एव तत्र होम आम्नातः- "ब्राह्मणस्य दक्षिणे हस्ते होतव्यम्" इति। तरणिर्दुःखेभ्यस्तारयिता न शिश्रयच्छिथिलो न भवति। तत्र हेतुः-श्रवस्यया हविर्लक्षणान्नेच्छया न शिश्रयत्पुनः पुनरभिवृद्ध एवाभून्न

Digitized by Madhuban Trust, Delhi

तु शिथिलः । विश्वस्मा इत्सर्वस्मै जगत एव सर्वजगद्रक्षणार्थमिषुध्यस ईश्वरो भवसि । इषुध ऐश्वर्य इति धातुः । देवत्रा सर्वेषु देवेषु हव्यमूहिषेऽस्मदीयं हव्यं वहसि । विश्वस्मा इत्सुकृते सर्वस्मा अपि पुण्यकृते तदर्थं वारमृण्वति । वार्यन्ते प्रवेशार्थिनः प्राणिनो यत्र तत्सुवर्गस्य द्वारं वारमित्युच्यते । तदपावृणोति । तदेव स्पष्टीक्रियते- अयमग्निद्वारा स्वर्गद्वारं व्यृण्वति विवृतं करोति । अन्त्ये(त्य)ष्टित्वादिय मष्टपदी ।

अथ दशमीमाह-

उदुज्जिहानो अभिकाममीरयन् । प्रपृञ्चन्विश्वा भुवनानि पूर्वथा । आ केतुना सुषमिद्धो यजिष्ठः । कामं नो अग्ने अभिहर्य दिग्भ्यः, इति ।

हेऽग्ने दिग्भ्यः सकाशान्नोऽस्मदीयं काममभीष्टमर्थमभिहर्य संपादय । किं कुर्वन्, उदिज्जिहानोऽत्यन्तमूर्ध्वमुद्गच्छन्काममभीष्टम- र्थमभिमतमीरयन्प्रेरवन् । विश्वा भुवनानि पूर्वथा यथापूर्वं केतुना स्वकीयेन धूमेन प्रपृञ्चन्प्रकर्षेण संयोजयन् । कीदृशोऽग्निः । सुषमिद्धोऽत्यन्तदीप्तो यजिष्ठाऽतिशयेन यष्टा ।

अथैकादशीमाह-

जुषामी हव्यममृतेषु दूढ्यः । आ नौ रयिं बहुलां गोमतीमिषम् । निधेहि यक्षदमृतेषु भूषन्, इति ।

हेऽग्ने हव्यं जुषाणोऽस्मदीयं हविः सेवमानस्त्वममृतेषु देवेषु दूढ्यो यागरहितात्पुरुषादानीय नोऽस्माकं रयिं धनं बहुलामतिप्रभूता गोमतीं गोभिर्युक्ताभिषमन्नं निधेहि नितरां संपादय । यो दुर्बुद्धिः पुमान्देवेषु भक्तिं न करोति तदीयं धनमाहृत्यास्मभ्यं देहीत्यर्थः । अस्मदीयस्तु यजमानोऽ मृतेषु देवेषु मध्ये भूषन्स्वात्मानमलंकुर्वन्देवत्वमात्मन इच्छन्नित्यर्थः । स यजमानस्त्वद्दत्तेन धनादिना यक्षद्यागं करिष्यति । तदेतन्मन्त्रत्रयमाग्नेये । कर्मणि द्रष्टव्यम् ।

अथ द्वादशीमाह-

अश्विना यज्ञभागतम् । दाशुषः पुरुदँ न सा । पूषा रक्षतु नो रयिम् (५), इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

हेऽश्विनो युवां पुरुदंससा भूरिकर्माणौ सन्तौ दाशुषो हविर्दत्तवतो यजमानस्य यज्ञमागतमागच्छतम् । पूषा च नोऽस्मदर्थं रयिं रक्षतु ।

अथ त्रयोदशीमाह-

इ॒मं य॒ज्ञम॒श्विना॑ व॒र्धय॑न्ता । इ॒मौ र॒यिं यज॑मानाय धत्तम् । इ॒मौ प॒शून्र॑क्षतां वि॒श्वतो॑ नः । पू॒षा नः पातु॒ सद॒मप्र॑युच्छन् , इति ।

हेऽश्विनाविममस्मदीयं यज्ञं वर्धयन्तां वृद्धिं प्रापयन्ताविमौ युवां यजमानाय रियं धनं धत्तं संपादयतम् । इमौ युवां नोऽस्मदीयान्पशून्विश्वतो रक्षतां सर्वतो भयात्पालयतम् । अयं पूषाऽ-मयुच्छन्प्रमादमकुर्वन्नोऽस्मदीयं सदं सदस्थानं पातु । एतच्चोभयम् - "अश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति' इत्यस्य याज्यानुवाक्ये ।

अथ चतुर्दशीमाह-

प्र ते॑ म॒हे सर॑स्वति । सुभ॑गे॒, वाजि॑नी वति । स॒त्य॒वाचे॑ भरे म॒तिम्, इति ।

हे सुभगे सौभाग्ययुक्ते हे वाजिनीवति अन्नयुक्ते हे महे महति हे सरस्वति सत्यवाचेऽनृतवाक्यरहितायै ते तुभ्यं नतिं मदीयां स्तुतिं प्रभरे संपादयामि ।

अथ पञ्चदशीमाह-

इ॒दं ते॑ ह॒व्यं घृ॒तव॑त्सरस्वति । स॒त्य॒वाचे॒ प्रभ॑रेमा ह॒वी ँषि । इ॒मानि॑ ते दु॒रि॒ता सौभ॑गानि । तेभि॑र्व॒य ँ सुभगा॑सः स्याम (६), इति ।

व॒ज्ज्यहीनामृ॒जीषं व्यृण्वति रक्षतु नो र॒यि ँसौभ॑गा॒न्येकं च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

पञ्चमाध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

हे सरस्वति ते तुभ्यं घृतवद् घृतयुक्तमिदं हव्यमस्माभिः संपादितमिति शेषः । सत्यवाचे तस्यै सरस्वत्या इमानि संपादितानि हवींषि प्रभरेम प्रकर्षेण समर्पयामः । दुरिता यानि दुरितानि यान्यस्माभिः

Digitized by Madhuban Trust, Delhi

कृतानि तानि सर्वाणि हे सरस्वति ते प्रसादात्सुभगानि सुकृतानि संपन्नानि । तेभिस्तैःसुकृतैर्वयं सुभगासः सौभाग्ययुक्ताः स्याम । एते ऋचौ-सरस्वते सत्यवाचे चरुम्' इत्यस्य याज्यानुवाक्ये ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
पञ्चमप्रपाठके चतुर्थोऽनुवाकः ।। ४ ।।

अथ पञ्चमप्रपाठके पञ्चमोऽनुवाकः ।

अथ पञ्चमानुवाके प्रथमामृचमाह-

यज्ञो रायो यज्ञ ईशे वसूनाम् । यज्ञः सस्यानामुत सुक्षितीनाम् । यज्ञ इष्टः पूर्वचित्तिं दधातु । यज्ञोब्रह्मण्वा ँ अप्येतु देवान् इति ।

यज्ञो यज्ञस्वामी यो देवः रायो धनस्य मणिमुक्तादिरूपस्येशे स्वामी भवति । तथा यज्ञो वसूनां निवासहेतूनां गृहाणामीशे स्वामी भवति । तथाऽयं यज्ञः सस्यानां व्रीह्याद्योषधीनां स्वामी । उतापि च सुक्षितीनां शोभनभूमीनामीशे स्वामी । इष्टो यज्ञः पूर्वचित्तिं दधात् पूर्वचित्तिं स्वर्गं दधातु । तथाऽन्यत्राऽऽम्नातम्-"द्यौरासीत्पूर्वाचित्तिः" इति । ब्रह्म वेदः, ब्रह्माण्वान्मन्त्रयुक्तो यज्ञो देवानप्येतु देवान्प्राप्नोतु ।

[अथ] द्वितीयामाह-

अयं यज्ञो वर्धतां गोभिरश्वैः । इयं वेदिः स्वपत्या सुवीरा । इदं बर्हिरतिबर्ही ँष्यन्या । इमं यज्ञं विश्वे अवन्तु देवाः, इति ।

अयमस्माभिरनुष्ठीयमानो यज्ञो गोभिरश्वैश्च सह वर्धतां वृद्धिं प्राप्नोतु । इयं वेदिर्यज्ञसंबन्धिनी स्वपत्या शोभनपुत्रप्रदा । सुवीरा शोभनभृत्यप्रदा चास्तु । इदं च वेद्यामास्तीर्णं बर्हिरन्या वर्हींषीतरयजमानसंबन्धीनि बर्हींष्यतिक्रामतु । इमं चास्मदीयं यज्ञं विश्वे देवा अवन्तु रक्षन्तु । एते ऋचौ दिवश्येनीनामिकास्विष्टिषु "यज्ञाय चरुम्" इत्यस्य याज्यानुवाक्ये ।

अथ तृतीयामाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

भग एव भगवा अँस्तु देवाः । तेन वयं भगवन्तः स्याम (१) । तं त्वा भग सर्व इज्जोहवीमि । स नो भग पुर एता भवेह, इति ।

हे देवा यो भगाख्यो देवः स एव भगवान्सौभाग्यवानस्तु । तेन देवेन वयं सर्वे भगवन्तः सौभाग्ययुक्ताः स्याम । हे भग तादृशं त्वां सर्व इत्सर्व एव जोहवीम्याह्वयामीत्यर्थः । हे भगदेवेह कर्मणि नोऽस्माकं पुर एता पुरतो गन्ता भव ।

अथ चतुर्थीमाह–

भग प्रणेतर्भग सत्यराधः । भगेमां धिय मुदवा ददन्नः । भग प्र णो जनय गोभिरश्वैः । भग प्र नृभिर्नृवन्तः स्याम, इति ।

हे प्रणेतः प्रकर्षेण नेतुं कुशल हे भगदेवास्मान्कर्मणि प्रणयेति शेषः । हे सत्यराधः सत्यधन भगदेवास्मभ्यं धनं देहीति शेषः । हे भग नोऽस्मभ्यमिमां धियं ददत्कर्मानुष्ठानबुद्धिं प्रयच्छन्नुदवोत्कर्षेण रक्ष हे भगदेव नोऽस्मान्गोभिरश्वैः प्रजनय तद्युक्तान्कुर्वित्यर्थः । हे भग त्वत्प्रसादाद्वयं नृभिः पुत्रपौत्रादिभिः पुरुषैर्नृवन्तः पुरुषवन्तः स्याम । एतद् द्वयं भगाय चरुं तावातायै गृह इत्यस्मिन्कर्मणि द्रष्टव्यम् ।

अथ पञ्चमीमाह–

शश्वतीः समा उपयन्ति लोकाः । शश्वतीः समा उपयन्त्यापः । इष्टं पूर्तं शश्वतीनां समानां शाश्वतेन । हविषेष्ट्वाऽनन्तं लोकं परमारुरोह (२), इति ।

लोकाः सर्वे प्राणिनः शश्वतीः शाश्वतीः समा निरन्तरवर्तिनः संवत्सरानुपयन्ति प्राप्नुवन्ति । एकस्मिन्संवत्सरेऽतीतेऽपि पुनरन्यं संवत्सरं प्राप्नुवन्ति । तथैवाऽऽपः शाश्वतीः समा उपयन्ति निरन्तरं प्रवहन्ति यथैतावुभौ दृष्टान्तौ तथा शाश्वतीनां समानां निरन्तरवर्तिनां संवत्सराणां संबन्धीष्टं पूर्तं श्रौतं स्मार्तं च कर्म प्रवर्ततां कर्मानुष्ठान-मनवच्छिन्नमस्त्वित्यर्थः । तेन शाश्वतेन निरन्तरानुष्ठितेन हविषा देवमिष्ट्वाऽनन्तं विनाशरहितं परमुत्कृष्टं लोकमारुरोह पुरुष आरोहति । कृष्यादिफलवच्छ्रौतस्मार्तकर्मफलं सहसा न विनश्यति किंतु

Digitized by Madhuban Trust, Delhi

चिरमनुभवितव्यमित्यर्थः । अस्यामृचि देवताभिव्यक्त्यभावात् "अनिरुक्तः प्रजापतिः" इत्यनुसारेण प्राजापत्ये कर्मण्येषा द्रष्टव्या ।

[अथ] षष्ठीमाह–

इयमेव सा या प्रथमा व्यौच्छत् । सा रूपाणि कुरुते पञ्च देवी, इति ।

या सृष्ट्युपक्रमे प्रथमोषा व्यौच्छद्वद्व्युष्टाऽऽसीदियमेव सेदानीमस्मान्यति सूर्योदयात्पूर्वकालरूपोषा प्रादुर्भवति सैव रूपाणि पुनः पुनरावर्तत इत्यर्थः । सा देव्येकैव सती पञ्च रूपाणि पञ्चर्तूंस्तल्लिङ्गानि पञ्च वा कुरुते ।

अथ सप्तमीमाह–

द्वे स्वसारौ वयतस्तन्त्रमेतत् । सनातनं विततं षण्मयूखम् । अवान्यांस्तन्तून्किरतो धत्तो अन्यान् । नावपृज्याते न गमाते अन्तम्, इति ।

अहश्च रात्रिश्चैते द्वे देवते स्वसारौ परस्परभगिन्यौ ते एतत्संवत्सरात्मकं तन्त्रं तन्तुनिष्पक्षं वस्त्रं ववतो यथा कुविन्दस्तन्तुभिर्वस्त्रं वयति निष्पादयत्ये वमेते संवत्सरं निष्पादयत इत्यर्थः। तच्च संवत्सारात्मकं वस्त्रं कीदृशम् । सनातनमनादिकालसिद्धम् । नहि संवत्सरप्रवाहस्यात्माभिर्दृश्यमान आदिः कश्चिदस्ति । अत एव विततं वस्त्रगतदीर्घतन्तुवद्विस्तीर्णं षण्मयूखं षट् संख्याका ऋतवो मयूखाः शङ्कुस्थानीया यस्य कुविन्देन हि तन्तु प्रसरणाय शङ्कवो निखन्यन्ते तद्वदृतव इत्यर्थः । कुविन्दो हि वस्त्रनिर्माण काले कांश्चिद्दीर्घतन्तूनधः कृत्वा मध्ये तिर्यक्तन्तून्धारयत्वेवमेते अप्यहोरात्रदेवते अन्यान्कांश्चिदहर्विशेषास्तन्तूनस्तमयकालेष्वकिरतोऽधोगतान्कुरुतः, अन्यांश्च रात्रिरूपांस्तन्तूनस्तमयादूर्ध्वं धत्तो धारयतः । एते अहोरात्रेदेवते कदाचिदपि नावपृज्याते । तस्यैव व्याख्यानमन्तं न गमाते संवत्सरात्मक वस्त्रनिर्माणस्य समाप्तिं न गच्छतो निरन्तरं संवत्सरपरम्परां निष्पादयत इत्यर्थः । एतच्च मन्त्रद्वयं क्रमादुषोदेवताकेऽहोरात्रदेवताके च कर्मविशेषे द्रष्टव्यम् ।

अथाष्टमीमाह–

आ वो यं तूदवाहासो अद्य । वृष्टिं ये विश्वे मरुतो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

जुनन्ति । अयं यो अग्निर्मरुतः । समिद्धः । एतं जुषध्वं कवयो युवानः (३), इति ।

हे मरुतो ये विश्वे सर्वे मेघा वृष्टिं जुनन्ति जवेन त्वरया प्रेरयन्ति वो युष्मत्संबन्धिन उदवाहास उदकवाहिनो मेघा अद्यास्मिन्कर्मण्यायन्त्वागच्छन्तु । कवयः सर्वज्ञा युवानो नित्यतरुणा मरुतो यूयं योऽग्निरिह समिद्धस्तमेतं जुषध्वं वृष्ट्यर्थं सेवध्वम् । "अग्निर्वा इतो वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति" इति ब्राह्मणम् ।

[अथ] नवमीमाह-

धारावरा मरुतो धृष्णवोजसः । मृगा न भीमास्तविशेभिरूर्मिभिः । अग्नयो नशुशुचाना ऋजीषिणः । भ्रुमिं धमन्त उप गा अवृण्वत, इति ।

एते मरुतो गा गोवद्दुहाना वृष्टीरूपावृण्वत समीपे वृतवन्तो वृष्टिं संपादितवन्त इत्यर्थः कीदृशा मरुतः । वृष्टिधारया भूमिं वृण्वन्ति व्याप्नुवन्तीति धाराचराः। अत एव मृगा न सिंहव्याघ्रादिमृगा इव तविषेभिर्बलवद्भिरुर्मिभिर्गमनैर्भीमा भयंकरा अग्नयो न शुशुचाना अग्नय इव दीप्यमाना ऋजीषिण ऋजीषोपलक्षितसोमपानयुक्ता । भ्रुमिं भ्राम्यतीति भ्रुमिर्मेघस्तं धमन्तश्चालयन्तः । एतच्चोभयं मारुते कर्मणि द्रष्टव्यम् ।

दशम्या एकादश्याश्च प्रतीके दर्शयति-

विचक्रमे त्रिर्देवः, इति ।

विचक्रम इत्येका त्रिर्देव इत्यपरा, एते "जुष्टी नरः" इत्यत्र व्याख्याते । एतच्चोभयं वैष्णवे कर्मणि द्रष्टव्यम् ।

[अथ] द्वादशीमाह-

आवेधसं नीलपृष्ठं बृहन्तम् । बृहस्पति ँ सदने साधयध्वम् । सादद्योनिं दम आदीदि वा ँ सम् । हिरण्यवर्णरुप ँ सपेम, इति ।

ह ऋत्विग्यजमाना बृहस्पतिं देवं सदने यज्ञस्थाने साधयध्वम् । कीदृशम् । आवेधसं सर्वतः स्रष्टारं नीलपृष्ठं पृष्ठभागे नीलं बृहन्तं गुणैर्महान्तं सादद्योनिं योनौ स्वर्गस्थाने यजमानान्सादयन्तं दमे गृह

Digitized by Madhuban Trust, Delhi

आदीदिववांसं सर्वतो दीप्यमानं हिरण्यवर्णं स्वर्णसमानकान्तिरूपं रोषरहितं तादृशं बृहस्पतिं सपेम संबन्धीमः ।

[अथ] त्रयोदशीमाह–

स हि शुचिः शतपत्रः स शुन्ध्यूः (४) । हिरण्यवाशीरिषिरः सुवर्षाः । बृहस्पतिः स स्वावेश ऋष्वाः । पुरू सखिभ्य आ सुतिं करिष्ठः, इति ।

स हि प्रसिद्धो बृहस्पतिः शुचित्वादिगुणोपेतः । शुचिः शुद्धः । शतपत्रः शतसंख्याकवाहनोपेतः । स बृहस्पतिः शून्ध्यूरन्येषामपि शोधको हिरण्यवाशीर्हिरण्यस्य वाशो वाक्यं शतमस्यै देहि सहस्रस्यै देहीत्यादि रूपं तेन वाक्येनोपेत इषिरः सर्वैरेषणीः सुवर्षाः स्वर्गपदाः । स बृहस्पतिः स्वावेशःसुष्ठ्वावेष्टुं समाश्रयितुं शक्य ऋष्वा ऋषिरतीन्द्रियद्रष्टा तादृशो बृहस्पतिः सखिभ्यः सखिसदृशेभ्यो यजमानेभ्यः पुरू प्रभूतमासुतिमन्नं करिष्ठोऽतिशयेन कर्ता । एतच्च मन्त्रद्वयम्–"श्वेतां बार्हस्पत्याम्" इत्यस्य पशोः सूक्ते द्रष्टव्यम् । तथा च प्रतीकद्वयमाम्नातम् – "आवेधस ँ स ँशुचीः" इति ।

[अथ] चतुर्दशीमाह–

पूष ँस्तव व्रते वयम् । न रिष्येम कदाचन । स्तोतारस्त इह स्मासि, इति ।

हे पूषंस्तव व्रते त्वदीये कर्मणि कदाचन न रिष्येम मा विनश्ये । इह कर्मणि ते तव स्तोतारः स्मसि भवामः ।

[अथ] पञ्चदशीमाह–

यास्ते पूषन्नावो अन्तः समुद्रे । हिरण्ययीरन्तरिक्षे चरन्ति । याभिर्यासि दूत्या ँसूर्यस्य । कामेन कृतः श्रव इच्छमानः (५), इति ।

हे पूषन्समुद्रे समुद्रवद्विस्तीर्णेऽन्तरिक्षेऽन्तर्मध्ये हिरण्ययीः सुवर्णवर्णास्ते तव संबन्धिन्यो नावो नौसमाना दीप्तयो याश्चरन्ति रश्मिभिस्त्वं सूर्यस्य दूत्यां यासि दूतत्वं प्राप्नोषि । सूर्यो हि स्वर्भानुसंज्ञकेनासुरेण तमसाऽऽवृतः सन्दुःखितायाः सूर्यायाः समीपे पूषणं रश्मियुक्तं दूतत्वेन प्रेषितवान् । तदिदमाख्यानं शाखान्तरे द्रष्टव्यम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

तथा च सूक्तेऽप्याम्नायते- "तं देवासो अददुः सूर्यायै" इति । स त्वं ताभिर्दीप्तिभिर्युक्तः सञ्श्रव इच्छमानः कीर्तिमाकाङ्क्षन्कामेन कृतः स्वेच्छयैव दूतकर्मणि प्रेरितः । एतदुभयं पौष्णे कर्मणि द्रष्टव्यम् । सूक्तेऽप्येकस्य प्रतीकमाम्नातम् । यास्ते पूषन्नावो अन्तः" इति ।

[अथ] षोडशीमाह-

अरण्यान्यरण्यान्यसौ । या प्रेव नश्यसि । कथा ग्रामं न पृच्छसि । न त्वा भीरिव विन्दती३, इति ।

अरण्यानीशब्देन महारण्यमुच्यते । द्विरुक्तिरादरार्था । हेऽरण्यानि या त्वं प्रणश्यसीव जनरहितत्वान्नष्टेव प्रतीयसे, असौ त्वं कथा कथं ग्रामं न पृच्छसि । सर्वो हि जनो मार्गे गच्छन्स्वनिवासाय ग्रामः कुत्रेत्येवं पृच्छति । त्वं तु तथा न पृच्छसि । तथा ग्रामाद्बहिष्ठं पुरुषं रात्रौ भीः प्रविशति । त्वां तु भीर्न विन्दती ३ इव न लभत एव । प्लुतिर्विस्मयार्था । तदेवमरण्य देवता स्तूयते ।

अथ सप्तदशीमाह-

वृषारवाय वदते । यदुपावति चिच्चिकः । आघा टीभिरिव धावयन् । अरण्यानिर्महीयते, इति ।

वृष्टिकाले रवः शब्दविशेषो यस्य पक्षिविशेषस्य सोऽयं वृषारवः । स हि निर्जनाया अरण्यान्या उपरि निर्गत्य निरन्तरं चिदित्यादिशब्दं वदति । तथावदते वृषारवाय पक्षिणे प्रत्युत्तरवादी चिच्चिकाख्योऽन्यः । पक्षी यद्यदो पावति समीपमागत्य तदीयमभिवदनं प्रत्युत्तरदानेन परिपालयति । एकस्मिन्पक्षिणि चिच्चिशब्दं कुर्वति सत्यन्येऽपि तज्जातीयाः पक्षिणस्तदानीमेव चिच्चिचशब्दान्कुर्वते तदानीमयमरण्यानिर्महीयते पूज्यते । तत्र दृष्टान्तः-प्राधाटीभिः काण्डवीणादिभिर्धावयन्निव शोधयन्निव यथा गानकाले गायकः पुरुषः स्वरविशेषान्वीणादिभिः शोधयति तादृशकुशलैर्गायकैः सेव्यमानो राजा यथा लोके पूज्यत एवमुक्तिप्रत्युक्तिरूपाचिच्चिशब्दसहस्राणि कुर्वद्भिः सूक्ष्मैः पक्षिविशेषैर्युक्तेयमरण्यानिः शोभत इत्यर्थः ।

अथाष्टादशीमाह-

उत गाव इवाऽऽदन् । उतो वेश्मैव दृश्यते (६) । उतो अरण्यानिः सायम् । शकटीरिव सर्जति, इति ।

Digitized by Madhuban Trust, Delhi

उतापि च गाव इव यथा ग्रामे गावो गृहेषु वसन्ति तथाऽरण्ये गवयाद्या विशेषा आदंस्तृणानि भक्षयन्तो वर्तन्ते । उतो अपि च लतागुल्मादिकं तत्र वेश्मेव गृह इव दृश्यते । उतो अपि चेयमरण्यानिः सायंकाले पुरालेषु तमसा छन्नेषु शकटीः सर्जतीव लक्ष्यते । यथा कृषिकाः सायंकाले धान्यविशेषैः शकटानि पूरयित्वा स्वगृहे समागच्छन्त्येवमत्राप्यहनि वृक्षाग्रेषु दृश्यमानानि फलानि रात्रौ न दृश्यन्ते । तथा सति सर्वाणि फलानि लूत्वा शकटे पूरयित्वा गृहेषु नीतानीति मुग्धानां बालानां प्रतिभासो भवति । सोऽयं प्रतिभासोऽत्रारण्यवर्णनार्थमुच्यते ।

अथैकोनविंशीमाह-

गाम॒ङ्गै॒ष आह्व॑यति । दार्व॒ङ्गै॒ष उपा॑वधीत् । वस॑न्नरण्या॒न्या ँ सा॒यम् । अक्रु॑क्ष॒दिति॑ मन्यते, इति ।

अपि चारण्यान्यामहनि गाश्चारयन्गोपालोऽङ्गशब्देन प्रियसंबोधनवाचिना गामाह्वयति । यस्मिन्नाह्वानार्थे शब्दे गवां संकेतः क्लृप्तस्तादृशस्य शब्दस्योपलक्षकोऽयमङ्गशब्दः । गोपालस्य शब्दं श्रुत्वा यतः कुतश्चिदपि गावः समागच्छन्त्येव तदिदमाश्चर्यम् । अपि च विचित्रस्य प्रसादस्य निर्माता यस्तक्षा स एव स्वापेक्षितं दारु काष्ठमरण्यान्यामुपावधीच्छिनत्तीत्यर्थः । यस्य यादृशं काष्ठमपेक्षितं तस्य तादृशमस्तीत्यरमिदमाश्चर्यम् । तस्याऽऽश्चर्यस्य द्योतकोऽयमङ्गशब्दः । अङ्ग हन्तेत्यर्थः । अपि च दीर्घयात्रासु मार्गे गच्छन्नरण्यान्यां सायंकाले यः पुमान्वसति सोऽयं महतो वृक्षस्याधस्ताद्वसन्नबहून्बहून्पक्षिशब्दाञ्श्रुत्वा सेयमरण्यान्याक्रोशतीति मन्यते तदिदमन्यदाश्चर्यम् ।

अथ विंशीमाह-

न वा अ॑रण्या॒निर्ह॑न्ति । अ॒न्यश्चेन्नाभि॒गच्छ॑ति । स्वा॒दोः फल॑स्य ज॒ग्ध्वा । य॒त्र का॒मं निप॑द्यते, इति ।

ये पुरुषास्तपश्चरितुमरण्यान्यां निवसन्ति तान्प्रत्यन्यो व्याघ्रादिर्नाभिगच्छति चेत्तदानीमियमरण्यानिर्न वै हन्ति सर्वथा न मारयति । अयमर्थः । अरण्यप्रयुक्तः कश्चिदपि बाधो नास्ति व्याघ्रादिप्रयुक्तस्तूपायेन परिहर्तुं शक्यत इति । यस्यामरण्यान्यां स्वादोः फलस्य जग्ध्वा स्वादु फलं भक्षयित्वा कामं निपद्यते स्वेच्छया निवसितुं शक्यते । न खलु तत्रान्नसंपादनाय प्रयासोऽस्ति नापि निवासस्थानसंकोचः । तादृशीयमरण्यानीति गुणस्तुतिः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथैकविंशीमाह-

आञ्जनगन्धीँ सुरभीम् । ब्रह्मन्नामकृषीवलाम् । प्राहं मृगाणां मातरम् । अरण्यानीमशँसिषम् (७), इति ।

स्याम रुरोह युवानः शुन्ध्यूरिच्छमानो दृश्यते निर्पद्यते चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

पञ्चमाध्याये पञ्चमोऽनुवाकः ।। ५ ।।

अहमनुष्ठातेमामरण्यानीं प्राशंसिषं प्रकर्षेण शंसनं कृतवानस्मि कीदृशीम् । आञ्जनगन्धीमञ्जनेषु कर्पूरादिसुगन्धिद्रव्यप्रक्षेपेण यादृशं गन्धं संपादयन्ति तादृशगन्धोपेताम् । विचित्रैः पुष्पैः फलैश्चानुकूलो गन्धः समुत्पाद्यते । अत एव सुरभीं सुगन्धी (न्धि) म् । चम्पकपुष्पादिजन्यो हि सुगन्धो वर्तते । भक्षितुं योग्यतां फलविशेषाणामनेकत्वाद्बह्वन्नां तादृशानां वृक्षाणां स्वत एवोत्पन्नत्वेन कृषेरनपेक्षणादकृषीवलां तत्रोत्पन्नानां मृगाणां पालकत्वान्मातृसदृशीम् । तदेतदरण्यानीत्यादिकमन्त्रषट्कमरण्यवासिभिस्तपस्विभिः स्वरक्षार्थं देवतां प्रार्थयितुं जपितव्यम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

पञ्चमप्रपाठके पञ्चमोऽनुवाकः ।। ५ ।।

अथ पञ्चमप्रपाठके षष्ठोऽनुवाकः ।

[अथ] षष्ठानुवाके प्रथमामृचमाह-

वार्त्रहत्याय शवसे । पृतनासाह्याय च । इन्द्र त्वा वर्तयामसि, इति ।

हे इन्द्र वार्त्रहत्याय शत्रुवधाय शवसेऽस्मदीयाय बलाय पृतनासाह्याय वैरिसेनाभिभवाय य त्वामार्तयामसि पुनः पुनर्भजामहे ।

[अथ] द्वितीयामाह-

सुब्रह्माणं वीरवन्तं बृहन्तम् बृहन्तम् । उरुं गभीरं पृथु बुध्नमिन्द्र । श्रुतर्षिमुग्रमभिमातिषाहम् । अस्मभ्यं चित्र वृषणँ रयिं दाः, इति ।

Digitized by Madhuban Trust, Delhi

हे इन्द्रास्मभ्यं रयिं दा धनं देहि, वयं तु त्वां भजाम इत्यध्याहारः। कीदृशं त्वाम्। सुब्रह्माणं शोभनब्राह्मणोपेतमृत्विग्भिः स्तुत्यमित्यर्थः। वीरवन्तं वीरैः पुत्रैर्भृत्यैश्चोपेतं बृहन्तमैश्वर्येण महान्तमुरुं गभीरमत्यन्तं गभीरमतिप्रबुद्धमित्यर्थः। पृथुबुध्नं विस्तीर्णमूलं प्रजापतिसृष्टमित्यर्थः। "प्रजापतिरिन्द्रमसृजत" इति श्रुतेः। श्रुतर्षिमृषिषु मन्त्रेष्विन्द्रसूक्तादिषु श्रूयमाणमुग्रं वैरिषु क्रोधिनमभिमातिषाहं पाप्मनो विनाशकम्। कीदृशं रयिम्। चित्रं मणिमुक्तादिरूपेण बहुविधं वृषणं कामाभिवर्षक्षमम्। एतच्चोभयमैन्द्रे कर्मणि द्रष्टव्यम्।

[अथ] तृतीयामाह–

क्षेत्रियै त्वा निर्ऋत्यै त्वा। द्रुहो मुञ्चामि वरुणस्य पाशात्। अनागसं ब्रह्मणे त्वा करोमि (१),। शिवे ते द्यावापृथिवी उभे इमे, इति।

एतस्य मन्त्रजातस्य जातकर्मविषयत्वात्कुमारोऽत्र संबोध्यते। हे कुमार त्वां क्षेत्रीनामिकाया रक्षोजातेर्द्रुहो द्रोहाद्वो मुञ्चामि मुक्तं करोमि। बालोपद्रवकारिणी काचिद्रक्षोजातिः। तथाऽन्या रक्षोजातिर्निर्ऋतिस्तस्या अपि द्रोहात्त्वां मुञ्चामि। तथा वरुणस्य पाशो रोगविशेषस्तस्मादपि त्वां मुञ्चामि। ब्रह्मणे परिवृढाय जातकर्मादिसंस्काराय त्वामनागसं दोषरहितं करोमि। ते त्वदर्थमिमे द्यावापृथिव्यावुभे अपि शिवे शान्ते भवेताम्।

[अथ] चतुर्थीमाह–

शं ते अग्निः सहाद्भिरस्तु। द्यावापृथिवी सहौषधीभिः। शमन्तरिक्षꣳ सह वातेन ते। शं ते चतस्रः प्रदिशो भवन्तु, इति।

हे कुमार त्वदर्थमयमग्निरद्भिः सह शं सुखहेतुरस्तु। द्यावापृथिव्यौ चौषधीभिः सह शं सुखहेतू स्ताम्। अन्तरिक्षं च वातेन सह ते शमस्तु। प्राच्याद्याः प्रकृष्टदिशश्चतस्रोऽपि ते शं भवन्तु।

या दैवीश्चतस्रः प्रदिशः। वातपत्नीरभि सूर्यो विचष्टे। तासां त्वा जरस आदधामि। प्र यक्ष्म एतु निर्ऋतिं पराचैः, इति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

वातपत्नीर्वायोः पालयित्रीर्देवीर्देवतारूपा याश्चतस्रः प्रदिशोऽभिलक्ष्य सूर्यो विचष्टे विशेषेण ख्यापयति तासां दिशां जरसे जरार्थं त्वां (त्वामा) दधामि स्थापयामि। यावद्दिशो न जीर्यन्ति तावत्त्वां जीवयामीत्यर्थः। योऽयं यक्ष्मो व्याधिः स पराचैस्त्वत्तः पराङ्मुखो भूत्वा निर्ऋतिं रक्षोजातिं प्रेत प्राप्नोतु।

[अथ] षष्ठीमाह-

अमोचि यक्ष्माद् दुरितावर्त्यै (२) द्रुहः पाशां निर्ऋत्यै चोदमोचि। अहा अवर्तिमविदत्स्योनम्। अप्यभूद्भद्रे सुकृतस्य लोके, इति।

अयं कुमारो यक्ष्माद् व्याधेर्दुरितादिहेतोः पापादवत्यै वर्तिर्वर्तनं जीवनहेतुः संपत्तद्विपरीतं दारिद्र्यमवर्ति तस्या अप्यमोचि मुक्तोऽभूत्। तथा निर्ऋत्यै राक्षसजातेर्द्रुहो द्रोहरूपात्पाशाच्चायं कुमार उदमोच्युत्कर्षेण मुक्तोऽभूत्। अवर्तिं दारिद्र्यमहा अहासीः परित्यक्तवान्। स्योनं सुखमविदल्लब्धवान्। भद्रे कल्याणे सुकृतस्य लोके पुण्यकर्मणः फलभूते स्थानेऽप्यभूदवस्थितवान्।

[अथ] सप्तमीमाह-

सूर्यमृतं तमसो ग्राह्या यत्। देवा अमुञ्चन्नसृजन्व्यैनसः। एवमहमिमं क्षैत्रियाज्जामिशꣳसात्। द्रुहो मुञ्चामि वरुणस्य पाशात्, इति।

तमोविद्धस्य सूर्यस्य प्रतीकारं देवाश्चक्रुः। तथा च ब्राह्मणम्-"सुवर्भानुरासुरः सूर्यं तमसाऽविध्यत्तस्मै देवाः प्रायश्चित्तिमैच्छन्" इति। सोऽयं वृत्तान्तोऽत्र दृष्टान्तत्वेनाभिधीयते। यद्यथा देवा ऋतमन्धकारप्राप्तं सूर्यं ग्राह्याग्राहकादावरकात्तमसोऽमुञ्चन्मुक्तमकुर्वन् यद्यथा देवा ऋतमन्धकारप्राप्तं सूर्यं ग्राह्या ग्राहकादावरकात्तमसोऽमुक्तमकुर्वन्नमुञ्चन्। तथा तद्धेतोरेनसः पापाद्व्यसृजन्वियोजितवन्तः। एवमहं जनक इमं कुमारं वरुणस्य पाशान्मुञ्चामि मुक्तं करोमि। कीदृशात्पाशात्। क्षेत्रियात्क्षेत्रं गर्भस्थानं तत्रोत्पन्नत्वाज्जामिशंसादालक्ष्यप्रख्यापकाद्द्रुहो बाधकात्। क्षेत्रियै त्वेत्यादिमन्त्राणां जातकर्माणि विनियोगं बौधायन आह-"अथैनं स्नापयति क्षेत्रियै त्वा निर्ऋत्यै त्वा" इति।

Digitized by Madhuban Trust, Delhi

अथाष्टमीमाह-

बृहस्पते युवमिन्द्रश्च वस्वः । दिव्यस्यैशाथे उत पार्थिवस्य । धत्तं रयिꣳ स्तुवते कीरयेचित् (३) । यूयं पात स्वस्तिभिः सदा नः, इति ।

हे बृहस्पते त्वमिन्द्रश्चेत्येतौ युवां दिव्यस्य वस्वः दिवि भवस्य वसुनः धनस्येशाथे स्वामिनौ भवथः । उतापि च पार्थिवस्य पृथिव्यां भवस्य धनस्येशाथे । स्तुवते स्तोत्रं कुर्वते कीरयेचित्कर्त्रे यागं बृहस्पतिसवाख्यं कुर्वते रयिं धनं संपादयतम् । ह इन्द्राबृहस्पती सपरिवारा यूयं नोऽस्मान्स्वस्तिभिः क्षेमैः सदा पात रक्षत । एतस्य मन्त्रस्य बृहस्पतिसवयागे यजमानाभिषेके विनियोगमापस्तम्ब आह -"आज्येन माध्यंदिन सने कृष्णाजिन आसीनमभिषिञ्चति शुक्रामन्थिनो वा संस्रावेण बृहस्पते युवम्" इति ।

[अथ] नवमीमाह-

देवायुधमिन्द्रमाजोहुवानाः । विश्वावृधमभि ये रक्षमाणाः । येन हता दीर्घमध्वानमायन् । अनन्तमर्थमनिवर्त्स्यमानाः, इति ।

येनेन्द्रेण हता वृत्रादयो दीर्घमध्वानमायन्मरणं प्राप्ता इत्यर्थः । तमिन्द्रमभिलक्ष्य ये यजमाना रक्षमाणाः प्रतीक्षां कुर्वन्त आजोहुवानाः सर्वत आह्वानं कुर्वन्तो वर्तन्ते । कीदृशमिन्द्रम् देवायुधं देवार्थं योद्धारं विश्वावृधं विश्वस्य वर्धयितारं ते यजमाना इन्द्रसेविनोऽनिवर्त्स्यमाना इतः परं मनुष्यलोके पुनरावृत्तिरहिताः । सन्तोऽनन्तं विनाशरहितमर्थं सर्वैरर्थनीयं प्रार्थनीयं लोकमायन्प्राप्ताः सोऽयं मन्त्र ऐन्द्रे कर्मणि द्रष्टव्यः ।

[अथ] दशमीमाह-

यत्ते सुजाते हिमवत्सु भेषजम् । मयोभूः शंतमा यद्धृदोऽसि । ततो नो देहि सीबले, इति ।

सीबलाशब्दः कांचिदोषधिं वल्लीरूपामाचष्टे सा च हिमवत्सानुषूत्पद्यते । हिमवत्सु पर्वतविशेषेषु सुजाते सुष्ठूत्पन्ने ह ओषधे ते त्वदीयं यद्भेषजं रोगविनाशमौषधमस्ति । यद्यतस्त्वं हृदो हृदस्य शंतमा सर्वोपद्रवशमनहेतुर्भयोभूः सुखस्य भावयित्री चासि । हे सीवल एतत्संज्ञक ओषधे ततस्तादृश्यास्त्वत्सकाशात्तदौषधं नो देहि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

[अथ] एकादशीमाह-

अदो गिरिभ्यो अधि यत्प्रधावसि । सꣳ शोभमाना कन्यैव शुभ्रे (४) । तां त्वा मुद्गला हविषा वर्धयन्ति । सा नः सीबले रयिमाभाजयेह, इति ।

हे ओषधे यद्यदा त्वं गिरिभ्यः पर्वतेभ्यः सकाशाददः प्रत्यक्षं यथा भवति तथाऽधिप्रधावस्यधिकं वल्लीरूपां सर्वतः प्रसरसि । तत्र दृष्टान्तः-संशोभमाना कन्येव यथा सर्वैराभरणैः सम्यक्शोभमाना कन्या स्यंवरार्थमागतानां वराणां पुरतः संचरति तद्वत् । हे शुभ्रे निर्मल ओषधिवते तां त्वा तादृशीं शुभ्रां त्वां मुद्गला मुद्गलगोत्रोत्पन्ना महर्षयो हविषा वर्धयन्ति । हे सीवलाख्य ओषधिदेवते सा त्वमिह कर्मण्यस्मभ्यं रयिमाभाजय धनं संपादय । रोगनिवर्तकमौषधमेवात्र धनम् । एते उभे ऋचावेतदोषधिदेवताके शाखान्तरगते कर्मणि याज्यानुवाक्ये ।

अथ द्वादशीमाह-

पूर्वो देवा अपरेणानुपश्यञ्जन्मभिः । जन्मान्यवरैः पराणि । वेदानि देवा अयमस्मीति माम् । अहꣳ हित्वा शरीरं जरसः । परस्तात्, इति ।

हे देवा अहमपरेणाधमेनानेन जन्मना पूर्व जन्मानुपश्यन्निदानीं वर्ते । तथैवावरैर्निकृष्टैर्मनुष्यजन्मभिः । पराण्युत्कृष्टानि देवा जन्मानि वेदानि लभेय । इदानींतनजन्मनि प्रयत्नमन्तरेण स्वतः प्रवृत्तां वेदशास्त्रादिवासनां दृष्ट्वा पूर्वमप्येतादृशजन्म संपन्नमिति निश्चीयते । अत एव आहुः-"प्रपेदिरे प्राक्तनजन्मविद्याः" इति सोऽयं दृष्टान्तः- पूर्वजन्मनि वासितमिह जन्मनि फलितमेवमत्राप्यनुष्ठितमुत्तरत्र फलिष्यतीति जानामि । अतोऽनुवित्त्याख्याया देवतायाः प्रसादादहं हे देवा जरसः परस्तात्स्वशरीरं हित्वा लोकान्तरेऽयमीदृशोऽस्मीति मां वेदानि ज्ञातुं शक्नुयाम् ।

[अथ] त्रयोदशीमाह-

प्राणापानौ चक्षुः श्रोत्रम् । वाचं मनसि संभृताम् । हित्वा शरीरं जरसः परस्तात् । आ भूतिं भूतिं वयमश्नवामहै, इति ।

यावेतौ प्राणापानावुच्छ्वासनिःश्वासरूपौ वायू । चक्षुः

Digitized by Madhuban Trust, Delhi

श्रोत्रमित्यादिकं ज्ञानेन्द्रियम् । याऽपि मनसि संभृता संबद्धा वाक् । "यद्धि मनसा ध्यायति तद्वाचा वदति" इति श्रुतेर्वाचो मनसि संबद्धत्वम् । इयं च वाक्कर्मेन्द्रियाणां सर्वेषामुपलक्षणम् । तदिदं प्राणापानादिकं सर्वं गृहीत्वा वयं जरसः परस्ताच्छरीरं हित्वा भूतिं भूतिं तत्तल्लोकस्थितं तत्तदैश्वर्यमासमन्तादश्नवामहै प्राप्नुवाम । एते ऋचौ दिवःश्येनीष्विष्टिषु-"अनुवित्यै चरुम्" इत्यत्र याज्यानुवाक्ये । अत एव तत्र प्रतीकद्वयमाम्नातम्-"पूर्वं देवा अपरेण प्राणापानौ" इति ।

अथ चतुर्दशीमाह-

इ॒मा ए॒व ता उ॒पसो॒ याः प्र॑थ॒मा व्यौच्छ॑न् । ता दे॒व्यः कुर्वते॒ पञ्च॑ रू॒पा । शश्व॑ती॒र्नाव॑पृज्यन्ति । न गम॒न्त्यन्त॑म् (५), इति ।

क॒रो॒भ्य॑र्व॒त्यै चिच्छु॒भ्रेऽश्नवामहै च॒त्वारि॑ च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके पञ्चमाध्याये षष्ठोऽनुवाकः ।। ६ ।।

या उषसः प्रथमाः प्रथमभाविन्यः सृष्ट्यादौ वर्तमाना व्यौच्छन्व्युष्टिं प्रभातमकुर्वन् ता इमा उषस इदानीं वर्तमाना एव । ताश्चोषसो देव्यः पञ्चसंख्याकानि रूपाणि कुर्वते वसन्तादीनि तत्तल्लिङ्गानि कुर्वते । शश्वतीर्निरन्तरं वर्तमानस्ता उषसो नावपृज्यन्ति कदाचिदपि न समाप्यन्ते । तदेव स्पष्टीक्रियते-अन्तमवसानं न गमन्ति । न माप्नुवन्ति । सोऽयं मन्त्र उषोदेवताके कर्मणि द्रव्यम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये पञ्चमप्रपाठके षष्ठोऽनुवाकः ।। ६ ।।

अथ पञ्चमप्रपाठके सप्तमोऽनुवाकः ।

सप्तमानुवाके प्रथमामृचमाह-

वसू॑नां॒ त्वाऽधी॑तेन रु॒द्राणा॑मू॒र्म्या॑य आ॒दि॒त्याना॒ तेज॑सा ।। विश्वे॑षां दे॒वाना॒ क्रतु॑ना म॒रुता॑मेम्ना॑ जुहोमि॒ स्वाहा॑, इति ।

हेऽग्ने त्वां जुहोमि । कीदृशं त्वाम् । वसूनामष्टानां संबन्धि यदधीतं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

मन्त्रजातं तेन सहितम् । रुद्राणामेकादशानां संबन्धिनी येयमूर्मिरुत्कस्तेन सहितम् । आदित्यानां द्वादशानां संबन्धि यत्तेजस्तेन सहितम् । विश्वेषां संबन्धी योऽयमेम्ना (मा) गतिविशेषस्तेन सहितम् । एतस्य मन्त्रस्य सावित्रचयने विनियोगमापस्तम्ब आह –"अपरं चतुर्गृहीतं वसूनां त्वाऽधीतेन" इति जुहोतीत्यनुवर्तते ।

अथ द्वितीयामाह–

अभिभूतिरहमागमम् । इन्द्रसखा स्वायुधः । आस्वाऽऽ शासु दुष्षहः, इति ।

हेऽग्नेऽहमागमं त्वत्समीपे समागतोऽस्मि । त्वमप्याशासु दिक्ष्वभिभूतिर्वैरितिरस्कारक्षम आस्स्वोपविश । इन्द्रसखेन्द्रस्य प्रियः स्वायुधः शोभनैरायुधैरुपेतो दुष्षहः केनापि तिरस्कर्तुमशक्यः । अयं मन्त्रः कस्मिंश्चिदाग्रयणे कर्मण्युपहोमार्थः ।

[अथ] तृतीयामाह–

इदं वर्चो अग्निना दत्तमागात् । यशो भर्गः सह ओजो बलं च (१), दीर्घायुत्वाय शतशारदाय । प्रतिगृभ्णामि महते वीर्याय, इति ।

अग्निना दत्तं यदिदं वर्चः प्रभृति गुणजातं तदिदमागाद्यजमानं प्रत्यागतम् । वर्चः शरीरकान्तिर्यज्ञः कर्तिर्भर्गो रश्मिरूपं तेजः सहोऽभिभवसामर्थ्यमोजो बलहेतुरष्टमो धातुर्बलं शरीरशक्तिः । शतशारदाय शतसंख्याकंसत्सरोपेताय दीर्घयुत्वाय दीर्घकाल-वर्त्यायुष्याय महते वीर्यायाधिकसामर्थ्याय च प्रतिगृभ्णाम्यग्नेरनुग्रहं स्वीकरोमि । अस्य मन्त्रस्य हारियोजनादूर्ध्वभाविनि यज्ञपुच्छे विनियोगो द्रष्टव्यः ।

उक्तास्त्रयो मन्त्रा ऋगात्मकाः । चतुर्थमन्त्रमारभ्य यजुरात्मकाः । तत्रैतं चतुर्थमन्त्रमाह –

आयुरसि विश्वायुरसि । सर्वायुरसि सर्वमायुरसि । सर्वं म आयुर्भूयात् । सर्वमायुर्गेषम्, इति ।

हे प्रवर्ताख्यकर्णाभरण त्वमायुरस्यायुषः स्वरूपमसि । विश्वायुरसि विश्वस्य जगत आयुः स्वरूपमसि । सर्वायुरसि विशेषत सर्वेषां पुरुषाणामायुः स्वरूपमसि । सर्वमायुरसि

Digitized by Madhuban Trust, Delhi

यच्छतसंवत्सरपरिमितमायुस्तत्सर्वं त्वमसि । त्वत्प्रसादात्सर्वं संपूर्णमायुर्मे भूयात् । अतोऽहं सर्वं संपूर्णमायुर्गेषं गम्यासम् । अस्य मन्त्रस्याऽऽयुष्कामेष्टौ कर्णाभरणधारणे विनियोगापस्तम्ब आह- "तद्यजमान आचम्य प्रतिगृह्य प्रदक्षिणं दक्षिणे कर्णे आबध्नात्यायुरसि विश्वायुरसि" इति ।

अथ पञ्चमं यजुराह-

भूर्भुवः सुवः, इति ।

पृथिव्यन्तरिक्षद्युलोका अनुगृह्णन्त्विति शेषः ।

अथ षष्ठं यजुराह-

अग्निर्धर्मेणान्नादः मृत्युर्धर्मेणान्नपतिः । ब्रह्म क्षत्रं स्वाहा (२), इति ।

योऽयमग्निः सोऽयं स्वकीयेन धर्मेणान्नादौ भवति । अन्नभक्षकत्वं जाठराग्नौ प्रसिद्धम् । योऽयं मृत्युर्देवः सोऽयं स्वकीयेन धर्मेणान्नपतिरन्नस्य पालकः । यावन्मृत्युः प्राणिनं न मारयति तावदयमन्नं भुङ्क्ते तदिदमन्नपालकत्वम् । ब्रह्म ब्राह्मणजातिः क्षत्रं क्षत्रियजातिस्तान्येतान्यग्निमृत्युब्रह्मक्षत्त्राण्युद्दिश्य स्वाहा हुतमिदमस्तु ।

अथ सप्तमं यजुराह-

प्रजापतिः प्रणेता । बृहस्पतिः पुर एता । यमः पन्थाः । चन्द्रमाः पुनरसुः स्वाहा, इति ।

योऽयं प्रजापतिः सोऽयं प्रणेता प्रेरकः । योऽयं बृहस्पतिः सोऽयं पुर एता पुरतो गन्ता । योऽयं यमः सोऽयं पन्था मार्गपालकः । यस्तु चन्द्रमा सोऽयं पुनरसुः पुनः पुनर्जायमानः प्राणरूपः। तानेतान्प्रजापत्यादीनुद्दिश्य स्वाहा हुतमिदमस्तु भूर्भुवः सुवरित्यादिमन्त्रत्रयस्य विनियोगः सूत्रान्तरेषु मृग्यताम् ।

अथाष्टमं यजुराह-

अग्निरन्नादोऽन्नपतिः । अन्नाद्यमस्मिन्यज्ञे यजमानाय ददातु स्वाहा, इति ।

योऽयमग्निःसोऽयमन्नादो जाठराग्निरूपेणान्नस्य भक्षकः । अन्नपतिर्बाह्याग्निरूपेणान्नस्य पाचकत्वात्पालकः । सोऽ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

यमग्निरस्मिन्यज्ञे यजमानाय भक्षणयोग्यमन्नं ददातु । तस्मा अग्नये स्वाहा हुतमिदमस्तु ।

अथ नवमं यजुराह-

सोमो राजा राजपतिः । राज्यमस्मिन्यज्ञे यजमानाय ददातु स्वाहा, इति ।

यः सोमः सोऽयं ब्राह्मणानां राजा । "सोमोऽस्माकं ब्राह्मणानां राजा" इति मन्त्रान्तरात् । स चान्येषां राज्ञां पालकत्वाद्राजपतिः । शेषं पूर्ववत् ।

अथ दशमं यजुराह-

वरुणः सम्राट्सम्राट् पतिः । साम्राज्यमस्मिन्यज्ञे यजमानाय ददातु स्वाहा (३), इति ।

योऽयं वरुणः सोऽयं समीचीनो राजा भूत्वा सर्वेषामन्येषां, साम्राज्यानां पालकः ।

अथैकादशं यजुराह-

मित्रः क्षत्रं क्षत्रपतिः । क्षत्रमस्मिन्यज्ञे यजमानाय ददातु स्वाहा, इति ।

मित्रो देवः स्वयं क्षत्रियजातिर्भूत्वा सर्वेषामन्येषां क्षत्रियाणां पालकः । स च क्षत्रं क्षत्रियधर्मं ददातु ।

अथ द्वादशं यजुराह -

इन्द्रो बलं बलपतिः । बलमस्मिन्यज्ञे यजमानाय ददातु स्वाहा, इति ।

अयमिन्द्रः स्वयं बलं प्राप्य परकीयस्य बलस्य पालको भवति । अथ त्रयोदशं यजुराह-

बृहस्पतिर्ब्रह्म ब्रह्मपतिः । ब्रह्मास्मिन्यज्ञे यजमानाय ददातु स्वाहा इति ।

बृहस्पतिः स्वयं देवानां मध्ये ब्राह्मणजातियुक्तः । "ब्रह्म वै देवानां बृहस्पतिः" इति श्रुत्यन्तरात् । सोऽयमितरब्राह्मणजातेः पालको ब्राह्मणधर्मं ददातु ।

Digitized by Madhuban Trust, Delhi

अथ चतुर्दशं यजुराह-

सविता राष्ट्रꣳ राष्ट्रपतिः । राष्ट्रमस्मिन्यज्ञे यजमानाय ददातु स्वाहा, इति ।

सविता स्वयं राष्ट्रं प्राप्यान्यदीयस्य राष्ट्रस्य पालको भवति ।

अथ पञ्चदशं यजुराह-

पूषा विशां विट्पतिः। विशमस्मिन्यज्ञे यजमानाय ददातु स्वाहा, इति ।

पूषा स्वयं देवानां विशा स्वामी भूत्वा मनुष्याणामपि विशां पालको भवति ।

अथ षोडशं यजुराह-

सरस्वती पुष्टिः पुष्टिपत्नी । पुष्टिमस्मिन्यज्ञे यजमानाय ददातु स्वाहा, इति ।

सरस्वती स्वयं पुष्टियुक्ता सती परकीयाया अपि पुष्टेः पालयित्री भवति ।

अथ सप्तदशं यजुराह-

त्वष्टा पशूनां मिथुनानाꣳ रूपकृद्रूपपतिः । रूपेणास्मिन्यज्ञे यजमानाय पशून्ददातु स्वाहा (४), इति ।

च स्वाहा साम्राज्यमस्मिन्यज्ञे यजमानाय ददातु स्वाहा विशमस्मिन्यज्ञे यजमानाय ददातु स्वाहा चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके पञ्चमाध्याये सप्तमोऽनुवाकः ।। ७ ।।

मिथुनानां स्त्रीपुरुषरूपाणां पशूनां रूपस्य कर्ता त्वष्टा सर्वेषां रूपाणां पालकः । अतोऽस्मिन्यज्ञे यजमानाय समीचीनरूपेण युक्तान्पशून्ददातु । तस्मै त्वष्ट्रे स्वाहा हुतमिदमस्तु । "अग्निरन्नादः" इत्यादयो दश मन्त्रा मित्रविन्दाख्यायामिष्टावुपहोमार्थाः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
पञ्चमप्रपाठके सप्तमोऽनुवाकः ।। ७ ।।

अथ पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ।

अष्टमेऽनुवाके प्रथमामृचमाह-

स ईं पाहि य ऋजीषी तरुत्रः । यः शिप्रवान्वृषभो यो मतीनाम् । या गोत्रभिद्वज्रभृद्यो हरिष्ठाः । स इन्द्र चित्रा अभितृन्धि वाजान्, इति ।

हे इन्द्र यस्त्वमृजीषी । निष्पीडितरसः सोमवल्लीभाग ऋजीषम् । तद्वानृजीषी । अत एव ब्राह्मणमाम्नायते- "तस्मात्तृतीयसवन ऋजीषमभिषुण्वन्ति" इति । तरुत्रो दुःखेभ्यस्तारकस्तादृशः स त्वमीं पाहीमं सवनं पालय । यस्त्वं शिप्रवाञ्शोभनहनुयुक्तो यश्च त्वं मतीनामस्मद्बुद्धीनां वृषभो वर्षयिता सन्मार्गबुद्धिप्रद इत्यर्थः । यश्च त्वं गोत्रभित्पर्वतानां भेत्ता वज्रभृद्वज्रस्य धारको यश्च हरिष्ठा शत्रूणामन्नान्यभितृन्ध्यभितो विनाशय । अयं मन्त्रो माध्यंदिनसवने प्रस्थियाज्यास्वन्तर्भावनीयः ।

[अथ] द्वितीयामाह-

आ ते शुष्मो वृषभ एत पश्चात् । ओत्तरादध राागा (?) पुरस्तात् । आ विश्वतो अभि समैत्वर्वाङ् । इन्द्र द्युम्न सवर्वद्धेह्यस्मे, इति ।

हे इन्द्र वृषभ श्रेष्ठ ते तव शुष्मो बलं पश्चादस्मत्तः पश्चिमभाग ,आ एत्वागच्छतु । तथैवोत्तरादुत्तरभागेऽप्यागच्छतु । अधरादधरभागेऽप्यागच्छतु । पुरस्तात्पूर्वभागेऽप्यागच्छतु । विश्वतः सर्वेषु प्रदेशेष्वभ्यस्मानभिलक्ष्यार्वाङ्समीपवर्त्यासमेतु सम्यगागच्छतु । हे इन्द्र सुवर्वत्स्वर्गयुक्तं द्युम्नं धनमस्मे धेह्यस्मासु संपादय ।

[अथ] तृतीयामाह-

प्रोष्वस्मै पुरो रथम् । इन्द्राय शूषमर्चत (१) । अभी कैचिदु लोककृत् । सङ्गे समत्सु वृत्रहा । अस्माकं बोधि चोदिता । नभन्तामन्यकेषाम् । ज्याका अधि धन्वसु, इति ।

Digitized by Madhuban Trust, Delhi

अस्मा इन्द्रायास्येन्द्रस्य पुरो रथं रथस्य पुरोभागे शूषं बलं प्रोष्वर्चत प्रकर्षेण सुष्ठु पूजयत । कथं बलस्य पूजेत्युच्यते-अयमिन्द्रो वृत्रहा वैरिघाती समत्सु संग्रामेषु सङ्गे योद्धृभिर्वैरिभटैः सङ्गे सति संयोगे सत्यमी केचिद्धन्तुं कामयमानेऽपि वैरिणि लोककृत्स्थितिं करोत्येव न तु पलायते । इत्थं बलस्य पूजा । तथा पूजित इन्द्रोऽस्माकमितरव्यावृत्तये चोदिता प्रेरयिता सन्बोधि बुध्यतां सावधानो भवतु । अन्यकेषां कुत्सितानां वैरिणां धन्वस्वधिश्रित्य वर्तमाना ज्याकाः कुत्सितज्या नभन्तां हिंसन्तां त्रुटयन्त्वित्यर्थः । एतच्चोभयं कस्मिंश्चिदैन्द्रे कर्मणि विनियोज्यम् ।

[अथ] चतुर्थीमाह-

इन्द्रं वय ँ शुनासीरम् । अस्मिन्यज्ञे हवामहे । वा वाजैरुप नो गमत्, इति ।

शुनो वायुः सीर आदित्यस्ताभ्यां युक्तमिन्द्रमस्मिन्यज्ञे वयमाह्वयामः । स चेन्द्रो वाजैरन्नैः सह नोऽस्माप्रन्त्युपागमदुपागच्छतु ।

[अथ] पञ्चमीमाह-

इन्द्राय शुनासीराय । स्रुचा जुहुत नो हविः (२) । जुषतां प्रतिमेधिरः, इति ।

शुनासीराय वाय्वादित्ययुक्तायेन्द्राय स्रुचा जुह्वा नोऽस्मदीयं हविर्हेऋत्विजो जुहुत । मेधिरो मेधावानिन्द्रः । प्रतिजुषतां प्रातिस्विकं तद्धविः सेवताम् ।

[अथ] षष्ठीमाह-

प्र हव्यानि घृतवन्त्यस्मै । हयश्वाय भरता सजोषाः इन्द्रर्तुभिर्ब्रह्मणा वावृधानः । शुनासीरी हविरिदं जुषस्व, इति ।

हर्यश्वाय हरितनामकाभ्यामश्वाभ्यां युक्तायास्मा इन्द्राय घृतवन्ति हव्यानि ह ऋत्विजः प्रभरत प्रकर्षेण संपादय [त] । ह इन्द्र त्वं सजोषा वसन्ताद्यृतुदेव ताभिः समानप्रीतः सन्ब्रह्मणा मन्त्रेण वावृधानो वर्धमानः शुनासीरी वाय्वादित्ययुक्त इदं हविर्जुषस्व । अत्राऽऽपस्तम्बः-"इन्द्राय सुनासीराय पुरोडाशो द्वादशकपालः" इत्यस्मिन्कर्मणि मन्त्रद्वयं विनियुक्तवान् "इन्द्राय शुनासीराय" इत्यारभ्य "हविरिदं जुषस्वेति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

याज्यनुवाक्ये" इत्यन्तेन वाक्येन । यस्त्वेताभ्यां पूर्वो मन्त्रः "इन्द्रं वयम्" इत्यादिः सोऽयं पुरोनुवाक्यया विकल्प्यते ।

[अथ] सप्तमीमाह-

वयः सुपर्णा उपसेदुरिन्द्रम् । प्रियमेधा ऋषयो नाधमानाः । अप ध्वान्तमूर्णुहि पूर्धि चक्षुः । मुमुग्ध्यस्मान्निधयेव बद्धान्, इति ।

केचिदृषय इन्द्रमुपसेदुः । कार्यप्राप्त्यर्थमुपासते । कीदृशा ऋषयः । वयः पक्षिमूर्तिधारिणोऽत एव सुपर्णाः शोभनपक्षोपेताः । प्रियमेधा अधीतस्य ग्रन्थस्य धारणशक्तिर्मेधा तस्यां प्रीतियुक्ताः । नाधमाना किंचित्कार्यं याचमानाः । स एव याच्ञाप्रकारः स्पष्टीक्रियते- हे इन्द्र ध्वान्तमज्ञानलक्षणमन्धकारमपोर्णुह्यपसारय । चक्षुर्ज्ञानलक्षणां दृष्टिं पूर्धि पूरय । निधयेव शृङ्खलयेवाज्ञानेन बद्धानस्मान्मुमुग्धि तस्मादज्ञानबन्धान्मोचय । अस्य मन्त्रस्य सोमक्रयादूर्ध्वंमंसाच्छादकवस्त्रापनयने विनियोगमापस्तम्ब आह- "अत्र यजमानोऽपोर्णुते वयः सुपर्णाः" इति ।

अथाष्टमीमाह-

बृहदिन्द्राय गायत (३), मरुतो वृत्रहन्तमम् । येन ज्योतिरजनयन्नृतावृधः । देवं देवाय जागृवि, इति ।

हे मरुतो वृत्रहन्तममतिशयेन वैरिवधकारिणं बृहत्सोमेन्द्रायेन्द्रार्थं गायत । ऋतावृधो यज्ञवर्धका ऋत्विजो देवायेन्द्रार्थं देवं दीप्यमानं जागृवि जागरणस्याप्रमत्तत्वस्य साधनं ज्योतिर्ज्ञानरूपं प्रकाशं येन बृहत्साम्नाऽजनयन्नुत्पादितवन्तः । तेन बृहता साम्ना गायतेत्यन्वयः । ऋत्विजो विनियोगो द्रष्टव्यः ।

अथ नवमीमाह-

कामिहैकाः क इमे पतङ्गाः । मान्थालाः कुलिपरि मा पतन्ति । अनावृतैनान्प्रधमन्तु देवाः । सौपर्णं चक्षुस्तनुवा विदेय, इति ।

मिहिकाशब्दो नीहारवाचकः सन्दृष्टेरावरकं रोगविशेषमुपलक्षयति । मिहिका एव मिहैकाः पतङ्गशब्दः शलभवाची

Digitized by Madhuban Trust, Delhi

सन्नेत्ररश्मिजन्यानि केशोण्ड्रकान्याकाशे भासमानान्युपलयक्षति । तानि चौष्ण्यरोगे सति बहूनि भासन्ते । तदुभयं किंशब्दाभ्यामाक्षिप्यते का मिहैका इमे पतङ्गाश्च के । तदुभयोपद्रवो मम नास्तीत्यर्थः । मन्थशब्देन दधिमन्थनमुच्यते । तत्संबन्धिनस्तक्रबिन्दवो मान्थास्तद्वदाला-न्त्यागच्छन्तीति मान्थालाः केशोण्ड्रकविशेषाः । कुलं समूहस्तद्रूपतामापन्नाः कुलिशब्देनोच्यन्ते । ते च संघशो मा मां परिपतन्ति । देवा अनावृताः । केशोण्ड्रादिकृतनेत्रावरणापगमेनै-नान्केशोण्ड्रादिकान्रोगदोषान्प्रधमन्तु प्रकर्षेण मुखोत्थितवायुमात्रेण विनाशयन्तु । ततोऽहं तनुवा सहितः सौपर्णं चक्षुर्विदेय । सुपर्णः पक्षी यथा दूरस्थं पश्यति तथा दूरदर्शनक्षमं चक्षुष्पाटवं लभेयम् । सोऽयं मन्त्रो नेत्ररोगपरिहाराय प्रयोक्तव्यः ।

[अथ] दशमीमाह-

एवाऽऽवन्दस्व वरुणं बृहन्तम् । नमस्या धीरममृतस्य गोपाम् । स नः शर्म त्रिवरूथं वियंसेत् (४), यूयं पात स्वस्तिभिः सदा नः, इति ।

हे यजमान बृहन्तं गुणाधिकं वरुणमेवाऽऽवन्दस्व स्तुहि । तथा धीरं बुद्धिमन्तममृतस्य क्रतुफलस्य गोपां रक्षितारं नमस्य नमस्कुरु। स वरुणो नोऽस्मभ्यं त्रिवरूथं भूमिकात्रयोपेतं शर्म गृहं वियंसद्विशेषेण यच्छतु । हे वरुण सपरिवारा यूयं स्वस्तिभिः क्षेमैर्नोऽस्मान्सदा पात रक्षत । अस्य मन्त्रस्य ब्रह्मण उत्सङ्गे सोमासादने विनियोगमापस्तम्ब आह- "एवाऽऽवन्दस्वेत्युपस्थे ब्रह्मा राजान कुरुते" इति ।

[अथ] एकादशीमाह-

नाके सुपर्णमुप यत्पतन्तम्, हृदा वेनन्तो अभ्यचक्षत त्वा । हिरण्यपक्षं वरुणस्य दूतम् । यमस्य योनौ शकुनं भुरण्युम्, इति ।

हे प्रवर्ग्यस्वामिंस्त्वामृत्विजो हृदा स्वकीयेन मनसा वेनन्तः कामयमाना यद्यदाऽभ्यचक्षताभितः प्रख्यापितवन्तस्तदा त्वं तुष्टो भवेति शेषः । कीदृशं त्वाम् । नाके सुवर्ग उप पतन्तं समीपं प्रतिगच्छन्तम् । अत एव सुपर्णं शोभनपक्षोपेतं हिरण्यपक्षं सुवर्णमयपक्षोपेतं वरुणस्य दूतं वरुणेन प्रेर्यमाणं यमस्य योनौ स्थानविशेषे भुरण्युं भरणशीलं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

रोगसंपादकमित्यर्थः । शकुनं पक्ष्याकारम् । अयं मन्त्रः प्रवर्ग्यस्याभिषवेऽन्तर्भावनीयः ।

[अथ] द्वादशीमाह-

शं नो देवीरभिष्टये । आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः, इति ।

देवीर्द्योतमाना आपो नोऽस्माकमभिष्टयेऽपेक्षिताय पानाय शं शान्ता भवन्तु । नोऽस्मान्प्रति शं सुख हेतवो योर्दुःखवियोजिकाश्च सत्योऽभिस्रवन्त्वभितः प्रवहन्तु ।

[अथ] त्रयोदशीमाह-

ईशाना वार्याणाम् । क्षयन्तीश्चर्षणीनाम् (५) । अपो याचामि भेषजम्, इति ।

अहमपो देवीः प्रति भेषजं पापविनाशकारकमौषधं याचामि । कीदृशीरपः । वार्याणां वरणीयानां कामानामीशाना दातुं समर्थाश्चर्षणीनां मानुषाणां क्षयन्तीर्निवासहेतुभूताः ।

[अथ] चतुर्दशीमाह-

अप्सु मे सोमो अब्रवीत् । अन्तर्विश्वानि भेषजा । अग्निं च विश्वशंभुवम् । आपश्च विश्वभेषजीः, इति ।

अप्स्वन्तर्जलेषु मध्ये विश्वानि भेषजा सर्वाण्यौषधानि सन्तीति मे मह्यं सोमोऽब्रवीत् । तथा विश्वशंभुवं सर्वस्य जगतः सुखस्य भावयितारमग्निं च मह्यं सोमोऽब्रवीत्। तथा विश्वभेषणीः सर्वस्यानिष्टस्यौषधरूपा आपश्च याः सन्ति ता अपि सोमोऽब्रवीत् । तदेतन्मन्त्रत्रयमदेवताके कर्मणि द्रष्टव्यम् । तृतीयमन्त्रस्यावभृथेष्टौ द्वितीयाज्यभागेऽपि विनियोगमापस्तम्ब आह-"अप्सुमन्तावाज्यभागौ यजत्यप्स्वग्न इत्येषाऽप्सु मे सोमो अब्रवीत्' इति ।

[अथ] पञ्चदशीमाह-

यदप्सु ते सरस्वती । गोष्वश्वेषु यन्मधु । तेन मे वाजिनीवति । मुखमङ्ग्धि सरस्वति, इति ।

हे सरस्वति नदीरूपे ते त्वदीयास्वप्सु यन्मधु माधुर्यं विद्यते तथा

Digitized by Madhuban Trust, Delhi

गोष्वश्वेषु मधुरं क्षीरं समीचीनं बहनसामर्थ्यं च यद्विद्यते हे वाजिनीवत्यन्नसमृद्धियुक्ते सरस्वति तेन सर्वेण मे मुखमङ्ग्धि वक्त्रमलंकृतं कुरु ।

[अथ] षोडशीमाह-

या सरस्वती वैशम्भल्या (६) । तस्यां मे रास्व । तस्यास्ते भक्षीय । तस्यास्ते भूयिष्ठभाजो भूयास्म, इति ।

विशां प्रजानां भरणं पोषणं विशम्भलं तत्कर्तुं क्षमा वैशभ्यल्या तादृशी या सरस्वती तस्यां सरस्वत्यां नदीरूपायां मे रास्व । हे सरस्वति देवते भोगं देहि । तस्याः सरस्वत्यास्ते तव भक्षीय रसमनुभवामि । तस्यास्ते भूयिष्ठभाजोऽतिप्रभूततररससेविनो भूयास्म । एतस्य इत्युपक्रम्य भूयिष्ठभाजो भूयास्मेति मुखं विसृष्टे" इत्यन्तेन वाक्येन ।

[अथ] सप्तदशीमाह-

अहं त्वदस्मि मदसि त्वमेतत् । ममासि योनिस्तव योनिरस्मि । ममैव सन्वह हव्यान्यग्ने । पुत्रः पित्रे लोककृज्जातवेदः, इति ।

हेऽग्नेऽहं त्वदस्मि त्वत्तः सकाशाद्यजमानोऽस्मि त्वमप्येतद्रूपं मदसि मत्तः सकाशादेतदाहवनीयरूपं प्राप्तोऽसि । मया ह्याधीयमानस्य तवाऽऽहवनीयत्वम् । अतः कारणातात्त्वं मम योनिः कारणमसि । अहं च तव योनिः कारणमस्मि । हेऽग्ने ममैव संस्त्वं मदीय एव भूत्वा हव्यानि । वह । हे जातवेदः सर्वजगदभिज्ञ यथा लोके पुत्रः पित्रे लोककृत्स्थानसंपादको भवत्यतो यथा मया तव स्थानं संपादितं तथा त्वयाऽपि मम पुण्यलोकः संपादनीयः । एतस्य मन्त्रस्य फलचमसे विनियोगमापस्तम्ब आह-'अहं त्वदस्मि मदसीत्यङ्गारे हुत्वा तस्मै भक्षं प्रयच्छेत्' इति ।

अथाष्टादशीमाह-

इहैव संस्तत्र सन्तं त्वाऽग्ने । प्राणेन वाचा मनसा बिभर्मि । तिरो मा सन्तमायुर्मा प्रहासीत् (७) । ज्योतिषा त्वा वैश्वानरेणोपतिष्ठे, इति ।

हेऽग्नेऽहमिहैव दूरदेशे स्थितः संस्तत्राऽऽहवनीयायतने सन्तं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

वर्तमानं त्वां मदीयेन प्राणेन मनसा वाचा बिभर्मि धारयामि । तिरो व्यवहितो भूत्वा सन्तं वर्तमानं मा मां प्रत्यायुर्मा प्रहासीन्मा परित्यजतु । वैश्वानरेण सर्वपुरुषहितेन ज्योतिषा युक्तं त्वामुपतिष्ठे भजामि । अयं मन्त्रः क्वचिदग्न्युपस्थाने विनियोक्तव्यः ।

अथैकोनविंशीमाह–

अ॒यं ते॒ योनि॑र्ऋ॒त्विय॑ः । यतो॑ जा॒तो अरो॑चथाः । तं जा॒नन्न॑ग्न॒ आरो॑ह । अथा॑ नो वर्धया र॒यिम्, इति ।

हेऽग्नेऽयमरणिरूपः काष्ठाविशेषस्ते तवर्त्वियो योनिर्ऋतुकालसंबन्ध्युत्पत्तिस्थानम् । यतो योनेर्जातस्त्वमरोचथा दीप्तोऽसि । हेऽग्ने जानन्स्वकीयत्वेनाव गच्छंस्तं योनिमरणिरूपमारोह । अथानन्तरं नोऽस्माकं रयिं धनं वर्धय समृद्धं कुरु । एतस्य मन्त्रस्य विनियोगो ब्राह्मणेनाऽऽम्नातः–"अ॒यं ते योनिर्ऋत्विय इत्यरण्योः समारोहयति" इति ।।

[अथ] विंशीमाह–

या ते॑ अग्ने य॒ज्ञिया त॒नूस्तये॒ह्यारो॑हा॒ऽऽत्मानम् । अच्छा॒ वसू॑नि कृ॒ण्वन्न॒स्मे नर्या॑ पु॒रूणि॑ । य॒ज्ञो भू॒त्वा य॒ज्ञमासी॑द॒ स्वां योनम् । जा॒तवे॑दो॒ भुव॒ आजाय॑मान॒ः सक्षय॒ एहि॑, इति ।

हेऽग्ने ते तव यज्ञिया तनूर्यज्ञयोग्या या तनुस्तया तन्वा सहैह्यागच्छ । आगत्य चाऽऽत्मानमारोह । त्वं मदीय आत्मा सन्प्रच्छरीरमारोह । किं कुर्वन् । अस्मे अस्माकं नर्या नरस्य योग्यानि वसूनि धनानि पुरूणि बहून्यच्छाभिमुखानि कृण्वंस्त्वं यज्ञस्वरूपो भूत्वा यज्ञं यज्ञनिर्वाहकं मदेहं स्वां योनिं स्वकीयं स्थानमासीद प्राप्नुहि । हे जातवेदो भुवः सकाशादाभिमुख्येन जायमानः सक्षयो निवासस्थानसहितं एह्यागच्छ । एतस्यापि मन्त्रस्य विनियोगो ब्राह्मणे दर्शितः–"या ते अग्ने यज्ञिया तनूस्तयेह्यारोहेत्यात्मन्समारोहयते" इति ।

[अथ] एकविंशीमाह–

उ॒पाव॑रोह जातवे॑द॒ः पुन॒स्त्वम् (८), दे॒वेभ्यो॑ ह॒व्यं व॑ह नः

Digitized by Madhuban Trust, Delhi

प्रजानन् । आयुः प्रजा ँरयिमस्मासु धेहि । अजस्रो दीदिहि नो दुरोणे, इति ।

हे जातवेदः पुनरपि त्वमुपावरोहारण्योः सकाशाद्भूमाववतर । अवतीर्य च प्रजानन्नस्य देवस्येदं हविरिति प्रकर्षेण जानन्नोऽस्मदीयं हव्यं देवेभ्यो वह प्रापय । आयुरादिकमस्मासु संपादय । अजस्रो निरन्तरं वर्तमानस्त्वं नो दुरोणेऽस्मदीये गृहे दीदिहि दीप्यस्व । एतस्य विनियोगमापस्तम्ब आह – "उपावरोह जातवेद इति निवर्तमानमभिमन्त्रयते" इति ।

[अथ] द्वाविंशीमाह–

तमिन्द्रं जोहवीमि मघवानमुग्रम् । सत्रादधानमप्रतिष्कुत ँशवा ँसि । म ँहिष्ठो गीर्भिरा च यज्ञियोऽववर्तत । राये नो विश्वा सुपथा कृणोत वज्री, इति ।

तं प्रसिद्धमिन्द्रं जोहवीम्याह्वयामि । कीदृशमिन्द्रम् । मघवानं धनवन्तमुग्रं शत्रुषु तीव्रं शवांसि सर्वाणि बलानि सत्रादधानं सहधारयन्तमप्रतिष्कुतं कुतोऽपि प्रतिपक्षरहितम् । ईदृश इन्द्रो मंहिष्ठोऽतिशयेन पूज्यो यज्ञियो यज्ञ योग्यश्च सन्गीर्भिरस्मदीयाभिः स्तुतिभिरावर्तत्पुनः पुनरावर्तमानः सन्वज्रीवज्रयुक्तो विश्वा सुपथा सर्वान्सुमार्गान्नो रायेऽस्माकं धनलाभाय कृणोतु करोतु । अयं मन्त्र ऐन्द्रे कर्मणि द्रष्टव्यः ।

[अथ] त्रयोविंशीमाह–

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत् । सोममपिबद्विष्णुना सुतं यथावशत् । स ईं ममाद महि कर्म कर्तवे महामुरुम्, (९), सैन ँसश्चद्देवं देवः सत्यमिन्दु ँसत्य इन्द्रः, इति ।

ज्योतिर्गौरायुरिति त्रिकद्रुक इत्यापस्तम्बेनाभिधानाज्ज्योतिरादयस्त्रयः सोमयागास्त्रिकद्रुक- शब्दावाच्याः । तेषु यागेष्विन्द्रो विष्णुना सहितः सोममपिबत् । कीदृश इन्द्रः । महिषो गुणैश्वर्यादिभिर्महांस्तुविशुष्मः । प्रभूतबलस्तृपत्तृप्तिं गतः । कीदृशं सोमम् । यवाशिरं यवसक्तुर्मिश्रितं सुतमभिषुतम् । स चेन्द्रस्तं सोमं ययावशद्यथावदकामयत् । सम्यक्कामितवानित्यर्थः । स च सोमो महि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

कर्म कर्तवे महत्कर्म कर्तुमींममादेममिन्द्रं हर्षयामास । स चेन्द्र एनं सोमं सश्चत्पीतवान् । कीदृशं सोमम् । महां स्वादुत्वेन महान्तमुरुं प्रभूतं देवं दीप्यमानं सत्यमवितथमवश्यफलप्रदमिन्दुमाह्लादहेतुम् । कीदृश इन्द्रः। देवो दीप्यमानः सत्योऽवितथस्वरूपः केनाप्यबाध्य इत्यर्थः ।

[अथ] चतुर्विंशीमाह-

विदद्यती सरमा रुग्णमद्रेः । महि पाथः पूर्व्यं सध्रियक्कः । अग्रं नयत्सुपद्यक्षराणाम् । अच्छा रवं प्रथमा जानती गात्, इति ।

सरमा काचिच्छुनी श्वमूर्तिधारिणी देवता भूमावन्नसंपादनार्थमायतीन्द्रेण प्रेषिताऽद्रेर्यती मेरोः सकाशाद्भूमिं गच्छन्ती रुग्णमन्नाभावेन क्षुधाग्रस्तं जनं विददलभत । ततो महि पाथो महज्जलं कः करोत् । कीदृशम् । पूर्व्यं पूर्वमुत्पन्नमन्नस्य कारणं सहाञ्चतीति सध्रियक्सर्वक्षेत्रसंचारीत्यर्थः । सुष्ठु पद्यते गच्छतीति सुपदी । सा शुन्यग्रं नयत्तज्जलं पुरतो नीतवती । तत्र पुरोदेशेऽक्षराणां क्षरो विनाशो हिंसा तदयोग्यानां गवां स्वशब्दं जानत्यच्छं तदाभिमुख्येन प्रथमा सती गाज्जगाम जलोत्पादनेनान्नं संपाद्य गोरसं संपादयितुं गतवतीत्यर्थः ।

[अथ] पञ्चविंशीमाह-

विदद्गव्यं सरमा दृढमूर्वम् । येना नुकं मानुषी भोजते विट् । आ ये विश्वा स्वपत्यानि चक्रुः । कृण्वानासो अमृतत्वाय गातुम्, इति ।

सरमा शुनी गव्यं गोयूथं विददलभत । कीदृशम् । दृढं कदाचिदप्यनपायिनमूर्वमतिप्रभूतम् । मानुषी विड् विश्वमनुष्यरूपा प्रजा येन गोयूथेन भोजते क्षीरादिकं भुङ्क्ते । नुकमित्येतदव्ययं सर्वथेत्यस्मिन्नर्थे वर्तते । अमृतत्वाय स्वर्गरूपाय कर्मफलाय गातुं मार्गं कृण्वानासः कुर्वाणा ये यजमाना विश्वा सर्वाणि स्वपत्यानि कर्माण्याचक्रुः सर्वतः कृतवन्तः । तथाविधयजमानरूपा प्रजा येन गव्येन भुङ्क्ते तं गोयूथमालभतेति पूर्वत्रान्वयः ।

[अथ] षड्विंशीमाह-

त्वं नृभिर्नृपते देवहूतौ (१०) । भूरीणि वृत्वा हर्यश्व

Digitized by Madhuban Trust, Delhi

ह ँसि । त्वं निदस्युं चमुरिम् । धुनिं चास्वापयो दभीतये सुहन्तु, इति ।

हे हर्यश्व हरिनामकाभ्यामश्वाभ्यामुपेतेन्द्र हे नृपते मनुष्याणां पालक नृभिर्मनुष्यैर्यजमानर्त्विग्भिर्देवहूतौ देवार्थमाह्वाने कृते सति त्वं भूरिणि बहूनि वृत्वा वृत्राणि शत्रुजातानि हंसि मारयसि । किंच त्वं निदस्युप्रभृतीं स्त्रीन्रक्षोविशेषान्सुहन्तु सुष्ठु हननसाधनेन वज्रेण दभीतये दम्भनाय हिंसा र्थमस्वापयः सप्तामूर्छितानकरोः ।

[अथ] सप्तविंशीमाह-

एवा पाहि प्रत्नथा मन्दतु त्वा । श्रुधि ब्रह्म वावृधस्वोत गार्भिः । आविः सूर्यं कृणुहिं पीपिहीषः । जहि शत्रू ँ रभि गा इन्द्र तृन्धि, इति ।

ह इन्द्र प्रत्नथा पुरातनः पूर्वकल्पावस्थित इन्द्रो यथा सोमं पिबत्येवा पाह्येवमेव त्वमपि सोमं पिब । स च सोमस्त्वां मन्दतु हर्षयतु । ब्रह्मास्माभिः प्रयुज्यमानं मन्त्रं श्रुधि शृणु । उतापि च गीर्भिरस्मदीयाभिः स्तुतिभिर्वावृधस्वातिशयेन वर्धस्व । सूर्यमाविष्कृणुह्याच्छादकस्य स्वर्भानुसंज्ञकस्यासुरस्य विनाशेन प्रकटीकुरु । इषोऽन्नानि पीपिहि पालय । शत्रूञ्जहि मारय । गा अभिलक्ष्य तृन्धि विरोधिनो व्याघ्रतस्करादीन्विनाशय । "तमिन्द्रं जोहवीमि" इत्यादिमन्त्रषट्कमैन्द्रे कर्मणि द्रष्टव्यम् । त्रिकद्रुकेष्विति मन्त्रस्तु षोडशिशस्त्रेऽप्यन्तर्भावनीयः ।

अथाष्टाविंशीमाह-

अग्ने बाधस्व वि मृधो नुदस्व । अपामीवा अप रक्षा ँसि सेध । अस्मात्समुद्राद् बृहतो दिवो नः (११), अपां भूमानमुप नः सृजेह, इति ।

हेऽग्ने मृधः शत्रून्विशेषेण बाधस्व । अमीवा रोगानपनुदस्व । रक्षांस्यपसे धापगमय । अस्मादृश्यमानात्समुद्राद् बृहतो समुद्रवदतिप्रौढाद्दिवो द्युलोकान्नोऽस्मदर्थमपा भूमानं वृष्टिजलस्य बाहुल्यं सृजोत्पादय । किंच नोऽस्मानपीह कर्मण्युपसृज संयोजय ।

[अथ] एकोनत्रिंशीमाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

यज्ञ प्रतिष्ठित सुमतौ सुशेवा आ त्वा । वसूनि पुरुधा विशन्तु । दीर्घमायुर्यजमानाय कृण्वन् । अधामृतेन जरितारमङ्ग्धि, इति ।

हे यज्ञ यागनिष्पादक वह्ने सुमतौ भक्तियुक्तायामस्मीदयायां बुद्धौ प्रतितिष्ठ प्रतिष्ठितो भव । किं कुर्वन्, यजमानार्थं दीर्घमायुः कुर्वन्, तादृशं त्वा त्वा पुरुधा बहुविधानि वसूनि धनान्याविशन्तु सर्वतः प्रविशन्तु । अथानन्तरं जरितारं जरां प्राप्स्यन्तं यजमानममृतेनाङ्ग्धि नाशरहितेन स्वर्गलोकेन संयोजय । एतयोर्मन्त्रयोरुत्तरवेद्यामग्निप्रतिष्ठापनं विनियोगमापस्तम्ब आह–"अग्ने बाधस्व" इत्यारभ्य "संभारेषु प्रतिष्ठाप्य" इत्यन्तेन वाक्येन ।

अथ त्रिंशीमाह–

इन्द्रः शुनावद्वितनोति सीरम् । संवत्सरस्य प्रतिमाणमेतत् । अर्कस्य ज्योतिस्तदिदास ज्येष्ठम् । संवत्सरꣳ शुनवत्सीरमेतत्, इति ।

अयमिन्द्रः शुनावत्सीरं वायुसहितमादित्यं वितनोति विस्तारयति । एतदादित्यस्य विस्ताररूपं संवत्सरस्य प्रतिमाणं प्रतिनिधिरूपम् । आदित्यगमनावृत्या हि संवत्सरो निष्पाद्यते । तदित्तदानीमेवार्कस्याऽऽदित्यस्य ज्योतिर्ज्येष्ठमतिप्रशस्तं प्रवृद्धं चाऽऽस । एतज्ज्योतिः संवत्सरनिष्पादकत्वात्संवत्सरस्वरूपम् । शुनवद्वायुसंयुक्त सीरमादित्यमण्डलरूपमित्येवं तस्य ज्येष्ठत्वम् ।

[अथ] एकत्रिंशीमाह–

इन्द्रस्य राधः प्रयतं पुरु त्मना । तदर्करूपं विमिमानमेति । द्वादशारे प्रतितिष्ठतीद् वृषा, इति ।

इन्द्रस्य राधः सर्वकर्मसाधकं यत्सामर्थ्यं तत्पुरु प्रभूतमात्मना प्रयतं स्वेनैव संपादितं तत्सामर्थ्यमर्कस्वरूपं सूर्यस्वरूपं भूत्वा विमिमानमेति । सर्वैः प्राणभिर्विशेषेण प्रमीयमाणं सदेति गच्छति संचरतीत्यर्थः । सोऽयमादित्यरूपो वृषा कामाभिवर्षक इन्द्रो द्वादशारे द्वादशमासरूपैररैर्युक्ते संवत्सरचक्रे प्रतितिष्ठतीत्प्रतिष्ठित एव वर्तते ।

Digitized by Madhuban Trust, Delhi

अथ द्वात्रिंशीमाह-

अश्वायन्तो गव्यन्तो वाजयन्तः । हवामहे त्वोपगन्त वा उ । आभूषन्तस्त्वा सुमतौ नवायाम् । वयमिन्द्र त्वा शुनँ हुवेम (१२), इति ।

अर्चत हविर्गीयत य सँच्चर्षणीनां वैशम्भस्याहासीत्वमुरुं देवहूतो नस्त्मना षट् च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

पञ्चमाध्यायेऽष्टमोऽनुवाकः ।। ८ ।।

ह इन्द्र वयमश्वायन्तोऽश्वमान इच्छन्तो गव्यन्तो गामात्मन इच्छन्तो वाजयन्तो वाजमन्नमात्मन इच्छन्तस्त्वामुपगन्त वा, उ, उपगन्तुमेव हवामह आह्वयामः । नवायां नूतनायां सुमतौ शोभनायां भक्तियुक्तायामस्मद्बुद्धौ त्वामाभूषन्तः सर्वतः प्रशंसन्तो वयं ह इन्द्र त्वा शुनं त्वद्रूपं वायुं तदुपलक्षितमादित्यं च हुवेमाऽऽह्वयामः । तदेतन्मन्त्रत्रयं शुनासीरगुणकेन्द्रदेवताके कर्मणि द्रष्टव्यम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्येद्वितीयकाण्डे

पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ।। ८ ।।

प्राण उदेहि पुनरा नो भर यज्ञो रायो वार्त्रहत्याय वसूना सँ स ईँ पाह्यष्टौ प्राणो रक्षत्यगृभीता धारावरा मरुतो दीर्घायुत्वाय ज्योतिषा त्वा पञ्चचत्वारिँ शत् ।।

हरिः ॐ

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

पञ्चमोऽध्यायः ।। ५ ।।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ।।

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये

वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये

पञ्चमप्रपाठकः समाप्तः ।। ५ ।।

(मूलक्रमेण-अष्ट. २ अध्या. ५ (१३) अनु. ८ (१२७)।

(भाष्यक्रमेण -का. प्रपा. ५ (१३) अनु. ८ (१२७) ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथ द्वितीयकाण्डे षष्ठप्रपाठकारम्भः

तत्र प्रथमोऽनुवाकः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ।। १ ।।
उपहोमार्थमन्त्राणां पञ्चमे शेष ईरितः ।
षष्ठे प्रपाठके सौत्रामणिः कौकिल्युदीर्यते ।। २ ।।

तत्र प्रथमानुवाके ग्रहा उच्यन्ते । कल्पः-"सुरावाः संधानकाले तोक्मैर्मासरेण नग्नहुना च सुरां संसृज्य" इति । अङ्कुरिता व्रीहयस्तोक्माः । ईषत्तप्तानां यवानां चूर्णं द्विविधं सूक्ष्मं स्थूलं च । तत्र सूक्ष्मं चूर्णं दध्ना तक्रेण वा मिश्रितं दर्भैः प्रच्छन्नं मासरमित्युच्यते । स्थूलचूर्णं तु मन्थे मिश्रितं दर्भैः प्रच्छन्नं नग्नहुरित्युच्यते । तैस्तोक्ममासरनग्नहुभिः सुरायाः संसर्जनार्थं स्वाद्वीं त्वेति मन्त्रः । तत्पाठस्तु -

स्वाद्वीं त्वा स्वादुना । तीव्रां तीव्रेण । अमृताममृतेन । मधुमतीं मधुमता । सृजामि सꣳ सोमेन । सोमोऽस्यश्विभ्यां पच्यस्व । सरस्वत्यै पच्यस्व । इन्द्राय सुत्राम्णे पच्यस्व, इति ।

हे सुरे स्वाद्वीं त्वा स्वादुना सोमेन संसृजामि । अत्र सोमशब्देन पूर्वोक्तं तोक्ममासरनग्नहुशब्दाभिधेयद्रव्यत्रयमुपलक्ष्यते । सोमस्यौषधिराजत्वेन तदुपलक्षणं कर्तुं शक्यम् । कीदृशीं त्वां तीव्रामुग्रगन्धाममृतामृतवदाप्यायनकरीम् । अत एव बलीवर्दादीनाप्यायियितुं पाययन्ति । मधुमतीं माधुर्येणोपेताम् । कीदृशेन सोमेन तीव्रेण वमनाद्युपयुक्तौषधित्वेन सोमस्य तीव्रत्वम् । अमृतेन "अपाम सोमममृता अभूम" इति श्रुतेरमृतत्वप्रापकेण । मधुमता माधुर्ययुक्तेन । एवंविधसोमरूपतया भावितैस्तोक्मादिभिर्युक्तत्वात्त्वं सोमोऽसि । तस्माद्देवतात्रयार्थं त्वं पच्यस्व सुत्राम्णे सुष्ठु रक्षकाय ।

कल्प-"सक्तूनां तृतीयेन परिकीर्य परीतो षिञ्चता सुतमित्येकस्या गोर्दुग्धेन परिषिच्य" इति । श्यामाकसक्तूंस्त्रेधा विभज्य तृतीयांशं सुरायामुपरि विकीर्य तदुपरि दुग्धपरिषेचनार्थोऽयं मन्त्रः । तत्पाठस्तु-

Digitized by Madhuban Trust, Delhi

परीतो षिञ्चता सुतम् । सोमो य उत्तम ँ हविः (१) ।
दधन्वा यो नर्यो अप्स्वन्तरा । सुषाव सोममद्रिभिः, इति ।

यः सोमलतात्मकस्तदेवेदमुत्तमं हविस्तदत्र सुतमभिषुतमितोऽस्मात्क्षीरात्परितः सिक्तमभूत् । यः सोमो नर्यो नराणां यजमानानां हितः सन्नप्स्वन्तरा द्रवद्रव्येषु मध्य आसमन्ताद्दधन्वा स्वादुत्वं धारयति तं सोममद्रिभि रूपांशुसवनप्रभृतिभिः पाषाणैः सुषाव यजमानोऽभिषुतवान् ।

यदुक्तं सूत्रकारेण – "आज्यमुत्पूय पय उत्पुनाति प्राङ्सोमो अतिद्रुत इति सोमवामिनः, प्रत्यङ्सोमो अतिद्रुत इति सोमातिपवितस्य" इति । तत्र सोमवामिनो मन्त्रमाह –

पुनातु ते परिस्रुतम् । सोम ँ सूर्यस्य दुहिता । वारेण शश्वता तना । वायुः पूतः पवित्रेण । प्राङ्सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा, इति ।

ह इन्द्र ते त्वदर्थं सूर्यस्य दुहिता पयः पावयन्ती सूर्यस्य संबन्धिनी दुहितृस्थानीया दीप्तिः स्रुतं द्रवीभूतं सोमं सोमत्वेन भावितं पयोद्रव्यं वारेण वालजन्येन पवित्रेण पुनातु शोधयतु । कीदृशेन वारेण शश्वता शाश्वतेन दृढेन तना विस्तीर्णेन तादृशेनानेन पवित्रेण पूतः पयोरूपो वायुवच्छीघ्रगामी भूत्वा प्राङूर्ध्वं निर्गतः । कीदृशः सोम इन्द्रस्य युज्यो योग्यः सखा तादृशोऽयं सोमः शुद्धो भवत्वित्यर्थः। यः पूर्वं सोमयागं कृत्वा वान्ति कृतवांस्तस्येदानीं सौत्रामण्यां पयः शोधनार्थोऽयं मन्त्रः ।

यस्य तु पुरा सोमो जीर्णः सोऽयं सोमातिपवितो. यद्वा यस्य सोमोऽधोद्वारेण निर्गतः सोऽयं सोमातिपवितस्तस्य पयः शोधनार्थं मन्त्रमाह–

वायुः पूतः पवित्रेण । प्रत्यङ्सोमो अतिद्रुतः (२) । इन्द्रस्य युज्यः सखा, इति ।

अत्र "पुनातु ते परिस्रुतम्" इति पूर्वभागोऽनुषज्यते । प्रत्यङ्ङतिद्रुतोऽधो निर्गतः । अन्यत्पूर्ववद्व्याख्येयम् ।

कल्पः–"ब्रह्म क्षत्रं पवत इति सुरां प्रतिप्रस्थाता" इति । पुनातीत्यनुवर्तते । पाठस्तु–

ब्रह्म क्षत्रं पवते तेज इन्द्रियम् । सुरया सोमः सुत आसुतो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

मदाय । शुक्रेण देव देवताः पिपृग्धि । रसेनान्नं यजमानाय धेहि, इति ।

ब्राह्मणजातिः क्षत्रियजातिश्च तेजःकारणमिन्द्रियवृद्धिकारणं चेदं द्रव्यं पवते पुनाति । अनया सुरया सह सोमः सुत उत्पादितः । मदाय देवानां मदार्थमासुतः सर्वतोऽभिषुतश्च । हे सोमदेव तव शुक्रेण निर्मलेन रसं देवताः पिपृग्धि संपृक्ताः कुरु । यजमानाय चान्नं संपादय ।

कल्पः–"अध्वर्युः पयोग्रहान्गृह्णाति कुविदङ्गेति सर्वेषामेका पुरोहगेका पुरोनुवाक्या, एकः प्रैषः, एका याज्या, उपयामगृहीतोऽस्यश्विभ्यां त्वा जुष्टं गृह्णामीति गृहीत्वा यवसक्तुभिः श्रीत्वा पवित्रेण परिमृज्यैष ते योनिस्तेजसे त्वेति सादयित्वोपयामगृहीतोऽसि सरस्वत्यै त्वा जुष्टं गृह्णामीति गृहीत्वा गोधूमसक्तुभिः श्रीत्वा पवित्रेण परिमृज्यैष ते योनिर्वीर्याय त्वेति सादयित्वोपयामगृहीतोऽसीन्द्राय त्वा सुत्राम्णं जुष्टं गृह्णामीति गृहीत्वोपवाकसक्तुभिः श्रीत्वा पवित्रेण परिमृज्यैष ते योनिर्बलाय त्वेति सादयित्वा" इति । तत्र पुरोरुचमाह –

कुविदङ्ग यवमन्तो यवं चित् । यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुत भोजनानि । ये बर्हिषो नमोवृक्तिं न जग्मुः, इति ।

अङ्गशब्दः प्रियसंबोधनवाचकः । हे प्रिया अश्विसरस्वतिसुत्रामेन्द्रा ये यज्वानो बर्हिषां बर्हिषो यागस्य नमोवृक्तिं नमस्कारविनाशनं न जग्मुर्न प्रापुः । किंत्वत्यन्तश्रद्धालवोऽनुतिष्ठन्ति तेषामेषां यजतां हविर्विषयाणि भोजनानीहेह कृणुत । ग्रहणपात्राणामनेकत्वाद्वीप्सा । तत्रोपमानमुच्यते– कुविच्छब्दो बह्वर्थवाची चिच्छब्दः समुच्चये । यथा लोके यवमन्तो यवादिधान्योपेताः कृषिकाः कुविद्यवं चिद्बहुलं यवमन्यानि च गोधूमप्रियङ्ग्वादिधान्यान्यनुपूर्वं तत्तत्परिपाकानुक्रमेण वियूय विधूय विशेषेणेदं पक्वमिदमपक्वामिति पृथक्कृत्य दान्ति लुनन्ति तथा यूयमपि नमस्कारादिरहितो नास्तिकोऽयं यज्वा श्रद्धालुरयं यज्वेति विविच्य श्रद्धालोर्हवींषि भुङ्ध्वम् ।

अथ ग्रहणमन्त्रानाह –

उपयामगृहीतोऽस्यश्विभ्यां त्वा जुष्टं गृह्णामि (३) । सरस्वत्या इन्द्राय सुत्राम्णे, इति ।

Digitized by Madhuban Trust, Delhi

उपयामशब्दः पृथिवीकार्यदारुपात्रवाची । "इयं वा उपयामः" इति श्रुतेः । पयोरूपद्रव्यविशेषत्वमुपयामेन गृहीतोऽस्यश्विदेवार्थं त्वामिह पात्रे गृह्णामि । सरस्वतीमन्त्रे पूर्वोत्तरभागावनुषञ्जनीयौ तथा सुत्राममन्त्रेऽपि ।

अथ सादनमन्त्रानाह –

एष ते योनिस्तेजसे त्वा । वीर्याय त्वा बलाय त्वा, इति ।

हे आश्विनग्रहैष खरप्रदेशस्ते तव स्थानम् । अस्मिन्स्थानेतेजःसिद्ध्यर्थं त्वां सादयामीति शेषः । वीर्यबलमन्त्रयोरप्येष ते योनिरित्यनुवर्तते । हे सारस्वतग्रहवीर्यवृद्धये त्वामिह सादयामि । हे सुत्रामग्रह बलवृद्धये त्वामिह सादयामि ।

कल्पः–"उत्तरैर्यथालिङ्गमुपतिष्ठते" इति । पाठस्तु –

तेजोऽसि तेजो मयि धेहि । वीर्यमसि वीर्यं मयि धेहि ।
बलमसि बलं मयि धेहि, इति ।

ग्रहत्रयं क्रमेण संबोध्य योजनीयम् ।

कल्पः–"सुरायां वाल आनीयमानायां धारायाः प्रतिप्रस्थाता सुराग्रहान्गृह्णाति नाना हि वां देवहितं सदः कृतमिति सर्वेषामेका पुरोरुगेका पुरोनुवाक्यैकः प्रैष एकायाज्योपयामगृहीतोऽस्याश्विनं तेजोऽश्विभ्यां त्वा जुष्टं गृह्णामीति गृहीत्वा पवित्रेण परिमृज्यैष ते योनिर्मोदाय त्वेति सादयत्युपयामगृहीतोऽसि सारस्वतं वीर्यं सरस्वत्यै त्वा जुष्टं गृह्णामीति गृहीत्वा पवित्रेण परिमृज्यैष त्वेति योनिरानन्दाय त्वेति सादयत्युपयामगृहीतोऽस्यैन्द्रं बलमिन्द्राय त्वा सुत्राम्णे जुष्टं गृह्णामीति गृहीत्वा पवित्रेण परिमृज्यैष ते योनिर्महसे त्वेति सादयति" इति । तत्र पुरोरुचमाह –

नाना हि वां देवहितꣳ सदः कृतम् । मा सꣳ सृक्षाथां
परमे व्योमन् । सुरा त्वमसि शुष्मिणी सोम एषः । मा
मा हिꣳसीः स्वा योनिमाविशन् (४), इति ।

हे सुरे हे सोम वां युवयोर्नाना पृथग्भूतं सदः स्थानं देवेभ्यो हितं कृतं संपादितं तस्मात्तौ युवां मा संसृक्षाथां परमे व्योमन्नुत्कृष्टे मदीयरक्षणे निमित्तभूते सति परस्परसंसृष्टौ मा भूतम् । हे गृह्यमाणद्रव्यविशेष त्वं शुष्मिणी बलवती सुराऽसि । एष तु सोमः शान्तात्मा ततश्च युवयोः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

संसर्गो न युज्यते । हे सोम स्वां योनिं मृदूदररूपं स्वस्थानमाविशन्मां सोमस्य पातारं मा हिंसीः ।

अथ ग्रहणमन्त्रानाह –

उपयामगृहीतोऽस्याश्विनं तेजः । सारस्वतं वीर्यम् । ऐन्द्रं बलम्, इति ।

हे द्रव्यविशेष [त्वदीयरक्षणे निमित्तभूते सति परस्परसंसृष्टौ मा भूतम् । हे गृह्यमाणद्रव्य उपयामेन] गृहीतोऽसि । तदिदं तव स्वरूपमश्विसंबन्धि तेजोऽतोऽश्विभ्यां त्वा जुष्टं गृह्णामीति शेषः । एवं सारस्वतमन्त्र ऐन्द्रमन्त्रश्च सूत्रोक्तक्रमेणानुषङ्गशेषपूरणाभ्यां योजनीयः ।

अथ सादनमन्त्रानाह –

एष ते योनिर्मोदाय त्वा । आनन्दाय त्वा महसे त्वा, इति ।

सूत्रोक्तक्रमेण ग्रहत्रयं सादने योजनीयम् ।

कल्पः–"षण्णामनुवाकशेषेणाध्वर्युर्यजमानश्चोपतिष्ठते, उत्तरेण चानुवाकेन" इति । तत्रानुवाकशेषे चत्वारि यजूंष्याह –

ओजोऽस्योजो मयि धेहि । मन्युरसि मन्युं मयि धेहि । महोऽसि महो मयि धेहि । सहोऽसि सहो मयि धेहि, इति ।

ओजो बलं मन्युर्दीप्तिः, महः पूजा सहोऽभिभवितृत्वम् । हे द्रव्यविशेष त्वमुक्तैर्गुणैर्युक्तोऽस्यतो मय्यपि तान्गुणान्संपादय ।

अथैकामृचमाह –

या व्याघ्रं विषूचिका । उभौ वृकं च रक्षति । श्येनं पतत्रिण ँ सिंह ँ म् । सेमं पात्व ँ हंसः, इति ।

भुक्तान्नजरणविरोधिव्याधिविशेषो विषूचिका । तादृशी या व्याघ्रं वृकं चोभौ रक्षति । वृकोऽरण्यश्वा । व्याघ्रवृकयोर्दीपनपाटवात्कदाचिदप्यजरणदोषो नास्ति । तथा सा विषूचिका श्येनाख्यं पक्षिणं

Digitized by Madhuban Trust, Delhi

सिंहं च रक्षति । तयोरपि नास्ति सा व्याधिः । सा व्याघ्रादिरक्षिका विषूचिकेमं यजमानमंहसः पापफलाद्व्याधेः पातु ।

अथ यजुर्द्वयमाह -

संपृचस्थ सं मा भद्रेण पृङ्क्त । विपृचस्थ वि मा पाप्मना पृङ्क्त (५), इति ।

हविः प्रत्यङ्सोमो अतिद्रुतो गृह्णाम्याविशन्विषूचिका पञ्च च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
षष्ठाध्याये प्रथमोऽनुवाकः ॥ १ ॥

हे इन्द्रपात्रस्थद्रव्यविशेषा यूयं द्रवत्वेन स्वभावतः संपर्कशीलाः स्थ,अतो मां भद्रेण श्रेयसा संयोजयत । इह तु पृथक्पात्रे धृतत्वाद्विपृचो वियुक्तरूपाः स्थ, अतो मां पाप्मना विपृङ्क्त वियोजयत ।

अत्र विनियोगसंग्रहः-

स्वाद्वीं तोक्मादिभिर्योज्यं सुरा क्षीरं पुनेत्यतः ।
ऋचां त्रयादुत्पुनीयात्सुरां ब्रह्मेति शोधयेत् ॥ १ ॥
कुवित्पुरोरुचं ब्रूयादुपयामादिभिस्त्रिभिः ।
पयः पात्रत्रये ग्राह्यमेषा सादयते त्रिभिः ॥ २ ॥
तेजस्त्रिभिरुपस्थेयं नानेत्येतां पुरोरुचम् ।
सुराग्रहे पठेन्मन्त्रैरुपयामादिभिस्त्रिभिः ॥ ३ ॥
सुरा गृह्णात्यथैषाद्यैर्मन्त्रैः संसादयेत्त्रिभिः ।
ओजोऽसीत्यादिभिःसप्तमन्त्रैस्तानुपतिष्ठते ।
प्रथमे ह्यनुवाकेऽस्मिन्नेकोनत्रिंशदीरिताः ॥ ४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ षष्ठप्रपाठके द्वितीयोऽनुवाकः ।

प्रथमे ग्रहा उक्ताः । द्वितीये तदुपस्थानमुच्यते । तत्र प्रथमामृचमाह -

सोमो राजाऽमृत सुतः । ऋजीषेणाजहान्मृत्युम् । ऋतेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सत्यमिन्द्रियम् । विपान ँ शुक्रमन्धसः । इन्द्रस्येन्द्रियम् ।
इदं पयोऽमृतं मधु, इति ।

अयमभिषुतः सोमो राजा स्वयममृतं पीयूषसमानो यथा पीयूषं पिबतोऽपमृत्युर्नास्त्येवं सोमपस्यापि नापमृत्युरित्यर्थः । तत्रायं हेतुः-ऋजीषेण कीदृक्स्थानीयेन नीरसेन मृत्युमजहात् । ऋजीषे ह्यपमृत्युमजहात् । ऋषीषममृत्युपापकं रसनिःसरणेन तस्य परित्यागादपमृत्युहेतुः परित्यक्तः । अतोऽयमृतेन यज्ञनिष्पादनेनेन्द्रियमिन्द्रियवृद्धिहेतुस्तदेतत्सत्यं शपथं करोमीत्यर्थः । अन्धसोऽन्नरसादपि विपानं विशेषेण पानयोग्यं सोमरसरूपममृतमतः शुक्रं शुद्धं योऽयमिन्द्रस्तस्यापीन्द्रियवृद्धिकारणमिदम् । किञ्चेदं द्रव्यं मधु पयो मधुरं क्षीररूपमत एवामृतरूपम् ।

अथ द्वितीयामाह -

सोममद्भ्यो व्यपिबत् । छन्दसा ह ँ सः शुचिषत् । ऋतेन सत्यमिन्द्रियम् । अद्भ्यः क्षीरं व्यपिबत् (१) । क्रुङ्ङाङ्गिरसो धिया । ऋतेन सत्यमिन्द्रियम् । अन्नात्परिस्रुतो रसम् । ब्रह्मणा व्यपिबत्क्षत्रम् । ऋतेन सत्यमिन्द्रियम्, इति ।

शुचौ शुद्धप्रदेशे स्वर्गे सीदतीति शुचिषद्धंसः सर्वप्राणिहृदि स्थितो जीवात्मा तद्रूपधारीन्द्रश्छन्दसा स्वेच्छया तमिमं सोममद्भ्यः सकाशाद्विभज्यापिबत् । ऋतेन यज्ञद्वारेणेन्द्रियवृद्धिहेतुः सोमस्तदेतत्सत्यम् । तत्र दृष्टान्तः-यथा लोके क्रुङ् क्रौञ्चपक्ष्याङ्गिरसः सर्वाङ्गसंबन्धिसारयुक्तः पुष्टशरीर इत्यर्थः तादृशो धिया स्वबुद्ध्या क्षीरमद्भ्यो विविच्यापिबत् । क्षीरपात्रे स्वमुखे प्रक्षिप्ते सति मुखगताम्लरससंपर्कात्क्षीरांशो जलांशश्चोभौ विविच्येते । तत्र जलभागं परित्यज्य क्षीरभागमेव पिबति । तद्वदयमिन्द्रोऽपि सोमरसं जलभागाद्विविच्य पिबति । अतो यज्ञद्वारेणेन्द्रियवृद्धिहेतुः सोमस्तदेतत्सत्यम् । तत्रैवान्यो दृष्टान्त उच्यते-यथा क्षत्रं क्षत्रियजातिर्ब्रह्मणा प्रौढेन क्षीराज्यादिना योगात्परितः स्रवतीति परिस्रुदन्नं तस्मादन्नात्संपन्नं रसं पिबति ।राजादयो हि भोजनकाले प्रभूतं क्षीरं वा व्रीह्याद्यन्नं प्रक्षिप्य तदन्नं रसोपेतं क्षीरादिकं पिबन्ति । एवमिन्द्रोऽयमपि सारभूतं रसं पिबति । ऋतेनेति पूर्ववत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ तृतीयामाह -

रेतो मूत्रं विजहाति । योनिं प्रविशदिन्द्रियम् । गर्भो जरायुणाऽऽवृतः । उल्बं जहाति जन्मना । ऋतेन सत्यमिन्द्रियम् (२) । वेदेन रूपे व्यकरोत् । सतासती प्रजापतिः । ऋतेन सत्यमिन्द्रियम् । इति ।

यथा लोके स्त्रीयोनिं प्रविशत्पुरुषस्येन्द्रियं रेतो मूत्रं च विभज्य परित्यजति । मूत्रस्य बहिस्त्यागः । रेतसो गर्भाशये त्यागः । तद्रेतः परिणामो जरायुणा वेष्टितो गर्भो भूत्वा स्वकीयेन जन्मना तदावरणरूपमुल्बं जहाति । एवमिन्द्रोप्यसारं परित्यज्यैकस्मिन्नपि पात्रे सारमेव स्वीकरोति । ऋतेनेति पूर्ववत् । यथा प्रजापतिरेकरूपेण वेदेन पर्यालोच्य सतासती पृथिव्यादिसद्रूपं शशविषाणाद्यसद्रूपं च विभज्याकरोत् तथाऽयमिन्द्रः सारासारविभागं कृतवान् । ऋतेनेति पूर्ववत् ।

अथ चतुर्थीमाह -

सोमेन सोमौ व्यपिबत् । सुतासुतौ प्रजापतिः । ऋतेन सत्यमिन्द्रियम् । दृष्ट्वा रूपे व्याकरोत् । सत्यानृते प्रजापतिः । अश्रद्धामनृतेऽदधात् । श्रद्धाँ सत्ये प्रजापतिः । ऋतेन सत्यमिन्द्रियम्, इति ।

प्रजापतिरेकरूपेण सोमद्रव्येण युक्तो रसात्मकोऽयं सोमोऽभिषुतो बल्लभात्मकोऽयं सोमो नाभिषुत इति विभज्य तत्र रसात्मकमेवापिबत् । अत्र प्रजापतिशब्देन प्रजापालकत्वादिन्द्रो विवक्षितः । तत्र विभागे दृष्टान्त उच्यते- यथा प्रजापतिः सत्यवदनमनृतवदनं चेत्येवं वचनस्य द्वे रूपे विशेषेण सृष्टवान् । ततोऽनृते प्रजानामश्रद्धामविश्वासं स्थापितवान् । सत्यवचने तु स प्रजापतिर्विश्वासं स्थापितवान् । एवयमिन्द्रोऽप्यभिषुतमेव पिबति ।

अथ पञ्चमीमाह -

दृष्ट्वा परिस्रुतो रसम् । शुक्रेण शुक्रं व्यपिबत् । पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियम् । विपानँ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुक्रमन्धसः । इन्द्रस्येन्द्रियम् । इदं पयोऽमृतं मधु (३), इति ।

अद्भ्यः क्षीरं व्यपिबत्क्रुङ्ङाङ्गिरसो धिया । ऋतेन सत्यमिन्द्रियं सत्ये प्रजापतिरष्टौ च ।

सेमो राजा विपान् सोममद्भ्याऽन्नाद्रेतो मूत्रं वेदेन सतासती सोमेन सुतासुतौ दृष्ट्वा रूपे दृष्ट्वा परिस्रुतो रसं विपानं दश ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

षष्ठाध्याये द्वितीयोऽनुवाकः ।

प्रजानां पालकोऽयमिन्द्रः परिस्रुत आलवालस्य परितः श्रयणं कुर्वतो द्रव्यस्य रसं तत्र शुक्रेण शुद्धेन द्रव्यान्तरेण सहितं शुद्रद्रव्यान्तरं पयःसोमं च विशेषेणापिबत् । ऋतेनेत्यादिकं प्रथममन्त्रवद्व्याख्येयम् । तैरेतैः पञ्चभिर्मन्त्रैरुपस्थानं कुर्यात् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

षष्ठप्रपाठके द्वितीयोऽनुवाकः ।। २ ।।

अथ षष्ठे तृतीयोऽनुवाकः ।

द्वितीये ग्रहोपस्थानमुक्तम् । तृतीये ग्रहहोमोऽभिधीयते । कल्पः–"सुरावन्तमिति पयोग्रहाञ्जुहोति" इति । पाठस्तु–

सुरावन्तं बर्हिषदं सुवीरम् । यज्ञं हिन्वन्ति महिषा नमोभिः । दधानाः सोमं दिवि देवतासु । मदेमेन्द्रं यजमानाः स्वर्काः, इति ।

महिषा महनीयाः पूजनीया यजमाना नमोभिर्नमस्कारोपेतैर्मन्त्रैर्यज्ञमिमं सौत्रामण्याख्यं हिन्वन्ति । प्रीणयन्ति सम्यगनुतिष्ठन्तीत्यर्थः । कीदृशं यज्ञं सुरावन्तं सुराद्रव्योपेतं बर्हिषि दर्भ आसाद्यमानेन हविषा युक्तं सुवीरं शोभनापत्यप्रदम् । दिवि द्युलोके देवतासु सोमं दधानाः संपादयन्तो वयं यजमानाः स्वर्काः शोभनेनार्चनेन युक्ता इन्द्रं मदेम हृष्टं करवाम ।

कल्पः–"यस्ते रसः संभृत इति सुराग्रहान्" इति । जुहोतीत्यनुवर्तते । पाठस्तु–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यस्ते रसः संभृत ओषधीषु । सोमस्य शुष्मः सुरया सुतस्य । तेन जिन्व यजमानं मदेन । सरस्वतीमश्विनाविन्द्रमग्निम्, इति ।

हे सुरे योऽयं ते रस ओषधीषु ब्रीह्यादिषु संभृतः संपादितः सुतस्याभिषुतस्य सोमस्य शुष्मो बलप्रदो रसः सुरया संयोजितस्तेन मदेन तदीयेन हर्षेण यजमानं जिन्व प्रीणय। तथा सरस्वत्यादिदेवांश्च प्रीणय।

कल्पः-"यमश्विना नमुचेत्याश्विनमध्वर्युर्भक्षयति" इति । पाठस्तु-

यमश्विना नमुचेरासुरादधि । सरस्वत्यसनोदिन्द्रियाय (१) । इमं त ँ शुक्रं मधुमन्तमिन्दुम्। सोम ँ राजानमिह भक्षयामि, इति ।

अश्विनौ देवौ यं रसं नमुचिनाम्नोऽसुरादध्याहृतवन्तौ । सरस्वती चेन्द्रियार्थमसनोत्प्रादात् । तमिमं सोमं राजानमिह कर्मणि भक्षयामि । कीदृशं सोमं शुक्रं शुद्धं मधुमन्तं माधुर्योपेतमिन्दुमाह्लादकं परमैश्वर्यप्रदं वा ।

कल्पः-"यदत्र रिप्तमिति सारस्वतं प्रतिप्रस्थाताऽऽग्नीध्रश्च" इति । भक्षयत इति शेषः । पाठस्तु-

यदत्र रिप्त ँ रसिनः सुतस्य । यदिन्द्रो अपिबच्छचीभिः । अहं तदस्य मनसा शिवेन । सोम ँ राजानमिह भक्षयामि, इति ।

रसिनो रसयुक्तस्य सुतस्याभिषुतस्य सोमात्मकस्य पयसो यदवशिष्टं पात्रे रिप्तं लिप्तं यच्चेन्द्रः स्वकीयाभिः शचीभिः शक्तिभिः सहापिबत् । अस्य सोमात्मकस्य पयसस्तदवशिष्टं रसरूपं सोमराजत्वेन भाव्यमानमिह कर्मणि शिवेन मनसाऽहं भक्षयामि ।

कल्पः-"दक्षिणेनाऽऽहवनीयं पयःशेषं पितृपितामहप्रपितामहेभ्यो ददाति पितृभ्य [इति]" इति । पाठस्तु-

पितृभ्यः स्वधाविभ्यः स्वधा नमः । पितामहेभ्यः स्वधाविभ्यः स्वधा नमः । प्रपितामहेभ्य स्वधाविभ्यः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वधा नमः । अक्षन्पितरः (२) । अमीमदन्त पितरः । अतीतृपन्त पितरः । अमीमृजन्त पितरः । पितरः शुन्धध्वम्, इति ।

स्वधाकारस्तृप्तिहेतुरेषामस्तीति ते स्वधाविनस्तादृशेभ्यः पितृभ्यः स्वधापयः शेषोऽयं समर्पितस्तथा तेभ्यो नमस्कारोऽस्तु । एवं पितामहप्रतिमहयोर्योजनीयम् । एते पितरोऽक्षन्भुक्तवन्तः । भुक्त्वा चास्मानमीमदन्त संतुष्टान्कुर्वन्तः । अतीतृपन्त तृप्तियुक्तान्कुर्वन्तः । अमीमृजन्त शोधितवन्तः । हे पितरो यूयमपि शुन्धध्वं शुद्धा भवत ।

कल्पः-"पुनन्तु मा पितरः सोम्यास इत्युपतिष्ठते" इति । तत्रोपस्थानसाधनभूतासु दशस्वृक्षु प्रथमामृचमाह-

पुनन्तु मा पितरः सोम्यासः । पुनन्तु मा पितामहाः । पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा, इति ।

सोम्यासोऽनुग्राहकत्वेन सौम्याः पितरः पवित्रेण शुद्धेन शतसंख्याकेनाऽऽयुषा मां पुनन्तु शोधयन्तु । एवं पितामहप्रपितामहाश्च ।

अथ द्वितीयामाह -

पुनन्तु मा पितामहाः । पुनन्तु प्रपितामहाः (३) । पवित्रेण शतायुषा । विश्वमायुर्व्यश्नवै, इति ।

पूर्वमन्त्रोक्तानामपि पुनः कथनमादरार्थम् । एतेषां प्रसादेनाहं सर्वमप्यायुः प्राप्नवानि ।

अथ तृतीयादीनामष्टानामृचां प्रतीकानि दर्शयति-

अग्नआयूꣳषि पवसेऽग्ने पवस्व । पवमानः सुवर्जनः । पुनन्तु मा देवजनाः । जातवेदः पवित्रवद्यत्ते पवित्रमर्चिषि । उभाभ्यां देव सवितर्वैश्वदेवी पुनती, । इति ।

अत्राऽऽद्यमृग्द्वयं तु "त्वमग्ने रुद्र" इत्यनुवाके व्याख्यातम् । अवशिष्टं षट्कं "पवमानः सुवर्जन" इत्यनुवाके व्याख्यातम् ।

Digitized by Madhuban Trust, Delhi

कल्पः-"अथाऽऽहुतीर्जुहुतो ये समाना इत्यध्वर्युर्ये सजाता इति प्रतिप्रस्थाता" इति । पाठस्तु -

ये समानाः सर्मनसः । पितरौ यमराज्यै । तेषां लोकः स्वधा नमः । यज्ञो देवेषु कल्पताम्, (४), इति ।

यमराज्ये यमलोके वर्तमानाः पितरो मया समानस्वभावाः संगतमनस्काश्च ये सन्ति तेषां पितृणां लोको ममास्त्विति शेषः । तेभ्यः पितृभ्यः स्वधा हविःशेषो दत्तो नमस्कारश्च कृतः । अयं मदीयो यज्ञो देवेषु कल्पतां तृप्तिप्रदो भवतु ।

अथ द्वितीयामाह-

ये सजाताः सर्मनसः । जीवा जीवेषु मामकाः । तेषा ँ श्रीर्मयि कल्पताम् । अस्मिल्ँलोके शत ँ समाः, इति ।

जीवेषु वर्तमानेषु मध्ये मामका मदीया ये जीवाः सजाता भ्रात्रादिरूपेण मया सहोत्पन्नाः संगतमनस्का मयि प्रीतियुक्तास्तेषां सर्वेषां श्रीर्धनादिसंपन्मयि कल्पतां तिष्ठतु मदधीना भवत्वित्यर्थः । अस्मिल्ँलोके मम समाः शत संख्याकाः सन्तु ।

अथ "द्वे स्रुती" इत्यादिमन्त्रो वल्मीकवपायां सुरावपनार्थः । स च पूर्वकाण्डे "युवं सुराम्" इत्यनुवाके राजसूयान्तर्गत-सौत्रामण्यर्थमाम्नातः । इह तु कौकिल्यर्थमाम्नायते । पाठस्तु-

द्वे स्रुती अशृणवं पितृणाम् । अहं देवानामुत मर्त्यानाम् । याभ्यामिदं विश्वमेजत्समेति । यदन्तरा पितरं मातरं च, इति ।

मरणशीलानां श्रौतमार्गवर्तिनां कर्मानुष्ठायिनामुपासकानां च दक्षिणमार्ग उत्तरमार्गश्चेति स्रुती द्वौ मार्गौ वेदमुखादहं श्रुतवानस्मि । तत्रैकः पितृणां संबन्धी तल्लोकप्राप्तिहेतुत्वात् । अन्यश्च देवानां संबन्धी ब्रह्मलोक प्राप्तिहेतुत्वात् । एतौ चोभौ मार्गौ छान्दोग्यबृहदारण्यकयोः स्पष्टमाम्नातौ- "ते धूममभिसंभवन्ति धूमाद्रात्रिम्" इति दक्षिणमार्गः । "तेऽर्चिषमभिसंभवन्ति, अर्चिषोऽहः" इत्यादिरुत्तरमार्गः । एजत्कम्पमानं परलोकगतियुक्तमिदं विश्वं प्राणिजातं याभ्यां मार्गाभ्यां तत्तल्लोकं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सम्यक्प्राप्नोति । यन्मार्गद्वयं पितरं मातरं चान्तरा द्यावापृथिव्योर्मध्ये वर्तते तादृशमार्गद्वयमहमशृणवमित्यन्वयः ।

कल्पः–"इदं हविरित्यैन्द्रं ब्रह्मा यजमानश्च"इति । हविः शेषं भक्षयत इति शेषः । पाठस्तु –

इदꣳ हविः प्रजननं मे अस्तु । दशवीरꣳ सर्वगणꣳ स्वस्तये । आत्मसनि प्रजासनि । पशुसन्यभयसनि लोकसनि । अग्निः प्रजां बहुलां मे करोतु । अन्नं पयो रेतो अस्मासु धत्त । रायस्पोषमिषमूर्जमस्मासु दीधरत्स्वाहा (५), इति ।

इन्द्रियाय पितरः शतायुषा पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः कल्पताꣳ स्वस्तये प॰ (१८)

इति कृष्णयजुर्वेदीय तैत्तिरीयब्राह्मणे द्वितीयाष्टके षष्ठाध्याये तृतीयोऽनुवाकः ।। ३ ।।

इदं भक्ष्यमाणं हविर्मे स्वस्तयेऽस्तु मम क्षेमाय भवतु । कीदृशं हविः, प्रजननं प्रजोत्पादकं दशसंख्याकैः कर्मशूरैः पुत्रैर्युक्तं तथा बन्धुभृत्यादिभिर्बहुभिर्गणैर्युक्तं सर्वगणम्, जीवात्मानमस्मिञ्शरीरे चिरकालावस्थायिनं सनोति ददातीत्यात्मसनि प्रजासनि पशुसनि प्रजां पशून्ददातीति प्रजासनि पशुसनि, अभयसनि भीतिराहित्यं परलोकान्ददातीति । अयमग्निर्मदीयां प्रजां बहुलां करोतु । देवा अन्नादीनस्मासु संपादयत । तथा धनपुष्ट्यन्नरसानस्मासु धारयत । इदं हविरस्मदुदरे स्वाहा हुतमस्तु ।

अत्र विनियोगसंग्रहः–

'सुरा' 'यस्ते' क्रमात्कार्या द्वाभ्यां क्षीरसुराहुतिः ।
यमश्विनेत्याश्विनाख्यमध्वर्युर्भक्षयेत्तथा ।। १ ।।
सारस्वतं प्रतिप्रस्थाताऽऽग्नीध्रश्च यदित्यतः ।
'पितृभ्यः' इत्यादिकेन पयः शेषं ददाति हि ।। २ ।।
देश आहवनीयस्य दक्षिणेऽथोपतिष्ठते ।
पुनन्तु मेत्यादिकानां मन्त्राणां दशकेन हि ।। ३ ।।
अध्वर्योश्च प्रतिस्थातुर्ये चात्र द्वयमाहुतौ ।
सुराशेषं तु वल्मीके नयति 'द्वे स्रुती ' इति ।। ४ ।।

Digitized by Madhuban Trust, Delhi

इदं भक्षयतो ब्रह्मस्वामिनौ ग्रहमैन्द्रकम् ।

अनुवाके तृतीयेऽस्मिन्मन्त्रा एकोनविंशतिः ।। ५ ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय तैत्तिरीयब्राह्मणभाष्ये षष्ठप्रपाठके तृतीयोऽनुवाकः ।। ३।।

अथ षष्ठे चतुर्थोऽनुवाकः ।

तृतीये ग्रहहोमोऽभिहितः । चतुर्थ उपहोमा उच्यन्ते । कल्पः–"मनोताकाले पृथक्पात्रेषु पशूनां यूषाणि निदधाति पुरस्तात्स्विष्टकृतः शृङ्गशफैरुपहोमाञ्जुहोत्यष्टावष्टावेकैकस्य कुष्ठिकशफा आश्विनस्य यूषेण कुष्ठिकां शफं च पूरयित्वा सीसेन तन्त्रमित्यष्टर्चेन प्रतिमन्त्रं द्वाभ्यां द्वाभ्यां कुष्ठिकशफाभ्यां जुहोतीत्युत्तमायाः शृङ्गे अनुषजति हुत्वा स्वेष्वभिषेचनपात्रेषु संपातानवनीयाऽऽहवनीये कुष्ठिकशफान्प्रविध्यन्त्यवमुत्तरेणाष्टर्चेन सारस्वतस्य सर्वेणानुवाकेनैन्द्रस्य" इति । अत्र कुष्ठिकशब्देन शफसमीपस्थः क्षुद्ररूपे शफाऽभिधीयते । एकैकशफमेकैकमुपशफं च यूषेण पक्वमांसरसेन पूरयित्वैकैकामाहुतिं जुहुयात् । एतैश्च मन्त्रैर्यजमानेन प्रायणीयो यज्ञावयवो निष्पाद्यो भविष्यन्निन्द्रदेहो निरूप्यते । तत्र प्रथमामृचमाह –

सीसेन तन्त्रं मनसा मनीषिणः । ऊर्णासूत्रेण कवयो वयन्ति । अश्विना यज्ञꣳ सविता सरस्वती । इन्द्रस्य रूपं वरुणो भिषज्यन्, इति ।

मनीषिणो बुद्धिमन्त ऊहापोहकुशलाः कवयो विद्वांसः शास्त्राभिज्ञा ऋत्विजः स्वमनसा प्रयोगं सर्वं विचार्य सीसद्रव्यक्रीतेन व्रीह्यङ्कुरादिना तन्त्रं सौत्रामणियज्ञविस्तारमूर्णासूत्रेणेव वयन्ति निष्पादयन्ति । यथा लोके केचिदविपालका ऊर्णासूत्रेण कम्बलं वयन्ति । एवमेतेऽप्यृत्विजः सीसक्रीतद्रव्यादिना यज्ञाख्यं दीर्घतन्तुरूपं वयन्ति । अश्विनासरस्वत्याद्या देवता इन्द्रस्य स्वरूपभूतमिमं यज्ञमोषधिसदृशैः पश्वङ्गैर्भिषज्यंश्चिकित्सन्ते ।

अथ द्वितीयामाह –

तदस्य रूपममृतꣳ शचीभिः । तिस्रो दधुर्देवताः सꣳरराणाः । लोमानि शष्पैर्बहुधा न तोक्मभिः त्वगस्य माꣳसमभवन्न लाजाः, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वावश्विनावेका सरस्वतीत्येतास्तिस्रो देवताः शचीभिः स्वकीयशक्तिभिरस्येन्द्रस्य तद्यज्ञात्मकं रूपममृतं विनाशरहितं यथा भवति तथा दधुः संपादयामासुः । कीदृश्यो देवताः संरराणाः संभूय परस्परं रममाणाः । तोक्मशब्देनाङ्कुरिता व्रीहय उच्यन्ते । तदङ्कुररूपं बालतृणं शष्पशब्देनोच्यते । नकार उपमार्थः । तोक्मभिः शष्पैर्बहुधा लोमानीव निष्पादितवन्तः । अङ्कुरप्ररोहाधारभूता बीजविशेषा लाजा अस्य यज्ञरूपस्येन्द्रस्य त्वगिव मासमिवाभवन् ।

अथ तृतीयामाह –

तदश्विना॑भिषजा॑ रुद्रव॑र्तनी । सर॑स्वती वयति पेशो॒ अन्त॑रः (१) । अस्थि॑ म॒ज्जानं॒ मास॑रैः । का॒रो॒त॒रेण॒ दध॑तो॒ गवां॑ त्वचि, इति ।

रुद्रस्येव वर्तनिर्मार्गो ययोरश्विनोस्तौ रुद्रवर्तनी । यथा रुद्रः क्रूरो देवो हिंसितुं समर्थ एवमेतावश्विनौ व्याधिं नाशयितुं समर्थावित्यर्थः । तादृशावश्विनौ तत्र यज्ञे भिषजौ चिकित्सकौ । या तु सरस्वत्यन्तरः शरीरमध्ये पेशो वयति रूपं निष्पादयति । मासरशब्देन यवनिष्पन्ना सूक्ष्मसक्तवो दधिमिश्रा दर्भैः परिवेष्टिता उच्यन्ते । कारोतरशब्देनावटस्थानीयस्तत्सदृशो वेणुदल निर्मितश्चर्मणा सर्वतः परिवेष्टितः सुराश्रव (प) णार्थ भाण्डाधारः पदार्थविशेष उच्यते । गवां त्वच्यवस्थितेन कारोतरेण मांसरैश्च मज्जानमस्थि च दधतो दधाति सरस्वती संपादयतीत्यर्थः ।

अथ चतुर्थीमाह –

सर॑स्वती॒ मन॑सा पे॒शलं॒ वसु॑ । नास॑त्याभ्यां वयति दर्श॒तं वपुः॑ । रसं॑ परि॒स्रुता॒ न रोहि॑तम् । न॒ग्नहु॒र्धीर॒स्तस॑रं॒ न वेम॑, इति ।

इयं सरस्वती नासत्याभ्यामश्विदेवताभ्यां सहिता वपुर्वयति शरीरं मनसा निष्पादयति । कीदृशं वपुः पेशलं वसु देवतात्मनो निवासयोग्यं दर्शतं दर्शनीयं दृष्टिप्रियमित्यर्थः । परिस्रुता न परिस्रुतेव धारया स्रवत्सुराद्रव्यं परिस्रुदित्युच्यते । तया परिस्रुतेव शरीरस्थं रसं जलं रोहितं रक्तं वयति संपादयति स्रवन्स एव रक्तस्थानीय इत्यर्थः । नग्नहुशब्देन यवानां स्थूलचूर्णानि संस्रावेणाभिषिक्तानि कथ्यन्ते । सोऽयं नग्नहुरवयवान्तरस्थानीय इत्यर्थः । धीर इत्यादिदृष्टान्तो लोके धीरो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बुद्धिमान्कुविन्दस्तसरं नववस्त्रमिव । वेमशब्देन वस्त्रनिर्माणकाले प्रहारदण्डोऽभिधीयते । यथा कुविन्दः प्रहारदण्डेन वस्त्रं निष्पादयति तद्वदित्यर्थः ।

अथ पञ्चमीमाह –

पय॑सा शु॒क्रम॒मृत॑ ज॒नित्र॑म् । सुर॑या मू॒त्राज्ज॑नयन्ति॒ रेतः॑ ।
अपाम॑तिं दु॒र्म॒तिं बाध॑मानाः । ऊव॑ध्यं॒ वात॑ꣳ स॒ब्बुव॒
तद॒रात् (२) , इति ।

यदेतदत्र पयोद्रव्यं यच्च सुराद्रव्यं तेन द्रव्यद्वयेन मूत्रान्मूत्रद्वारात्सकाशान्निर्गमनयोग्यं रेतो देवता जनयन्ति । कीदृशं रेतः शुक्रं दीप्तिमच्छ्वेतवर्णममृतं विनाशरहितमत एव जनित्रम- पत्योत्पादकम् । या देवता रेतो जनयन्ति ताः कीदृश्यः, अमतिं दुर्मतिं चापबाधमानाः । अमतिः कर्तव्यविषयज्ञानाभावः, दुर्मतिर्विपरीतज्ञानम् । किंच ता देवतास्तत्तस्मिन्संपादयितव्ये शरीर आरात्समीप उदरमध्य ऊवध्यं जनयन्ति । अर्धं जीर्णमन्नमपरिपक्वं पुरीषमूवध्यशब्दवाच्यम् । पयः सुराभ्यामेव तज्जनयन्ति । तथा सबुवं वातं जनयन्ति । वातः प्राणवायुः । बुवशब्दः श्वासकालीनं शब्दमनुकरोति । तेन शब्देन सहितमित्यर्थः ।

अथ षष्ठीमाह –

इन्द्रः॑ सु॒त्रामा॑ हृद॑येन स॒त्यम् । पु॒रो॒डाशे॑न सवि॒ता ज॑जान ।
यकृ॑त्क्लो॒मान॒ वरु॑णो भिषज्यन् । मत॑स्ने वाय॒व्यै॑र्न मि॑नाति
पित्तम्, इति ।

शोभनं यथा भवति तथा त्रायत इति सुत्रामा । तादृश इन्द्रः पशोर्हृदयेन सत्यं यथार्थज्ञानशक्तिं जजान । सविता च पुरोडाशेन क्लोमानं भिषज्यन्वर्तते । यकृत्क्लोमशब्दाभ्यां हृदयस्य पार्श्वद्वयवर्तिनौ मांसखण्डावुच्येते । यकृत्क्लोम्नोः समीपवर्तिनी द्वे मांसे मतस्ने । वायव्यैर्न वायव्यैरिव वायव्यानि ग्रहपात्राणि तैर्मतस्ने इव पित्तमिव मिनात्यवय- वजातं संपादयति ।

[अथ] सप्तमीमाह –

आ॒न्त्राणि॑ स्था॒ली मधु॑ पिन्व॑माना । गु॒दा॒ पात्रा॑णि सु॒दुघा॑

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न धेनुः। श्येनस्य पत्रं न प्लीहा शचीभिः । आसन्दी नाभिरुदरं न माता, इति ।

मधु मधुरं क्षीरादिरसं पिन्वमाना प्रीणयन्ती धारयन्तीत्यर्थः। तादृशी स्थाली या वर्तते सेयमान्त्राण्यान्त्रस्थानीयानि । अन्यानि पिष्टादिद्रव्य स्थापनार्थानि पात्राणि तानि गुदा गुदस्थानीयानि । स्थाल्याः पात्राणां च दृष्टान्तः । सुदुघा न धेनुः शोभनं क्षीरं दोग्धीति सुदुधा । तादृशी धेनुरिव स्थाल्यादिकं वर्तते । प्लीहशब्दो मांसविशेषवाची । स च मांसविशेषः श्येनाख्यस्य पक्षिणः पत्रं न पक्ष इव । तादृशः स मांसविशेषः शचीभिः स्वव्यवहारशक्तिभिः सह पात्रैः संपादित इति शेषः । येयमभि-षेकार्थाऽऽसन्दी सेयं नाभिस्थानीया । या तु माता सा भूम्यात्मिका वेदिः सेयमुदरं न, उदरमिव ।

अ [था] ष्टमीमाह -

कुम्भो वनिष्ठुर्जनिता शचीभिः । यस्मिन्नग्रे योन्यां गर्भो अन्तः (३) । प्लाशीर्व्यक्तः शतधार उत्सः । दुहे न कुम्भी स्वधां पितृभ्यः, इति ।

उलूकपक्षिसदृशो मांसविशेषो वनिष्ठुः । योऽयमत्र द्रवद्रव्यस्थापनार्थः कुम्भः स वनिष्ठुस्थानीयः । स च शचीभिः स्वशक्तिभिर्जनितोत्पादयिता । यस्मिन्वनिष्ठावग्रे पुरोभागे योन्यामन्तर्यो गर्भो वर्तते । अत्र सुरावनयनार्थं शतच्छिद्रयुक्तः कुम्भो योऽस्ति सोऽयं व्यक्तः स्पष्टः । बहुच्छिद्रोपेतत्वाच्छतधारः । सुरास्रवणयुक्तत्वादुत्सः । तादृशः कुम्भः प्लासी (शी)र्नासिकाच्छिद्रस्थानीयः । येयं द्रवद्रव्यधारणार्था कुम्भी तां कुम्भीं पितृभ्यः पित्रर्थं स्वधां दुहे नामृतं दोग्धीव । अध्वर्युरिति शेषः ।

[अथ] नवमीमाह -

मुखं सदस्य शिर इत्सदेन । जिह्वा पवित्रमश्विना स सरस्वती । चप्यं न पायुर्भिषगस्य वालः । वस्तिर्न शेपो हरसा तरस्वी, इति ।

सीदत्यत्रेति सदो देवयजनस्थानं तेन सदेनास्य निरूप्यमाणशरीरस्य संमुखं समीचीनं मुखं शिर इच्छिरश्च संपन्नमिति शेषः । पवित्रं द्रव्यशोध नार्थं यद्वस्त्रं तज्जिह्वा । एतत्सर्वमश्विनौ सरस्वती च तिस्रः

Digitized by Madhuban Trust, Delhi

संपादितवत्यः । चप्पं पिष्टपात्रं तत्पायुर्नापानस्थानमिव वर्तते । योऽयं वालो द्रव्यशोधनार्थः सोऽयमस्य शरीरस्य भिषक्, चिकित्सकस्थानीयः । तेन हि व्याधिस्थानीयो द्रव्यदोषोऽपनीयते । योऽयं पशोः शेपः सोऽयं वस्तिर्न मूत्रस्थानमिव । हरसा वह्निज्वालारूपेण तेजसा तरस्वी निरूप्यमाणो देहो वेगवानिव लक्ष्यते ।

अथ दशमीमाह –

अश्विभ्यां चक्षुरमृतं ग्रहाभ्याम् । छागेन तेजो हविषा शृतेन । पक्ष्माणि गोधूमैः कुवलैरुतानि । पेशो न शुक्लमसितं वसाते (४), इति ।

अश्विभ्यां ग्रहाभ्यामश्विनोः संबन्धिनौ यौ ग्रहावयवौ ताभ्याममृतं विनाशरहितं चक्षुः संपादितम् । शृतेन पक्वेन हविःस्वरूपेणच्छागेन चक्षुर्गतं तेजःसंपादितम् । सक्तुनिष्पादनार्थं ये गोधूमा ये च कला बदरफलविशेषास्तैरुभयैः परस्परमुतानि संबद्धानि पक्ष्माणि रोमाणि संपाद्यन्ते । पेशो न रूपमिव यत्पशौ दृश्यते तच्चक्षुर्गतशुक्लमसितं च शुक्लमण्डलं कृष्णमण्डलं च तदुभयं वसाते अश्विनौ देवौ पक्ष्मभिराच्छादयतः ।

ए (अथै) कादशीमाह –

अविर्न मेषो नसि वीर्याय । प्राणस्य पन्था अमृतो ग्रहाभ्याम् । सरस्वत्युपवाकैर्व्यानम् । नस्यानि बर्हिर्बदरैर्जजान, इति ।

अविर्नाविरिव वर्तमानो यः सारस्वतो मेषः सोऽयं नसि नासिकायां वीर्याय श्वासप्रवृत्तिसामर्थ्याय प्रवर्तते । इयं च नासिका प्राणाख्यस्य वायोरमृतः कदाचिदपि विनाशरहितः पन्था गमनागमनहेतुर्ग्रहाभ्यां पयः-सुराभ्यां निष्पादितः । तथेयं सरस्वत्युपवाकैर्हरितयवसक्तुभिर्व्यानवायुं जनयति । नस्यानि नासिकायां भवानि बर्हिर्वर्हीषि लोमानि बदरैः सक्तुनिष्पादनाय संपादितैर्बदरफलैर्जजान संपादयामास ।

अथ द्वादशीमाह –

इन्द्रस्य रूपमृषभो बलाय । कर्णाभ्याꣳ श्रोत्रममृतं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्रहाभ्याम्। यवा न बर्हिर्भुवि केसराणि । कर्कन्धु जज्ञे मधु सारघं मुखात्, इति ।

योऽयमृषभ इन्द्रस्य रूपमिन्द्रदेवताकत्वेन तत्स्वरूपसदृशः सोऽयमस्य शरीरस्य बलार्थं संपाद्यते । पशुसंबन्धिभ्यां कर्णाभ्यां पयः सुरारूपग्रहाभ्यां चामृतं श्रोत्रं बाधिर्यरहितं श्रोत्रेन्द्रियं संपद्यते । भु (भु) वि यवा न भूमावुत्पन्ना यवा इव बर्हिर्वेद्यमासादितानि वर्हींषि केसराणि प्रवृद्धतमानि लोमानि । सरघा मधुमक्षिकास्ताभिः संपादितं सारघं मधु तद्रूपं जज्ञे । कर्कन्धुशब्देनातिस्थूलबदरफलपिष्टमुच्यते । तच्च मधुसदृशं मुखाज्जज्ञे यज्ञारम्भे समुत्पन्नमित्यर्थः ।

[अथ] त्रयोदशर्मीमाह -

आत्मन्नुपस्थे न वृकस्य लोम । मुखे श्मश्रूणि न व्याघ्रलोमम् (५) । केशा न शीर्षन्यशसे श्रियै शिखा । सिँहस्य लोम त्विषिरिन्द्रियाणि, इति ।

प्रकृतिभूतायां सौत्रामण्यां त्रयाणि लोमानीति वाक्येन वृकव्याघ्रसिंहानां लोमानि विहितानि तान्यत्र चोदकप्राप्तानि ग्रहत्रये प्रक्षिप्यन्ते । तत्र यद्वृकस्य लोम तदात्मन्संपाद्यमानशरीर उपस्थे न गुह्यप्रदेश इव वर्तते । यत्तु व्याघ्रलोम तन्मुखे वर्तमानानि श्मश्रूणीव । यत्तु सिंहस्य लोम तच्छिरसि केशा इव । केशनिष्पन्ना च शिखा यशसे श्रियै च संपद्यते । अनुष्ठानकाले सशिखत्वेन यशः । लोके व्यवहारे रमणीयत्वेन श्रीः । या तु लोमगता त्विषिर्दीप्तिः । सा तु संपाद्यस्य शरीरस्येन्द्रियस्थानीया ।

[अथ] चतुर्दशीमाह -

अङ्गान्यात्मन्भिषजा तदश्विना । आत्मानमङ्गैः समधात्सरस्वती । इन्द्रस्य रूपँशतमानमायुः । चन्द्रेण ज्योतिरमृतं दधाना , इति ।

तत्तदानीं यागावसरे भिषजा चिकित्सकावश्विनावात्मन्संपाद्ये शरीरेऽङ्गानि हस्तपादादीनि संपादितवन्तौ । सरस्वती च तैरङ्गैरात्मानं संपूर्णदेहं समधात्सम्यगकार्षीत् । कीदृशी सरस्वती । इन्द्रस्य वर्तमानस्य यद्रूपं तद्दधाना संपादयन्ती । तथा शतमानं शतसंवत्सरप्रमाणमायुः

Digitized by Madhuban Trust, Delhi

संपादयन्ती । तथा चन्द्रेणाऽऽह्लादकरूपेणामृतं ज्योतिरनश्वरं तेजः संपादयन्ती ।

[अथ] पञ्चदशीमाह -

सरस्वती योन्यां गर्भमन्तः । अश्विभ्यां पत्नी सुकृतं बिभर्ति । अपां रसेन वरुणो न साम्ना । इन्द्रं श्रियै जनयन्नप्सु राजा, इति ।

अश्विभ्यां देवाभ्यां सुकृतं सुष्ठु संपादितमुत्पादनीयशरीररूपं गर्भं पत्नी पालयित्री सरस्वती योन्यां गर्भाशयेऽन्तर्मध्ये बिभर्ति पोषयति । अपां रसेन सारभूतेन साम्ना परस्परं साम्येन पय सुराग्रहेणाप्सु वरुणो न राजा ?) यथा जलमध्ये वरुणी राजा तस्यामब्देवतायां पुत्रं जनयति तथेमं यजमानमिन्द्रमिन्द्रसमानशरीरं श्रियै सपदनभवार्थमयमनुष्ठीयमानो यागो जनयन्वर्तते ।

[अथ] षोडशीमाह -

तेजः पशूना हविरिन्द्रियावत् । परिस्रुता पयसा सारघं मधु । अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याम् । अमृतः सोम इन्दुः (६), इति ।

अन्तर आरादन्तर्वसाते व्याघ्रलोम राजा चत्वारि च ।

इति कृष्णयजुर्वेदीय तैत्तिरीयब्राह्मणे द्वितीयाष्टके

षष्ठाध्याये चतुर्थोऽनुवाकः ।। ४ ।।

पशूनां तेजः सारभूतं हविर्भिषजा चिकित्सकाभ्यामश्विभ्यां दुग्धं संपादितमित्यर्थः । केन द्रव्येण परिस्रुता पयसा परितः स्रवतीति परिस्रुत्सुरा तया क्षीरेण च संपादितं हविः । कीदृशं हविरिन्द्रियावदिन्द्रियाभिवृद्धिकरं सारघं मधु सरघाभिः संपादितेन मधुना सदृशं यथाऽश्विभ्यां हविः संपादितं तथा सरस्वत्या । तत्फलभूतो यजमानस्येन्द्रसदृशः संपादितः । केन साधनेन सुतासुताभ्याम-भिषवसदृशव्यापारेण संपादिता सुरा सुता तादृक्प्रयासरहितक्षीरसुतं ताभ्यां देहः संपादितः। कीदृशो देहोऽमृतो देवलोके समुत्पन्नत्वान्मरणरहितः सोमः सोम्यो दृष्टोप्रिय इन्दुश्चन्द्रवदाह्लाद-करःपरमैश्वर्ययुक्तो वा । एवमेतैः षोडशभिर्यन्त्रैर्यजमानस्य भाविदेहसूचनपरैरुपहोमः कर्तव्यः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठके चतुर्थोऽनुवाकः ।। ४ ।।

अथ षष्ठे पञ्चमोऽनुवाकः ।

चतुर्थ उपहोमा अभिहिताः । पञ्चमेऽभिषेकोऽभिधीयते । कल्पः-"औदुम्बर्यासन्द्यरत्निमात्रशीर्षण्यानूच्या नाभिदघ्नपादा मौञ्जविवाना मित्रोऽसि वरुणोऽसीति । तां यजमानायतने प्रतिष्ठापयत्यासादनोपवेशनाभिमन्त्राणानि राजसूयवत्" इति । पाठस्तु -

मि॒त्रोऽसि॒ वरु॑णोऽसि । सम॒हं विश्वै॑र्दे॒वैः, इति ।

ह आसन्दीविशेष त्वमिष्टप्रापकत्वान्मित्रोऽसि । अनिष्टनिवारकत्वाद्वरुणोऽसि । अहमत्र त्वद्बलात्सर्वैर्देवैः संगतो भूयासम् ।

कल्पः-"क्षत्रस्य नाभिरसीति तस्यां कृत्य (त्त्य) धीवासमास्तीर्य-" इति । पाठस्तु -

क्ष॒त्रस्य॒ नाभि॑रसि । क्ष॒त्रस्य॒ योनि॑रसि, इति ।

हे चर्मपट त्वं क्षत्रस्य बलस्य नाभिर्मध्यस्थानमसि । तथा क्षत्रस्य बलस्य योनिः कारणमसि ।

कल्पः-"स्योना मा सीद सुषदा मा सीदेति तामासाद्य यजमानो मा त्वा हिँ सीन्मा मा हिँ सीदित्युपविशति" इति । पाठस्तु -

स्यो॒ना मा सीद । सु॒षदा॒ मा सीद । मा त्वा हिँ सीत् ।
मा मा॑ हिँ सीत्, इति ।

ह आसन्दि त्वं स्योना सुखकरी भूत्वा मां प्रत्यासीद । तथा सुषदा सुष्ठूपवेशनयोग्या सती मां प्रत्यासीद प्राप्नुहि । मदीयो देहस्त्वां मा हिनस्तु । त्वदीयस्वरूपमपि मां मा हिनस्तु ।

कल्पः-"निषसाद धृतव्रत इत्यासीनमनुमन्त्रयते" इति । पाठस्तु-

निष॑साद् धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या॑स्वा (१) । साम्रा॑ज्याय सु॒क्रतुः, इति ।

अयं यजमानो धृतव्रतः स्वीकृतनियम वरुणः फलप्रतिबन्धकपापनिवारको भूत्वा साम्राज्यं कर्तुं सुक्रतुः शोभनसंकल्पः सन्पस्त्यासु गृहसमानेष्वासन्दीस्थानेष्वानिषसाद सर्वत उपविष्टवान् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कल्पः-"तस्यां प्राङ्मुखमासीनं प्रत्यङ्मुखस्तिष्ठन्नश्विनोः । संपातैरभिषिञ्चति देवस्य त्वा" इति । पाठस्तु -

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन । तेजसे ब्रह्मवर्चसायाभिषिञ्चामि, इति ।

सवितुर्देवस्य प्रेरणे सत्यश्विसंबन्धिभ्यां बाहुभ्यां पूषसंबन्धिभ्यां हस्ताभ्यामश्विनोः संबन्धिना संपातेनौषधरूपेण कान्तिब्रह्मवर्चससिद्ध्यर्थं यजमानं त्वामभिषिञ्चामि ।

कल्पः-"एवमुत्तरेण मन्त्रेण सारस्वतस्योत्तमेनैन्द्रस्य" इति । संपातेनाभिषिञ्चतीत्युभयत्रानुवर्तते । पाठस्तु-

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्याम् । सरस्वत्यै भैषज्येन (२) । वीर्यायान्नाद्यायाभिषिञ्चामि, इति ।

पूर्ववद्व्याख्येयम् ।

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्याम् । इन्द्रस्येन्द्रियेण । श्रियै यशसे बलायाभिषिञ्चामि, इति ।

पूर्ववद्व्याख्येयम् ।

कल्पः-"कोऽसि कतमोऽसीति पाणिं संमृश्य" इति । पाठस्तु-

कोऽसि कतमोऽसि । कस्मै त्वा काय त्वा, इति ।

हे यजमान त्वं कोऽसि प्रजापतिरूपोऽसि । अत एव कतमोऽस्यविज्ञातविशेषोऽसि । न हि प्रजापतिरीदृश एवेति केनचिदपि निर्धारयितुं शक्यते । तस्य सर्वात्मकत्वेन विशेषस्य दुर्निरूपत्वात् । अतः कस्या अविज्ञेयस्वरूपसिद्ध्यर्थं त्वां स्पृशामि । काय प्रजापतिरूपसिद्ध्यर्थं त्वां स्पृशामि । अनेन मन्त्रेण यजमानस्य पाणिद्वयमभिसंस्पृशेत् ।

कल्पः-"अत्र राजसूयवन्मङ्गल्यनाम्न आहूय" इति । राजसूये

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

त्त्वेवमुक्तम्-मङ्ल्यनाम्नो राजाऽऽह्वयति सुश्लोकाँ ३ इति संग्रहीतारं सुमङ्गलाँ३ इति भागदुघं सत्यराजा३निति क्षत्तारम्' इति । पाठस्तु -

सुश्लोकाँ३सुमङ्गलाँ३ सत्यराजा३न, इति ।

शोभनः श्लोकः कीर्तिर्यस्यासौ सुश्लोकः । आह्वानार्था सानुनासिकाप्लुतिः । सुष्ठु मङ्गलाचरणं यस्यासौ सुमङ्गलः। सत्येन स्वामिव्यापारेण राजत इति सत्यराजः । एतैः संग्रहीत्रादय आह्वातव्याः स्युः । रथस्योपर्यश्वप्रग्रहधारी संग्रहीता । यद्वा संपादितं राजधनं भाण्डागारे सम्यक्संगृह्णातीति संग्रहीता । ग्रामेषु राजभागकरं दुग्धे स्वी करोतीति भागदुघः । क्षत्ता सारथिर्द्वारपालको वा ।

कल्पः-"शिरो मे श्रीरिति यथालिङ्गमङ्गानि संमृश्य" इति । पाठस्तु-

शिरो मे श्रीः (३) । यशो मुखम् । त्विषिः केशाश्च श्मश्रूणि । राजा मे प्राणोऽमृतम्, सम्राट् चक्षुः । विराट्छ्रोत्रम् । जिह्वा मे भद्रम् । वाङ्महः। मनो मन्युः । स्वराड्भामः । मोदाः प्रमोदा अङ्गुलीरङ्गानि (४) । चित्तं मे सहः । बाहू मे बलमिन्द्रियम् । हस्तौ मे कर्म वीर्यम् । आत्मा क्षत्रमुरो मम । पृष्टीर्मे राष्ट्रमुदरम ँ सौ । ग्रीवाश्च श्रोण्यौ । ऊरू अरत्नी जानुनी । विशो मेऽङ्गानि सर्वतः । नाभिर्मे चित्तं विज्ञानम् । पायुर्मेऽपचितिर्भसत् (५) । आनन्दनन्दावाण्डौ मे । भगः सौभाग्यं पसः, इति ।

मदीयं शिरः श्रियो हेतुत्वेन श्रीरूपमस्तु । मुखं यशोहेतुरस्तु । केशाःश्मश्रूणि च कान्तिहेतवः सन्तु । मदीयः प्राणः सर्वेन्द्रियाणां राजा सन्नमृतहेतुरस्तु । चक्षुरिन्द्रियं दूरसूक्ष्मादिदर्शने सम्यग्राजमानमस्तु । श्रोत्रेन्द्रियं दूरशब्दमन्दध्वनिश्रवणेन विविधं राजमानमस्तु । मदीया जिह्वा विविधरसज्ञानेन कल्याणभोगहेतुरस्तु । वागिन्द्रियं सभारञ्जनेन पूजाहेतुरस्तु । मदीयं मनो धर्मकार्यमननहेतुरस्तु । मदीयो भाम क्रोधो भ्रातृव्य निराकरणेन स्वयमेव राजाऽस्तु । अङ्गुलयो मोदा हर्षहेतवः सन्तु । अङ्गान्यनुक्तावयवाः प्रमोदाः प्रकृष्टहर्षहेतवः सन्तु । मदीयं चित्तं स्तुति निन्दादिसहनहेतुरस्तु । मनश्चित्तयोर्वृत्तिभेदेन भेदः । मदीयौ बाहू मणिबन्धस्य मूलभागौ प्रबलशक्तिहेतू स्ताम् । हस्तौ मणिबन्धस्याग्रभागौ

Digitized by Madhuban Trust, Delhi

वीर्यवद्व्यापारहेतू स्ताम् । मदीय आत्मा मध्यशरीरमुरश्च क्षत्त्रं बलहेतुरस्तु । पृष्ठ्यादयो जान्वन्ता अवयवा राष्ट्रहेतवः सन्तु । पृष्टयः पार्योरुपरिस्थान्यस्थीनि । उदरादयः प्रसिद्धाः । ग्रीवा गलावयवाः । अरत्नी प्रकोष्ठौ । विशो मनुष्याः । ममाङ्गानीव सर्वतो विधेयाः सन्तु । मदीयं (यो) नाभिश्चित्तं चैतन्यहेतुरस्तु । पायुर्विज्ञानं विसर्गज्ञानकुशलोऽस्तु । भसन्मे ममोपस्थेन्द्रियमपचितिर्नियतत्वेन बहुमानहेतुरस्तु । मदीयावाण्डौ वृषणावानन्दनन्दयोर्हेतू स्ताम् । पुंसः सुखमानन्दः । स्त्रियाः सुखं नन्दः । पसः प्रजननं भगसौभाग्यहेतुरस्तु । भग ऐश्वर्यम् । सौभाग्यं देहशोभा ।

कल्पः–"जङ्घाभ्यां पद्भ्यामिति प्रत्यवरुह्य" इति । पाठस्तु–

जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि । विशि राजा प्रतिष्ठितः, इति ।

जानुभ्यामधोभागौ जङ्घे ताभ्यां पादाभ्यां च धर्मो देहस्य धारयिताऽस्मि । विशि प्रजायां प्रतिष्ठितः स्थैर्येणावस्थितो राजाऽस्मि ।

कल्पः–"प्रतिक्षत्त्रे प्रतितिष्ठामि राष्ट्र इति जपित्वा " पाठस्तु–

प्रतिक्षत्त्रे प्रतितिष्ठामि राष्ट्रे । प्रत्यश्वेषु प्रतितिष्ठामि गोषु । प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन् । प्रति प्राणेषु प्रतितिष्ठामि पुष्टे । प्रतिद्यावापृथिव्योः । प्रतितिष्ठामि यज्ञे (६), इति ।

क्षत्त्रादिषु यज्ञान्तेषु प्रतितिष्ठामि स्थैर्येणावस्थितोऽस्मि । क्षत्त्रं बलं क्षत्त्रियादिर्वा । राष्ट्रं देशः । अश्वादयः प्रसिद्धाः । आत्मा शरीरम् । पुष्टं शरीरस्य पुष्टिः ।

कल्पः–"त्रयो देवा एकादशेत्याहुतीर्जुहोति" इति । तत्र प्रथमामृचमाह –

त्रया देवा एकादश । त्रयस्त्रिꣳशाः सुराधसः । बृहस्पतिपुरोहिता । देवस्य सवितुः सवे । देवा देवैरवन्तु मा । प्रथमा द्वितीयैः । द्वितीयास्तृतीयैः । तृतीयाः सत्येन । सत्यं यज्ञेन । यज्ञो यजुर्भिः (७) । यजूꣳषि सामभिः । सामान्यृग्भिः । ऋचो याज्याभिः याज्या

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वषट्कारैः वषट्कारा आहुतिभिः । आहुतयो मे कामान्त्समर्धयन्तु, इति ।

एकादशसंख्याका देवतास्त्रयास्त्रिविधा लोकत्रयवर्तित्वात् तथा चाऽऽम्नातम्–"ये देवा दिव्येकादश स्थ" इत्यादिना । ते चैते त्रयस्त्रिंशत्संख्याका देवाः सुराधसः शोभनस्य कर्मणः साधकाः। बृहस्पतिः पुरोहितो मुख्यो येषां ते बृहस्पतिपुरोहिताः । सवितुर्देवस्य प्रसवे सति ते सर्वे मुख्या देवा इतरैः सह मामवन्तु । तत्र प्रथमगणस्था द्वितीयगणस्थैः सहिताः । द्वितीयगणस्थास्तृतीयगणस्थैः सहिताः । तृतीयगणस्थाः सत्येन सहिताः । सत्यं च यज्ञेन संहितम् । एवं यज्ञादय आहुतिपर्यन्ता उत्तरोत्तरवस्तुभिः सह तिष्ठन्ति । ताश्चाऽऽहुतयो मदीयान्कामान्समर्धयन्तु समृद्धान्कुर्वन्तु ।

अथ द्वितीयं मन्त्रमाह –

भूः स्वाहा, इति ।

येयं भूमिस्तस्यै स्वाहा हुतमस्तु ।

कल्पः–"लोमानि प्रयतिर्ममेति यथालिङ्गमङ्गानि संमृशति" इति ।

पाठस्तु –

लोमानि प्रयतिर्मम। त्वङ्म आनतिरागतिः । मा ँ सं म उपनतिः । वस्वस्थि । मज्जा म आनतिः (८), इति ।

पस्त्यांस्वा सरस्वत्यै भैषज्येन श्रीरङ्गानि भसद्यज्ञे यज्ञो यजुर्भिरुपनतिर्द्वे च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
षष्ठाध्याये पञ्चमोऽनुवाकः ।। ४ ।।

मदीयानि लोमानि प्रयतिः शुद्धिकराणि सन्तु । मदीया त्वगानतिरन्येषां प्रह्वीभावहेतुरस्तु । आगतिरन्येषां पदार्थानामागमन-हेतुरस्तु । मदीयं मांसमुपनतिरभिप्रेतसंपत्तिहेतुरस्तु । अस्थि च मदीयं वसु धनहेतुरस्तु । मत्संबन्धिमज्जा चाऽऽनतिरन्येषां वशीकरणहेतुरस्तु ।

अत्र विनियोगसंग्रहः–

आसन्दीं स्थापयेन्मित्रः क्षत्रस्य चर्मसंस्कृतिः ।
स्योनां तस्यामुपविशेन्निषसादेति मन्त्रयेत् ।।

Digitized by Madhuban Trust, Delhi

देवत्रयेणाभिषिञ्चेत्कोऽसि पाणी उपस्पृशेत् ।
सुश्लोकत्रयेणाऽऽह्वयेच्छिरः स्वात्माभिमर्शनम् ।।
अवरोहति जङ्घाभ्यां प्रतिक्षत्रादिकं जपेत् ।
त्रया भूराहुतीर्हुत्वा लोमेत्यङ्गान्युपस्पृशेत् ।
अनुवाके पञ्चमेऽस्मिन्मन्त्राः सप्तदश स्मृताः ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठके पञ्चमोऽनुवाकः ।। ५ ।।

अथ षष्ठे षष्ठोऽनुवाकः ।

पञ्चमेऽभिषेक उक्तः । षष्ठेऽवभृथ उच्यते ।

कल्पः–"यद्देवा देवहेडनमित्यवभृथे पञ्चाऽऽहुतीर्जुहोति" [इति] । तत्र प्रथमामृचमाह -

यद्दे॑वा दे॒व॒हे॑ड॑नम् । दे॑वा॑सश्चकृ॒मा व॒यम् ।
अ॒ग्निर्मा॒तस्मा॒दे॑नसः । विश्वा॑न्मुञ्च॒त्व ँ॑ हंसः, इति ।

देवासो द्योतनात्मका हे देवा देवहेडनं देवविषयमनादररूपं यत्पापं वयं सभृत्यपुत्राश्चकृम कृतवन्तः । अंहसोऽभिभवनस्वभावाद्विश्वस्मात्सर्वस्मात्तस्मादेनसः पापादग्निर्मा मां मुञ्चतु मुक्तं करोतु ।

[अथ] द्वितीयामाह –

यदि॒ दिवा॒ यदि॒ नक्त॑म् । एना ँ॑ सि चकृ॒मा व॒यम् ।
वा॒युर्मा॒ तस्मा॒दे॑नसः । विश्वा॑न्मुञ्च॒त्व ँ॑ हसः, इति ।

कालविशेषे कृतात्पाप्मनो वायुर्मोचकोऽस्तु ।

अथ तृतीयामाह –

यदि॒ जाग्रद्यदि स्वप्ने॑ । एना ँ॑ सि चकृ॒मा व॒यम् (१) ।
सूर्यो॑ मा॒ तस्मा॒दे॑नसः। विश्वा॑न्मुञ्च॒त्व ँ॑ हंसः, इति ।

अवस्थाविशेषे कृतात्पाप्मनः सूर्यो मोचकोऽस्तु ।

अथ चतुर्थीमाह –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यद् ग्रामे यदरण्ये । यत्सभायां यदिन्द्रिये । यच्छूद्रे यदर्ये । एनश्चकृमा वयम् । यदेकस्याधि धर्मणि । तस्यावयजनमसि, इति ।

अर्यः स्वामी वैश्यो वा । अरण्यादिदेशविशेषे चक्षुरादीन्द्रियविशेषे शूद्रादिपुरुषविशेषे च यदेनो वयं चकृम यदप्येकस्यान्यपुरुषस्य धर्मण्यग्निहोत्रादिधर्मकार्येऽधिकं पापं चकृम तस्य सर्वस्य पापस्य ह आहुतिरूप त्वमवयजनं विनाशकमसि ।

अथ पञ्चमीमाह –

यदापो अघ्निया वरुणेति शपामहे । ततो वरुण नो मुञ्च(२), इति ।

हे वरुण या आपः सन्ति याश्चाघ्निया गाव एतदद्वयं भूम्यादेरुपलक्षणं तेषु सर्वेषु विषयेष्वित्यनेन प्रकारेण शपामहे सत्यत्वेनानृतत्वेन वा शपथं कुर्मः । यत्पापमस्ति हे वरुण ततः शपथकृतात्पापान्नोऽस्मान्मुञ्च मुक्तान्कुरु ।

कल्पः–"अवभृथ निचङ्कुणेत्यवभृथं यजमानोऽभिमन्त्रय" इति ।

पाठस्तु –

अवभृथ निचङ्कुण निचेरुरसि निचङ्कुण । अव देवैर्देवकृतमेनोऽयाट् । अव मर्त्यैर्मर्त्यकृतम् । उरोरा नो देव रिषस्पाहि, इति ।

हेऽवभृथ कर्माभिमानिन्वरुण निचङ्कुण राक्षसभर्त्सनार्थं नितरां ध्वनिकारिन्निचेरुरस्यस्मरणार्थं निगूढत्वेन चरणशीलोऽसि । हे निचङ्कुणास्माभिर्देवेषु कृतमेनोऽसि ।

सुमित्रा न आप ओषधयः सन्तु । दुर्मित्रास्तस्मै भूयासुः । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः, इति ।

या एता अब्देवता याश्चौषधिदेवतास्ताः सर्वा नोऽस्मान्प्रति सुमित्रा अत्यन्तमनुकूलाः सन्तु । योऽस्मानुदासीनानपि द्वेष्टि य चान्यमुदासीनमपि वयं द्विष्मस्तस्मै द्विविधाय तादृशपुरुषाय या (ता) आप ओषधयश्च दुर्मित्राः प्रतिकूलाः सन्तु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयमन्त्रपाठस्तु -

द्रुपदादिवेन्मुमुचानः । स्विन्नः स्नात्वी मलादिव (३) ।
पूतं पवित्रेणेवाऽऽज्यम् । आपः शुन्धन्तु मैनसः, इति ।

राजानो ह्यपराधिनस्तस्करस्य पादं सच्छिद्रे काष्ठे कीलयन्ति तद् द्रुपदमित्युच्यते । तस्मान्मुमुचान इवैतद्बन्धनान्मुक्तः पुरुषश्चौर्याभियोगं परित्यज्य शुद्ध इत्येव व्यवह्रियते । यथा स्विन्नः पुरुषः स्नात्वी स्नानं कृत्वा मलान्मुमुचानः शुद्ध इत्येव व्यवह्रियते। यथा च कर्मण्याज्यमुत्पवनपवित्रेण पूतं भवति तथेमा आपो मामेनसः पापाच्छुन्धन्तु शुद्धं कुर्वन्तु ।

कल्पः-"उद्वयं तमसस्परीत्यादित्यमुपस्थाय " इति । पाठस्तु-

उद्वयं तमसस्परि। पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यम् । अगन्म ज्योतिरुत्तमम्, इति ।

तमसस्पर्यन्धकारस्योपरि वर्तमानमुत्तरं ज्योतिरुत्कृष्टं प्रकाशमुत्पश्यन्त उत्कर्षेण वीक्षमाणा वयं देवत्रा देवेषु मध्ये देव द्योतमानं सूर्यं सूर्यस्वरूपमुत्तमं ज्योतिरगन्म प्राप्ताः स्मः ।

कल्पः-"प्रतियुतो वरुणस्य पाश इत्युदकान्तं प्रत्यस्यति" इति । पाठस्तु -

प्रतियुतो वरुणस्य पाशः । प्रत्यस्तो वरुणस्य पाशः, इति ।

योऽयं वरुणस्य पाशो जलमध्यवर्ती सोऽस्माभिर्बहिर्निर्गच्छद्भिः प्रतियुतः परित्यक्तः तथा वरुणस्य पाशः प्रत्यस्तो विनाशितः ।

कल्पः-"पशुवत्समिध उपस्थानं च" इति ।पशौ त्वेवमुक्तम् - "एधोऽस्येधिषीमहीत्याहवनीये समिधं आधायापो अन्वत्रारिषमित्युपतिष्ठन्ते" इति ।. तत्र समिदाधानमन्त्राणां त्रयाणां पाठस्तु -

एधोऽस्येधिषीमहि । समिदसि । (४) तेजोऽसि तेजो मयि धेहि, इति ।

हे समित्त्वमेधोऽस्यभिवृद्धिहेतुरसि । अतस्त्वामाधाय वयमेधिषीमहि वृद्धिं प्राप्नुमः । हे द्वितीयसमित्वं समिन्धनसाधनमसि । हे तृतीयसमित्त्वं तेजोहेतुरसि । अतो मयि तेजो धेहि संपादय ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपो अन्वचारिषम् । रसेन समसृक्ष्महि । पयस्वाँ अग्न आगमम् । तं मा स सृज वर्चसा । प्रजया च धनेन च, इति ।

अहमेता अपोऽनुसृत्याचारिषं कर्मानुष्ठितवानस्मि । रसेन जलगतेन सारेण समसृक्ष्महि संसृष्टा अभूम । हेऽग्ने पयस्वाञ्जलसारयुक्तोऽहमागमं त्वत्समीपे समागतोऽस्मि । तमेतादृशं मां वर्चसा बलेन च प्रजया धनेन च संसृज संयोजय ।

कल्पः-"समावर्तीत्युपस्थाय" इति । पाठस्तु-

समाववर्ति पृथिवी । समुषाः । समु सूर्यः । समु विश्वमिदं जगत् । वैश्वानर ज्योतिर्भूयासम् । विभुं कामं व्यश्नवै, इति ।

येयं पृथिवी सा समाववर्ति सम्यगावृत्ता मया सह समागता । एवमुषःकालः सूर्यः सर्वमिदं जगच्च समाववर्ति । हे वैश्वानराहं ज्योतिःस्वरूपो भूयासम् । त्वत्प्रसादाद्विभुं कामं व्याप्तं फलं व्यश्नवै प्राप्नवानि ।

भूः स्वाहा ।। ४ ।।

स्वप्न एनाः सि चकृमा वयं मुञ्च मलादिव समिदप्ति जगृग्रीणि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
षष्ठाध्याये षष्ठोऽनुवाकः ।। ६ ।।

कल्पः-"भूः स्वाहेत्याहुतिं हुत्वा" - इति । येयं भूःपृथिवीका स्वाहा त्वयि स्वाहुता ।

अत्र विनियोगसंग्रहः-

यद्देवा पञ्चभिर्हुत्वाऽवभृथेत्यनुमन्त्रयेत् ।
सुमित्रा द्रुपदा द्वाभ्यां स्नात्वोद्वेत्युपतिष्ठते ।
प्रतीत्यापः परित्याज्या एधोस्त्रिर्जुहुयात्त्रिभिः ।
अपः समेत्युपस्थानं भूः स्वाहेति जुहोति हि ।।
अत्र मन्त्राः षोडशोक्ता अध्वर्योः कृत्यमीरितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठके षष्ठोऽनुवाकः ।। ६ ।।

अथ षष्ठे सप्तमोऽनुवाकः ।

इत्थं षड्भिरनुवाकैरस्यां कौकिल्या सौत्रामण्यामाध्वर्यवमुक्तम् । अथावशिष्टैश्चतुर्दशभिरनुवाकैर्हो (हौ)ममुच्यते । तत्रास्मिन्सप्तमेऽनुवाके होतारमुद्दिश्य मैत्रावरुणेन पठनीया एकादश प्रयाजप्रैषा उच्यन्ते । तत्र समिद्धयःप्रेष्य इत्यध्वर्युणा प्रेषितो मैत्रावरुणः प्रैषमन्त्रं पठति । तमिमं मन्त्रमाह-

होता यक्षत्समिधेन्द्रमिडस्पदे । नाभा पृथिव्या अधि ।
दिवो वर्ष्मन्त्समिध्यते । ओजिष्ठश्चर्षणीसहान् ।
वेत्वाज्यस्य होतर्यज, इति ।

योऽयं होता विद्यते समिधेन्द्रं, समिन्नामकेनाग्निना युक्तमिन्द्रमिस्पद इडाख्याया गोः पदस्थानेऽस्मिन्नाहवनीये यक्षद्यजतु पूजयत्वित्यर्थः । या सोमक्रयि (य) णी गौस्तस्याः पादपांसोः कियानपिभाग आहवनीये प्रक्षिप्तस्तस्मादिडिस्पदमित्युच्यते । समिन्नामकः कश्चिदग्निविशेषः प्रथमयाऽऽहुत्या हूयते । अतः समिन्नामकाग्निद्वारा तमिन्द्रं होता यक्षदित्युच्यते । तच्चेडायाः पदमाहवनीयाख्यं पृथिव्या नाभा नाभिस्थानीयायामुत्तरवेद्यामध्युपरि वर्तते । हूयमानोऽयमग्निर्दिवो वर्ष्मन्द्युलोकस्य शरीरस्थानीय इत्यर्थः । तत्र समिध्यते सम्यग्दीप्यते । चर्षणीसहांश्चर्षणयो मनुष्यास्तान्सहन्तेऽभिभवन्तीति चर्षणीसहा देवास्तानुद्दिश्य तेषां देवानी मध्य ओजिष्ठोऽत्यन्तप्रबलस्तादृशोऽग्निराज्यस्य वेत्विदमाज्यमश्नातु पिबत्वित्यर्थः । हे होतर्यज तदर्थं याज्यां पठ ।

अथ द्वितीयं प्रैषमन्त्रमाह -

होता यक्षत्तनूनपातम् । ऊतिभिर्जेतारमपराजिम् । इन्द्रं देवꣳ सुवर्विदम्, पथिभिर्मधुमत्तमैः । नराशꣳसेन तेजसा(१) ।
वेत्वाज्यस्य होतर्यज, इति ।

अत्र सर्वत्र प्रथमान्तो होतृशब्दो दैव्यं होतारमाचष्टे, संबुद्ध्यन्तो मानुषम् । यथा पूर्वमन्त्रे समिच्छब्दः प्रयाजदेवतारूपमग्निविशेषमाह, एवमत्रापि तनूनापाच्छब्दो द्वितीयप्रयाजदेवतारूपमग्निविशेषमाचष्टे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दैव्यो होता तनूनपान्नामकमग्निं यक्षद्यजतु पूजयतु तदग्निद्वारेन्द्रं पूजयतु। कीदृशमिन्द्रम्, ऊतिभिरस्मद्रक्षणैर्युक्तम्, जेतारं युद्धे जयशीलं केनाप्यन्येनापराजितम्, देवं द्योतमानम् सुवर्विदं स्वर्गस्थ लब्धारम्, मधुमत्तमैरन्नपानादिपाथेयसंपत्त्याऽत्यन्तं मधुरैः पथिभिर्मार्गैर्युक्तम्, नराशंसेन मनुष्यैः शंसनीयेन तेजसा युक्तम्, तथाविधेन्द्रं पूजार्थं तनूनपादग्निराज्यं पिबतु। तदर्थं हे मानुष होतर्याज्यां पठ।

[अथ] तृतीया (य) [मन्त्र] माह -

होता यक्षदिडाभिरिन्द्रमीडितम्। आजुह्वानममर्त्यम्। देवो देवैः सवीर्यः। वज्रहस्तः पुरंदरः। वेत्वाज्यस्य। होतर्यज, इति।

इडाशब्देन प्रयाजदेवतारुपस्तृतीयोऽग्निरुच्यते। बहुवचनं पूजार्थम्। तदग्निद्वारा दैव्यो होतेन्द्रं पूजयतु। कीदृशमिन्द्रम्, ईडितं नानाविधैर्मन्त्रैः स्तुतम्, आजुह्वानं सर्वेषु यज्ञेषु होमभाजमाह्वानभाजं वा, अमर्त्यं मरणरहितम्। स चेन्द्रो देवो देवैः सह सवीर्यो बहुसामर्थ्ययुक्तः शत्रूनभिभवितुं वज्रहस्त आसुरीं पुरीं दारयति विनाशयतीति पुरंदरः। तथाविधेन्द्रस्य प्रीतये पूर्वोक्तो वह्निराज्यं पिबतु। हे मानुष होतर्याज्यां पठ।

[अथ] चतुर्थमन्त्रमाह-

होता यक्षद्बर्हिषीन्द्रं निषद्वरम्। वृषभं नर्यापसम्। वसुभी रुद्रैरादित्यैः। सयुग्भिर्बर्हिरासदत् (२)। वेत्वाज्यस्य होतर्यज, इति।

बर्हिःशब्दश्चतुर्थप्रयाजदेवतारूपमग्निमाचष्टे। तस्मिन्बर्हिषि पूजिते सति तद्द्वारेणेन्द्रं दैव्यो होता पूजयतु। कीदृशमिन्द्रं निषद्वरं नितरां यज्ञे सीदन्त्युपविशन्तीति निषदा (दो) देवास्तेषां श्रेष्ठम् वृषभं कामानां वर्षयितारम्, नरेभ्यो हितं नर्यं तथाविधं कर्म यस्यासौ नर्यापास्तथाविधम्। स चेन्द्रो वस्वादिभिः सयुग्भिः स्वेन सह वर्तमानैर्युक्तो बर्हिरासदद्यज्ञं प्राप्नोतु। वेत्वित्यादि पूर्ववत्।

अथ पञ्चममन्त्रमाह -

होता यक्षदोजो न वीर्यम्। सहो द्वार इन्द्रमवर्धयन्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुप्रायणा विश्रयन्तामृतावृधः। द्वारइन्द्राय मीढुषे ।
वियन्त्वाज्यस्य होतर्यज इति ।

द्वारशब्दः पञ्चमप्रयाजदेवतारूपमग्निमाह । पूजार्थं बहुवचनम् । तमग्निं दैव्यो होता पूजयतु । ताश्च द्वारशब्दाभिधेया देवता इन्द्रं वर्धयन्तु । ओज आदयो दृष्टान्ताः । यथाऽष्टमधातोरोजसो वीर्यस्य चक्षुरादीन्द्रियसामर्थ्यस्य च सहसः शरीरबलस्य च वृद्धिस्तथेन्द्रस्याभिवृद्धिरित्यर्थः । ताश्च द्वारदेवताः सुप्रायणाः शोभनगतय ऋतावृधो यज्ञस्य वर्धयित्र्यतथाविधा विश्रयन्तां विशेषेण यज्ञमाश्रयन्तु । मीढुषे वृष्ट्यादिना सेचकायेन्द्रायेन्द्रार्थं द्वारो देवता वियन्तु पिबन्तु ।

[अथ] षष्ठमन्त्रमाह -

होता यक्षदुषे इन्द्रस्य धेनू । सुदुघे मातरौ मही । सवातरौ न तेजसी । वत्समिन्द्रमवर्धताम् (३) । वीतामाज्यस्य होतर्यज, इति ।

उषाशब्दः षष्ठप्रयाजाग्निमूर्तिद्वयमाह । तादृश्यावुषे द्वे दैव्यो होता पूजयतु । कीदृश्यावुषे, इन्द्रस्य धेनू धेनुवत्प्रीणयित्र्यै सुदुघे सुखेन दोग्धुं शक्ये, मातरौ पयःदानेन मातृसदृश्यौ, मही महत्यौ पूज्ये वा । वातृशब्दो गमनस्वभावं वत्समाचष्टे । समानो वातो ययोस्ते सवातरौ । नकार उपमार्थः । इन्द्रस्य वत्सस्थानीयत्वादेकवत्से इव ते उभे वर्तेते। तेजसी तेजस्विन्यौ, तादृश्यौ मूर्ती वत्सस्थानीयमिन्द्रमवर्धतां वृद्धिं प्रापयताम् । ते मूर्ती आज्यं वीतां पिबताम् ।

[अथ] सप्तममन्त्रमाह -

होता यक्षद्दैव्या होतारा । भिषजा सखाया । हविषेन्द्रं भिषज्यतः । कवी देवौ प्रचेतसौ । इन्द्राय धत्त इन्द्रियम् । वीतामाज्यस्य होतर्यज, इति ।

दैव्यहोतृशब्देन सप्तमप्रयाजदेवतारूपस्याग्निर्द्वौ देहावुच्येते । तावुभौ होता पूजयतु । कीदृशौ, भिषजावनिष्टव्याधिचिकित्सकौ सखाया परस्परं स्निग्धौ, तावुभावनेन हविषा तमिन्द्रं भिषज्यतोऽनिष्टपरिहारेण चिकित्सां कुरुतः । तावुभौ कवी विद्वांसौ, देवौ द्योतमानौ, प्रचेतसौ प्रकृष्टज्ञानौ, ताविन्द्रार्थमिन्द्रियं धत्तः शक्तिं पोषयतः। तावुभावाज्यं वीतां पिबताम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अ [था] ष्टममन्त्रमाह -

होता यक्षत्तिस्रो देवीः । त्रयस्त्रिधातवोऽपसः । इडा सरस्वती भारती (४) । महीन्द्रपत्नीर्हविष्मतीः । वियन्त्वाज्यस्य होतर्यज, इति ।

अष्टमप्रयाजदेवतारूपस्याग्नेस्त्रिमूर्तयस्तिस्रस्ताः पूजयतु । कीदृश्यस्ता देवी द्योतनात्मिका अपसः कर्मनिमित्तं त्रिधातवस्त्रीणि शरीराणि धारयित्र्य, अत एव त्रयस्त्रिलोकात्मिकाः । इडादीनि तासां नामधेयानि, ताश्च मही महत्यः पूज्या इन्द्रपत्नीरिन्द्रस्य पालयित्र्यः, हविष्मतरस्मद्दत्तेन हविषा युक्ताः । तादृश्य एता आज्यं वियन्तु पिबन्तु ।

अथ नवममन्त्रमाह -

होता यक्षत्वष्टारमिन्द्रं देवम् । भिषज ँ सुयजं घृतश्रियम् । पुरुरूप ँ सुरेतसं मघोनिम् । इन्द्राय त्वष्टा दधदिन्द्रियाणि । वेत्वाज्यस्य होतर्यज, इति ।

त्वष्टृशब्देन नवमप्रयाजदेवतारूपोऽग्निरुच्यते, तं होता पूजयतु तद्द्वारेणेन्द्रं पूजयतु । कीदृशमिन्द्रं देवं द्योतनात्मकं भिषजमनिष्टच्चाधिचिकित्सकं सुयजं सुखेन यष्टुं शक्यं घृतश्रियं घृतसेविनं पुरुरूपं तत्तद्यजमानगृहागमनाय बहुरूपधारिणं सुरेतसं शोभनापत्ययुक्तं मघोनिमन्नवन्तम् । ईदृशायेन्द्राय स त्वष्टेन्द्रियाणि क्रियासामर्थ्याणि दधत्पोषयतु । आज्यं वेतु पिबतु ।

[अथ] दशममन्त्रमाह -

होता यक्षद्वनस्पतिम् । शमितार ँ शतक्रतुम् । धियो जोष्टारमिन्द्रियम् (५) । मध्वा समञ्जन्पथिभिः सुगेभिः स्वदाति हव्यं मधुना घृतेन । वेत्वाज्यस्य होतर्यज, इति ।

वनस्पतिशब्देन दशमप्रयाजदेवतारूपोऽग्निरुच्यते । तं होता यक्षत्तद्द्वारेणेन्द्रं पूजयतु । कीदृशमिन्द्रं शमितारं सर्वानिष्टशमनहेतुं शतक्रतुं शतसंख्याकाश्वमेधयुतं धियो जोष्टारं बुद्धेः सेवितारमुपासकानां बुद्ध्या ध्यातव्यमित्यर्थः । इन्द्रियं सामर्थ्योपेतम् । तादृश इन्द्रः सुगभिः पथिभिः सुखेन गन्तुं शक्यैर्मार्गैरागत्य मध्वामधुरद्रव्येण समञ्जन्हवींषि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्निग्धीकुर्वन्वर्तते । स च मधुना मधुरेण घृतेन हव्यं स्वदाति स्वादू करोति । तथाविधेन्द्रप्रीत्यर्थं वनस्पतिदेव आज्यं पिबतु ।

ए (अथै) कादशमन्त्रमाह –

होता यक्षदिन्द्रँ स्वाहाऽऽज्यस्य । स्वाहा मेदसः। स्वाहा स्तोकानाम् । स्वाहा स्वाहाकृतीनाम् । स्वाहा हव्यसूक्तीनाम् । स्वाहा देवाँ आज्यपान्। स्वाहेन्द्रँ होत्राज्जुषाणाः इन्द्र आज्यस्य वियन्तु। होतर्यज (६), इति।

तेजसा सददवर्धतां भारतीन्द्रियं जुषाणा द्वे च । समिधेन्द्रं तनूनपातमिडाभिर्बर्हिष्योजे उषे दैव्या । तिस्रस्त्वष्टारं वनस्पतिमिन्द्रम् ।। २ ।। समिधेन्द्रं चतुर्वेत्वेको वियन्तु द्विर्वीतामेको वियन्तु द्विर्वेत्वेको वियन्तु होतर्यज ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

षष्ठाध्याये सप्तमोऽनुवाकः ।। ७ ।।

उक्तेषु सर्वेषु प्रयाजेष्वनुगतमिन्द्रं होता यक्षद्यजतु पूजयतु । तदिन्द्रस्य प्रीत्यर्थमाज्यस्य स्वाहुतिरस्तु । मेदसो द्रव्यस्य स्वाहुतिरस्तु । स्तोकानां विदू (न्दू)नां स्वाहुतिरस्तु । स्वाहाकृतीनां स्वाहाकारेण दीयमानानां सर्वाहुतिद्रव्याणां स्वाहुतिरस्तु । हव्यसूक्तीनां हवि स्तावकमन्त्राभिमानिदेवतानामर्थे स्वाहुतिरस्तु । ये त्वाज्यं पिबन्तो देवास्तान्सर्वानुद्दिश्य स्वाहुतिरस्तु । होत्राद्धोमनिमित्तभूतादिन्द्रं जुषाणाः सेवमाना ये देवास्तेषां स्वाहुतिरस्तु । अयमिन्द्रोऽन्ये च सर्वे देवा आज्यं पिबन्तु । हे मानुष होतस्तदर्थं याज्यां पठ ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

षष्ठप्रपाठके सप्तमोऽनुवाकः ।। ७ ।।

अथ षष्ठेऽष्टमोऽनुवाकः ।

सप्तमे प्रयाजानां मैत्रावरुणप्रैषा एकादशाभिहिताः । अष्टमे तेषामेव प्रयाजानामेकादश पुरोरुचोऽभिधीयन्ते । तत्र प्रथमामृचमाह –

समिद्ध इन्द्र उषसामनीके । पुरोरुचा पूर्वकृद्वावृधानः । त्रिभिर्देवैस्त्रिँ शता वज्रबाहुः । जघान वृत्रं वि दुरो ववार, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समिन्नामको योऽयं प्रथमप्रयाजदेवोऽग्निः स एवायमिन्द्रस्वरूपः, स चोषसां प्रातःकालानामनीके मुखे वर्तते । किं कुर्वन्, पुरः पूर्वस्यां दिशि रोचत इति पुरोरुगाहवनीयस्तेन पूर्वकृत्पूर्वाणि कर्माण्यग्निहोत्रादीनि कुर्वन् । वावृधानोऽतिशयेन वर्धमानः । स च त्रिसंख्याकैस्त्रिंशत्संख्याकैश्च हविर्भाग्भिर्देवैःसहितो वज्रबाहुः सन्वृत्रं वैरिणं जघान हतवान् । दुरः स्वर्गस्य द्वाराणि विववार विवृत्तानि चकार ।

[अथ] द्वितीयामाह –

नराशꣳसः प्रति शूरो मिमानः । तनूनपात्प्रति यज्ञस्य धाम । गोभिर्वपावान्मधुना समञ्जन् । हिरण्यैश्चन्द्री यजति प्रचेताः , इति ।

तनूनपात्संज्ञको द्वितीयप्रयाजदेवः । स च नराशंस ऋत्विग्भिर्नरैरा समन्ताच्छंसनीयो युद्धेषु शूरः सन्प्रतिमिमानो वैरिणां बलमियत्तया परिच्छिन्दन्वर्तते ।तथा यज्ञस्य धाम फलभूतं स्थानं मतिमिमानो वर्तते । तथा गोभिः स्वकीयै रश्मिभिर्वपावाञ्शरीरपुष्टिमान्वर्तते । तथा मधुना मधुरेण घृतेन समञ्जन्पुरोडाशादिहवींषि श्लक्ष्णीकुर्वन्वर्तते । तथा भक्तेभ्यो दीयमानैर्हिरण्यैश्चन्द्र्याह्लादक (का)री सन्प्रचेताः प्रकृष्टज्ञानयुक्तो यजति देवान्पूजयति ।

[अथ] तृतीयामाह –

ईडितो देवैर्हरिवाꣳ अभिष्टिः । आजुह्वानो हविषा शर्धमानः (१) पुरंदरो मघवान्वज्रबाहुः । आयातु यज्ञमुप नो जुषाणः, इति ।

ईडितशब्देन तृतीयप्रयाजदेव उच्यते । स च देवैरीडितः स्तुत इन्द्राभिन्नत्वात् । हरिवान्हरिशब्दाभिधेयाभ्यामश्वाभ्यां युक्तः । अभिष्टिरभितः क्रियमाणेष्टिर्यागो यस्य सोऽयमभिष्टिर्यागनिष्पादक इत्यर्थः । आजुह्वानः संग्रामे प्रतिभटानामाह्वानकारी । हविषा शर्धमानोऽस्माभिर्हुतेनाधिकं बलं प्राप्नुवन् । वैरिणां पुराणि दारयतीति पुरंदरः । मघवान्धनवान् । वज्रबाहुरिन्द्ररूपेण वज्रस्य धारयिता । तादृशोऽयं-जुषाणः प्रीयमाणो नोऽस्माकं यज्ञमुपयातु समीप एवाऽऽगच्छतु ।

[अथ] चतुर्थीमाह –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जुषाणो बर्हिर्हरिवान्न इन्द्रः । प्राचीनꣳ सीदत्प्रदिशा पृथिव्याः । उरुव्यचा प्रथमानꣳ स्योनम् । आदित्यैरक्तं वसुभिः । सजोषाः, इति ।

बर्हिर्नामकच(श्च)तुर्थप्रयाजदेवः। स चेन्द्रस्वरूपः । हरिवानश्वयुक्तो जुषाणःप्रीतियुक्तः सन्पृथिव्याः संबन्धिन्या प्रदिश प्रकृष्टया पूर्वया दिशायुक्तं प्राचीनमाहवनीयस्थानं सीदत्प्राप्नोतु । उरुव्यचा अत्यन्तं व्याप्तः सन्प्रथमानं विस्तृतं स्योनं सुखकरं हविः प्राप्नोतीति शेषः । कीदृशः स आदित्यैर्वसुभिश्च सजोषाः समानप्रीतिः । कीदृशं हविरक्तं श्लक्ष्णम् ।

[अथ] पञ्चमीमाह –

इन्द्रं दुरः कवष्यो धावमानाः । वृषाणं यन्तु जनयः सुपत्नीः। द्वारो देवीरभितो विश्रयन्ताम् । सुवीरा वीरं प्रथमाना महोभिः (२), इति ।

द्वारशब्दाभिधेया देव्यः पञ्चमप्रयाजदेवस्य स्त्रीमूर्तयस्ताश्चेन्द्रमभितो विश्रयन्तां विशेषेण सेवन्ताम् । कीदृश्यो द्वारः । दुरश्छिद्रभूयिष्ठा महावकाशा इत्यर्थः । कवष्यः कवाटवत्यः, धावमानाः प्रवेशनिर्गमनरूपगतिमत्यः शुद्धमत्यो वा, जनयो यज्ञानां जनयित्र्यः, सुपत्नीः सुष्ठु पालयित्र्यः, तादृश्यो देव्यो वृषाणां कामानां वर्षयितारं यन्तु प्राप्नुवन्तु । पुनरपि कीदृश्यः । सुवीराः शोभनवीरपुरुषाधिष्ठिताः, महोभिः कीर्तिभिः प्रथमाना लोकेषु प्रख्याताः । कीदृशमिन्द्रं वीरं युद्धेषु शूरम् ।

अथ षष्ठीमाह –

उषासा नक्ता बृहती बृहन्तम् । पयस्वती सुदुघे शूरमिन्द्रम् । पेशस्वती तन्तुना संव्ययन्ती । देवानां देवं यजतः सुरुक्मे, इति ।

उषःशब्देन नक्तशब्देन चाभिधेये षष्ठप्रयाजदेवस्य द्वे मूर्ती । ते उभे इन्द्र यजतः पूजयतः । कीदृश्यौ । महती महत्यौ, पयस्वती क्षीरवत्यौ, सुदुघे सुखेन दोग्धुं शक्ये, पेशस्वती रूपवत्यौ, तन्तुनासंव्ययन्ती वस्त्रेणैवालंकुर्वाणे, सुरुक्मे शोभनाभरणे कीदृशमिन्द्रं बृहन्तं महान्तं तथा युद्धेषु शूरं देवानामपि देवं स्वामिनम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[अथ] सप्तमीमाह -

दैव्या मिमाना मनसापुरुत्रा । होताराविन्द्रं प्रथमा सुवाचा । मूर्धन्यज्ञस्य मधुना दधाना । प्राचीनं ज्योतिर्हविषा वृधातः, इति ।

दैव्या होताराविति सप्तप्रयाजदेवस्य द्वौ पुरुषदेहावुच्येते । तावुभाविन्द्रं हविषा वृधातो वर्धयतः । कीदृशौ तौ । पुरुत्रा बहुषु स्थानेषु मनसा मिमाना स्वचित्तेनोत्पादयन्तौ श्रद्धया ध्यायन्तावित्यर्थः । प्रथमा मुख्यभूतौ सुवाचा शोभनवाक्यौ कल्याणस्तुतियुक्तौ । यज्ञस्य मूर्धन्मूर्धस्थानीय आहवनीये प्राचीनं ज्योतिर्दधानोत्तमां ज्वालामुत्पादयन्तौ । कीदृशेन हविषा मधुना मधुरेण ।

अ [था]ष्टमीमाह -

तिस्रो देवीर्हविषा वर्धमानाः । इन्द्रं जुषाणा वृषणं न पत्नीः (३)। अच्छिन्नं तन्तुं पयसा सरस्वती । इडा देवी भारती विश्वमूर्तिः (?), इति ।

सरस्वतीडा भारती चेत्यष्टमप्रयाजदेवस्य तिस्रो मूर्तयः। ताश्च देवीर्हविषा वर्धमानाः सत्य इन्द्रं जुषाणाः सेवमाना वर्तन्ते । तत्र दृष्टान्तः-वृषणं न पत्नीर्यथा पत्न्यः सेक्तारं सेवन्ते तद्वत् । कीदृशमिन्द्रम् । अच्छिन्नं तन्तुमविच्छिन्नं पुत्रपौत्रादिसंघं तन्वानम् । कीदृशेन हविषा पयसा क्षीरसदृशेन । कीदृशी भारती देवी द्योतमाना विश्वमूर्तिः स्वेच्छागृहीतबहुशरीरयुक्ता ।

[अथ] नवमीमाह -

त्वष्टा दधदिन्द्राय शुष्मम् । अपाकोऽचिष्टर्यशसे पुरूणि । वृषा यजन्वृषणं भूरिरेताः । मूर्धन्यज्ञस्य समनक्तु देवान्, इति ।

नवमप्रयाजदेवस्त्वदृष्टशब्देनोच्यते । सोऽयमिन्द्रार्थं शुष्मं बलं दधत्संपादयतु । कीदृशस्त्वष्टा । अपाको बालो न भवतीत्यर्थः । यशसे यशसोऽर्थं (र्थे) पुरूणि बहूनि कार्याण्यचिष्टुरवैषीत्संपादितवानित्यर्थः । स्वयं वृषा संचनसमर्थो भूरिरेता बह्वपत्यबीजयुक्तो वृषणं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सेचनसमर्थमिन्द्रं यजन्पूजयतु । यज्ञस्य मूर्धन्नाहवनीये देवान्समनक्तु सम्यग्घविः प्रापयतु ।

[अथ] दशमीमाह -

वनस्पतिरवसृष्टो न पाशैः । त्मन्या समञ्जञ्छमिता न देवः । इन्द्रस्य हव्यैर्जठरं पृणानः । स्वदाति हव्यं मधुना घृतेन, इति ।

दशमप्रयाजदेवो वनस्पतिः। स च मधुना मधुरेण घृतेन हव्यं स्वदाति स्वादू करोति । तत्र दृष्टान्तः-पाशैरवसृष्टो न यथा कारागृहे बद्धः पुरुषः पाशैर्मुक्तः सन्स्वगृहे गत्वा विस्रम्भेण व्यापारं करोति तद्वत् । किं कुर्वन् । त्मन्या समञ्जन्नात्मनैव सम्यग्गच्छन्स्वतन्त्रः सन्नित्यर्थः दृष्टान्तः शमिता न देवो यथा पशोर्विशनकर्ता विशसने स्वतन्त्रस्तद्वत् । पुनः किं कुर्वन्, हव्यैरिन्द्रस्य जठरमुदरं पृणानः पूरयन् ।

ए (अथै)कादशीमाह -

स्तोकानामिन्दुं प्रति शूर इन्द्रः । वृषायमाणो वृषभस्तुराषाट् । घृतप्रुषा मधुना हव्यमुन्दन् । मूर्धन्यज्ञस्य जुषता स्वाहा (४), इति ।

शर्धमानो, महोभिः पत्नीर्वृतेन चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके षष्ठाध्यायेऽष्टमोऽनुवाकः ।। ८ ।।

इन्द्रशब्दः सर्वप्रयाजसाधारणदेवतावाची । सोऽयमिन्द्रो यज्ञस्य मूर्धन्नाहवनीये स्वाहा हुतं हविर्जुषताम् । कीदृश इन्द्रः । स्तोकानामिन्द्रं प्रति शूरः स्तोकानां हविर्लेशानां मध्ये योऽयमिन्दुरतिस्वल्पोंऽशस्तं प्रति शूर आदरवानल्पमपि हविर्भागं नावजानातीत्यर्थः । वृषायमाणो वृषवदाचरन् । यथा वृषो गोषु बहून्वत्सानुपसादयति तद्वदयं बहुप्रजोत्पादक इत्यर्थः । वृषभः कामानां वर्षयिता । तुराषाट्, तूर्णं सहते शत्रूनभिभवतीत्यर्थः । किं कुर्वन्, घृतप्रुषा घृतसंगतेन मधुना मधुरेण रसेन हव्यमुन्दन्पुरोडाशादिरूपं हविर्द्रवीकुर्वन् । ता एताः पुरोरुगाख्या एकादशसंख्याका ऋचः प्रयाजानां याज्या आप्रिय इति चोच्यन्ते । हविष्प्रक्षेपात्पूर्वपाठत्वात्पुरोरुचः । ई (इ)ज्यन्ते प्रयाजा आभिरिति याज्याः । देवताः सर्वतः प्रीणयन्तीत्याप्रियः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये
षष्ठप्रपाठकेऽष्टमोऽनुवाकः ।। ८ ।।

अथ षष्ठे नवमोऽनुवाकः ।

अष्टमे प्रयाजयाज्या अभिहिताः । अथ नवम ऐन्द्रस्य पशोर्वपापुरोडाशहविषां द्वे द्वे याज्यापुरोनुवाक्ये क्रमेणोच्येते । तत्र वपामन्त्रयोः प्रतीकं दर्शयति-

आर्चर्षणि प्रा विवेष यन्मा,' इति ।

"आचर्षणि प्रा वृषभो जनानाम्" इति पुरोनुवाक्या । सा च "जुष्टी नरः" इत्यत्र व्याख्याता । "विवेष यन्मा धिषणा" इति याज्या । सा च "इन्द्रं वो विश्वतस्परि" इत्यत्र व्याख्याता ।

अथ पुरोडाशे पुरोनुवाक्यायाः प्रतीकं दर्शयति -

त ँसध्रीचीः, इति ।

तं सध्रीचीरूतयो वृष्णियानीत्येषा "वृषासो अंशुः" इत्यत्र व्याख्याता । अथ तत्रैव याज्यामाह -

सत्यमित्तन्न त्वावा ँ अन्यो अस्ति । इन्द्र देवो न मर्त्यो ज्यायान् । अहन्नहिं परिशयानमर्णः । अवासृजोऽपो अच्छा समुद्रम्, इति ।

हे इन्द्र तन्मयोच्यमानं वचः सत्यमित्सत्यमेव । कीदृशं वच इति तदुच्यते-अन्यः कश्चिद्देवो मर्त्यो वा त्वावांस्त्वत्सदृशो नास्ति । ज्यायानधिको नास्ति । अर्ण उदकमुद्दिश्य त्वं परिशयानं परितो व्याप्य वर्तमानमहिं मेघमहतवानसि मेघं भित्वा जलं वर्षयसीत्यर्थः । ततः समुद्रमच्छा समुद्राभिमुख्येनापो जलान्यवासृजोऽवाङ्मुखत्वेन सृष्टवानसि ।

अथ हविषः पुरोनुवाक्यामाह -

प्रससाहिषे पुरुहूत ँशत्रून् । ज्येष्ठस्ते शुष्म इह रातिरस्तु । इन्द्राऽऽभर दक्षिणेना वसूनि । पतिः सिन्धूनामसि रेवतीनाम्, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हे पुरुहूत बहुषु यज्ञेष्वाहूयमानेन्द्र शत्रून्प्रकर्षेण ससाहिषेऽभिभूतवानसि । ते शुष्मो बलं ज्येष्ठोऽत्यन्तप्रवृद्धः । इहास्मिन्कर्मणि रातिस्त्वदीयं धनमस्तु । हे इन्द्र दक्षिणेन हस्तेन वसूनि धनान्याभर । त्वं तु रेवतीनां धनयुक्तानां संपदां सिन्धूनां रत्नाधाराणां समुद्राणां पतिः पालकोऽसि ।

तत्रैव याज्यामाह -

स शेवृधमधिधा द्युम्नमस्मे । महि क्षत्रं जनाषाडिन्द्र तव्यम् । रक्षा च नो मघोनः पाहि सूरीन् । राये च नः स्वपत्या इषे धाः (१), इति ।

रेवतीनां चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके षष्ठाध्याये नवमोऽनुवाकः ।। ९ ।।

हे इन्द्र स त्वं शेवृधं सुखवर्धकं धनमस्मे अस्मास्वधिधा अधिकं संपादय । जनाषाडिवरोधिजनानामभिभवि तव्यं त्वदीयं क्षत्रं बलं महि संपादय । जनाषाड्विरोधिजनानामभिभवितव्यं त्वदीयं क्षत्रं बलं महि महन्नोऽस्मान्मघोनो धनवतः कृत्वा रक्ष । तथा सूरीन्विदुषश्च कृत्वा पाहि । नोऽस्मान्राये धनाय स्वपत्यै शोभनापत्यत्वायेषेऽन्नाय च धा धारयास्मभ्यं धनादीन्देहीत्यर्थः ।

अथ विनियोगसंग्रह--

ऐन्द्रे पशौ वपायां द्वे ऋचौ याज्यानुवाक्यके।
आचर्षणि विवेषेति पुरोडाशे पुनर्द्वयम् ।।
तं सध्रीचीः सत्यमिद्ध हविषस्तु तथा द्वयम् ।
प्रससाहि स शे मन्त्रा अनुवाके षडीरिताः ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये षष्ठप्रपाठके नवमोऽनुवाकः ।। ९ ।।

अथ षष्ठे दशमोऽनुवाकः ।

नवमे वपादीनां याज्यानुवाक्या उक्ताः । दशमेऽनूयाजानामेकादश मैत्रावरुणप्रैषा उच्यन्ते । तत्र प्रथममन्त्रमाह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवं बर्हिरिन्द्र सुदेवं देवैः । वीरवत्स्तीर्णं वेद्यामवर्धयत् । वस्तोर्वृतं प्राक्तोर्भृतम् । राया बर्हिष्मतोऽत्यगात् । वसुवने वसुधेयस्य वेतु यज, इति ।

बर्हिःशब्देन दर्भाभिमानिप्रथमानुयाजदेवतास्वरूपमुच्यते । तद्बर्हिरिन्द्रं देवमवर्धयत् । कीदृशं बर्हिः। सुदेवं शोभना देवता यस्य तत्सुदेवं सर्वे देवा बर्हिषि सीदन्ति । तथा देवैर्देवसदृशैर्त्विग्भिर्वेद्यां स्तीर्णं प्रसारितम् । तथा वीरः कर्मशूरो यजमानोऽस्यास्तीति वीरवत् । वस्तोरक्तोरित्येतदव्ययद्वयमहोरात्रवाचकम् । इदं बर्हिर्वस्तोरहनि वृतं संपादितम् । अक्तो रात्रौ प्रभृतं प्रकर्षेणोन्नतदेशे स्थापितम् । तादृशीं बर्ही रावा धनेन बर्हिष्मतो बर्हिर्युक्तानन्यान्यागानत्यगादतीत्य गत तरयागेभ्योऽधिकं धनं प्रयच्छतीत्यर्थः । वसुधेयस्य वसु धनमेव धेयं संपादनीयं यस्य कुबेरादेः सोऽयं वसुधेयस्तस्य वसुवने धनदाननिमित्तं तदीयं धनमस्मभ्यं दातुमित्यर्थः । वेतु बर्हिर्देव आज्यं पिबतु । तदर्थं हे होतर्यज याज्यां पठ ।

अथ द्वितीयमन्त्रमाह-

देवीर्द्वार इन्द्र संघाते । विड्वीर्यामन्नवर्धयन् । आ वत्सेन वरुणेन कुमारेण च मीविता अपार्वाणम् । रेणुकंकाटं नुदन्ताम् । वसुवने वसुधेयस्य वियन्तु यज (१), इति ।

द्वारशब्दाभिधेयाः स्त्रीमूर्तयो द्वितीयानुयाजदेवतास्ता देव्य इन्द्रमवर्धयन् । कीदृश्यः । संघाते विड्वीर्यद्वाराभिमा नित्वात्कवाटद्वयमेलने दृढशक्तयः कुत्र वीर्धतवत्यो याममन्नियमरूपयागे । वत्सोऽत्यन्तबालस्तरुणो युवा तयोर्मध्ये वर्तमानः । कुमारःचकारस्तेषां समुच्चये । आकारः कार्त्स्न्यवाची, सर्वैरपत्यैः सहितमिन्द्रमित्यर्थः । किंचैता द्वार्देवता मीविता बलाधिक्येन स्थौल्यमापन्नाः सत्यो रेणुककाटमपनुदन्ताम् । कट्यां भवं काटं लिङ्गं रेणुकं रमणशीलं काटं यस्य राक्षसादेस्तं स्वैरचारिणं निराकुर्वन्तु । दृष्टान्तार्थोऽर्वञ्श(श)ब्दः । दुर्दान्ताश्वो यथा विषयव्यसनेन यत्र क्वापि वडवामारोहति तादृशमित्यर्थः । ता देव्यो वियन्त्वाज्यं पिबन्तु । वसुवन इत्यादि पूर्ववत् ।

अथ तृतीयमन्त्रमाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवी उषासा नक्ता । इन्द्रं यज्ञे प्रयत्यह्वेताम् । दैवीर्विशः प्रायासिष्टाम् । सुप्रीते सुधिते अभूताम् । वसुवने वसुधेयस्य वीतां यज, इति ।

उषासानक्तशब्दवाच्ये अहोरात्राभिमानिन्यौ तृतीयानुयाजदेव्यौ । ते उभे प्रयति प्रकर्षेण गच्छति वर्तमाने यज्ञ इन्द्रमह्वेतामिन्द्रस्याऽऽह्वानमकुरुताम् । दैवीर्विशो देवसंबन्धिनीः प्रजाः प्रायासिष्टां प्रकर्षेण प्रापितवत्यौ । स्वयं च सुप्रीते अत्यन्ततुष्टे सुधिते सुखप्राप्तियुक्ते अभूताम् । सुप्रीतसुधितशब्दौ सुखप्राप्तिवाचकौ । तादृशौ देव्यौ वीतां पिबताम् ।

अथ चतुर्थमन्त्रमाह -

देवी जोष्ट्री वसुधिती । देवमिन्द्रमवर्धताम् । अयाव्यन्याऽघा द्वेषाँ सि । आऽन्याऽवाक्षीद्वसु वार्याणि । यजमानाय शिक्षिते (२) । वसुवने वसुधेयस्य वीतां यज, इति ।

यथा तृतीयानुयाजदेवस्योषासानक्तशब्दवाच्ये द्वे स्त्रीमूर्ती तथा चतुर्थानुयाजदेवस्य जोष्ट्रीशब्दवाच्ये द्वे स्त्रीमूर्ती । ते च वसुधिती सुखप्राप्तियुक्ते । तादृश्यावुभे इन्द्रं देवमवर्धतां वर्धितवत्यौ । तयोरुभयोर्मध्येऽन्या काचिद्देव्यघा द्वेषांसि द्वेष्याणि पापान्ययाव्यस्मत्तः पृथक्कृतवती । अन्येतरा देवता वार्याणि वसु वरणीयानि धनान्य (न्या) वाक्षीत्सर्वतः प्रापितवती । किमर्थं यजमानाय । कीदृश्यौ देव्यौ शिक्षिते कुशले ।

अथ पञ्चममन्त्रमाह -

देवी ऊर्जाहुती दुघे सुदुघे । पयसेन्द्रमवर्धताम् । इषमूर्जमन्याऽवाक्षीत् । सग्धिँ सपीतिमन्या । नवेन पूर्वं दयमाने । पुराणेन नवम् । अधातामूर्जमूर्जाहुती वसु वार्याणि । यजमानाय शिक्षिते । वसुवने वसुधेयस्य वीतां यज (३), इति ।

ऊर्जाहुतिशब्दवाच्ये पञ्चमानुयाजदेवतेस्त्रीमूर्ती । ते च दुघे

CC-0. Shri Vipin Kumar Col. Deoband: In Public Domain.

Digitized by Madhuban Trust, Delhi

अपेक्षितस्य फलस्य दोहयित्र्यौ, सुदुधे सुष्ठु दोग्धुं शक्ये, तादृश्यावुभे पयसा क्षीरविकारेण हविषेन्द्रमवर्धता वर्धितवत्यौ । तयोरन्या काचिदिषमन्नमूर्जं रसं चावाक्षीत्प्रापितवती । इतरातु सग्धिं सहभोजनं सपीतिं सहपानं चोभयोः प्रापितवती । ते चोभे नवेनेदानीं क्रियमाणेन हविषा पुरा कदाचिदनुष्ठितं हविर्दयमाने रक्षयित्र्यौ पुराणेन च हविषा नवं हविः पालयन्त्यौ हविर्द्वये नात्यन्ततुष्टे इत्यर्थः । ते चोर्जाहुती देव्यावूर्जं क्षीरादिरसमधातां संपादितवत्यौ । शेषं पूर्ववत् ।

अथ षष्ठमन्त्रमाह -

दे॒वा दैव्या॒ होता॑रा दे॒वमिन्द्र॑मवर्धताम् । ह॒ताघ॑ शं॑सा॒वाभा॑र्ष्टां॒ वसु॒ वार्या॑णि । यज॑मानाय शिक्षि॒तौ । व॒सु॒वने॑ वसु॒धेय॑स्य वीतां यज॑, इति ।

दैव्याहोतृशब्दवाच्यौ षष्ठानुयाजदेवस्य द्वौ देहौ । तथाविधौ देवाविन्द्रं देवमवर्धतां वर्धितवन्तौ । कीदृशौ देवौ । हताघशंसावघमस्मद्विषयं द्रोहं शंसतीत्यघशंसो वैरी । स च हतो याभ्यां तौ हताघशंसौ । तादृशौ देवौ यजमानार्थं वरणीयानि वसून्याभार्ष्टामाहृतवन्तौ। शिक्षितौ कुशलौ ।

अथ सप्तममन्त्रमाह -

दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीः । प॒तिमिन्द्र॑मवर्धयन् । अस्पृ॑क्ष॒द्भार॑ती॒ दिव॑म् । रु॒द्रैर्य॒ज्ञं॑ सर॑स्वती । इडा वसु॑मती गृ॒हान् (४) । व॒सु॒वने॑ वसु॒धेय॑स्य वियन्तु॒ यज॑, इ॒ति ।

इडा सरस्वती भारतीत्येतास्तिस्रो देव्यः सप्तमानुयाजदेवताः। परस्परवियोगः कदाचिदपि नास्तीति विवक्षया पुनरपि तिस्रो देवीरित्युक्तम् । तास्तिस्रः पतिं पालकमिन्द्रमवर्धयन्वर्धितवत्यः । तासां मध्ये भारती देवी दिवं द्युलोकमस्पृक्षत्स्पृष्टवती द्युलोके वर्तत इत्यर्थः । सरस्वती देवीरुद्रैर्देवैः सहिता यज्ञमस्पृक्षदपालयदित्यर्थः। इडा देवी वसुमती धनयुक्ता भूत्वा, गृहानस्पृक्षदपाहयत् । तास्तिस्रो देव्यो वियन्तु पिबन्तु ।

अथाष्टममन्त्रमाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देव इन्द्रो नराशꣳसः । त्रिवरुथस्त्रिवन्धुरः । देव मिन्द्रमवर्धयत् । शतेन शितिपृष्ठानामाहितः । सहस्रेण प्रवर्तते । मित्रावरुणेदस्य होत्रमर्हतः । बृहस्पतिः स्तोत्रम् । अश्विनाऽऽध्वर्यवम् । वसुवने वसुधेयस्य वेतु यज (५), इति ।

नराशंसशब्देनाष्टमानुयाजदेव उच्यते । स च परमैश्वर्ययोगादिन्द्रः । स च त्रिवरूथस्त्रिविधसेनायुक्तः। त्रिबन्धुरस्त्रिविधोन्नतावनतभावयुक्तः । समीपवर्तिनी काचित्सेनाऽत्युन्नता, ततो बहिर्भूता मध्यमा काचिदानता ततोऽपि बहिर्भूताऽधमाऽत्यन्तमानता । तादृशो देवः प्रसिद्धमिन्द्रं देवं वर्धितवान् । स च नराशंसः शितिपृष्ठानां श्वेतपृष्ठानां गवां शतेन सहस्रेण चाऽऽहितः सर्वतो व्याप्तः प्रवर्तते । मित्रावरुणे मित्रावरुणावेवास्य नराशंसस्य होत्रं होतृत्वमर्हतः । बृहस्पतिः स्तोत्रं स्तोतृत्वमुद्गातृत्वमर्हति । अश्विनौ चाऽध्वर्यवमध्वर्युत्वमर्हतः ।

अथ नवममन्त्रमाह –

देव इन्द्रो वनस्पतिः । हिरण्यपर्णो मधुशाखः सुपिप्पलः । देवमिन्द्रमवर्धयत् । दिवमग्रेणाऽऽप्रात् आऽन्तरिक्षं पृथिवीमदृꣳहीत् । वसुवने वसुधेयस्य वेतु यज, इति ।

नवमानुयाजदेवो वनस्पतिशब्दवाच्यः । स च परमैश्वर्ययोगादिन्द्रः । वृक्षाभिमानित्वेन तदाकारत्वाद्धिरण्यपर्णः । सुवर्णमयपत्रयुक्तः, मधुशाखो मधुराभिः कोमलाभिः शाखाभिर्युक्तः, सुपिप्पलः शोभनेन फलेन युक्तः । सोऽयं वनस्पतिर्देवं इन्द्रं देवं वर्धितवान् । स्वकीयेन वृक्षाग्रेण दिवं द्युलोकमाप्रात्पूरितवान् । तथाऽन्तरिक्षमाप्रान्मध्यभागेन पूरितवान् । पृथिवीमदृंहीन्मूलैर्दृढीकृतवान् ।

अथ दशममन्त्रमाह –

देवं बर्हिर्वारितीनाम् । देवमिन्द्रमवर्धयत् । स्वासस्थमिन्द्रेणाऽऽसन्नम् । अन्या बर्हीꣳष्यभ्यभूत् । वसुवने वसुधेयस्य वेतु यज, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दशमानुयाजदेवो दर्भाभिमानी बर्हिःशब्दवाच्यः । तच्च बर्हिर्वारितीनां वारां जलानामितयः प्राप्तयो वारितयस्तासां वारितीनां देवं द्योतकं दर्भेषु प्ररूढेषु भूमौ जलप्राप्तिर्जातित्यनुमातुं शक्यते, तादृशं बर्हिरिन्द्रमवर्धयद्वर्धितवत् । कीदृशं बर्हिः,इन्द्रेण स्वासस्यं शोभनमासनं स्वासस्तस्मिन्स्थातुं योग्यं स्वासस्यम् । इन्द्रो हि बर्हिषि सुखेनोपविशति । अत एवाऽऽसन्नमिन्द्रस्य समीपवर्ति भूत्वाऽन्यानि लौकिकानि वर्हीष्यभ्यभूत्तिरस्कृतवत् । न हि लौकिकानि बर्हीषि मन्त्ररहितानीन्द्रेण स्थातुं योग्यानि ।

अथैकादशमन्त्रमाह –

दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृत् । दे॒वमिन्द्र॑मवर्धयत् । स्वि॑ष्टं कु॒र्वन्त्स्वि॑ष्टकृत् स्वि॑ष्टम॒द्य करोतु नः । व॒सु॒वने॑ वसु॒धेय॑स्य वे॒तु यज॑ (६), इति ।

वि॒यन्तु॒ यज॑ शिक्षि॒ते शिक्षि॒ते व॑सु॒वने॑ वसु॒धेय॑स्य वी॒तां यज॑ गृ॒हान्वे॑तु यजा॑भूत् षट् च॑ ।

दे॒वं ब॒र्हिर्दे॒वीर्द्वारो॑ दे॒वी उ॒षासा॒ नक्ता॑ दे॒वी जोष्ट्री॑ दे॒वी ऊ॒र्जाहु॑ती दे॒वा दै॒व्या॒ होता॑रा शिक्षि॒तौ दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीः पति॑ दे॒व इन्द्रो॒ नराश ँसो॑ दे॒व इन्द्रो॒ वनस्पति॒र्दे॒वं ब॒र्हिवारि॑तानां दे॒वो अ॒ग्निः । स्वि॑ष्ट॒कृद्दे॒वम् ।

वे॒तु वि॒यन्तु॒ च॒तुर्वी॑ता॒मेको॑ वियन्तु च॒तुर्वे॑तु । अ॒व॒र्ध॒य॒द॒व॒र्धय॑न्त्रित्ववव॒र्धता॒मेको॑ऽवर्धयन्य॒तुर॑वर्धयत् । व॒स्तो॒रा व॒त्सेन॒ दै॒वीर॒यावी॑ष ँहुतास्पृ॑क्षच्छ॒तेन॒ दिव॒मिन्द्रं ँ स्वास॒स्य ँ स्वि॑ष्टम् ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके षष्ठाध्याये दशमोऽनुवाकः ।। १० ।।

स्विष्टकृन्नामकोऽग्निरेकादशानुयाजदेवः । स इन्द्रं देवं वर्धितवान् । अत्र सर्वत्राऽऽशंसार्थत्वाद्भूतवन्निर्देशः । यत्पूर्वमिष्टं तत्सर्वं सुष्ठु कुर्वन्वर्तत इति व्युत्पत्या स्विष्टकृदिति नाम संपन्नम् । तादृशो देवो नोऽस्मदर्थमद्यास्मिन्यज्ञे स्विष्टं करोतु । वसुधेयस्य धनस्वामिनो वसुवने धनदाननिमित्तं येत्व देव आज्यं पिबतु । होतस्तदर्थं याज्यां पठ ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयत्तैतिरीयब्राह्मणभाष्ये षष्ठप्रपाठके दशमोऽनुवाकः ।। १० ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठ एकादशोऽनुवाकः ।

निर्वापकालीनो योऽयमैन्द्रः पशुः सूत्रकारेणोक्तः "निर्वपनकाल ऐन्द्रं पशुमालभते" इति तत्रानुयाजार्था मैत्रावरुणप्रैषा दशमेऽनुवाकेऽभिहिताः । अथैकादशे चोदकप्राप्तपशुत्रये प्रयाजार्था मैत्रावरुणप्रैषा उच्यन्ते । अस्याः कौकिल्याः प्रकृतिभूतायां सौत्रामण्यां पशुत्रयं विहितम्-"आश्विनं धूम्रमालभते सारस्वतं मेषमैन्द्रमृषभम्" इति । तदेतत्त्रयमत्र चोदकप्राप्तं तदीयेषु प्रयाजप्रैषेषु प्रथममन्त्रमाह -

होता यक्षत्समिधाऽग्निमिडस्पदे । अश्विनेन्द्रं सरस्वतीम् । अजो धूम्रो न गोधूमैः क्वलैर्भेषजम् । मधुशष्पैर्न तेज इन्द्रियम् । पयः सोमः परिस्रुता । घृतं मधु । वियन्त्वाज्यस्य होतर्यज, इति ।

सर्वप्रयाजसाधारणो देवोऽग्निस्तस्य विशेषमूर्तयः समिदादयः । योऽयं दैव्यो होता सोऽयमिडस्पदे सोमक्रयणीपदपांसुयुक्त आहवनीये समिधाऽग्नि यक्षत्समिन्मूर्तिरूपेण वर्तमानमग्निं यक्षत्पूजयतु । तद् द्वारेणाश्विनौ द्वाविन्द्रं सरस्वतीं च देवतात्रयं पूजयतु । योऽयमजो धूम्रवर्णः "आश्विनं धूम्रललाममालभेत" इति विहितः सोऽयमत्र सक्तवर्थैर्गोधूमैः क्वलैर्बदरफलैश्च सह भेषजमौषधमनिष्टनिवारकमित्यर्थः । अत्राजो धूम्रो न गोधूमैरित्युक्तो नकारःसाहित्यार्थः । एवमुत्तरत्रापि यथोचितं साहित्यार्थ उपमार्थो वा योजनीयः । यानि शष्पाणि व्रीह्यङ्कुराणि तैः सहितं मधुरमिदं द्रव्यं तेजस इन्द्रियस्य च कारणत्वेन तद्रूपम् । येयं परिस्रुता धारया स्रवन्ती सुरा यच्च पयः क्षीरं तदुभयमत्र सोमः सोमसदृशं मधु घृतं मधुरघृतसदृशम्, अतस्तदीयं कर्म निष्पादयितुं योऽयं समिदाख्योऽग्निर्येऽश्वीन्द्रसरस्वत्याख्या देवास्ते सर्वेऽप्याज्यस्य वियन्त्विदमाज्यं पिबन्तु । तदर्थं हे मानुष होतर्यज याज्यां पठ ।

अथ द्वितीयमन्त्रमाह -

होता यक्षत्तनूनपात्सरस्वती । अविर्मेषो न भैषजम् । पथा मधुमताऽऽभरन् । अश्विनेन्द्राय वीर्यम् (१) । बदरैरुपवाकाभिर्भेषजं तोक्मभिः । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योऽयं द्वितीयप्रयाजदेवस्तनूनपान्नामको या च सरस्वती यौ च सरस्वत्युपलक्षितावश्विनौ यश्च सरस्वत्युपलक्षित इन्द्रस्तान्सर्वान्देवानयं दैव्यो होता यक्षत्पूजयतु । योऽयमत्राविजातीयो मेषः "सारस्वतं मेषम्" इतिवाक्यविहितः सोऽयं मधुमता पथा सह भेषजमनिष्टनिवारकम्, कर्मानुष्ठानमेवात्र मधुरः पन्थाः, अत्राश्विना तदुपलक्षिताः सर्वे देवा इन्द्राय वीर्यमाभरन् । कीदृशं वीर्यं बदरैः सक्तुहेतु-भिर्बदरफलैरुपवाकाभिर्हरितयवैस्तोक्मभिरङ्कुरितव्रीहिभिश्च निष्पन्नं भेषजमनिष्टनिवारकम् । 'पयः सोमः' इत्यादि पूर्ववत् ।

अथ तृतीयमन्त्रमाह –

होता यक्षन्नराशꣳसं न नग्नहुम् । पतिꣳ सुरायै भेषजम् । मेषः सरस्वती भिषक् । रथो न चन्द्र्यश्विनोर्वपा इन्द्रस्य वीर्यम् । बदरैरुपवाकाभिर्भेषजं तोक्मभिः । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज (२), इति ।

तृतीयप्रयाजदेवो नराशंसस्तमग्न्यादिदेवसंयुक्तं होता पूजयतु । साहित्यवाचिना नकारेण देवतान्तरयोगोऽवगम्यते । नग्नहुशब्दः स्थूलयवनिष्पन्न सक्तुवाची । स च द्रव्यविशेषमेलनेन सुरायाः पतिः पालकस्तादृशसुरापतिं नग्नहुं भेषजमनिष्टनिवारकं कर्तुं दैव्यो होता पूजयत्वित्यन्वयः । योऽयं विहितो मेषरूपः पशुर्या च तद्देवता सरस्वती तदुभयं भिषक्चिकित्सकसदृशं सर्वारिष्टनिवारकमित्यर्थः । येयं वपा सेयमश्विनोर्देवयो रथो न चन्द्री चन्द्रवदाह्लादकारी, इन्द्रस्य तु वीर्यं सामर्थ्यहेतुः । बदरैरित्यादिपूर्ववत् ।

अथ चतुर्थमन्त्रमाह –

होता यक्षदिडेडित आजुह्वानः सरस्वतीम् । इन्द्रं बलेन वर्धयन् । ऋषभेण गवेन्द्रियम् । अश्विनेन्द्राय वीर्यम् । यवैः कर्कन्धुभिः । मधुलाजैर्न मासरम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज, इति ।

इड्शब्देन चतुर्थप्रयाजदेव उच्यते । इडा देवेन सहाश्विसरस्वतीन्द्रैर्वान्होता यजतु । कीदृश इन्द्रः ईडितो मन्त्रैः स्तुतः, सरस्वतीमाजुह्वान इह कर्मण्याह्वयन्वर्तते । इन्द्रं बलेन वर्धयन्वर्तते । ऐन्द्रमृषभमितिविहितेन गोजातीयेनर्षभेणेन्द्रियं वर्धयन्वर्तते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अश्विसहितायेन्द्राय वीर्यं वर्धयन्वर्तते । ये सक्त्वर्था यवा ये च कर्कन्धवः । स्थूलबदरफलविशेषा ये च लाजसदृशा व्रीहिबीजविशेषास्तैः सर्वैर्युक्तं मधु मधुरं मासरं मासरद्रव्यं वर्धयन्वर्तते । मासरं तक्रमिश्रितं सूक्ष्मयवचूर्णम् ।

अथ पञ्चममन्त्रमाह-

होता यक्षद्बर्हिः सुष्टरीमोर्णम्रदाः । भिषङ्नासत्या (३) । भिषजाऽश्विनाऽस्वा शिशुमती । भिषग्धेनुः सरस्वती । भिषग्दुह इन्द्राय भेषजम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज, इति ।

दर्भाभिमानी बर्हिःशब्दवाच्यः पञ्चप्रयाजदेवस्तं देवं होता यजतु । कीदृशो देवः, सुष्टरीमा शोभनस्तरीमा वेद्यामास्तरणं यस्यासौ सुष्टरीमा, ऊर्णम्रदाः कम्बलवन्मृदुः । इह कर्मणि नासत्या भिषगश्विदेवौ चिकित्सकौ विघ्नरूपानिष्टनिवारकौ । न केवलमत्रैव किन्तु सर्वत्र । भिषजाऽश्विना तौ देवौ चिकित्सकौ । कीदृशावश्वाऽश्ववन्तौ व्यापिनौ वा । शिशुमती निशिमती निशितबुद्धिर्येयं सरस्वती साऽपि धेनुः प्रीणयित्री सती भिषक्चिकित्सकसदृशी । योऽयमश्विरूपः सरस्वतीरूपश्च भिषक्सोऽयमिन्द्रार्थं भेषजमौषधसदृशमिदं कर्म दुहे दोग्धि निष्पादयतीत्यर्थः ।

अथ षष्ठमन्त्रमाह -

होता यक्षद्दुरो दिशः । कवष्यो न व्यचस्वतीः । अश्विभ्यां न दुरो दिशः । इन्द्रो न रोदसी दुघे । दुहे कामान्त्सरस्वती (४) । अश्विनेन्द्राय भेषजम् । शुक्रं न ज्योतिरिन्द्रियम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज, इति ।

दुरः शब्दाभिधेया द्वाराभिमानिन्यः षष्ठप्रयाजदेवतास्ता होता यजतु । ताः कीदृश्यः दिशो दिगात्मिकाः । कवष्यो न कवाटयुक्ता इव वर्तन्ते । व्यचस्वतीर्व्याप्तिमत्यः । ईदृश्यो दिगात्मिका दुराख्या देवता अश्विभ्यां नाश्विदेवाभ्यां सह वर्तन्ते । इन्द्रो नेन्द्रस्तु रोदसी द्यावापृथिव्यौ दुघे दोग्धि तत्रत्यं सारं संपादयतीत्यर्थः । सरस्वती काम दुहे दोग्धि संपादयति । अश्विनेन्द्रायाश्विभ्यां सहितायेन्द्राय

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भेषजमौषधसदृशमिदं कर्म शुक्रं न शुद्धमिव ज्योतिः प्रकाशकमिन्द्रियं संपाद्यत इति श्लेषः ।

अथ सप्तममन्त्रमाह -

होता यक्षत्सुपेशसोषे नक्तंदिवा । अश्विना संजानाने । समञ्जाते । सरस्वत्या । त्विषिमिन्द्रे न भेषजम् । श्येनो न रजसा हृदा । पयः सोमः परिस्रुता घृतं मधु (५) । वियन्त्वाज्यस्य होतर्यज इति ।

उषाशब्देन सप्तमप्रयाजदेवस्य मूर्तिद्वयमहोरात्राभिमानिरूपमुच्यते । द्वे उषे होता यजतु । कीदृशे उषे, सुपेशसे शोभनरूपयुक्ते नक्तंदिवाऽहोरात्ररूपे अश्विना संजानाने अश्विदेवाभ्यां संयुज्य सर्वं जानन्त्यौ । तथा सरस्वत्या सह सयञ्जाने सम्यग्गच्छन्त्यौ, तादृश्यौ देव्याविन्द्रे भेषजं वौषधमिव त्विषिं दीप्तिं कृतवत्याविति शेषः । श्येनो न प्रचलपक्षीय रजसा रञ्जकेन हृदा हृदयेन संयुक्ते इति शेषः । यथा श्येनस्तीव्रवेगेन (ण) मनुष्याणां हृदयं रञ्जयति तद्वदिमे अपि स्वकार्यनिष्पादनेन रञ्जयत इत्यर्थः ।

अथाष्टममन्त्रमाह -

होता यक्षद्दैव्या होतारा भिषजाऽश्विना । इन्द्रं न जागृवी दिवा नक्तं न भेषजैः । शूषं सरस्वती भिषक् । सीसेन दुह इन्द्रियम् । पयः सोमः परिस्रुता घृतं मधु वियन्त्वाज्यस्य होतर्यज, इति ।

दैव्याहोतृशब्देनाष्टप्रयाजदेवस्य द्वौ देहावुच्येते । तौ होता यजतु । भिषजाऽश्विना भिषग्रूपावश्विनावपि यजतु । इन्द्रं नेन्द्रमपि यजतु । नकारः समुच्चयार्थः । कीदृशौ होतारौ, दिवा नक्तं न दिवसे रात्रौ च भेषजैरौषधैर्जागृवी जागरूकावनिष्टपरिहारेण निन्तरं सावधानावित्यर्थः । येयं सरस्वती सा भिषक्समाना सती सीसेन सीसक्रीतेन शष्पद्रव्येण शूषं बलमिन्द्रियं चक्षुरादिपाटवं च दोग्धि संपादयतीत्यर्थः ।

अथ नवममन्त्रमाह -

होता यक्षत्तिस्रो देवीर्न भेषजम् । त्रयस्त्रिधातवोऽपसः । रूपमिन्द्रे हिरण्ययम् । (६) अश्विनेडा न भारती । वाचा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सरस्वती । मह इन्द्राय दधुरिन्द्रियम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज, इति ।

इडा सरस्वती भारतीत्येतास्तिस्रो देव्यो नवमप्रयाजेदवतास्तास्तिस्रो देवीर्होता यजतु । ताश्च देव्य ई(इ)ज्यमानास्त्रयो लोकत्रयात्मिकास्त्रिधातवस्त्रीणि शरीराणि धारयित्र्यस्तत्तल्लोकप्राप्तिरूपत्रिविधफलधारिण्यः सत्योऽपसोऽस्मात्कर्मण इन्द्रे हिरण्यं हिण्मयं रूपं दधुः । किमिव भेषजं न, औषधमिव । यथा सर्वोपद्रवशमनहेतुरौषधमेवमिन्द्रे संपाद्यमानमिदं रूपमित्यर्थः । यावेतावश्विनौ न याश्चैता इडाद्यास्तिस्रो देव्यस्ते सर्वे मिलित्वेन्द्रार्थं मह इन्द्रियमत्यधिकं बलं दधुः संपादितवन्तः ।

[अथ] दशममन्त्रमाह -

होता यक्षत्त्वष्टारमिन्द्रमश्विना । भिषजं न सरस्वतीम् । ओजो न जूतिरिन्द्रियम् । वृको न रभसोभिषक् । यशः सुरया भेषजम् (७) । श्रिया न मासरम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज, इति ।

दशमप्रयाजदेवस्त्वष्टा । तमिन्द्रमश्विनौ सरस्वतीं च होता यजतु । देवतानामेव दृष्टान्तः । भिषजं न, यथा भेषजमनिष्टनिवारकं तद्वदेते देवा इत्यर्थः । एतद्देवप्रसादादोज आदित्रयं संपद्यते । ओजः कर्मानुष्ठान उत्साहः, जूतिर्जवो वेगस्तत्राऽऽलस्यराहित्यम्, इन्द्रियं करणपाटवम्, त्रितयसमुच्चयार्थो नकारः । योऽयमस्मिन्कर्मणि वृकोऽस्ति तल्लोम्नामत्र संपादितत्वाल्लोमोपलक्षको वृकशब्दः । स च वृको रभसो भिषङ्न तीव्रश्चिकित्सक इव हितकारीत्यर्थः । यत्तु मासरं यवसक्तुरूपं द्रव्यं तच्छ्रिया न संपदा सममित्यर्थः ।

ए(अथै) कादशमन्त्रमाह -

होता यक्षद्वनस्पतिम् । शमितार ँ शतक्रतुम् । भीमं न मन्यु ँराजानं व्याघ्रं नमसाऽश्विना भामम् । सरस्वती भिषक् । इन्द्राय दुह इन्द्रियम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज (८), इति ।

एकादशप्रयाजदेवो वनस्पतिस्तं होता यजतु । कीदृशम्, शमितारं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वोपद्रवशमनहेतुम्, शतक्रतुं शतसंख्याकक्रतुनिष्पादकम्, भीमं भयंकरम्, मन्युं क्रोधवन्तम्, राजानं सिंहं, भामं क्रोधवन्तम्, व्याघ्रं न व्याघ्रमपि यजत्वित्यन्वयः । सिंहलोम्नां व्याघ्रलोम्नां चात्र हविषि प्रक्षिप्तत्वात्तद्योगोपन्यासः । यावेतावश्विनौ ताभ्यां सहिता सरस्वतीन्द्रार्थमिन्द्रियं दुहे दुग्धे ।

[अथ] द्वादशमन्त्रमाह -

होता यक्षदग्निꣳ स्वाहाऽऽज्यस्य स्तोकानाम् । स्वाहा मेदसां पृथक् । स्वाहा छागमश्विभ्याम् । स्वाहा मेषꣳ सरस्वत्यै । स्वाहर्षभमिन्द्राय सिꣳहाय सहसेन्द्रियम् । स्वाहाऽग्निꣳ न भैषजम् । स्वाहा सोममिन्द्रियम् । स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारं वरुणं भिषजां पतिम् । स्वाहा वनस्पतिं प्रियं पाथो न भैषजम् । स्वाहा देवाँ आज्यपान् (९) । स्वाहाऽग्निꣳ होत्राज्जुषाणो अग्निर्भेषजम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज, इति ।

स्वाहाशब्देन द्वादशप्रयाजाभिमानी देवोऽभिधीयते । यद्यप्येकादशैव प्रयाजा अनुष्ठेयास्तथाऽपि द्वितीयप्रयाजे तनूनपान्नराशंसमन्त्रयोरधिकारिभेदेन विकल्पित्वाद्द्वादश मन्त्रा अत्राऽऽम्नाताः । अतोऽयं द्वादशमन्त्रप्रतिपाद्यो देवस्तं स्वाहाशब्देन विवक्षितमग्निं देवं होता यजतु । आज्यस्य स्तोकानां स्तोकान्बिदून्स्वाहा सुष्ठु जुहुयात्, मेदसां मेदांसि पृथग्विभज्य स्वाहा सुष्ठु जुहुयात्, छागमश्विभ्यां स्वाहा सुष्ठु जुहुयात्, मेषं सरस्वत्यै जुहुयात्, ऋषभमिन्द्राय जुहुयात्, सिंहाय लोमहेतवे सहसा बलेन सहेन्द्रियं स्वाहा जुहुयात्, उद्दिश्य त्यजेदित्यर्थः । भेषजं नौषधि(ध?)मिव वर्तमानमग्निं प्रथमाज्यभागदेवं स्वाहा होमेन तर्पयेत् । इन्द्रियमिन्द्रियाभिवृद्धिहेतुं सोमं द्वितीयाज्यभागदेवं होमेन तर्पयेत् । य एतेऽत्रपुरोडाशा विहिताः "ऐन्द्रमेकादशकपालं निर्वपेत्सावित्रं द्वादशकपालं वारुणं दशकपालम्" इति । तानेतानिन्द्रसवितृवरुणान्होमेन तर्पयेत् । तत्रेन्द्रः सुष्ठु रक्षकत्वात्सू(त्स)त्रामेति विशेष्यते । वरुणोऽनिष्टनिवारकत्वाद्भिषजां पतिरित्युच्यते । वनस्पतिं यूपदेवं होमेन तर्पयेत् । स विशेष्यते प्रियं पाथो न भेषजमिति । यथा प्रियमुदकं तृषाया औषधमेवमयं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वनस्पतिरप्यनिष्टनिवारकत्वेनौषधरूपः । ये चाऽऽज्यपाः प्रयाजदेवता (वा) स्ता हो (न्हो)मेन तर्पयेत् । योऽयं स्विष्टकृद्देवोऽग्निस्तं होमेन तर्पयेत् । होत्राद्धोमाज्जुषाणः प्रीतः स्विष्टकृदग्निर्भेषजं क्रतुवैकल्यनिवारणेनौषधस्वरूपः ।

अथ प्रधानदेवार्थः प्रैषस्तमेतं त्रयोदशमन्त्रमाह –

होता यक्षदश्विना सरस्वतीमिन्द्र ँ सुत्रामाणम् । इमे सोमाः सुरामाणः । छागैर्न मेषैर्ऋ षभैः सुताः । शष्पैर्न तोक्मभिः । लाजैर्महस्वन्तः । मदा मासरेण परिष्कृताः । शुक्राः पयस्वन्तोऽमृताः । प्रस्थिता वो मधुश्चुतः । तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ता ँ सोम्यं मधु । पिबन्तु मदन्तु वियन्तु सोमम् । होतर्यज (१०), इति ।

वीर्यं वियन्त्वाज्यस्य होतर्यज नासत्या सरस्वती मधु हिरण्ययं भेषजं वियन्त्वाज्यस्य होतर्यजाऽऽज्यपानमृताः पञ्च च ।।

समिधाऽग्नि ँषट् । तनूनपात्सप्त । नराश ँसमृर्षिः । इडेडितो यवैरष्टौ । बर्हिः सप्त दुरो नव । सुपेशसोष नक्तमृर्षिः । दैव्या होतारा रसः । तिस्रस्त्वष्टारमष्टावष्टौ । वनस्पतिमृषिः । अग्निं त्रयोदश । अश्विना द्वादश त्रयोदश । समिधाऽग्निं बदरैर्वदरैर्यवैरश्विना त्विषिमश्विना न भेषज ँ रूपमश्विना भीमं मीमं मासम् ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके षष्ठाध्याये एकादशोऽनुवाकः ।। ११ ।।

यौ देवावश्विनौ या च सरस्वती यश्च सुत्रामेन्द्रस्तान्मुख्यदेवान्दैव्यो होता यजतु पूजयतु । ये चाऽऽश्विनसारस्वतैन्द्रग्रहास्त इमे सोमाः सोमसदृशाः सुरामाणः सुष्ठु रमणीयाः, मेषैः सारस्वतमेषावयवैऋष-भैरैन्द्रर्षभावयवैश्छागैर्नाऽऽश्विनच्छागावयवैरपि हविर्विशेषैर्निमित्तभूतैः सुता उत्पादिताः । यानि व्रीह्यङ्कुरजन्याणि शष्पानि बालतृणानि यानि चाङ्कुरावस्थापन्नानि तोक्मानि ये च बीजावस्था लाजास्तैस्त्रिभिरपि द्रव्यैरेते यागा महस्वन्तस्तेजस्विनो भासन्ते, मदा मदहेतुना मासरेण यवसक्तुद्रव्येण परिष्कृता अलंकृताः शुक्रा निर्मलाः पयस्वन्तः पयसा युक्ता अमृताः स्वादुत्वेनामृतसमाना हेऽश्विसरस्वतीसुत्रामेन्द्ररूपा देवा वो युष्मदर्थं मधुश्चुतो माधुर्यरसस्राविणो ग्रहाः प्रस्थिताः संपादिताः,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तान्ग्रहानश्व्यादय एते देवा जुषन्तां सेवन्तां, तत्रत्यं सौम्यं रमणीयं मधु मधुरं रसं पिबन्तु । ततो मदन्तु हृष्यन्तु । ततः सोमं वियन्तु सोमत्वेन स्वीकुर्वन्तु । तदर्थं हे मानुष होतर्यज याज्यां पठ ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठक एकादशोऽनुवाकः ।। ११ ।।

अथ षष्ठे द्वादशोऽनुवाकः ।

एकादशे प्रयाजप्रैषा उक्ताः अथ द्वादशे प्रयाजयाज्या आप्रियोऽभिधीयन्ते । तत्र प्रथमामाह-

समिद्धो अग्निरश्विना । तप्तो धर्मो विराट्सुतः । दुहे धेनुः सरस्वती । सोमꣳ शुक्रमिहेन्द्रियम्, इति ।

हेऽश्विनौ समिद्धः संदीप्तः । समिन्नामकः प्रथमप्रयाजदेवोऽग्निस्तप्तो धर्मः संतप्तप्रवर्ग्यसदृशो विराड् विशेषेण राजमानः सुत उत्पन्नः । तथा धेनुः प्रीणयित्री सरस्वती शुक्रं शुद्धमिन्द्रियमिन्द्रियवृद्धिहेतुं सोमं सोमसदृशं हविर्दुहे दोग्धि संपादयति ।

[अथ] द्वितीयामाह -

तनूपा भिषजा सुते । अश्विनोभा सरस्वती । मध्वा रजाꣳसीन्द्रियम् । इन्द्राय पथिभिर्वहान्, इति ।

तनूपा द्वितीयप्रयाजदेवो भिषजौ चिकित्सकावश्विनावुभौ सरस्वतीत्येते देवाः । सुते प्रवृत्ते कर्मणि मध्वा मधुना रसेन युक्तानि रजांसि रञ्जकानि हवींषि विविधमिन्द्रियं हविर्जन्यं सामर्थ्यं चेन्द्रार्थं पथिभिरनुष्ठानरूपैर्मार्गैर्वहान्वहन्तु संपादयन्तु ।

[अथ] तृतीयामाह -

इन्द्रायेन्दुꣳ सरस्वती । नराशꣳसेन नग्नहुः (१) । अधातामश्विना मधु । भेषजं भिषजा सुते, इति ।

नराशंसो मन्त्रपाठक्रमेण तृतीयप्रयाजदेवस्तेन सहिता सरस्वतीन्द्रार्थमिन्दुमैश्वर्यकरं हविःसारं नग्नहुरेतच्छब्दवाच्यं स्थूलयवपिष्टसक्तुरूपं संपादयतीति शेषः । अश्विना भिषजा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चिकित्सावश्विनौ सुते प्रवृत्तेऽस्मिन्कर्मणि मधु भेषजं मधुरमौषधरूपं हविरधातां संपादितवन्तौ ।

अथ चतुर्थीमाह -

आजुह्वाना सरस्वती । इन्द्रायेन्द्रियाणि वीर्यम् ।
इडाभिरश्विनाविषम् । समूर्जꣳ स ꣳरयिं दधुः, इति ।

चतुर्थप्रजाजदेवता इडास्ताभिः सहिता सरस्वत्याजुह्वाना स्वयं कर्मण्याहूयमानेन्द्रार्थमिन्द्रियाणि वीर्यं च संपादयितुं योग्यं हविर्दधात्विति शेषः । अश्विनौ देवौ ताभिरिडाभिः सहेषमन्नं दधुः । संपादितवन्तः । ऊर्जं क्षीरादि रसं संपादितवन्तः । रयिं धनं संपादितवन्तः ।

[अथ] पञ्चमीमाह-

अश्विना नमुचेः सुतम् । सोमꣳ शुक्रं परिस्रुता ।
सरस्वती तमाभरत । बर्हिषेन्द्राय पातवे (२), इति ।

बर्हिःशब्दाभिधेयः पञ्चमप्रयाजदेवः । हेऽश्विनौ तेन बर्हिषा युक्ता सरस्वती सुतमभिषुतं शुक्रं निर्मलं सोमं सोमत्वेन भाषितं रसं नमुचेः सकाशादाभरदाहरत् किमर्थमिन्द्रार्थं पातवे पातुम् ।

अथ षष्ठीमाह -

कवष्यो न व्यचस्वतीः । अश्विभ्यां न दुरो दिशः । इन्द्रो
न रोदसी दुघे । कामान्त्सरस्वती, इति ।

दुरःशब्दाभिधेया या द्वाराभिमानिन्यः षष्ठप्रयाजदेवताः कवष्यो न कवाटवत्य इव व्यचस्वतीरवकाशवत्योऽश्विभ्यां नाश्विभ्यामपि सह वर्तन्त इति शेषः । इन्द्रोऽपि रोदसी दुघे द्यावापृथिव्यौ दोग्धि । सरस्वती कामान्दुहे दोग्धि ।

[अथ] सप्तमीमाह -

उषासा नक्तमश्विना । दिवेन्द्रꣳ सायमिन्द्रियैः ।
संजानाने सुपेशसा । समञ्जाते । सरस्वत्या, इति ।

हेऽश्विनावुषासानक्तशब्दवाच्ये अहोरात्राभिमानिन्यौ सप्तमप्रयाजदेवते इन्द्रं दिवेन्द्रियैः संजानाने संयोजयेते । सायं सुपेशसा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शोभनरूपेण संजानाने संयोजयेते । तथा सरस्वत्या समञ्चाते संयोजयेते ।

अथाष्टमीमाह –

पातं नौ अश्विना दिवा । पाहि नक्तँ सरस्वति (३) ।
दैव्या होतारा भिषजा । पातमिन्द्रँ सचा सुते, इति ।

हेऽश्विनौ दिवा नोऽस्मान्पातम् । हे सरस्वति नक्तमस्मान्पाहि । दैव्यहोतृशब्दवाच्यौ हेऽष्टमप्रयाजदेवौ युवां भिषजौ चिकित्सकौ सचा परस्परं संयुक्तौ सुते प्रवृतेऽस्मिन्कर्मणीन्द्रं पातम् ।

[अथ] नवमीमाह –

तिस्रस्त्रेधा सरस्वती । अश्विना भारतीडा । तीव्रं
परिस्रुता सोमम् । इन्द्राय सुषवुर्मदम्, इति ।

हेऽश्विनौ सरस्वती भारतीडेत्येतास्तिस्रो नवमप्रयाजदेवतास्त्रेधा लोकत्रयरूपेण वर्तमानाः परिस्रुता परिस्रवन्त्या सुरया सहितं तीव्रं तीव्रगन्धोपेतं सोमं सोमसदृशं मदं मदकरं हविरिन्द्राय सुषवुरिन्द्रार्थं संपादितवत्यः ।

[अथ] दशमीमाह –

अश्विना भेषजं मधु । भेषजं नः सरस्वती । इन्द्रे त्वष्टा
यशः श्रियम् । रूपँरूपमधुः सुते, इति ।

यावेतावश्विनौ या च सरस्वती योऽपि त्वष्टा दशमप्रयाजदेवस्ते सर्वे मिलित्वा भेषजं सर्वेषामौषधरूपं मधु मधुरं नो भेषजमस्माकं विशेषत औषधरूपं यशः श्रियं यशःप्रदं श्रीपदं रूपं रूपं बहुरूपकरमिदं हविः सुते प्रवृत्तेऽस्मिन्कर्मणीन्द्रेऽस्मिन्नधुः स्थापितवन्तः ।

अथैकादशीमाह –

ऋतुथेन्द्रो वनस्पतिः । शशमानः परिस्रुता ।
कीलालमश्विभ्यां मधु । दुहे धेनुः सरस्वती, इति ।

योऽयं वनस्पतिरेकादशप्रयाजरूपो देवः सोऽयमृतुथा तस्मिंस्तस्मिन्नृताविन्द्र इन्द्रेणाभिन्नः सन्परिस्रुता परितः स्रवन्त्या सुरया

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सह शशमानः शश्वद्वर्तते । अश्विभ्यां युक्ता सरस्वती धेनुः प्रीणयित्री सती कीलालमुदकसदृशं मधु मधुरं हविर्दुघे दोग्धि ।

[अथ] द्वादशीमाह -

गोभिर्न सोममश्विना । मासरेण परिष्कृता । समधाता सरस्वत्या । स्वाहेन्द्रे सुतं मधु (४), इति ।

नग्नहुः पार्तवे सरस्वत्यधुः . सुतेऽष्टौ च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

षष्ठाध्याये द्वादशोऽनुवाकः ।। १२ ।।

हेऽश्विनौ गोभिर्न गवादिभिर्ऋषभच्छागमेषैरपि सहितं मासरेण परिष्कृता यवसक्तुद्रव्येणालंकृतं सोमं सोमसदृशं मधु मधुरमिदं हविः सरस्वत्या चरमप्रयाजदेवेन स्वाहाशब्दवाच्येन च सहितौ युवामिन्द्रे समधातां सम्यक्स्थापितवन्तौ । तदेवं विकल्पितेन सहितानां प्रयाजानां याज्यारूपा द्वादश मन्त्रा अभिहिताः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

षष्ठप्रपाठके द्वादशोऽनुवाकः ।। १२ ।।

अथ षष्ठे त्रयोदशोऽनुवाकः ।

द्वादशे प्रयाजयाज्या आप्रियोऽभिहिता । त्रयोदशे वपादीनां याज्यानु वाक्या उच्यन्ते । त्रिपशुके वपापुरोडाशहविर्यागानां (णां) पुरोनुवाक्यास्ता एव याज्याः । तत्र तिसृणां वपानां तिस्र ऋचस्तासां चैकैका कस्यांचिद्वपायां पुरोनुवाक्या कस्यांचिद्याज्येत्येवं द्विरूपा । तत्र प्रथमायां पुरोनुवाक्यां तृतीयायां याज्यामृचमाह -

अश्विना हविरिन्द्रियम् । नमुचेर्धिया सरस्वती । आ शुक्रमासुराद्वसु । मघमिन्द्राय जभ्रिरे, इति ।

यावंतावश्विनौ या च सरस्वती ते त्रयो मिलित्वा धिया स्वबुद्ध्येन्द्रार्थं नमुचिनाम्नोऽनुराद्धविराजभ्रिर आहृतवन्तः . कीदृशं हविः, इन्द्रियमिन्द्रियवर्धकं शुक्रं निर्मलं वसु निवासकारणं मघं महनीयम् ।

अथ प्रथमायां याज्यां द्वितीयस्यां पुरोनुवाक्यामृचमाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

यमश्विना सरस्वती । हविषेन्द्रमवर्धयन् । स बिभेद बलं मघम् । नमुचावासुरे सचा, इति ।

अश्विनावुभौ सरस्वती चेत्येते त्रयो हविषा यमिन्द्रमवर्धयन्सोऽयमिन्द्रो नमुचिनामासुरे सचासंबद्धं मघं महनीयं बलं बलनामानमसुरं बिभेद विदारितवान् ।

अथ द्वितीयस्यां याज्यां तृतीयस्यां पुरोनुवाक्यामाह –

तमिन्द्रं पशवः सचा । अश्विनोभा सरस्वती (१) । दधाना अभ्यनूषत । हविषा यज्ञमिन्द्रियम्, इति ।

छागमेषऋषभा, य एते पशवो यावुभावश्विनौ या च सरस्वती ते सर्वे सचा परस्परं संबद्धा इन्द्रियमिन्द्रियवृद्धिहेतुं यज्ञं हविषा दधानास्तमिन्द्रमभ्यनूषत ।

अव त्रिषु पुरोडाशेषु पूर्ववत्तिस्त्र ऋच आम्नाताः तत्र प्रथमस्य पुरोडाशस्थ पुरोनुवाक्या तृतीयस्य याज्यामृचमाह –

य इन्द्र इन्द्रियं दधः । सविता वरुणो भगः । स सुत्रामा हविष्पतिः । यजमानाय सश्चत, इति ।

इन्द्रसवितृवरुणा पुरोडाशदेवता भगोऽपि तत्सहचारी कश्चित् । ये यस्मिन्निन्द्रे सवितृवरुणभगा इन्द्रियं दधुः संपादितवन्तः । सोऽयमिन्द्रः सुत्रामा सुष्ठु रक्षको हविष्पतिर्हविषां पालको यजमानार्थं सश्चत संबद्धोऽभूत् ।

अथ प्रथमस्य याज्यां द्वितीयस्य पुरोनुवाक्यामृचमाह –

सविता वरुणो दधत् । यजमानाय दाशुषे । आदत्त नमुचेर्वसु । सुत्रामा बलमिन्द्रियम् (२), इति ।

यः सविता सोऽयं दाशुषे हविर्दत्तवते यजमानाय दधदपेक्षितं संपादयतु । तथा च वरुणोऽपि संपादयतु । सुत्रामेन्द्रो बलमिन्द्रियं बलेन्द्रिययोः कारणं वसु हविःस्वरूपं धनं नमुचेः सकाशादादत्त ।

अथ द्वितीयस्य याज्यां तृतीयस्य पुरोनुवाक्यामृचमाह –

वरुणः क्षत्रमिन्द्रियम् । भगेन सविता श्रियम् । सुत्रामा यशसा बलम् । दधाना यज्ञमासत, इति ।

Digitized by Madhuban Trust, Delhi

योऽयं वरुणः सोऽयं क्षत्रं बलमिन्द्रियं च दधाति । भगेन सह सविता श्रियं दधाति । सुत्रामेन्द्रो यशसा सह बलं दधाति । त एते त्रयो देवास्त्रिविधं दधाना यजमानस्य यज्ञमाश (स) त प्राप्तवन्तः ।

अथ हविषस्तिस्र आम्नाताः । तत्र प्रथमस्य पुरोनुवाक्यां तृतीयस्य याज्यामाह -

अश्विना गोभिरिन्द्रियम् । अश्वेभिर्वीर्यं बलम् । हविषेन्द्र सरस्वती । यजमानमवर्धयन्, इति ।

अश्विनोभौ सरस्वतीचेत्येते त्रयो देवा गोभिरिन्द्रियं संपाद्यैश्वर्यं वीर्यं बलं च संपाद्यात्रत्येन हविषेन्द्रं यजमानं चावर्धयन् । हविर्भोक्तृत्वमिन्द्रस्य वृद्धिः । हविर्दातृत्वं यजमानस्य वृद्धिः ।

अथ प्रथमस्य याज्यां द्वितीयस्य पुरोनुवाक्यामृचमाह -

ता नासत्या सुपेशसा । हिरण्यवर्तनी नरा । सरस्वती हविष्मती । इन्द्र कर्मसु नोऽवत, इति ।

ता नासत्या तावश्विनौ सुपेशसा सुरूपौ हिरण्यवर्तनी आभरणैः । सह वर्तमानौ नरा जगद्व्द्व्यवहारस्य नेतारौ सरस्वती चात्र हविष्मती हविर्युक्ता । हे इन्द्रं त्वं च सरस्वती चाश्विनौ चेत्येते यूयमनुष्ठीयमानेष्वेतेषु कर्मसु नोऽस्मानवत रक्षत ।

अथ द्वितीयस्य याज्यां तृतीयस्य पुरोनुवाक्यामृचमाह -

ता भिषजा सुकर्मणा । सा सुदुघा सरस्वती । स वृत्रहा शतक्रतुः । इन्द्राय दधुरिन्द्रियम् (इति

उमा सरस्वती बलमिन्द्रयं नरा षट् च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
षष्ठाध्याये त्रयोदशोऽनुवाकः ।। १३ ।।

ता भिषजा तौ चिकित्सकावश्विनौ सुकर्मणा शौभनकर्मयुक्तौ सा सरस्वती सुदुघा सुष्ठु दोहनयुक्ता स च वृत्रहेन्द्रः शतक्रतुः शतशंख्याकक्रतुयुक्तस्ते सर्वेऽपीन्द्रार्थमिन्द्रियं सपादितवन्तः । इन्द्रोऽपि स्वार्थं प्रवर्तत इति भावः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

अथ षष्ठे चतुर्दशोऽनुवाकः ।

त्रयोदशे वपापुरोडाशहविषां याज्यानुवाक्या उक्ताः । अथ चतुर्दशेऽनुयाजानां मैत्रावरुणप्रैषा उच्यन्ते । तत्र प्रथममन्त्रमाह –

देवं बर्हिः सरस्वती । सुदेवमिन्द्रे अश्विना । तेजो न चक्षुरक्ष्योः बर्हिषा दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज, इति ।

बर्हिःशब्दवाच्यं प्रथमानुयाजदेवतास्वरूपं, तच्च देवं द्योतमानं सुदेवं शोभना देवा यस्य सर्वदेवप्रियमित्यर्थः । तादृशं यद्बर्हिर्या च सरस्वती यौ चाश्विनौ देवौ ते सर्वेऽप्यक्ष्योरक्षिगोलकयोस्तेजश्चक्षुर्न तेजोरूपं चक्षुरिन्द्रियं यथा स्थापयन्ति तथा बर्हिषा बर्हिर्देवतामुखेनेन्द्र इन्द्रियं दधुः स्थापितवन्तः । वसुधेयस्य द्रव्याधारकस्य देवस्य वसुवने धनदाननिमित्तं बर्हिरादयो देवावियन्त्वाज्यं पिबन्तु । तदर्थं हे होतर्यज याज्यां पठ ।

अथ द्वितीयमन्त्रमाह –

देवीर्द्वारो अश्विना । भिषजेन्द्रे सरस्वती । प्राणं न वीर्यं नसि । द्वारो दधुरिन्द्रियम् । वसुवने वसुधे यस्य वियन्तु यज (१), इति ।

द्वारशब्दवाच्या द्वितीयानुयाजदेवतास्ता देवीर्द्योतमाना अश्विनौ भिषजौ चिकित्सकौ सरस्वती चेत्येते देवा नासि नासिकायां वीर्यं वीर्यहेतुं प्राणं न प्राणमिव यथा प्राणवायुं नासिकायां स्थापयन्ति तथा द्वारो द्वार्देवता इतरैः सहिता इन्द्रं इन्द्रियं दधुः ।

[अथ] तृतीयमन्त्रमाह –

देवी उषासावश्विना । भिषजेन्द्रे सरस्वती । बलं न वाचमास्ये । उषाभ्यां दधरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज, इति ।

उषःशब्दवाच्ये तृतीयानुयाजदेवते देवी द्योतनात्मिके उभे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भिषजावश्विनौ सरस्वती चाऽऽस्ये मुखे वाचं वागिन्द्रियं बलं न बलमिव यथा मुखे वागिन्द्रियसामर्थ्यं स्थापितवन्तस्तथैव सर्वे देवा उषाभ्यामुषादेवता मुखेनेन्द्र इन्द्रियं दधु ।

[अथ] चतुर्थमन्त्रमाह -

देवी जोष्ट्री अश्विना । सुत्रामेन्द्रे सरस्वती । श्रोत्रं न कर्णयोर्यशः । जोष्ट्रीभ्यां दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज (२), इति ।

जोष्ट्रीशब्दवाच्ये चतुर्थानुयाजदेवते । ते च देवी देव्यौ द्योतमात्मिके उभे अश्विनौ द्वौ सुत्रामाख्य इन्द्रः सरस्वती चेत्येता देवताः कर्णयोःकर्णगोलकयोर्यशो यशःकरणं श्रोत्रं न श्रोत्रेन्द्रियमिव यथा श्रोत्रेन्द्रियं कर्णगोलकयोः स्थापयन्ति तथा जोष्ट्रीभ्यां जोष्ट्रीदेवतामुखेन सदिन्द्र इन्द्रियं दधुः ।

[अथ] पञ्चममन्त्रमाह -

देवी ऊर्जाहुती दुघे सुदुघे । पयसेन्द्र सरस्वत्यश्विना भिषजाऽवत । शुक्रं न ज्योतिः स्तनयोराहुती धत्त इन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज,इति ।

ऊर्जाहुतिशब्दवाच्ये पञ्चमानुयाजदेवते देवी द्योतनात्मिके दुघे अभीष्टफलस्य दोग्ध्यौ सुदुघे सुष्टु दोग्धुं शक्ये तथाविधे उभे देव्यौ सरस्वती भिषजावश्विनौ चेत्येते यूयं पयसा हविषेन्द्रमवत रक्षत । आहुतिदेव्यौ स्तनयोरुभयोः शुक्रं शुद्धं ज्योतिर्न यथा स्त्रीस्तनयोर्ज्योतीरूपं क्षीरं स्थापयन्ति तद्वदिन्द्रियं धत्तः ।

[अथ] षष्ठमन्त्रमाह -

देवा देवानां भिषजा । होताराविन्द्रमश्विना । वषट्कारैः सरस्वती । त्विषिं न हृदये मतिम् । होतृभ्यां दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज (३), इति ।

होतृशब्दवाच्यौ षष्ठानुयाजदेवौ देवा द्योतनात्मकौ यौ विद्येते यौ च देवानां भिषजावश्विनौ या च सरस्वती वषट्कारदेवैः सहिता ते सर्वेऽपि यूयमिन्द्रयमवतेति शेषः । पुनरपि ते सर्वे हृदये हृदयकमले

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मतिं बुद्धिरूपां त्विषिं न दीप्तिमिव यथा बुद्धिरूपां दीप्तिं हृदये स्थापयन्ति तथा होतृभ्यां होतृदेवमुखेनेन्द्र इन्द्रियं दधुः ।

अथ सप्तममन्त्रमाह –

देवीस्तिस्रस्तिस्रो देवीः । सरस्वत्यश्विना भारतीडा शूषं न मध्ये नाभ्याम् । इन्द्राय दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यजु, इति ।

सरस्वती भारतीडेत्येतास्तिस्रः सप्तमानुयाजदेवताः । [ताश्च] परस्परं कदाचिदप्यवियुक्ता इति वक्तुं पुनस्तिस्रो देवीरित्युक्तम् । अथवैकैकस्या देवताया मूर्तित्रयविवक्षया तदुक्तिः । ता एता देवताः सरस्वत्यश्विनौ चेत्येते सर्वे शरीरस्य मध्ये नाभ्यां शूषं न बलमिव यथा बलं स्थापयन्ति तथेन्द्रार्थमिन्द्रियं दधुः ।

अथाष्टममन्त्रमाह –

देव इन्द्रो नराशंसः । त्रिवरूथः सरस्वत्याऽश्विभ्यामीयते रथः । रेतो न रूपममृतं जनित्रम् । इन्द्राय त्वष्टा दधदिन्द्रियाणि । वसुवने वसुधेयस्य वियन्तु यज (४), इति ।

नराशंसाख्योऽष्टमानुयाजदेवः । स च देवो द्योतनात्मक इन्द्रः परमैश्वर्ययुक्तस्त्रिवरूथस्त्र सेनात्रययुक्तो रथो रथयुक्तः । स च सरस्वत्याऽश्विभ्यां च सहेयते व्याप्रियते, रूपं रूपसंपादकममृतं सुखकारणं जनित्रं प्रजोत्पादकं रेतो न रेत इव यथा रेतः स्वस्थाने प्रापयन्ति तथेन्द्रार्थमयं त्वष्टा नराशंसाख्यो देव इन्द्रियाणि दधत्संपादयतु ।

[अथ] नवममन्त्रमाह –

देव इन्द्रो वनस्पतिः । हिरण्यपर्णो अश्विभ्याम् । सरस्वत्याः सुपिप्पलः । इन्द्राय पच्यते मधु । ओजो न जूतिर्ऋषभो न भामम् । वनस्पतिर्नो दधदिन्द्रियाणि । वसुवने वसुधेयस्य वियन्तु यज, इति ।

नवमानुयाजदेवो वनस्पतिशब्दवाच्यः । स च देवा द्योतनात्मक इन्द्र इन्द्रेण सहितो हिरण्यपर्णः सुवर्णपत्रोऽश्विभ्यां देवाभ्यां च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युक्तः सरस्वत्याश्च संबन्धी सुपिप्पलः शोभनफलोपेत इन्द्रार्थमस्मिन्यज्ञे मधु मधुरं हविः पच्यते । ओजो न जूतिं यथा शरीरमध्ये बलशक्तिवेगमुत्पादयति, ऋषभो न भामं यथा लोके कश्चिदृषभो दृप्तः क्रोधमुत्पादयति तद्वदयं वनस्पतिर्नोऽस्मदर्थमिन्द्रियाणि दधत्संपादयतु ।

[अथ] दशममन्त्रमाह –

देवं बर्हिर्वारितीनाम् । अध्वरे स्तीर्णमश्विभ्याम् । ऊर्णम्रदाः सरस्वत्याः (४) । स्योनमिन्द्र ते सदः । ईशायै मन्युꣳ राजानं बर्हिषा दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज, इति ।

दशमानुयाजदेवस्वरूपं बर्हिर्नामकं, तच्च देवं द्योतनात्मकं वारितीनां जलप्राप्तीनां संबन्धि । यत्र भूमिर्जलेन सिच्यते तत्र बर्हिर्जायते । तच्चाश्विभ्यामध्वरे यागे स्तीर्णं प्रसारितमूर्णम्रदाः कम्बलवन्मृदु सरस्वत्याः संबन्धि । हे इन्द्र तादृशं बर्हिस्ते तव स्योनं सुखकरं सद उपनिवेशनस्थानमीशायै जगदीश्वररूपेन्द्रदेवतायै मन्युं वैरिविषयं क्रोधं राजानं शरीरदीप्तिमिन्द्रियं चक्षुरादिपाटवं च बर्हिषा बर्हिर्देवतामुखेन दधुः सरस्वत्यादयः संपादितवत्यः ।

ए [अथै] कादशमन्त्रमाह –

देवो अग्निः स्विष्टकृत् । देवान्यक्षद्यथायथम् । होताराविन्द्रमश्विना । वाचा वाचꣳ सरस्वतीम् । अग्निꣳ सोमꣳ स्विष्टकृत् । स्विष्ट इन्द्रः सुत्रामा सविता वरुणो भिषक् । इष्टो देवो वनस्पतिः । स्विष्टा देवा आज्यपाः । इष्टो अग्निरग्निना । होता होत्रे स्विष्टकृत् । यशो न दधदिन्द्रियम् । ऊर्जमपचिति ꣳ स्वधाम् । वसुवने वसुधेयस्य वियन्तु यज (६), इति ।

द्वारो दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यत्र जोष्ट्रीभ्यं दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज होतृभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यजेन्द्रियाणि वसुवने वसुधेयस्य वियन्तु यज सरस्वत्या वनस्पतिः षट् च ।

देवं बर्हिर्देवीर्द्वारो देवी उषासावश्विना देवी जोष्ट्री देवी ऊर्जाहुती

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दे॒वा दे॒वानां भि॒षजा॑ दे॒वास्ति॒स्रस्ति॒स्रो दे॒वीः सर॑स्वती दे॒व इन्द्रो॑ नराशꣳसो दे॒व इन्द्रो॑ व॒नस्पति॑र्दे॒वं ब॒र्हिर्वारि॑तीनां दे॒वो अ॒ग्निः स्वि॒ष्टकृ॑द्दे॒वान् ।

स॒मिधा॒ऽग्निम् । सौत्राम॒ण्या सुꣳसु॒तासु॒ती । अ॒ञ्जन्त्य॒यं यज॑मानः । दे॒वं ब॒र्हिः सर॑स्वती॒ सर्वं॑ वि॒यन्तु । द्वार॑स्ति॒स्रः । सर्वं॑ वि॒यन्तु । अ॒ज इन्द्र॒मोजो॒ऽग्निं प॒रः सर॑स्वतीम् । अ॒न्यत्र॒ सर॑स्वती । भि॒षक्पू॒र्वं दु॒ह इ॒न्द्रि॒यम् । अ॒न्यत्र॒ दधु॑रिन्द्रि॒यम् ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
षष्ठाध्याये चतुर्दशोऽनुवाकः ॥ १४ ॥

एकादशोऽ(शा)नुयाजदेवः स्विष्टकृच्छब्दवाच्योऽग्निः सोऽयं द्योतनात्मकोऽन्यान्देवान्यथायथं यक्षद्यद्यस्य योग्यं तं तेन पूजितवान् । कं कं पूजितवानिति तदुच्यते । होतारौ दैव्यमानुषरूपौ देवौ स्वयं धृत्वा वाचा मन्त्रेणेन्द्रं देवम्, अश्विनौ द्वौ देवौ वाचं सरस्वती वाग्रूपां सरस्वत्याख्यां देवतां पूजितवान् । तथा स्विष्टकृदयमग्निं सोमं चोभावाज्यभागदेवौ पूजितवान् । सुत्रामेन्द्रः स्विष्टः सुष्ठु पूजितः । सविता च स्विष्टः । भिषग्रूपो वरुणोऽपि स्विष्टः । तथा यूपदेवो वनस्पतिरिष्टः । आज्यपाः प्रयाजानुयाजदेवाः स्विष्टाः । दैव्यो होता योऽयमग्निः सोऽयमनेनाग्निनेष्टः । स्विष्टकृदाख्योऽयमग्निर्होत्रे होमकर्त्रे यजमानाय यशो न यश इवेन्द्रियं दधत्संपादयति । तथोर्जं क्षीरादिरसं संपादयति । तथाऽपचितिं पूजां संपादयति । तथा स्वधामन्नं च संपादयति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

अथ षष्ठे पञ्चदशोऽनुवाकः ।

चतुर्दशे प्रधानपशुत्रयार्था अनूयाजप्रैषा उक्ताः । अथ पञ्चदशे सूक्तवाकप्रैषोऽभिधीयते –

अ॒ग्निम॒द्य होता॑रमवृणीत । अ॒यꣳ सु॒तासु॑ती यज॑मानः । पच॒न्प॒क्तीः । पच॒न्पु॒रो॒डा॒शान् । गृ॒ह्णन्ग्रहा॑न् । ब॒न्ध॒न्न॒श्विभ्यां॒ छाग॒ꣳ सर॑स्वत्या॒ इन्द्रा॑य । ब॒न्धन्त्सर॑स्वत्यै मे॒षमिन्द्रा॑या॒श्विभ्या॑म् । ब॒न्धन्निन्द्रा॑यर्ष॒भम॒श्विभ्या॑ꣳ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सरस्वत्यै । सूपस्था अद्य देवो वनस्पतिरभवत् । अश्विभ्यां छागेन सरस्वत्या इन्द्राय (१) । सरस्वत्यै मेषेणैन्द्रायाश्विभ्याम् । इन्द्रायर्षभेणाश्विभ्या ँ सरस्वत्यै । अक्ष ँ स्तान्मेदस्तः प्रति पचताऽग्रभीषुः । अवीवृधन्त ग्रहैः अपातामश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा । सोमान्त्सुराम्णः । उपो उक्थामदाः श्रौद्मिमदा अदन् । अवीवृधन्ताऽऽङ्गूषैः । त्वामद्यर्ष आर्षेयर्षीणां नपादवृणीत । अय ँ सुतासुती यजमानः । बहुभ्य आसंगतेभ्यः । एष मे देवेषु वसुवार्या यक्ष्यत इति । ता या देवा देवदानान्यदुः । तान्यस्मा आ च शास्व । आ च गुरस्व । इषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः । सूक्तवाकाय सूक्ता ब्रूहि (२), इति ।

इन्द्राय यजमानः सप्त च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके षष्ठाध्याये पञ्चदशोऽनुवाकः ।। १५ ।।

अथास्मिन्कर्मण्ययं यजमानोऽग्निरूपं देवं होतारं होमनिष्पादकं पुरुषमवृणीत वृतवान् । कीदृशो यजमानः, सुतासुती, सुतमभिषुतं सोमसुरादि, असुतमभिषवरहितं पयःप्रभृति तदुभयमस्यास्तीति सुतासुती । किं कुर्वन्पक्तीः पक्तव्यानि द्रव्याणि पचन्पक्वानि कुर्वंस्तथा पुरोडाशानैन्द्रसावित्रादीन्पचन्पक्वान्कुर्वन्ग्रहानाश्विनादीन्गृह्णन्पात्रेषु स्वीकुर्वन्योऽयं छागस्तं सरस्वतीन्द्रयुक्ताभ्यामश्विभ्यां सर्वदेवार्थं यूपे बध्नंस्तथा यो मेषस्तमिन्द्राश्वियुक्तायै मुख्यायै सरस्वत्यै बध्नंस्तथा यो वृषभस्तमश्विसरस्वतीयुक्ताय मुख्यायेन्द्राय बध्नन्नद्यास्मिन्दिने वनस्पतिर्देवो यूपात्मकः सूपस्था अभवत्सुष्ठु स्थिरावस्थानयुक्तोऽभवत् । सरस्वतीन्द्रयुक्ताभ्यां मुख्याभ्यामश्विभ्यां छागेन पशुना यजमानः परिचरति । इन्द्राश्वियुक्तायै मुख्यायै सरस्वत्यै मेषेण पशुना परिचरति । अश्विसरस्वतीयुक्तायेन्द्राय वृषभेण पशुना परिचरति । तान्पशूनिन्द्रादयो देवा अक्षन्नशितवन्तः । मेदांस्तो मेदासि पचता पक्वानि हवींषि प्रत्यग्रभीषुः प्रतिगृहीतवन्तः । ग्रहैरनुष्ठितैरवीवृधन्त बर्धितवन्तः । अश्विनौ देवौ सोमान्सुराम्णः सुरासदृशानि सोमद्रव्याण्यपातां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पीतवन्तौ । सरस्वती च पीतवती । सुत्रामा वृत्रहेन्द्रश्च पीतवान् । उपो समीप उक्थामदाः शस्त्रवद्धर्षहेतुमन्त्राञ्शौदश्रौषुः । विमदा विशेषेण हर्षयुक्ता अदन्भक्षितवन्तः । आङ्गूषैरङ्गविशेषैरवीवृधन्त सम्यग्वर्धितवन्तः । अद्यास्मिन्कर्मणि हे ऋषेऽतीन्द्रियार्थदर्शिन्हे होतस्त्वामयं यजमानोऽवृणीत वृतवान् । आर्षेय हे ऋषिकुलोत्पन्न ऋषीणां नपाद्धे ऋषिनप्तर्गोत्रप्रवर्तकमृषिं प्रति चतुर्थ इत्यर्थः । एतदुभयमप्यृषिविशेषणम् । कीदृशो यजमानः सुतासुत्यभिषुतानमभिषुतद्रव्यद्वयवान् । किमर्थं वृतवानिति तदुच्यते- आसंगतेभ्यो बहुभ्य आगत्यास्मिन्कर्मणि संबद्धानां बहूनां देवानामर्थे । केनाभिप्रायेण वृतवानिति सोऽभिप्राय उच्यते- एष होता मे वसुवारि पुरोडाशरूपं वसु पयः सुरारूपं वारि च देवेष्वायक्ष्यते समन्ताद्यागं करिष्यतीति । ता या देवा देवदानानि यानि तानि देवेभ्यो दत्तानि हवींषि देवा अत्रऋत्विजो दत्तवन्तस्तानि सर्वाणि हविष्फलान्यस्मै यजमानायाऽऽशास्स्व च सिध्यन्त्वित्येवमाशिषं च कुरु । आगुरस्व च तत्सिद्ध्यर्थमुद्यमं च कुरु । हे होतरिषितो मयाऽभिलषितः प्रेषितश्चासि । भद्रवाच्याय कल्याणवचनाय प्रेषितो मानुषो होता त्वं सूक्तस्य वचनं वाको यस्य देवस्य सोऽयं देवः सूक्तवाकस्तस्मै सूक्तवाकदेवाय सूक्ता ब्रूहि "इदं द्यावापृथिवी" इत्येतान्यनुवाकोक्तानि शोभनानि वचनानि कथय ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठके पञ्चदशोऽनुवाकः ।। १५ ।।

अथ षष्ठे षोडशोऽनुवाकः ।

पञ्चदशे सूक्तवाकप्रैषोऽभिहितः । षोडशे पितृयज्ञविषया मन्त्रा उच्यन्ते । पितृयज्ञश्च सूत्रकारेण निर्दिष्ट- "पूर्ववत्पितृयज्ञः" इति । स च राजसूयप्रकरणे चातुर्मास्येषु "सोमाय पितृमते" इत्यनुवाके व्याख्यातः । तदर्थानां मन्त्राणां दशानां प्रतीकानि दर्शयति -

उशन्तस्त्वा हवामह आ नो अग्ने सुकेतुना । त्व सोम
महे भगं त्व सोम प्रचिकितो मनीषा । त्वया हि नः
पितरः सोम पूर्वे त्व सोम पितृभिः संविदानः ।
बर्हिषदः । पितर आऽहं पितॄन् । उपहूताः
पितरोऽग्निष्वात्ताः पितरः, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतास्वृक्षु "उशन्तस्त्वा हवामहे "एषा साभिधेनी, सेयं संहितायां द्वितीयकाण्डे व्याख्याता । "आ नो अग्ने" "त्वं सोम महे" इत्युभे आज्यभागयोः पुरोनुवाक्ये, ते च "वृषामो अंशुः पवते" इत्यनुवाके व्याख्याते । "सोमाय पितृमते पुरोडाशं षट्कपाल निर्वपति" इत्यस्मिन्कर्मणि " त्वं सोम प्रचिकितः" "त्वया हि नः पितरः" इत्येते पुरोनुवाक्ये । तत्रैव 'त्वं सोम पितृभिः" इति याज्या । "पितृभ्यो बर्हिषद्भयो धानाः" इत्यस्मिन्कर्मणि " बर्हिषदः पितर ऊत्यर्वाक्' "आऽहं पितॄन्सुविदत्रान्' इत्येते पुरोनुवाक्ये । "उपहूताः पितरः" इत्येषा याज्या । "पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थम्' इत्यत्र "अग्निष्वात्ताः पितरः सोम्यासः" इत्येषा पुरोनुवाक्या । ता एतास्त्वं सोम प्रचिकित इत्याद्याः सप्त संहितायाम् । "उशन्तस्त्वा" इत्यनुवाके व्याख्याताः ।

अथ द्वितीयां पुरोनुवाक्यामाह -

अग्निष्वात्तानृतुमतो हवामहे । नराशꣳसे सोमपीथं य आशुः । ते नो अर्वन्तः सुहवा भवन्तु । शं नो भवन्तु द्विपदे शं चतुष्पदे, इति ।

अग्निष्वात्ता अग्निष्वात्तनामकाः पितरः पितृविशेषाः । ते च चातुर्मास्यगतपितृयज्ञब्राह्मणे स्पष्टमभिहिताः-"ये वा अयज्वानो गृहमेधिनः । ते पितरोऽग्निष्वात्ता" इति । मनुष्यजन्मन्यग्निष्टोमादियागमकृत्वा स्मार्तकर्मनिष्ठाः सन्तो मृत्वा च पितृत्वं गतास्तानग्निष्वात्तानृतुमत ऋतुरूपेण यज्ञकालेन युक्तान्हवामह आह्वयामः । ये पितरो नराशंसे नरैः शंसनीये यज्ञे सोमादिरूपेण सोमपीथं सोमपानमाशुः प्राप्तवन्तस्ते पितरो नोऽस्माकं सुहवाः सुखेनाऽऽह्वातुं शक्या अर्वन्त शीघ्रगतिमन्तो भवन्तु । नोऽस्माकं द्विपदे मनुष्याय शं सुखकरा भवन्तु । चतुष्पदे पशवे च शं भवन्तु ।

अथ विकल्पितामन्यां द्वितीयां पुरोनुवाक्यामाह -

ये अग्निष्वात्ता येऽनग्निष्वात्ताः (१) । अꣳहो मुचः पितरः सोम्यासः । परेऽवरेऽमृतासो भवन्तः । अधिब्रुवन्तु ते अवन्त्वस्मान् इति ।

अग्निष्वात्ताः पूर्वोक्तलक्षणाः पितरो ये सन्ति ये च यागं कृत्वा पितृलोकं प्राप्ता अनग्निष्वात्ताः । पितरस्ते सर्वेऽप्यंहोमुचः पापान्मोचयितारः सोम्यासः सोमपानार्हाः परे कृतयागा अवरे यागरहिता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्विधा अप्यमृतासो मनुष्यवच्छीघ्रमरणरहितास्ते भवन्तः पितरोऽधिब्रुवन्तु देवानां समीपे यजमानमधिकं ब्रुवन्तु । यजमानानस्मानवन्तु ।

अथ तत्रैव याज्यामाह –

वान्यायै दुग्धे जुषमाणाः करम्भम् । उदीराणा अवरे परे च । अग्निष्वात्ता ऋतुभिः संविदानाः । इन्द्रवन्तो हविरिदं जुषन्ताम्, इति ।

अग्निष्वात्तनामकाः पितरो मदीयमिदं हविर्जुषन्ताम् । कीदृशा अग्निष्वात्ता वान्यायै मृतवत्साया धेनोर्दुग्धे प्रक्षिप्तं करम्भं यवपिष्टरूपं मन्थं जुषमाणाः । तेषु मध्ये ये पर उत्कृष्टा ये चावरे निकृष्टास्ते सर्वेऽप्युदीराणा अस्मिन्कर्मण्युत्कर्षेण प्राप्ता ऋतुभिर्यज्ञकालाभिमानिदेवैः सह संविदाना ऐकमत्यं गता इन्द्रवतः परमैश्वर्ययज्ञकालाभिमानिदेवैः सह संविदाना ऐकमत्यं गता इन्द्रवतः । परमैश्वर्ययुक्तेन पितृराजेन यमेन संयुक्ताः ।

अत्र शाखान्तरानुसारेण हविरन्यतरं सूत्रकार उदाजहार– "अग्नये कव्यवाहनाय यमाय वा मन्थम्" इति । तत्र द्वयोः पुरोनुवाक्ययोरेकस्या याज्यायाश्च प्रतीकानि दर्शयति –

यदग्ने कव्यवाहन त्वमग्न ईडितो जातवेदः । मातलीकव्यैः, इति ।

एतास्तिस्रः "उशन्तस्त्वा हवामहे" इत्यनुवाक्ये संहितायां व्याख्याताः । अथ तत्रैव स्विष्टकृतः पुरोनुवाक्यामाह –

ये तातृपुर्देवत्रा जेहमानाः । होत्रावृधः स्तोमतष्टासो अर्कैः । आऽग्ने याहि सुविदत्रेभिरर्वाङ् । सत्यैः कव्यैः पितृभिर्घर्मसद्भिः . इति ।

ये पितरो देवत्रा देवेषु मध्ये जेहमानाः प्रथमाना होत्रावृधो होमकर्तृन्वर्धयन्तः स्तोमतष्टासः स्तोत्ररूपैर्मन्त्रैः संस्कृताः । सन्तोऽर्कैरर्चनीयैर्हविभिस्तातृपुस्तृप्तिं गताः । हेऽग्ने तैः पितृभिः सार्धमर्वाङायाह्यस्मदभिमुख आगच्छ । कीदृशैः पितृभिः सुविदत्रेभिः सम्यगभिज्ञैः सत्यैः सत्यवादिभिः कव्यैः कव्यांख्येन पितृणामन्नेन युक्तैर्घर्मसद्भिर्घर्मे दीप्यमानेऽस्मिन्कर्मणि निवसद्भिः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ तत्रैव याज्यामाह –

हव्यवाहमजरं पुरुप्रियम् । अग्निं घृतेन हविषा सपर्यन् । उपासदं कव्यवाहं पितृणाम् । स नः प्रजां वीरवती समृण्वतु (२), इति ।

अनग्निष्वात्ता जेहमानाः सप्त च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके षष्ठाध्याये षोडशोऽनुवाकः ।। १६ ।।

अहं स्विष्टकृदाख्यमिममग्निमुपासदमुपसन्नोऽस्मि । किं कुर्वन्घृतेन हविषा सपर्यन्पूजयन् । कीदृशमग्निं हव्यवाहं देवार्थं हव्यस्य वोढारमजरं जरारहितं पुरुप्रियं पुरूणां बहूनां यजमानानां प्रियं पितृणामर्थे कव्यवाहं कव्याख्यस्य हविषो वोढारम् । स तादृशोऽग्निर्नोऽस्माकं वीरैर्भृत्यैर्युक्तां प्रजां पुत्रपौत्रादिरूपां समृण्वतु सम्यक्प्रापयतु ।

अथ विनियोगसंग्रहः–

पितृयज्ञे सामिधेनी ह्युशन्तस्त्वेति वर्णिता ।
आ नस्त्वं सोम इत्याज्यभागयोर्द्वे पुरोरुचौ ।।
पितृमत्सोमयागे तु त्वं सोम प्रेत्युभे मते ।
पुरोनुवाक्ये याज्या तु त्वं सोमेत्यादिका मता ।।
बर्हिषः पितृयागे तु बर्हिष्यादित्रयं तथा ।
अग्निष्वेति चतस्रः स्युरग्निष्वात्तयजौ तथा ।।
यदग्ने कव्यवाहेति कव्यवाहयजौ त्रयम् ।
एतौ द्वे स्विष्टकृद्यागे मन्त्रा अष्टादशेरिताः ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये षष्ठप्रपाठके षोडशोऽनुवाकः ।। १६ ।।

अथ षष्ठे सप्तदशोऽनुवाकः ।

षोडशे पितृयज्ञयाज्यानुवाक्या उक्ताः । अथ यत्पश्वन्तरं सूत्रकारेणोदाहृतम् "इन्द्राय वयोधसे पशुमालभते" इति, तत्र प्रयाजार्था मैत्रावरुणप्रैषाः सप्तदशेऽभिधीयन्ते । तत्र प्रथममन्त्रमाह –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होता यक्षदिडस्पदे । समिधानं महद्यशः । सुषमिद्धं वरेण्यम् । अग्निमिन्द्रं वयोधसम् । गायत्रीं छन्द इन्द्रियम् । त्र्यविं गां वयो दधत् । वेत्वाज्यस्य होतर्यज, इति ।

योऽयं दैव्यो होता सोऽयमिडस्पदे सोमक्रयणीपदपांसुयुक्त आहवनीये समिधानं समिन्नामकं प्रथमप्रयाजदेवं यक्षद्यजतु । कीदृशं देवं महद्यशो महतो यशसः कारणम् । सुषमिद्धं सुखेन सम्यक्प्रज्वलितम् । वरेण्यं सर्वैर्वरणीयम् । तद्देवद्वाराऽग्निं तदग्निरूपवयोधसं वय आयुष्यं धारयतीति वयोधास्तादृशमिन्द्रं पशुस्वामिनं देवं यजतु । तथा गायत्रीं छन्दश्चतुर्विंशत्यक्षरं छ (रच्छ)न्दोदेवं यजतु । ततो यजमानायेन्द्रियं चक्षुरादिपाटवं त्र्यविं गाम् , अविशब्दो मासषट्कोपलक्षक इति चतुर्थकाण्डे प्रतिपादितम्, त्रीणि मासषट्कानि यस्या गोः संयंत्र्यविस्तादृशीं गां वय आयुष्यं च दधत्संपादयतु । अयं प्रयाजदेव आज्यस्य वेतु हूयमानमाज्यं पिबतु । तदर्थं हे मानुष होतर्यज याज्यां पठ ।

अथ द्वितीयमन्त्रमाह -

होता यक्षच्छुचिव्रतम् । तनूनपातमुद्भिदम् । यं गर्भमदितिर्दधे (१) । शुचिमिन्द्रं वयोधसम् । उष्णिहं छन्द इन्द्रियम् । दित्यवाहं गां वयो दधत् । वेत्वाज्यस्य होतर्यज, इति ।

तनूनपान्नामको द्वितीयप्रयाजदेवस्तं होता यक्षद्यजतु । कीदृशं शुचिव्रतं शुद्धमेतत्कर्मरूपं व्रतं यस्य तादृशम् । उद्भिदं फलस्योद्भेत्तारमुत्पादयितारम् ।यं तनूनपादाख्यामग्निमदितिरथं भूमिर्गर्भं दधे तं यजत्वित्यन्वयः । तद्द्वारेण शुचिं शुद्धात्मानं वयोधसमिन्द्रं पशुदेवमुष्णिक्छन्दोदेवं च यजतु । तत इन्द्रियं दित्यवाहं गां द्विवर्षां गामायुष्यं च संपादयतु । वेत्वित्यादि पूर्ववत् ।

अथ तृतीयमन्त्रमाह -

होता यक्षदीडेन्यम् । ईडितं वृत्रहन्तमम् । इडाभिरीड्यꣳ सहः । सोममिन्द्रं वयोधसम् । अनुष्टुभं छन्द इन्द्रियम् । त्रिवत्सं गां वयो दधत् (२) । वेत्वाज्यस्य होतर्यज, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ईडेन्यस्तृतीयप्रयाजदेवस्तं होता यजतु । कीदृशम् । ईडितं सर्वैर्ऋत्विग्भिः स्तुतम् । वृत्रहन्तममतिशयेन वैरिघातिनम् । इडाभिरीड्यं स्तुतिपराभिर्ऋग्भिः स्तुतम् । सहो बलहेतुम् । इन्द्रमित्यादि पूर्ववत् । तस्य विशेषणं सोमं सोमपानार्हमित्यर्थः । त्रिवत्सं त्रिवर्षम् ।

अथ चतुर्थमन्त्रमाह –

होता यक्षत्सुबर्हिषदम् । पूषण्वन्तममर्त्यम् । सीदन्तं बर्हिषि प्रिये । अमृतेन्द्रं वयोधसम् । बृहतीं छन्द इन्द्रियम् । पञ्चाविं गा वयो दधत् । वेत्वाज्यस्य होतर्यज, इति ।

बर्हिःशब्देन चतुर्थप्रयाजदेव उच्यते, तं होता यक्षद्यजतु । कीदृशं पूषण्वन्तं पोषणसामर्थ्ययुक्तम । अमर्त्यं मरणरहितम् । प्रिये बर्हिषि यज्ञे सीदन्तमुपविष्टम् । अमृतशब्दो मरणराहित्यवाचीन्द्रस्य विशेषणम् । पञ्चाविं सार्धसंवत्सरद्वयोपेतम् ।

अथ पञ्चममन्त्रमाह –

होता यक्षद्व्यचस्वतीः । सुप्रायणा ऋतावृधः (३) । द्वारो देवीर्हिरण्ययीः । ब्रह्माण इन्द्रं वयोधसम् । पङ्क्तिं छन्द इहेन्द्रियम् । तुर्यवाहं गां वयो दधत् । वेत्वाज्यस्य होतर्यज, इति ।

द्वारशब्दवाच्याः पञ्चमप्रयाजदेवतास्ताश्च व्यचस्वतीर्व्याप्तिमत्योऽवकाशवत्यः सुप्रायणाः सुष्ठु प्रायणं गमनागमनरूपं यासु ता ऋतं सत्यं वर्धयन्तीस्त्यृतावृधो हिरण्ययीः । सुवर्णाभरणयुक्ता ब्रह्माणः परिवृढास्तादृशीर्होता यजतु । इन्द्रमित्यादि पूर्ववत् । [इह कर्मणि] तुर्यवाहं सार्धसंवत्सरत्रयोपेतम् ।

अथ षष्ठमन्त्रमाह–

होता यक्षत्सुपेशसे । सुशिल्पे बृहती उभे । नक्तोषासा न दर्शते । विश्वमिन्द्रं वयोधसम् । त्रिष्टुभं छन्द इन्द्रियम् (४) । षष्ठवाहं गां वयो दधत् । वेत्वाज्यस्य होतर्यज, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

नक्तोषासाशब्दवाच्ये षष्ठप्रयाजदेवते । ते च सुपेशसे शोभनरूपयुक्ते सुशिल्पे शोभनशिल्पोपेते । शिल्पशब्देन कलाविद्या उच्यन्ते । बृहती महत्यौ न दर्शते दर्शनीये च ते उभे होता यजतु । विश्वं विश्वस्वामिनम् । इन्द्रमित्यादि पूर्ववत् । षष्ठवाहं संवत्सरचतुष्टयोपेतम् ।

अथ सप्तममन्त्रमाह -

होता यक्षत्प्रचेतसा । देवानामुत्तमं यशः । होतारा दैव्या कवी । सयुजेन्द्रं वयोधसम् । जगतीं छन्द इहेन्द्रियम् । अनड्वाहं गां वयो दधत् । वेत्वाज्यस्य होतर्यज, इति ।

दैव्यौ होतारौ सप्तमप्रयाजदेवौ । तौ च प्रचेतसौ प्रकृष्टज्ञानयुक्तौ देवानां सर्वेषामुत्तमं यशः संपादयन्तौ कवी विद्वांसौ अयुजा सदैव वर्तमानौ । इह कर्मण्यनड्वाहं शकटवहनक्षमं गाम् । अन्यत्पूर्ववत् ।

अथाष्टममन्त्रमाह -

होता यक्षत्पेशस्वतीः (५) । तिस्रो देवीर्हिरण्ययीः । भारतीर्बृहतीर्महीं । पतिमिन्द्रं वयोधसम् । विराजं छन्द इहेन्द्रियम् । धेनुं गां न वयो दधत् । वेत्वाज्यस्य होतर्यज, इति ।

तिस्रो देव्योऽष्टमप्रयाजदेवताश्च पेशस्वती रूपवत्यो हिरण्ययी सुवर्णाभरणोपेताः । भारतीरितिबहुवचनेनेडासरस्वत्यावपि गृह्येते । बृहतीः प्रौढा महीः पूज्याः । पतिं पालकम् । धेनुं गां [न] नवप्रसूतिं गामपि । अन्यत्पूर्ववत् ।

[अथ] नवममन्त्रमाह -

होता यक्षत्सुरेतसम् । त्वष्टारं पुष्टिवर्धनम् । रूपाणि बिभ्रतं पृथक् । पुष्टिमिन्द्रं वयोधसम् (६) । द्विपदं छन्द इहेन्द्रियम् । उक्षाणं गां न वयो दधत् । वेत्वाज्यस्य होतर्यज, इति ।

त्वष्टृशब्देन नवमप्रयाजदेव उच्यते । स च सुरेताः शोभनरेतस्को बहुप्रजाप्रदः । शरीरस्य पुष्टिं वर्धयतीति पुष्टिवर्धनः । स च प्रतिशरीरं

Digitized by Madhuban Trust, Delhi

पृथग्विलक्षणानि रूपाणि विभ्रद्वर्तते । तादृशं देवं होता यक्षद् यजतु । पुष्टि पुष्टिप्रदमिन्द्रम् । इह कर्मण्युक्षाणं गां न सेवनक्षमं वृषभमपि । अन्यत्पूर्ववत् ।

[अथ] दशममन्त्रमाह –

होता यक्षच्छतक्रतुम् । हिरण्यपर्णमुक्थिनम् । रशनां बिभ्रतं वशिम् । भगमिन्द्रं वयोधसम् । ककुभं छन्द इहेन्द्रियम् । वशां वेहतं गा न वयो दधत् । वेत्वाज्यस्य होतर्यज, इति ।

हिरण्यवर्णशब्देन सुवर्णपर्णयुक्तो दशमप्रयाजदेवो वनस्पतिरुच्यते । स च शतक्रतुः शतसंख्याकक्रतुहेतुः । उक्थी शस्त्रोपेतो मन्त्रेण प्रशस्यमान इत्यर्थः । स च वशीं स्ववशां रशनां यूपावस्थां बिभ्रद्वर्तते तादृशं होता यजतु । भगं भाग्ययुक्तम् । वशां वन्ध्यां वेहतं गां न गर्भघातिनीं गामपि । अन्यत्पूर्ववत् ।

[अथ एकादशमन्त्रमाह –

होता यक्षत्स्वाहाकृतीः । अग्निं गृहपतिं पृथक् । वरुणं भेषजं कविम् । क्षत्रमिन्द्रं वयोधसम् । अतिच्छन्दसं छन्द इन्द्रियम् । बृहदृषभं गां वयो दधत् । वेत्वाज्यस्य होतर्यज (७), इति ।

दधे दधदृतावृध इन्द्रियं पेशस्वतीर्वधोधदसं वेत्वाज्यस्य होतर्यज सप्त च ।।

इडस्पदेऽग्निं गायत्रीं त्र्यविम् । शुचिव्रतꣳ शुचिमुष्णिहꣳ दित्यवाहम् । ईडेऽन्यꣳ सोममनुष्टुभं त्रिवत्सम् । सुबर्हिषदममृतेन्द्रं बृहतीं पञ्चाविम् । व्यचस्वतीः सुप्रायणा द्वारो ब्रह्माणः पङ्क्तिततमिहतर्य । वाहम् । सुपेशसे । विश्वमिन्द्रं त्रिष्टुभं षष्ठवाहम् । प्रचेतसा सयुजेन्द्रं जगतीमिहानड्वाहम् । पेशस्वतीस्तिस्रो भारतीः पति विराजमिह धेनुं न । सुरेतसं त्वष्टारं पुष्टिं द्विपदमिहोक्षाणं न । शतक्रतुं भगमिन्द्रं ककुभमिह वशां वेहतं गां न । स्वाहाकृतीः । क्षत्रमतिच्छन्दसं बृहदृषभं गाम् । इन्द्रियमृषिर्वसुनवदशेहेन्द्रियमष्टं नव दश गां न वयो दधत्सवतु ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
षष्ठाध्याये सप्तदशोऽनुवाकः ।। १७ ।।

स्वाहाकृतिशब्दे नैकादशप्रयाजदेव उच्यते । स च पृथग्गृहपतिः । प्रत्येकं गृहस्य पालको वरुणः पापवारकः कविर्विद्वांस्तादृशमग्नि होता यजतु । क्षत्रं बलवन्तम् । बृहत्प्रौढम् । अन्यत्पूर्ववत् ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठके सप्तदशोऽनुवाकः ।। १७ ।।

अथ षष्ठेऽष्टादशोऽनुवाकः ।

ऐन्द्रे पशावेकादश प्रयाजप्रैषाः सप्तदशेऽभिहिताः अष्टादश आप्रिनाम (मि)काः प्रयाजयाज्या उच्यन्ते । तत्र प्रथमामृचमाह-

समिद्धो अग्निः समिधा । सुषमिद्धो वरेण्यः । गायत्री छन्द इन्द्रियम् । त्र्यविर्गौर्वयो दधुः, इति ।

समिन्नामकः, प्रथमप्रयाजदेवोऽग्निः । स च समिधासमिद्यागेन सुमिद्धः सुष्ठु प्रज्वलितः । योऽयं तादृशोऽग्निर्यच्च गायत्र्याख्यं छन्दो योऽपि त्र्यविःसार्धसंवत्सरो गौस्त एते देवा इन्द्रियं चक्षुरादिपाटवं वय आयुष्यं च दधुः संपादितवन्तः ।

अथ द्वितीयामाह -

तनूनपाच्छुचिव्रतः । तनूनपाच्च सरस्वती । उष्णिक्छन्द इन्द्रियम् । दित्यवाड्गौर्वयो दधुः, इति ।

तनूनपाच्छब्देन द्वितीयप्रयाजदेव उच्यते । स च शुचिव्रतः शुद्धेन व्रतकर्मणा युक्तस्तादृशस्तनूनपाच्छरीरप्राप्तिहेतुः सरस्वती चोष्णिक्छन्दश्च दित्यवाट् संवत्सरद्वयोपेता गौश्चेत्येते देवा इन्द्रियं वयश्च संपादयन्तु ।

अथ तृतीयामाह -

इडाभिरग्निरीड्यः । सोमो देवो अमर्त्यः (१) । अनुष्टुप्छन्द इन्द्रियम् । त्रिवत्सो गौर्वयो दधुः, इति ।

इडाभिर्मन्त्रोक्ताभिः स्तुतिभिरीडयःस्तुत्य ईड्यनामकोऽ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्निस्तृतीयप्रयाजदेवो यश्चामर्त्यो मरणरहितः सोमो देवो यदप्यनुष्टुप्छन्दो योऽपि संवत्सरत्रयोपेतो गौस्त एते देवा इन्द्रियं वयश्च दधुः ।

अथ चतुर्थीमाह –

सुबर्हिरग्निः पूषण्वान् । स्तीर्णबर्हिरमर्त्यः । बृहती छन्द इन्द्रियम् । पञ्चाविर्गौर्वयो दधुः, इति ।

सुष्ठु बर्हिर्यस्यासौ सुबर्हिरितन्नामकश्चतुर्थप्रयाजेदेवोऽग्निः पूषण्वान्पूष्णा देवेन युक्तः पोषणसामर्थ्ययुक्तो वा स्तीर्णबर्हिर्वेदिप्रसारितबर्हिर्युक्तोऽमर्त्यो मरणरहितः । ईदृशो योऽग्निर्यच्च बृहती छन्दो योऽपि सार्धसंवत्सरद्वयोपेतो गौरेते देवा इन्द्रियं वयश्च दधुः ।

अथ पञ्चमीमाह –

दुरो देवीर्दिशो महीः । ब्रह्मा देवो बृहस्पतिः । पङ्क्तिश्छन्द इहेन्द्रियम् । तुर्यवाडगौर्वयो दधुः (२), इति ।

दुरः पञ्चमप्रयाजदेवतास्ताश्च देवीर्द्योतमाना दिशो दिग्रूपा महीर्महत्यः । यश्च ब्रह्मा ब्राह्मणस्वामी बृहस्पतिर्देवो यदपि पङ्क्तिश्छन्दो योऽपि सार्धसंवत्सरत्रयोपेतो गौरेते देवा इन्द्रियं वयश्च दधुः ।

अथ षष्ठीमाह –

उषे यह्वी सुपेशसा । विश्वे देवा अमर्त्यः । त्रिष्टुप्छन्द इन्द्रियम् । पष्ठवाड्गौर्वयो दधुः, इति ।

उषे षष्ठप्रयाजदेवते यह्वी प्रयतमाने सुपेशसा शोभमानरूपे । ईदृश्यौ ये देव्यौ ये चामर्त्या मरणधर्मरहिता विश्वेदेवा यच्च त्रिष्टुप्छन्दो योऽपि संवत्सरचतुष्टयोपेतो गौरेते देवा इन्द्रियं वयश्च दधुः ।

अथ सप्तमीमाह –

दैव्या होतारा भिषजा । इन्द्रेण सयुजा युजा । जगती छन्द इहेन्द्रियम् । अनड्वान्गौर्वयो दधुः, इति ।

दैव्यौ होतारौ सप्तमप्रयाजदेवौ । तौ च भिषजौ चिकित्सकाविन्द्रेण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

सयुजा सह वर्तमानौ युजा परस्परमपि संयुक्तौ । ईदृशौ यौ देवौ यच्च जगती छन्दो योऽपि शकटवहनक्षमो गौरेते देवा इन्द्रियं वयश्च दधुः ।

अथाष्टमीमाह -

तिस्र इडा सरस्वती । भारती मरुतो विशः (३) । विराट् छन्द इहेन्द्रियम् । धेनुर्गौर्न वयो दधुः, इति ।

इडा सरस्वती भारती चाष्टमप्रयाजदेवतास्तिस्रो याः सन्ति येऽपि देवानां मध्ये विशो मरुतो यदपि विराट् छन्दो नवप्रसूतिका गौरपि या विद्यत एते देवा इह कर्मणीन्द्रियं वयश्च दधुः ।

अथ नवमीमाह -

त्वष्टा तुरीपो अद्भुतः । इन्द्राग्नी पुष्टिवर्धना । द्विपाच्छन्द इहेन्द्रियम् । उक्षा गौर्न वयो दधुः, इति ।

त्वष्टा नवमप्रयाजदेवः । स च तुरीयः शीघ्रप्राप्तिमानद्भुत आश्चर्यविग्रहस्तादृशो यो देवो यौ च पुष्टिवर्धनापुष्टि वर्धयितारौ ताविन्द्राग्नी यदपि द्विपात्पादद्वयोपेतश्छन्द उक्षा गौर्न सेचनसमर्थो गौरपि यो विद्यते ते देवा इह कर्मणीन्द्रियं वयश्च दधुः ।

अथ दशमीमाह -

शमिता नो वनस्पतिः । सविता प्रसुवन्भगम् । ककुच्छन्द इहेन्द्रियम् । वशा वेहद्गौर्न वयो दधुः, इति ।

वनस्पतिर्दशमप्रयाजदेवः । स च नोऽस्माकं शमिता सर्वोपद्रवशमनहेतुः । तादृशो यो देवो यश्च सविता भगं सौभाग्यं प्रसुवन्प्रेरयन्वर्तते गौर्न गौरपि वेहद्गर्भघातिनी सती वशा वन्ध्या या विद्यत एते देवा इन्द्रियं वयश्च दधुः ।

अथैकादशीमाह -

स्वाहा यज्ञं वरुणः । सुक्षत्रो भेषजं करत् । अतिच्छन्दा-श्छन्द इन्द्रियम् । बृहदृषभो गौर्वयो दधुः (४), इति ।

अमर्त्यस्तुर्यवाड् गौर्वयो दधुर्विशो वशा वेहद्गौर्न वयो दधुश्चत्वारि च ।

Digitized by Madhuban Trust, Delhi

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
षष्ठाध्यायेऽष्टादशोऽनुवाकः ।। १८ ।।

स्वाहाकाराख्य एकादशप्रयाजदेवो यज्ञं निष्पादयति । स च वरुणोऽनिष्टवारकः सुक्षत्रः शोभनबलोपेतो भेषजं करदौषधं करोति । तादृशो यो देवो यच्चातिच्छन्दा(न्दआ)ख्यं छन्दोऽपि प्रौढ ऋषभो गौरेते देवा इन्द्रियं वयश्च दधुः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठकेऽष्टादशोऽनुवाकः ।। १८ ।।

अथ षष्ठ एकोनविंशोऽनुवाकः ।

ऐन्द्रस्य पशोः प्रयाजयाज्या अष्टादशेऽभिहिताः । एकोनविंशे वपापुरोडाशहविषां याज्यानुवाक्या उच्यन्ते । तत्र वपायाः पुरोनुवाक्यामाह –

वसन्तेनर्तुना देवाः । वसवस्त्रिवृता स्तुतम् । रथंतरेण तेजसा । हविरिन्द्रे वयो दधुः, इति ।

वसन्ताख्येनर्तुदेवेन सहिता वसवो देवा इन्द्रे हविरिन्द्रं समर्प्यमाणं वय आयुष्यं च दधुः संपादितवन्तः । कीदृशं हविस्त्रिवृदाख्येन स्तोमेन स्तुतम् । तथा तेजसा तेजस्विना रथंतराख्येन (ण) साम्ना स्तुतम् ।

[अथ] वपायाज्यामाह –

ग्रीष्मेण देवा ऋतुना । रुद्राः पञ्चदशे स्तुतम् । बृहता यशसा बलम् । हविरिन्द्रे वयो दधुः, इति ।

ग्रीष्मर्तुना सहिता इन्द्रः पञ्चदशस्तोमे यशस्विना बृहत्साम्ना स्तुतं बलकरं हविर्वयश्चेन्द्रे दधुः ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

वर्षाभिर्ऋतुनाऽऽदित्याः । स्तोमे सप्तदशे स्तुतम् (१), वैरूपेण विशौजसा । हविरिन्द्रे वयो दधुः, इति ।

वर्षर्तुना सहिता आदित्याः सप्तदशस्तोमे वैश्यानुग्राहकेणौजस्विना वैरुपसाम्ना स्तुतं हविर्वयश्चेन्द्रे दधुः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुरोडाशस्य याज्यामाह -

शारदेनर्तुना देवाः । एकवि ँश ऋभवः स्तुतम् । वैराजेन श्रिया श्रियम् । हविरिन्द्रे वयो दधुः, इति ।

शरदृतुसहिता ऋभुनामका देवा एकविंशस्तोमे श्रिया श्रीपदेन वैराजेन साम्ना स्तुतं श्रियं हविर्वयश्चेन्द्रे दधुः ।

अथ हविषः पुरोनुवाक्यामाह -

हेमन्तेनर्तुना देवाः । मरुः स्त्रिणवे स्तुतम् । बलेन शक्वरीः सहः । हविरिन्द्रे वयो दधुः, इति ।

हेमन्तर्तुसहिता मरुन्नामका देवास्त्रिणवस्तोमे बलेन बलप्रदेन शक्वरीः शकरसाम्ना स्तुतं बलप्रदं हविर्वयश्चेन्द्रे दधुः ।

[अथ] हविषो याज्यामाह -

शैशिरेणर्तुना देवाः । त्रयस्त्रि ँ शेऽमृत ँस्तुतम् । सत्येन रेवतीः क्षत्रम् । हविरिन्द्रे वयो दधुः (२), इति ।

स्तोमे सप्तदशे स्तुत ँसहो हविरिन्द्रे वयो दधुश्चत्वारि च । वसन्तेन ग्रीष्मेण वर्षाभिः शारदेन हेमन्तेन शैशिरेण षट् ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
षष्ठाध्याय एकोनविंशोऽनुवाकः ।। १९ ।।

शैशिरर्तुसहिता देवास्त्रयस्त्रिंशाख्ये स्तोमे सत्येन सत्यवाक्येन हेतुना रेवती रेवत्याख्येन साम्ना स्तुतममृतमविनश्वरं क्षत्रं बलप्रदं हविर्वयश्चेन्द्रे दधुः ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
षष्ठप्रपाठक एकोनविंशोऽनुवाकः ।। १९ ।।

अथ षष्ठे विंशोऽनुवाकः ।

एकोनविंशे वपापुरोडाशहविषां याज्यानुवाक्या उक्ता । अथ विंशेऽनूयाजानां मैत्रावरुणप्रैषा उच्यन्ते । तत्र प्रथममन्त्रमाह -

देवं बर्हिरिन्द्रं वयोधसम् । देवं देवमवर्धयत् । गायत्रिया

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छन्दसेन्द्रियम्। तेज इन्द्रे वयो दधत्। वसुवने वसुधेयस्य वेतु यज, इति।

बर्हिःशब्देन प्रथमानूयाजदेवस्वरूपमुच्यते । तच्च देवं द्योतनशीलम् । योऽयमिन्द्रो वयोधा आयुष्या (ष्य) धारकस्तं देवमिन्द्रं पूर्वोक्तदेवनशीलं बर्हिःस्वरूपमवर्धयद्वर्धितवत् । यच्च गायत्र्याख्येन (ण) च्छन्दसा सहितं सदिन्द्रियं चक्षुरादिपाटवं तेजः शरीरकान्तिर्वय आयुष्यं च दधत्संपादयति । वसुधेयस्य धनधारकस्य देवस्य वसुवने धनदाननिमित्तमयं प्रथमानुयाजदेवो वेत्वाज्यं पिबतु । तदर्थं हे होतर्यज याज्यां पठ ।

अथ द्वितीयमन्त्रमाह -

देवीर्द्वारो देवमिन्द्रं वयोधसम् । देवीर्देवमवर्धयन् । उष्णिहा छन्दसेन्द्रियम् । प्राणमिन्द्रे वयो दधत्। वसुवने वसुधेयस्य वियन्तु यज (१) इति।

द्वारशब्दवाच्या देव्यो द्वितीयानुयाजदेवता याः सन्ति ता देव्यो देवं द्योतमानं वयोधसमिन्द्रं देवमवर्धयन् । ताश्च देव्य उष्णिहा छन्दसा सहेन्द्रियपाटवं प्राणं स्थैर्यमायुष्यं चेन्द्रे संपादयन्तु ।

अथ तृतीयमन्त्रमाह -

देवी देवं वयोधसम् । उषे इन्द्रमवर्धताम् । अनुष्टुभा छन्दसेन्द्रियम् । वाचमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य वीतां, यज, इति।

उषे देवी उषाख्ये देव्यौ तृतीयानुयाजदेवते । ते उभे वयोधसमिन्द्रं देवं वर्धितवत्यौ । ते चानुष्टुभा छन्दसा सहेन्द्रियं वाग्वयांसीन्द्रे संपादयतः ।

अथ चतुर्थमन्त्रमाह -

देवी जोष्ट्री देवमिन्द्रं वयोधसम् । देवी देवमवर्धताम्। बृहत्या छन्दसेन्द्रियम् । श्रोत्रमिन्द्रे वयो दधत्। वसुवने वसुधेयस्य वीतां यज (२), इति।

जोष्ट्री देवी जोष्ट्र्याख्ये देव्यौ ये विद्येते ते देव्यौ द्योतमानं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वयोधसमिन्द्रं देवं वर्धितवत्यौ । ते च बृहत्या छन्दसा सहेन्द्रियं श्रोत्रवयांसीन्द्रे संपादयतः । इन्द्रियशब्दः सामान्यवाची वाक्श्रोत्रादयो विशेषवाचिनः ।

अथ पञ्चममन्त्रमाह -

देवी ऊर्जाहुती देवमिन्द्रं वयोधसम् । देवी देवमवर्धताम् । पङ्क्त्या छन्दसेन्द्रियम् । शुक्रमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य वीतां यज, इति ।

ऊर्जाहुत्याख्ये ये देव्यौ विद्यते ते देव्यौ द्योतमानं वयोधसमिन्द्रं देवं वर्धितवत्यौ । ते च पङ्क्त्या छन्दसा सहेन्द्रियं शुक्रं, वयांसीन्द्रे संपादयतः । शुक्रशब्देन दीप्तिरुच्यते ।

अथ षष्ठमन्त्रमाह-

देवा दैव्या होतारा देवमिन्द्रं वयोधसम् । देवा देवमवर्धताम् । त्रिष्टुभा छन्दसेन्द्रियम् । त्विषिमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य वीतां यज (३), इति ।

दैव्यहोतृनामकौ यौ देवौ विद्येते तौ देवौ द्योतमानं वयोधसमिन्द्रं देवं वर्धितवन्तौ । तौ च त्रिष्टुभा छन्दसा सहेन्द्रियं त्विषि वयांसीन्द्रे दधतुः । पूर्वत्र शुक्रशब्देन शरीरकान्तिरुक्ता, इह त्विषिशब्देन रश्मिरुच्यते ।

अथ सप्तममन्त्रमाह -

देवीस्तिस्रस्तिस्रो देवीर्वयोधसम् । पतिमिन्द्रमवर्धयन् । जगत्या छन्दसेन्द्रियम् । बलमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य वियन्तु यज, इति ।

या देव्यस्तिस्रस्त्रिसंख्याका एकैकस्यास्त्रिमूर्तित्वात्पुनरपि तिस्र इत्युच्यन्ते । ताः सर्वा वयोधसं पालकमिन्द्रं वर्धितवत्यः । पुनर्जगत्या छन्दसा सहेन्द्रियं बलं वयांसीन्द्रे संपादयन्ति ।

अथाष्टममन्त्रमाह -

देवो नराशꣳसो देवमिन्द्रं वयोधसम् । देवो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवमवर्धयत् । विराजा छन्दसेन्द्रियम् । रेत इन्द्रे वयो दधत् । वसुवनै वसुधेयस्य वेतु यज (४), इति ।

नराशंसाख्यो यो देवोऽस्ति स देवो द्योतमानं वयोधसमिन्द्रं देवं वर्धितवान् । स च विराजा छन्दसा युक्त इन्द्रियं रेतो वयांसीन्द्रे संपादयति ।

[अथ] नवममन्त्रमाह -

देवो वनस्पतिर्देवमिन्द्रं वयोधसम् देवो देवमवर्धयत् । द्विपदा छन्दसेन्द्रियम् । भगमिन्द्रे वयो दधत् । वसुवनै वसुधेयस्य वेतु यज, इति ।

वनस्पत्याख्यो यो देवोऽस्ति स देवो द्योतमानं वयोधसमिन्द्रं वर्धितवान् । स च द्विपदा छन्दसा सहेन्द्रियसौभाग्यवयांसीन्द्रे संपादयति ।

अथ दशममन्त्रमाह -

देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसम् देवो देवमवर्धयत् । ककुभा छन्दसेन्द्रियम् । यश इन्द्रे वयो दधत् । वसुवनै वसुधेयस्य वेतु यज, इति ।

वारितीनां जलप्राप्तीनां संबन्धि बर्हिराख्यं यद्देवस्वरूपमस्ति तदिदं बर्हिः स्वरूपं द्योतमानं वयोधसमिन्द्रं देवं वर्धितवत् । तच्च ककुभा छन्दसा सहेन्द्रिययशोवयांसीन्द्रे संपादयति ।

अथैकादशमन्त्रमाह -

देवो अग्निः स्विष्टकृद्देवमिन्द्रं वयोधसम् । देवो देवमवर्धयत् । अतिच्छन्दसाच्छन्दसेन्द्रियम् । क्षत्रमिन्द्रेवयो दधत् । वसुवनै वसुधेयस्य वेतु यज (४), इति ।

वियन्तु यज वीतां यज वीतां यज वेतु यज वेतु यज पञ्च च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके षष्ठाध्याये विंशोऽनुवाकः ।। २० ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्विष्टकृदाख्योऽग्निर्देवो योऽस्ति स देवो द्योतमानं वयोधसमिन्द्रं देवं वर्धितवान् । स चातिच्छन्दोरूपेणच्छन्दसा सहेन्द्रियबलवयांसीन्द्रे संपादयति । अतो धनधारकस्य धनदाननिमित्तमयं स्विष्टकृद्देव आज्यं वेतु पिबतु । तदर्थं हे होतर्यज याज्यां पठ ।।

इति श्रीमत्सायणाचार्यविरचिते द्वितीयकाण्डे
षष्ठप्रपाठके विंशोऽनुवाकः ।। २० ।।

देवं बर्हिर्गायत्रिया तेजः । देवीर्द्वारं उष्णिहा प्राणम् । देवी देवमुषे अनुष्टुभा वाचम् । देवी जोष्ट्री बृहत्या श्रोत्रम् । देवी ऊर्जाहुती पङ्क्त्या शुक्रम् । देवा दैव्या होतारा त्रिष्टुभा त्विषिम् । देवीस्तिस्रस्तिस्रो देवीः पतिं जगत्या बलम् । देवो नराशꣳसो विराजा रेतः । देवो वनस्पतिर्द्विपदा भगम् । देवं बर्हिर्वारितीनां ककुभा यशः । देवो अग्निः स्विष्टकृदतिच्छन्दसा क्षत्रम् । वेतु वियन्तु चतुर्वीतामेको वियन्तु चतुर्वेतु । अवर्धयदवर्धयश्चतुरवर्धतामेकोऽवर्धयश्चतुरवर्धयत् ।

स्वाद्वीं त्वा सोमः सुरावन्तꣳसीसेन मित्रोऽसि यद्देवा होता यक्षत्समिधेन्द्रꣳसमिद्ध इन्द्र आचर्षणि प्रा देवं बर्हिरिन्द्रꣳसुदेवꣳहोता यक्षत्समिधाऽग्निꣳसमिद्धो अग्निरश्विनाऽश्विना हविरिन्द्रियं देवं बर्हिः सरस्वत्यग्निमद्योशन्तो होता यक्षदिडस्पदे समिद्धो अग्निः समिधा वन्तेन देवं बर्हिरिन्द्रे वयोधसं वि ꣳशतिः ।

स्वाद्वीं त्वामी मित्रोऽस्यवभृथ पुरंदरो होता यक्षदिडस्पदे समिद्धो अग्निरश्विना देवी ऊर्जाहुती वेत्वाज्यस्य वैरूपेण विशौजसा षण्णवतिः ।

स्वाद्वीं त्वाऽमी मदन्त पितरः साम्राज्याय पूतं पवित्रेणवाऽऽज्यमुषासानक्ता वदरैरधातामश्विना हविरिन्द्रियं देव इन्द्रो वनस्पतिः षष्ठवाहं । गां देवी देवं वयोधसं चतुर्नवतिः ।

अच्छिन्नं तन्तुꣳहोता यक्षत्सुपेशसो वरुणः क्षत्रमिन्द्रियꣳहोता यक्षदिडस्पदे वैरूपेण विशौजसा षडशीतिः ।

अस्य प्रपाठकस्यानुवाकार्थसंग्रहः-

ग्रहा उपस्थितिर्होम उपहोमोऽभिषेचनम् ।
तथाऽवभृथ ऐन्द्रे तु पशौ चत्वार ईरिताः ।। १ ।।
पशुत्रयेऽथ चत्वारः सूक्तवाके त्वनन्तरः ।
पितृयज्ञे तूत्तरः स्यात्पशावैन्द्रे चतुष्टयम् ।। २ ।।
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ।। ३ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये षष्ठः प्रपाठकः समाप्तः ॥ ६ ॥

(मूलक्रमेण-अष्ट. २ अध्या. ६ (१४) अनु. २० (१४७) ।

(भाष्यक्रमेण-का. २ प्रपा. ६ (१४) अनु. २० (१४७) ।

अथ द्वितीयकाण्डे सप्तमप्रपाठकारम्भः ।

तत्र प्रथमोऽनुवाकः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
षष्ठे प्रपाठके सौत्रामणिः कौकिल्युदीरिता ।
सवनामान एकाहाः कथ्यन्ते सप्तमे स्फुटम् ॥ २ ॥

सूयत ईश्वरत्वेनाभिषिच्यत एष्विति सवा एकाहविशेषाः तत्राऽऽदौ बृहस्पतिसव उच्यते । तस्मिंश्च बृहस्पतिसवे चोदकप्राप्तां स्त्रिवृदादिस्तोमान्द्वादशस्वपि स्तोत्रेषु बाधितुमेकं स्तोमं विधत्ते-

हरिः ॐ ।

त्रिवृत्स्तोमो भवति । ब्रह्मवर्चसं वै त्रिवृत् । ब्रह्मवर्चसमेवावरुन्धे, इति ।

प्रकृतौ बहिष्पवमानस्तोत्रे त्रिवृत्स्तोमश्चतुर्ष्वाज्यस्तोत्रेषु माध्यंदिनपवमानस्तोत्रे च पञ्चदशस्तोमश्चतुर्षु पृष्ठस्तोत्रेष्वार्भवपवमानस्तोत्रे च सप्तदशस्तोमो यज्ञायज्ञीयस्तोत्र एकविंशस्तोमस्तान्बाधित्वा सर्वेषु स्तोत्रेषु त्रिवृत्स्तोम एकः कर्तव्यः । तस्य ब्रह्मवर्चसहेतुत्वाद्ब्रह्मवर्चसप्राप्तिर्भवति ।

सोमयागसंस्थाविशेषं विधत्ते -

अग्निष्टोमः सोमो भवति । ब्रह्मवर्चसं वा अग्निष्टोमः । ब्रह्मवर्चसमेवावरुन्धे, इति ।

पृष्ठस्तोत्रे विकल्पितबृहत्साम्नव्यावृत्त्यर्थं रथंतरसाम विधत्ते-

रथंतर सामं भवति । ब्रह्मवर्चसं वै रथंतरम् । ब्रह्मवर्चसमेवावरुन्धे, इति ।

Digitized by Madhuban Trust, Delhi

होतरि कंचिद्विशेषं विधत्ते –

परिस्रजी होता भवति (१)। अरुणो मिर्मिरस्त्रिशुक्रः एतद्वै ब्रह्मवर्चसस्य रूपम्। रूपेणैव ब्रह्मवर्चसमवरुन्धे, इति।

परिस्रजी खलतिः, शिरसि स्रगाकारेण परित एव केशा न तु मध्य इत्यर्थः । अरुणः संध्यावर्णः । मिर्मिरः पुनः पुनरतिवेगेन चक्षुर्मीलनयुक्तः । त्रिशुक्रस्त्रिषु वेदेषु शुद्धो मातृवंशपितृवंशनिजाचारेषु वा शुद्धः . यदेतद् द्विज वेशस्य लक्षणं खलत्यादि, यच्च त्रिशुक्रत्वं तदुभयमपि ब्रह्मवर्चसस्वरूपम् । अतस्तदनुकूलेन रूपेण ब्रह्मवर्चसं प्राप्नोति ।

बृहस्पतिसवस्योत्पत्तिविधिमुक्त्वा प्रयोगं विधत्ते –

बृहस्पतिरकामयत देवानां पुरोधां गच्छेयमिति स एतं बृहस्पतिसवमपश्यत्। तमाहरत्। तेनायजत। ततो वै स देवानां पुरोधामगच्छत्। यःपुरोधाकामः स्यात्। स बृहस्पतिसवेन यजेत (२)। पुरोधामेव गच्छति, इति।

बृहस्पतिः पुरोधां देवगुरुत्वलक्षणं मुख्यत्वं पौरोहित्यं वा । दक्षिणायां विशेषं विधत्ते –

तस्य प्रातः सवने सन्नेषु नाराशꣳसेषु। एकादशदक्षिणा नीयन्ते। एकादश माध्यंदिने सवने सन्नेषु नाराशꣳसेषु। एकादश तृतीयसवने सन्नेषु नाराशꣳसेषु। त्रयस्त्रिꣳशत्संपद्यन्ते। त्रयस्त्रिꣳशद्वै देवताः। देवता एवावरुन्धे, इति।

भक्षिताप्यायितचमसानराशंसास्तेषुदक्षिणस्य हविर्धानस्याधस्तात्सन्नेषु सत्स्वेकादश गावो दक्षिणात्वेन नीयन्ते दातव्याः । एवमुत्तरयोरपि सवनयोस्ता मिलित्वा त्रयस्त्रिंशत्संख्यया देवतासाम्यात्तत्प्रीतिहेतवो भवन्ति – "ये देवा दिव्येकादशस्य" इति मन्त्रे त्रयस्त्रिंशद्देवा आम्नाताः ।

दक्षिणायामपरं विशेषाह –

अश्वश्चतुस्त्रिꣳशः। प्राजापत्यो वा अश्वः (३)।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिश्चतुस्त्रिँशो देवतानाम् । यावतीरेव देवताः । ता एवावरुन्धे, इति ।

पूर्वोक्तगवापेक्षया चतुस्त्रिंशत्संख्यापूरकोऽश्वो दातव्यः । प्रजापतिजन्यत्वात्प्राजापत्यत्वम् । प्रजापतिश्च पूर्वोक्तदेवतापेक्षया चतुस्त्रिंशः । अतोऽश्वदानेन सर्वदेवताप्राप्तिर्भवति ।

एतस्य कर्मणः सवत्वादभिषेकं विधत्ते -

कृष्णाजिनेऽभिषिञ्चति । ब्रह्मणो वा एतद्रूपम् । यत्कृष्णाजिनम् । ब्रह्मवर्चसेनैवैनँसमर्धयति, इति ।

कृष्णाजिनमास्तीर्य तत्रोपविष्टं यजमानमभिषिञ्चेत् कृष्णमृगरूपत्वसाधारणत्वाद्ब्रह्मरूपत्वम् । तेन ब्रह्मवर्चससमृद्धिः ।

अभिषेकद्रव्यं विधत्ते -

आज्येनाभिषिञ्चति । तेजो वा आज्यम् । तेज एवास्मिन्दधाति (४), इति ।

होता भवति यजेत वा अश्वौ दधाति ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये प्रथमोऽनुवाकः ।। १ ।।

आज्यस्य स्निग्धत्वात्तेजस्त्वम् ।।

अत्र मीमांसा । चतुर्थाध्यायस्य तृतीयपादे चिन्तितम् -

इष्ट्वा तु वाजपेयेन बृहस्पतिसवं यजेत् ।
कालं वा बोधयेद्वाक्यमुताङ्गत्वस्य बोधकम् ।।
क्त्वाश्रुत्या भाति कालोऽत्र मैवमङ्गत्वबोधनम् ।
श्रुतेर्मुख्यं प्रक्रिया च तथा सत्यनुगृह्यते ।।

इदमाम्नायते -"वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत् । अग्निं चित्वा सौत्रामण्या यजेत" इति । तत्रेष्ट्वेति क्त्वाप्रत्ययो वाजपेयस्य पूर्वकालिकतां ब्रूते । तस्माद्वाक्यमिदं बृहस्पतिसवस्योत्तरकालीनतां बोधयतीति चेन्मैवम् । वाजपेयाङ्गत्वबोधनमेव क्त्वाश्रुतेर्मुख्योऽर्थः । "समानकर्तृकयोः पूर्वकाले" इति सूत्रेण क्रियाद्वयस्यैककर्तृकतायां तद्विधानात् । यद्यपि सूत्रे पूर्वकाले इत्युक्तम्, तथाऽपि तन्न नियतं मुखं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्यादाय स्वपितीत्यत्र कालैक्येऽपि प्रयोगदर्शनात् । वाजपेयप्रकरणमप्यङ्गत्वेन गृह्यते । अन्यथा त्वप्रकृते बृहस्पतिसवे कालविधानात्प्रकरणं बाध्येत । अङ्गत्वे कर्मान्तरत्वेन प्रसिद्धबृहस्पतिसवत्वाभावात्तच्छब्दोऽनुपपन्न इति चेन्न । मासाग्निहोत्रन्यायेन तद्धर्मातिदेशार्थत्वात् । तस्माद्वाक्यमिदमङ्गत्वबोधकम् । अग्निं चित्वेत्यत्राप्येवं योजनीयम् ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके प्रथमोऽनुवाकः ।। १ ।।

अथ सप्तमे द्वितीयोऽनुवाकः ।

प्रथमे बृहस्पतिसवोऽभिहितः । द्वितीये वैश्यसवोऽभिधीयते । स च सूत्रकारेण स्पष्टमभिहितः-"अथ सवानां व्याख्यातो बृहस्पतिसवः । वैश्यः पुष्टिकाम आग्नेयादीनि सप्त हवींषि निर्वपति । पृश्निः षष्ठौही मारुत्यालभ्यते । तस्याः पुरस्तात्स्विष्टकृतो यजमानायतन ऋषभचर्म प्राचीनग्रीवमुत्तरलोममास्तीर्य तस्मिन्नासीनं यजमानं दध्नाऽभिषिञ्चति" इति । तत्र प्रथमं हविर्विधत्ते -

यदा॑ग्ने॒यो भव॑ति । अ॒ग्निमु॑खा॒ ह्यृ॒धिः॑र्द्धिः, इति ।

आग्नेयोऽष्टाकपालः कर्तव्यः, समृद्धेरग्निपूर्वकत्वात् । आदावाग्नेयेन तत्समृद्धं कर्म भवति ।

द्वितीयं हविर्विधत्ते -

अथ॒ यत्पौ॒ष्णः । पुष्टि॒र्वै पू॒षा । पुष्टि॒र्वैश्य॑स्य । पुष्टि॑मे॒वाव॑रुन्धे, इति ।

पौष्णश्चरु कर्तव्यः पूषादेवतायाः पुष्टिहेतुत्वात् । वैश्यस्य पुष्टिकामत्वात्पुष्टिमेव प्राप्नोति ।

अथ तृतीयं हविर्विधत्ते -

प्र॒स॒वाय॑ सावि॒त्रः, इति ।

सावित्रोऽष्टाकपालः पुरोडशः कार्यः । स च सवितुः प्रसवाय प्रेरणाय संपद्यते ।

चतुर्थं हविर्विधत्ते -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ यत्वाष्ट्रः । त्वष्टा हि रूपाणि विकरोति, इति ।

अष्टाकपालस्त्वाष्ट्रः कार्यः । तस्मात्त्वष्टा निषिक्ते रेतसि विविधानि रूपाणि करोति ।

पञ्चमं हविर्विधत्ते –

निर्वरुणत्वाय वारुणः (१) । अथो य एव कश्च सन्त्सूयते । स हि वारुणः, इति ।

अष्टाकपालो वारुणः कार्यः । स च निर्वरुणत्वाय वरुणपाशराहित्याय संपद्यते । अपि च पूर्वं यः को ह्यल्पः पुरुषः सन्सूपतेऽभिषिच्यते । स हि तदा वारुणो वरुणेनानुगृहीत इत्युच्यते । तस्माद्वारुणयागोऽभिषेकयोग्यः ।

षष्ठं हविर्विधत्ते –

अथ यद्वैश्वदेवः । वैश्वदेवो हि वैश्यः, इति ।

एकादशकपालो वैश्वदेवः कार्यो यस्माद्वैश्यो विश्वैर्देवैः सह प्रजापतेर्मध्यभागादुत्पन्नः . तं विश्वे देवता अन्वसृज्यन्त । "जगती छन्दो वैरूपं साम वैश्यो मनुष्याणाम्" .इति श्रुत्यन्तरविधानात् । ततस्तदीयत्वाद्वैश्वदेवस्तत्र योग्यः ।

सप्तमं हविर्विधत्ते –

अथ यन्मारुतः । मारुतो हि वैश्यः, इति ।

एकादशकपालो मारुतः कार्यः । मरुता देवविट्त्वेन वैश्ययागे योग्यत्वात् । मरुतां विटत्वम् "मारुतो वै देवानां विशः" इति विप्रसिद्धश्रुतेः ।

अधिकशङ्कानिवृत्तये हविःसंख्या दर्शयति –

सप्तैतानि हवीꣳषि भवन्ति ।

सप्त गणा वै मरुतः, इति ।

"ईदृङ् चान्यादृङ् च" इत्यादयः सप्त गणाः ।

अथ पशुं विधत्ते –

पृश्निः षष्ठौही मारुत्यालभ्यते । विड्वै मरुतः, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पृश्निः श्वेतवर्णा षष्ठौही चतुर्वर्षा । तादृशी काचिदजा मरुद्देवताकाऽऽलब्धव्या ।

अथाभिषेककालविधिमुन्नयति –

विशं एवैतन्मध्यतोऽभिषिंच्यते । तस्माद्वा एष विशः प्रियः । विशो हि मध्यतोऽषिच्यते, इति ।

एतस्य पशोर्मध्ये स्विष्टकृतः पुरस्तादभिषिञ्चेदिति विधिरुन्नेयः । एवं सति विशः प्रजाया मध्य एतदभिषेचनं कृतं भवति । यस्माद्विशो मध्येऽभिषेकः कृतस्तस्मादेवैष वैश्यः सर्वानुष्ठायी विशां प्रियो भवति ।

अभिषेकार्थमासनं विधत्ते –

ऋषभचर्मेऽध्यभिषिंञ्चति । स हि प्रजनयिता, इति ।

यस्मादृषभः प्रजोत्पादकस्तस्मात्तदीयस्य चर्मणि पर्यभिषिञ्चेत् । अभिषेकद्रव्यं विधत्ते –

दध्नाऽभिषिंञ्चति । ऊर्ग्वा अन्नाद्यं दधिं । ऊर्जैवेनमन्नाद्येन समर्धयति (२), इति ।

वारुणो विड्वै मरुतोऽष्टौ चं ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये द्वितीयोऽनुवाकः ।। २ ।।

दध्नो रसरूपत्वात्तादृशेनान्नेन वैश्यं समर्धयति ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके द्वितीयोऽनुवाकः ।। २ ।।

अथ सप्तमे तृतीयोऽनुवाकः ।

द्वितीये वैश्यसवोऽभिहितः । तृतीये ब्राह्मणसवोऽभिधीयते । स च सूत्रकारेण स्पष्टीकृतः-"ब्राह्मणो ब्रह्मवर्चसकाम आग्नेयादीन्यष्टौ हवींषि निर्वपति पुरस्तात्स्विष्टकृतो हिरण्येन घृतमुत्पूय तेन कृष्णाजिन आसीनमभिषिञ्चति" इति । तान्येतानि हवींषि विधातव्यानि । तत्र प्रथमं विधत्ते–

यदाग्नेयो भवति । आग्नेयो वै ब्राह्मणः, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आग्नेयोऽष्टाकपालः कर्तव्यः । अग्निना सह ब्राह्मणस्य प्रजापतिमुखजत्वसाम्येनाऽऽग्नेयत्वम् ।

द्वितीयं विधत्ते –

अथ यत्सौम्यः । सौम्यो हि ब्राह्मणः, इति ।

सौम्य एकादशकपालः कर्तव्यः "सोमोऽस्माकं ब्राह्मणानाꣳ राजा" इति श्रुतेः ब्राह्मणस्य सौम्यत्वम् ।

तृतीयं विधत्ते –

प्रसवायैव सावित्रः, इति ।

सावित्रोऽष्टाकपालः कार्यः । स च प्रसवायैव कल्प्यते ।

चतुर्थं विधत्ते –

अथ यद्बार्हस्पत्यः । एतद्वै ब्राह्मणस्य वाक्पतीयम्, इति ।

बार्हस्पत्योऽष्टाकपालः कर्तव्यः । यद् बृहस्पतिसंबन्धित्वमेतदेव ब्राह्मणस्य वाक्पतित्वं नाम ।

पञ्चमं विधत्ते –

अथ यदग्नीषोमीयः । आग्नेयो वै ब्राह्मणः । तौ यदा संगच्छेते (१) । अथ वीर्यावत्तरो भवति, इति ।

अग्नीषोमीय एकादशकपालः कर्तव्यः । ब्राह्मणस्याऽऽग्नेयत्वं पूर्वमुक्तम् । तेन पूर्वोक्तं सौम्यत्वमप्युपलक्ष्यते । तावग्निश्च सोमश्चेत्येतौ यदा समैता भवतस्तदानीं द्विगुणब्राह्मण्येन वीर्यातिशयो भवति ।

अथ षष्ठं विधत्ते –

अथ यत्सारस्वतः । एतद्धि प्रत्यक्षं ब्राह्मणस्य वाक्पतीयम्, इति ।

सारस्वतोऽष्टाकपालः कार्यः । ब्राह्मणस्य सरस्वतीसंबन्धित्वं यदस्त्येतत्प्रत्यक्षमेव वाक्पतित्वम् । बृहस्पतिसंबन्धेन तु यद्वाक्पतित्वं पूर्वमुक्तं तच्छास्त्रसिद्धम् । जिह्वायाः सरस्वतीसंबन्धे तु तद्वाक्पतित्वमनुभूयते ।

सप्तमं विधत्ते –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निर्वरुणत्वायैव वारुणः । अथो य एव कश्च सन्त्सूयते । स हि वारुणः, इति ।

वारुणोऽष्टाकपालः कर्तव्यः । स च पूर्ववद्वरुणपाशराहित्यायैव संपद्यते । अपि च य एव कश्चित्पुमानधमोऽपि सूयतेऽभिषिच्यते स पुमान्वरुणेनानुगृहीतो राजा भवति ।

अष्टमं विधत्ते -

अथ यद्द्यावापृथिव्यः । इन्द्रो वृत्राय वज्रमुदयच्छत् । तं द्यावापृथिवी नान्वमन्येताम् । तमेतेनैव भागधेयेनान्वमन्येताम् (२) । वज्रस्य वा एषोऽनुमानाय । अनुमतवज्रः सूयाता इति, इति ।

द्यावापृथिव्य एककपालः कर्तव्यः । पुरा कदाचिदिन्द्रो वृत्रवधार्थं वज्रमुद्यतवान् । तमिन्द्रं ते द्यावापृथिव्यौ नान्वमन्येताम् । अनुमत्यभावे कारणं दर्शपूर्णमासब्राह्मणे स्पष्टमभिहितम् -"ते अब्रूतां द्यावापृथिवी मा प्रहा (ह) राऽऽवयोर्वै श्रितः" इति । योऽयमेककपालरूपो भागोऽस्ति तेन भागधेयेन तुष्टे द्यावापृथिव्यौ वृत्रवधार्थमुद्यतं वज्रमङ्गीकृतवत्यौ । अतोऽत्रापि यः पुरोडाशः स एव वज्रस्यानुमत्यर्थं संपद्यते । अनुमतवज्रो हि पुरुषःशत्रुक्षये समर्थत्वात्सूयाता अभिषेकमर्हतीत्येवाभिज्ञा आहुः ।

अधिकत्वशङ्कानिवारणाय हविः संख्यां दर्शयति-

अष्टावेतानि हवीँषि भवन्ति । अष्टाक्षरा गायत्री । गायत्री ब्रह्मवर्चसम् । गायत्रियैव ब्रह्मवर्चसमवरुन्धे, इति ।

अष्टसंख्योपेताया गायत्र्या ब्रह्मवर्चसहेतुतया ब्रह्मवर्चसप्राप्तिः ।

अभिषेकद्रव्यस्योत्पवनं विधत्ते -

हिरण्येन घृतमुत्पुनाति । तेजस एव रुचे, इति ।

निर्मलद्रव्यत्वात्स्वतोऽपि घृतं तेजोऽर्थमेव पुनरपि हिरण्योत्पवनेनात्यन्तदीप्त्यर्थं भवति ।

अभिषेककालीनमाधारं विधत्ते -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कृष्णाजिनऽभिषिञ्चति । ब्रह्मणो वा एतदृक्समयो रूपम् । यत्कृष्णाजिनम् । ब्रह्मन्नैवैनमृक्सामयोरध्यभिषिञ्चति, इति ।

कृष्णाजिने समासीनमेनमभिषिञ्चेत् । कृष्णाजिनं च ब्रह्मणो वेदस्य संबन्धिनोर्ऋक्सामयोः स्वरूपम् । "ऋक्सामे वै देवेभ्यो यज्ञायातिष्ठमाने कृष्णोरूपं कृत्वाऽपक्रम्यातिष्ठताम्" इत्यन्यत्राऽऽम्नानात् । अतः कृष्णाजिनेऽभिषेकेण ब्रह्मन्नेव वेद एव ऋक्सामयोरुपर्येनमभिषिञ्चति ।

द्रव्यं विधत्ते –

घृतेनाभिषिञ्चति । तथा वीर्यावत्तरो भवति (३), इति ।

संगच्छैते भागधेयेनान्वमन्येता ँरूपं चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

सप्तमाध्याये तृतीयोऽनुवाकः ।। ३ ।।

घृतस्य वज्ररूपत्वमन्यत्राऽऽम्नातम् । "घृतं खलु वै देवा वज्रं कृत्वा" इति । अतो घृतेनाभिषेके वीर्यातिशयो भवति ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णययुर्वेदीयत्तैरीयब्राह्मणभाष्ये द्वितीयकाण्डे

सप्तमप्रपाठके तृतीयोऽनुवाकः ।। ३ ।।

अथ सप्तमे चतुर्थोऽनुवाकः ।

तृतीये ब्राह्मणसवोऽभिहितः । चतुर्थे सोमसवोऽभिधीयते । तस्य सोमयागरूपत्वं निषिध्य पशुरूपत्वं विधत्ते –

न वै सोमेन सोमस्य सवोऽस्ति । हतो ह्येषः । अभिषुतो ह्येषः । न हि हतः सूयते । सौमी ँसूतवंशामालभते । सोमो वै रैतोधाः । रैत एव तद्दधाति, इति ।

सोमेन यागेन सोमस्य देवस्य च सवोऽभिषेको नैवास्ति । यस्मात्कारणाच्च येषु सोमो हतः । हननं कथमिति तदुच्यते– यस्मादेवैष सोमोऽभिषुतस्तस्मादस्ति तस्य हननम् । "घ्नन्ति वा एतत्सोमं यदभिषुण्वन्ति" इत्यन्यत्राभिषवस्य हननरूपत्वश्रवणात् । न हि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्वचिदपि हतः पुरुषोऽभिषिच्यमानो दृश्यते । तस्मात्सोमस्याभिषेकसिद्धये सोमयागं परित्यज्य सोमदेवताकां सूतवशामालभते । सकृत्प्रजमुत्पाद्य पश्चाद्वन्ध्या सूतवशा सोमस्य रेतोधारकत्वात्तया देवतया रेत एव धारयति ।

अथाभिषेकमन्त्रं विधत्ते –

सौम्यर्चाऽभिषिञ्चति । रेतोधा ह्येषा । रेतः सोमः । रेत एवास्मिन्दधाति, इति ।

"अषाढम्" इत्यादिका वक्ष्यमाणा सौमी । यस्माद्दृगेषा रेतोधारणहेतुः सोमोऽपि रेतःस्वरूपोऽतः सौम्याभिषेके सत्यस्मिन्यजमाने रेत एव दधाति ।

अस्मिन्सवे कर्तव्यान्यान्तरं विधत्ते –

यत्किंच राजसूयमृते सोमम् । तत्सर्वं भवति, इति ।

राजसूये हेमपवित्राभिषेचनीयदशपेयकेशवपनीयव्युष्टिद्विरात्रक्षत्रधृतिसंज्ञकाः सप्त सोमयागास्तान्वर्जयित्वा यत्किंचिदनुमत्यादिकं सौत्रामण्यन्तं प्रयोगजातं तत्सर्वमस्मिन्सोमसवेऽनुष्ठेयम् । तस्मिन्राजसूयप्रयोगमध्येऽरत्नीनां हविर्भ्य ऊर्ध्वं संसृपां हविर्भ्यः पुरस्तात्सौमी सूतवशाऽऽलब्धव्या तस्याः स्विष्टकृतः पुरस्तादभिषेकः कार्यः ।

अभिषेकाय सौमीमृचं पठति –

अषाढं युत्सु पृतनासु पप्रिम् । सुवर्षामप्स्वां वृजनस्य गोपाम् । भरेषुजा सुक्षिति सुश्रवसम् । जयन्तं त्वामनु मदेम सोम, (१) इति ।

रेतः सोमः सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये चतुर्थोऽनुवाकः ॥ ४ ॥

हे सोम वयं त्वामनुसृत्य मदेम हृष्यास्म । कीदृशं त्वां युद्धेष्वषाढं सोढुमशक्यं पृतनासु धेनासु पप्रि पूरकं सुवर्षां सुवः स्वर्गस्यात्यारिष्टं विना शयतीति सुवर्षास्तं सुवर्षामप्स्वां न केनापि प्सायते भुज्यत इत्यप्सा अप्सा एवाप्स्वास्तं वृजनं पापवर्जनं तस्य गोपां रक्षितारं भरेषु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भरणीयेष्वग्निष्टोमादिषु जायते निवसतीति भरेषुजा सुक्षितिं शोभन् (ना) क्षितिर्भूमिर्निवासस्थानं यस्यासौ सुक्षितिस्तं सुष्ठुश्रवः कीर्तिर्यस्यासौ सुश्रवास्तं सुश्रवसं जयन्तं सर्वत्र जयशीलम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके चतुर्थोऽनुवाकः ।। ४ ।।

अथ सप्तमे पञ्चमोऽनुवाकः ।

चतुर्थे सोमसवोऽभिहितः । पञ्चमे पृथिसवोऽभिधीयते । तमेतं विधत्ते-

यो वै सोमेन सूयते । स देवसवः । यः पशुना सूयते । स देवसवः । य इष्ट्या सूयते । स मनुष्यसवः । एतं वै पृथये देवाः प्रायच्छन् । ततो वै सोऽप्यारण्यानां पशूनामसूयत । यावतीः कियतीश्च प्रजा वाचं वदन्ति । तासा ँ सर्वासां ँ सूयते (१) । य एतेन यजते । य उ चैनमेवं वेद, इति ।

यः क्रतुः सोमेन सूयते निष्पाद्यते स देवानां योग्यः सवः । यथा पूर्वोक्तो बृहस्पतिसवः । यश्च पशुना निष्पाद्यते वैश्यसवादिः । सोऽपि देवानामपि योग्यः सवः । अतस्तदुभयं तथैव तिष्ठतु । यश्च स्वयमिष्ट्या निष्पाद्यते स मनुष्ययोग्यः सवः सर्वेषां सुलभः । तस्मादेतमेव मनुष्यसवं पृथिनाम्ने कस्मैचिद्राज्ञे वेनपुत्राय देवाः प्रायच्छन् । तस्मादेव स मनुष्यसवः । स पृथिरारण्यानामपि पशूनामसूयताधिपतिरासीत्किमुत ग्राम्याणाम् । पृथिनाऽनुष्ठितत्वादयं पृथिसवः । एतेन पृथिसवेन यो यजते, यश्चैनमेवं वेद स द्विविधोऽप्यसौ पुरुषः प्रजाभिरुच्यमानानां तासां सर्वासां वाचां सूयतेऽधिपतिर्भवति । प्रजाश्च यावतीः कियतीश्च कियत्यश्च सन्ति ताः प्रजा वाचं वदन्ति तस्यां वाचि कोऽप्यंशो न परित्यज्यते । एतदभिप्रेत्य तासां सर्वासामिति बहुवचननिर्देशः ।

अस्मिन्पृथिसवेऽभिषेकमन्त्रं विधत्ते -

नाराश ँ स्यर्चाऽभिषिञ्चति । मनुष्या वै नराश ँ सः । निहनुत्य वावै तत् । अथाभिषिञ्चति, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नरैः शंसनीयः स्वयमपि मनुष्यरूपो देवविशेषो नराशंसस्तत्संबन्धिनी "ये मे पञ्चाशतम्" इत्यादिका नाराशंसी तथाऽभिषिञ्चेत् । तत्र पूर्वोक्तरीत्या मनुष्यमूर्तय एव देवा ना (न) राशंसशब्देनोच्यन्ते, तत्संबन्ध्यभिषेचनं यदस्त्येतेन निह्नुत्यैवापलप्यैव भवन्तो यतो मनुष्या अतो भवज्जातीयानस्माननुग्रहीतुमर्हन्तीत्येवं प्रलोभ्यैवानन्तरमभिषिञ्चति ।

अस्मिन्पृथिसवे कर्तव्यविशेषँ विधत्ते -

यत्किंच राज॒सूय॑मनुत्तरवे॒दीक॑म् । तत्सर्वं॑ भवति, इति ।

राजसूये ह्युत्तरवेदियुक्तः सत्यसोमयागा द्विपशुः पशुबन्धश्चातुर्मास्यानि चैतानि वर्जयित्वा यदन्यदनुमत्यादिकं सौत्रामण्यन्तमस्ति, तत्सर्वमत्र कर्तव्यम् ।

अथ नाराशंसीमृचं पठति -

ये मे॑ पञ्चा॒शतं॑ द॒दुः । अश्वा॑ना ँ स॒धस्तु॑तिः । द्युमद॑ग्ने॒ महि॒ श्रवः॑ । बृहत्कृ॑धि म॒घोना॑म् । नृवद॑मृत नृ॒णाम् (२) । इति ।

सूयते॒ स॒धस्तु॒ति॒स्त्रीणि॑ च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये पञ्चमोऽनुवाकः ।। ५ ।।

ये मनुष्या मे महामृत्विजेऽश्वानां पञ्चाशतं ददुर्दातुं समर्थास्तेषां मघोनां धनिकानां नृणां मनुष्याणां यजमानानां यज्ञे हेऽग्ने सधस्तुतिः स्तुत्या सहितं श्रवो बृहत्कृधि । कीदृशं श्रवो द्युमद्दीप्तिमद्धनयुक्तमित्यर्थः । महि महन्नृवत्पुत्रभृत्यादियुक्तम् । अमृतशब्दः सम्बुद्ध्यन्तोऽग्निविशेषणम् ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके पञ्चमोऽनुवाकः ।। ५ ।।

अथ सप्तमे षष्ठोऽनुवाकः ।

पञ्चमे पृथिसव उक्तः । षष्ठे गोसव उच्यते -

ए॒ष गोस॒वः । ष॒ट्त्रि ँ शउ॒क्थ्यो॑ बृहत्सा॑मा । पव॑माने कण्वरथंतरं भ॑वति, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एष वक्ष्यमाणो गोसवाख्यः क्रतुरनुष्ठेयः । स च सर्वेषु स्तोत्रेषु षट्त्रिंशस्तोमयुक्त उक्थ्यसंस्थारूपः । पृष्ठस्तोत्रे बृहत्सामयुक्तः । तस्य पवमानस्तोत्र कण्वरथंतराख्यं साम भवति ।

अथ वाजपेयराजसूयाभ्यामुत्कृष्टत्वेनैतं सवं प्रशंसति –

यो वै वाजपेयः । स सम्राट्सवः । यो राजसूयः । स वरुणसवः । प्रजापतिः । स्वाराज्यं परमेष्ठी । स्वाराज्यं गौरेव, इति ।

योऽयं वाजपेयोऽस्ति सोऽयं साम्राज्यहेतुरेव सवः । यश्च राजसूयाः सोऽपि वरुणैश्वर्यप्राप्तिहेतुरेव सवः । न तु तदुभयमधिकफलप्राप्तिहेतुः । यस्तु स्वाराज्यं पराधीनत्वमप्राप्तः परमेष्ठी परमे पदे स्थितः प्रजापतिरस्ति स तु सर्वेभ्यः । फलेभ्योऽधिकफलभूतः । स्वाराज्यं हि सर्वैः प्राथ्यते । स्वाराज्यं नाम गौरेव गोसव एव स्वाराज्यप्राप्तिहेतुत्वात् ।

एतदनुष्ठानं तद्वेदनं च प्रशंसति –

गौरिव भवति (१) । य एतेन यजते । य उ चैनमेवं वेद, इति ।

यथा गौररण्ये स्वच्छन्दचार्येवमयं ब्रह्मलोकेऽपि स्वतन्त्रो भवति । बृहत्सामेति यदुक्तं तदेव सामद्वयरूपेण प्रशंसति –

उभे बृहद्रथंतरे भवतः । तद्धि स्वाराज्यम्, इति ।

अत्रैकेनैव बृहत्साम्ना सामद्वयसाध्योऽतिशयः क्रियते । अतस्तद्धि बृहत्सामानुष्ठानमेव स्वाराज्यप्राप्तिहेतुः ।

दक्षिणायां विशेषं विधत्ते –

अयुतं दक्षिणाः । तद्धि स्वाराज्यम्, इति ।

गवामयुतमत्र दक्षिणात्वेन दातव्यम् ।

अभिषेकद्रव्यं विधत्ते –

प्रतिधुषाऽभिषिञ्चति । तद्धि स्वाराज्यम्, इति ।

प्रतिधुषा तदानीमेव दुग्धेन क्षीरेणाभिषिञ्चेत् । सोऽयमभिषेकोऽयुतगोप्राप्तिवत्स्वाराज्यहेतुः ।

अथाभिषेकस्य देशकालौ विधत्ते –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अनुद्धते वेद्यै दक्षिणत आहवनीयस्य बृहतस्तोत्रं प्रत्यभिषिञ्चति। इयं वाव रथंतरम् (२)। असौ बृहत्। अनयोरेवैनमनन्तर्हितमभिषिञ्चति, इति।

वेद्यै वेद्या मध्य आहवनीयस्य दक्षिणभागे योऽयमनुद्धतदेशोऽस्ति सोऽयमभिषेकस्य योग्यो देशस्तस्मिन्देशेऽभिषिञ्चेत्। बृहतस्तोत्रं प्रति बृहत्साम्ना क्रियमाणं स्तोत्रं यदा प्रवर्तते तदाऽभिषिञ्चेत्। यदिदं कण्वरथंतरं पवमानस्तोत्रे प्रवृत्तं तद्भूमिस्वरूपं यच्च पृष्ठस्तोत्रे बृहत्साम तद्द्युलोकरूपं तयोरूभयोर्लोकयोर्मध्येऽनन्तर्हितं व्यवधानरहितमेवैनं यजमानमभिषिञ्चति।

षटत्रिंश उक्थ्यो बृहत्सामेति यत्पूर्वमुक्तं तत्र स्तोमं प्रशंसति–

पशुस्तोमो वा एषः। तेन गोसवः। षट्त्रिँशः सर्वः, इति।

यस्मादेष ऋतुः पशुहेतुना स्तोमेन युक्तस्तेन गोसव इत्युच्यते। पशुहेतु स्तोमयुक्तत्वमेव षट्विंश इत्यनेन विशदीक्रियते। "षट् त्रिंशदक्षरा बृहती बार्हताः पशवः" इत्यन्यत्राऽऽम्नातम्। अतोऽस्मिन्गोसवे सर्वोऽपि स्तोमः षटत्रिंश एव क्रियते न तु त्रिवृदादिः।

अथाभिषेकार्थमन्त्रमाह –

रेवज्जातः सहसा वृद्धः। क्षत्राणां क्षत्रभृत्तमो वयोधाः। महान्महित्वे तस्तभानः क्षत्रे राष्ट्रे च जागृहि। प्रजापतेस्त्वा परमेष्ठिनः स्वाराज्येनाभिषिञ्चामि, इति।

हे यजमान त्वं रेवद्धनवज्जीवनं यथा भवति तथा जातः प्रवृत्तः, सहसा वृद्धो बलेनाधिकः क्षत्राणां बलवतां मध्ये क्षत्रभृत्तमोऽतिशयेन बलवान्वयोधा दीर्घायुष्यधारी महान्विद्याचारादिगुणैरधिको महित्वे पूज्यत्वे तस्तभानः स्थिरं वर्तमानः। क्षत्रे बलकार्ये राष्ट्रे जनपदे च जागृह्यप्रमत्तो वर्धस्व। परमेष्ठिन उत्तमे पदे स्थितस्य प्रजापतेः संबन्धिना स्वाराज्येन पराधीनरहितत्वेन राज्येन निमित्तेन त्वामभिषिञ्चामि।

तमेतं मन्त्रं विधत्ते–

इत्याह। स्वाराज्यमेवैनं गमयति (३), इति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इव भवति रथंतरमाहैकं च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये षष्ठोऽनुवाकः ।। ६ ।।

इत्युक्तमेतं मन्त्रमेतदभिषेककाले पठेत्तेन पाठेनैनं यजमानं स्वाराज्यं प्रापयति ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके षष्ठोऽनुवाकः ।। ६ ।।

अथ सप्तमे सप्तमोऽनुवाकः ।

षष्ठे गोसवोऽभिहितः । सप्तम ओदनसवोऽभिधीयते । कल्पः–"ओदनसवेनान्नाद्यकामो रोहिण्यां यजेत । उपव्युषं श्रपयति दर्विहोमो भवत्युदित आदित्ये सिँहे व्याघ्र इति चतस्र आहुतीरोदनाद्धुत्वा" इति । तत्र प्रथमामृचमाह –

सिँहे व्याघ्र उत या पृदाकौ । त्विषिरग्नौ ब्राह्मणे सूर्ये या । इन्द्रं या देवी सुभगा जजान । सा न आगन्वर्चसा संविदाना, इति ।

पृदाकुर्मनुष्यनिगरणसमर्थोऽजगरः । सिंहादिष्वग्न्यादिषु च येयं त्विषिरप्रधृष्यत्वलक्षणं तेजस्तदभिमानिनी या देवी सुभगा सौभाग्ययुक्ता सतीन्द्रं परमैश्वर्ययुक्तं पुरुषं जजानोत्पादयामास । सा देवी वर्चसा बलेन संविदानैकमत्यं गता सती नोऽस्मान्प्रत्यागन्नागच्छतु ।

अथ द्वितीयामाह –

या राजन्ये । दुन्दुभावायतायाम् । अश्वस्य क्रन्द्ये पुरुषस्य मायौ । इन्द्रं या देवी सुभगा जजान । सा न आगन्वर्चसा संविदाना, इति ।

राजन्ये क्षत्रिय आयतायां ताड्यमानायां दुन्दुभावश्वस्य क्रन्द्ये क्रन्दने हेषिते पुरुषस्य मायौ सिंहनादादिशब्दे । एतेषु या त्विषिर्गाम्भीर्यलक्षणा तदभिमानिनी । या देवीत्यादि पूर्ववत् ।

अथ तृतीयामृचमाह –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

या हस्तिनि द्वीपिनि या हिरण्ये । त्विषिरश्वेषु पुरुषेषु गोषु (१) । इन्द्रं या देवी सुभगा जजान । सा न आगन्वर्चसा संविदाना, इति ।

नगरे जातस्तत्रैव वर्तमानो हस्ती । अरण्ये जातस्तत्रैव वर्तमानो द्वीपीत्यवान्तरभेदः । द्वीपी मृगान्तरं वा । हस्त्यादिष्वश्वादिषु च या त्विषिर्महार्घत्वलक्षणा तदभिमानिनी । या देवीत्यादि पूर्ववत् ।

अथ चतुर्थीमाह –

रथे अक्षेषु वृषभस्य वाजे । वाते पर्जन्ये वरुणस्य शुष्मे । इन्द्रं या देवी सुभगा जजान । सा न आगन्वर्चसा संविदाना, इति ।

वाजो वेगः । शुष्मो बलम् । रथादिषु वातादिषु च या त्विषिः स्वस्वकार्यक्षमलक्षणा तदभिमानिनी । या देवीत्यादि पूर्ववत् ।

कल्पः–"राडसीत्येतैः प्रतिमन्त्रं मन्थान्कल्पयन्त्याज्यमन्यं ब्राह्मणःपयोमन्थं राजन्यो दधिमन्थं वैश्य उदमन्थं शूद्रः" इति । तान्मन्त्रानाह –

राडसि विराडसि । सम्राडसि स्वराडसि, इति ।

हे आज्यमन्थ त्वं राडसि राजमानोऽसि । विविधं राजत इति विराट् ।। सम्यग्राजत इति सम्राट् । स्वातन्त्रेण राजत इति स्वराट् ।

कल्पः–"इन्द्राय त्वा तेजस्वते तेजस्वन्तं श्रीणामि, इति ब्राह्मणः सक्तुभिराज्यं श्रीत्वा "तेजोऽसि" इत्यभिमन्त्र्य "तत्ते प्रयच्छामि, इति यजमानाय प्रयच्छति । 'तेजस्वदस्तु मे मुखम्' इति प्रतिगृह्य भक्षयति । एवमितरेषामुत्तरोत्तरश्रयणोऽभिमन्त्रणः । प्रदानो भक्षणश्च यथालिङ्गम्" इति । तत्र श्रयणमन्त्राणां पाठस्तु –

इन्द्राय त्वा तेजस्वते तेजस्वन्तꣳ श्रीणामि । इन्द्राय त्वौजस्वत ओजस्वन्तꣳ श्रीणामि (२) । इन्द्राय त्वा पयस्वते पयस्वन्तꣳ श्रीणामि । इन्द्राय त्वाऽऽयुष्मत आयुष्मन्तꣳ श्रीणामि, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हे आज्यमन्थ त्वां तेजोयुक्तेन्द्रार्थं तेजस्वन्तं त्वां सक्तुभिः सह श्रीणामि पचामि । आज्यस्य तेजोरूपत्वेन तेजस्त्वम् । एवं पयोमन्थादिषु योज्यम् । ओजसो बलहेतुत्वात्पयोमन्थ ओजस्वान् । दर्शेष्टौ च "ऐन्द्रं पयः "इत्याम्नानादिन्द्रस्य पयस्वत्वम् । दधिमन्थस्य पयोविकारत्वेन पयस्वत्त्वम् । चिरजीवित्वादिन्द्रस्याऽऽयुष्मत्वम् । उदमन्थस्याऽऽयुर्हेतुत्वादायुष्मत्वम् ।

आज्यमन्थस्याभिमन्त्रणादींस्त्रीन्मन्त्रानाह -

तेजोऽसि । तत्ते प्रयच्छामि । तेजस्वदस्तु मे मुखम् । तेजस्वच्छिरो अस्तु मे । तेजस्वान्विश्वतः प्रत्यङ् । तेजसा संपिपृग्धि, मा, इति ।

हे आज्यमन्थ त्वं तेजोरूपोऽसि । हे यजमान तन्मन्थद्रव्यं ते तुभ्यं प्रयच्छामि । मे मम यजमानस्य मुखं तेजोयुक्तमस्तु । शिरोऽपि तेजस्वदस्तु । हे मन्थ त्वं तेजस्वान्भूत्वा विश्वतः सर्वस्मात्प्रत्यङ्प्रत्यासन्नः सन्मां तेजसा संपिपृग्धि संपृक्तं कुरु ।

पयोमन्थस्याभिमन्त्रणादींस्त्रीन्मन्त्रानाह -

ओजोऽसि । तत्ते प्रयच्छामि (३) । ओजस्वदस्तु मे मुखम् ।। ओजस्वच्छिरो अस्तु मे । ओजस्वान्विश्वतः प्रत्यङ् । ओजसा संपिपृग्धि मा, इति ।

ओजो बलम् । अन्यत्पूर्ववद्व्याख्येयम् ।

दधिमन्थस्याभिमन्त्रणादींस्त्रीन्मन्त्रानाह -

पयोऽसि । तत्ते प्रयच्छामि । पयस्वदस्तु मे मुखम् । पयस्वच्छिरो अस्तु मे । पयस्वान्विश्वतः प्रत्यङ् । पयसा संपिपृग्धि मा (४), इति ।

दधिमन्थस्य पयोविकारत्वात्पयस्त्वम् । मुखस्य पयोभोजित्वात्पयस्वत्वम् । शिरःशब्देन कृत्स्न देह उपलक्ष्यते । तस्य पयोजन्यशक्तिमपूत्त्वात्पयस्वत्वम् । अन्यत्पर्ववत् ।

उदमन्थरूस्याभिमन्त्रणादींस्त्रीन्मन्त्रानाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आयुरसि । तत्ते प्रयच्छामि । आयुष्मदस्तु मे मुखम् । आयुष्मच्छिरो अस्तु मे । आयुष्मान्विश्वतः प्रत्यङ् । आयुषा संपिपृग्धि मा, इति ।

उदमन्थस्याऽऽयुर्हेतुत्वादायुष्ट्वम् । अन्यत्पूर्ववत् ।

कल्प-"ओदनशेषं यजमानः प्राश्नाति, इममग्न आयुषे वर्चसे कृधीति प्राशनन्तमभिमन्त्रयते" इति । पाठस्तु -

इममग्न आयुषे वर्चसे कृधि । प्रियꣳरेतो वरुण सोम राजन् ।। मातेवास्मा अदिते शर्म यच्छ । विश्वेदेवा जरदष्टिर्यथा सत् (५), इति ।

हेऽग्ने, इमं यजमानमायुषे दीर्घायुष्ट्वाय, वर्चसे बलाय च कृधि समर्थं कुरु । हे वरुण प्रियं कृध्यभीष्टं कुरु । हे सोम राजन्, रेतः कृधि प्रजोत्पादनसामर्थ्यं कुरु । हेऽदितेऽस्मै यजमानाय मातेव शर्म यच्छ सुखं देहि । हे विश्वेदेवा अयं यजमानो 'जरदष्टिर्यथा सत्' जराप्राप्तिमान्यथा भवति, तथा कुर्वन्तु । चिरजीविनं कुर्वन्त्वित्यर्थः ।

कल्पः-"हिरण्यं यजमानाय बध्नाति 'आयुरसि विश्वायुरसि' इत्याबध्यमानो जपति" इति । पाठस्तु -

आयुरसि विश्वायुरसि । सर्वायुरसि सर्वमायुरसि, इति ।।

हे हिरण्य त्वमायुर्हेतुरसि । न केवलं ममैवाऽऽयुर्हेतुः किंतु विश्वेषां मनुष्याणां, सर्वेषां देवानां चाऽऽयुर्हेतुरसि । तस्मात्त्वमेव सर्वायुरसि ।

कल्पः-"तैरनं संसृष्टैरभिषिञ्चति यतो वातो मनोजवाः" इति । तैरपां ग्रहैः। पाठस्तु -

यतो वातो मनोजवाः । यतः क्षरन्ति सिन्धवः । तासां त्वा सर्वासाꣳरुचा । अभिषिञ्चामि वर्चसा, इति ।

यतो यस्या रुचो दीप्तिर्वेगवान्वातः प्रवर्तते । पुनरपि यतः सिन्धवो नद्यो मनोजवा मनोवेगयुक्ताः सत्य क्षरन्ति प्रवहन्ति । तासां सर्वासामपां संबन्धिन्या रुचा त्वां यजमानं वर्चसा बलनिमित्तमभिषिञ्चामि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कल्प–"समुद्र इवासि गह्मनेत्येनमभिमन्त्रय" इति । पाठस्तु–

समुद्र इवासि गह्मना । सोम इवास्यदाभ्यः । अग्निरिव विश्वतः प्रत्यङ् । सूर्य इव ज्योतिषा विभूः (६), इति ।

हे यजमान त्वं गह्मना गाम्भीर्येण समुद्र इवासि समुद्रसमोऽसि । सोमवददाभ्यः केनाप्यप्रधृष्योऽसि । अग्निरिव विश्वतः सर्वस्मात्प्रत्यङ् प्रत्यासन्नोऽसि । अग्निर्ह्युदरमध्यवर्तित्वात्प्रत्यासन्नः । सूर्य इव ज्योतिषा व्याप्तोऽसि ।

कल्पः–"अपां ग्रहान्गृह्णन्ति । ये मन्यान्कल्पयन्ति ' अपां यो द्रवणे रसः" इत्येतैः प्रतिमन्त्रम् " इति । नानेतांश्चतुरो मन्त्रानाह –

अपां यो द्रवणे रसः । तमहमस्मा आमुष्यायणाय । तेजसे ब्रह्मवर्चसाय गृह्णामि । अपां य ऊर्मौ रसः । तमहमस्मा आमुष्यायणाय । ओजसे वीर्याय गृह्णामि । अपां यो मध्यतो रसः । तमहमस्मा आमुष्यायणाय । पुष्ट्यै प्रजननाय गृह्णामि । अपां यो यज्ञियो रसः । तमहमस्मा आमुष्यायणाय आयुषे दीर्घायुत्वाय गृह्णामि (७), इति ।

गोष्वोजस्वन्त ँ श्रीणाम्योजोऽसि तत्ते प्रयच्छामि पयसा संपिपृग्धि मा सद्धि भूर्याज्ञियो रसो द्वे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये सप्तमोऽनुवाकः ॥ ७ ॥

अपां संबन्धिनि द्रवणे द्रवीभावे यो रसः सारस्तं रसममलमामुष्यायणायामुष्य देवदत्तस्य पुत्रायास्मै यज्ञदत्ताख्याय यजमानाय तेजोब्रह्मवर्चसयोः सिद्ध्यर्थं गृह्णामि । एवमुत्तरत्रयो मन्त्रा व्याख्येयाः ।

अत्र विनियोगसंग्रहः–

स्यादोदनसवे होमः सिंहे मन्त्रचतुष्टयात् ।
राट्चतुर्भिश्चतुर्मन्थान्कल्पयेद्ब्राह्मणादयः ॥ १ ॥
आज्यं क्षीरं दधि जलं द्रव्याण्येषां क्रमादिह ।
श्रीणन्ति सक्तुभिर्मन्थनिन्द्रायेति चतुष्टयान् ॥ २ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तेजोऽसीत्याज्यमन्थस्य मन्त्रणं तत्त इत्यतः ।
तं मन्थं स्वामिने तद्यात्तेजस्वद्धक्षयेदतः ।। ३ ।।
क्षीरादिमन्थेऽप्योजोऽसीत्यादिमन्त्रास्तथैव हि ।
खादन्तं मन्त्रयेच्चेममायुस्तु स्वामिनो जपः ।। ४ ।।
यतोऽभिषिच्याभिषिक्तं समुद्रो मन्त्रयेत हि ।
अपामित्यभिषेकाय गृह्णन्ति हि जलग्रहान् ।।
अनुवाके सप्तमेऽस्मिन्मन्त्रा द्वात्रिंशदीरिताः ।। ५ ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे सप्तमप्रपाठके सप्तमोऽनुवाकः ।। ७ ।।

अथ सप्तमेऽष्टमोनुवाकः ।

सप्तमेऽनुवाक ओदनसवस्य होमादिमन्त्रा उक्ताः । अष्टमे रथारोहणमन्त्रा उच्यन्ते । कल्पः "अग्रेणाऽऽहवनीयां रथोऽवस्थितो भवति ।। 'अभिप्रेहि' इति तं यजमानोऽभ्येति" इति । पाठस्तु-

अभिप्रेहि वीरयस्व । उग्रश्चेत्ता सपत्नहा, इति ।

हे यजमान रथमभिलक्ष्य प्रेहि प्रकर्षेण गच्छ । गत्वा च वीरयस्व विक्रमं कुरु । उग्रस्तीव्रशासनश्चेत्ता जयोपायभिज्ञः सपत्नहा वैरिघाती च भव ।

कल्पः-"आतिष्ठ मित्रवर्धन इत्यारोहन्तमभिमन्त्रयते" इति पाठस्तु-

आतिष्ठ मित्रवर्धनः । तुभ्यं देवा अधिब्रुवन्, इति ।

हे यजमान त्वं मित्राभिवृद्धिहेतुः सन् रथमातिष्ठाऽऽरोह । देवास्तुभ्यं त्वदर्थमधिब्रुवन्नधिकोऽयं यजमान इति ब्रुवन्तु ।

कल्पः-"अङ्कौ न्यङ्काविति रथचक्रे अभिमृशति पक्षसी वा । 'आतिष्ठ वृत्रहन्' इति पञ्चभिरारूढम्" इति । अभिमन्त्रयत इत्यनुवर्तते । अत्र चक्रस्पर्शनहेतोर्ऋचोऽभिमन्त्रणमन्त्रणेषु प्रथमाया ऋचश्च प्रतीके दर्शयति-

अङ्कौ न्यङ्कावभित आतिष्ठ वृत्रहन्नथम्, इति ।

अङ्कौ न्यङ्कावभितो रथं यावित्येषा संहितायाः प्रथमकाण्डे देव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सवितः प्रसुवेत्यनुवाके व्याख्याता। "आतिष्ठ वृत्रहन्" इत्येषा गृहकाण्डे व्याख्याता।

अथ द्वितीयामृचमाह -

आतिष्ठन्तं परि विश्वे अभूषन् । श्रियं वसानश्चरति स्वरोचाः । महत्तदस्यासुरस्य नाम । आ विश्वरूपो अमृतानि तस्थौ, इति ।

आतिष्ठन्तं रथमारोहन्तं यजमानं विश्वे देवाः सर्वेऽपि देवाः पर्यभूषन्परितोऽलंकृतवन्तः । अयं च रथस्त्वयाऽधिष्ठितः श्रियं वसान आच्छादयंस्त्वयि सर्वसंपदं कुर्वन्नित्यर्थः । स्वरोचाः स्वायत्तदीप्तिः प्रवर्तते । असुरस्य शत्रूणां निरसितुर्मित्राणां वा प्राणप्रदस्यास्य रथस्य तन्नाम महदधिकम् । त्वदीयो रथ आयातीति श्रुत्वा शत्रवः पलायन्त इत्यर्थः । एवं विधो रथो विश्वरूपो बहुदेशसंचारेण बहुविधरूपः सन्नमृतान्यमरणसाधनानि फलान्यातस्थौ संपादयति ।

अथ तृतीयामाह -

अनु त्वेन्द्रो मदत्वनु बृहस्पतिः (१) । अनु सोमो अन्वग्निरावीत् । अनु त्वा विश्वे देवा अवन्तु । अनु सप्त राजानो य उताभिषिक्ताः, इति ।

हे यजमान रथमातिष्ठन्तं त्वामिन्द्रबृहस्पतिसोमा अनुमदन्त्वनुमोदन्तामङ्गीकुर्वताम् । अग्निरपि त्वामनुक्रमेणाऽऽवीद्रक्षतु ।। ये विश्वे देवास्तेऽपिऽत्वामनुक्रमेणावन्तु । उतापि च सप्त राजानस्त्वदीयदिग्व्यतिरिक्ताः सप्तसु दिक्षु वर्तमाना राजानोऽभिषिक्ता ये सन्ति ते सर्वेऽपि त्वामनुमोदन्तु ।

अथ चतुर्थीमाह -

अनु त्वा मित्रावरुणाविहावतम् । अनुद्यावापृथिवी विश्वशंभू । सूर्यो अहोभिरनु त्वाऽवतु । चन्द्रमा नक्षत्रैरनु त्वाऽवतु, इति ।

मित्रावरुणाविह कर्मणि त्वामनुक्रमेण रक्षताम् । विश्वशंभू

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विश्वस्य सुखस्य भावयित्र्यौ द्यावापृथिव्यौ त्वामनुरक्षताम् । सूर्योऽयमहोभिः सह त्वामन्ववतु । चन्द्रमा नक्षत्रैः सह त्वामनुरक्षतु ।

अथ पञ्चमीमाह -

द्यौश्च॑ त्वा पृथि॒वी च॒ प्रचे॑तसा । शु॒क्रो बृ॒हद्दक्षि॑णा त्वा पिपर्तु । अनु॑ स्व॒धा चि॑कि॒ता॒ँ सोमौ॑ अ॒ग्निः । आऽयं पृ॑णक्तु रज॑सि उ॒पस्थ॑म् (२), इति ।

बृ॒हस्पति॒ः सोमौ॑ अ॒ग्निरेकं॑ च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके सप्तमाध्यायेऽष्टमोऽनुवाकः ।। ८ ।।

द्यौश्च पृथिवी चेत्येते प्रचेतसा प्रकृष्टज्ञानयुक्ते सत्यौ त्वां रक्षताम् । योऽयं सोमयागे शुक्राख्यो ग्रहः स त्वां पिपर्तु पालयतु । तथा बृहत्साम त्वां पिपर्तु । दक्षिणा त्वां पिपर्तु । स्वधाशब्दोपलक्षितमन्नं त्वामनुचिकित्सतां तवानिष्टं निवारयत्वित्यर्थः । तथा ऽग्निश्चेत्येतावुभौ त्वदीयमनिष्टं निवारयेताम् । अयं रथो रजसी रञ्जनात्मके द्यावापृथिव्यावुपस्थं तत्समीपे स्थितमन्तरिक्षं चाऽऽपृणक्तु सर्वतः स्वेन संपृक्तानि करोतु । स्वयं लोकत्रयं व्याप्नोत्वित्यर्थः ।

अत्र विनियोगसंग्रहः-

अर्भाति रथमभ्येति ह्यातिष्ठेत्यभिमन्त्रणम् ।

अङ्कौ चक्रे स्पृशेदाभिमन्त्रयेद्रथसंस्थितम् ।।
पञ्चभिश्चैवमंत्रोक्ता अष्टौ मन्त्राः क्रमादमी ।। १ ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे सप्तमप्रपाठकेऽष्टमोनुवाकः ।। ८ ।।

अथ सप्तमे नवमोऽनुवाकः ।

अष्टमेऽनुवाक ओदनसवगता रथारोहणमन्त्रा उक्ताः । सोऽयमोदनसवो नवमेऽभिधीयते । तमेतं विधत्ते -

प्र॒जाप॑तिः प्र॒जा अ॑सृजत । ता अ॑स्मात्सृ॒ष्टाः परा॑चीरायन् । स ए॒तं प्र॒जाप॑तिरोद॒नम॑पश्यत् । सोऽन्नं॑ भू॒तोऽतिष्ठत् । ता अ॒न्यत्रा॒न्नाद्य॒मवि॑त्त्वा । प्र॒जाप॑तिं प्र॒जा उ॒पाव॑र्तन्त ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्नमेवैनं भूतं पश्यन्तीः प्रजा उपावर्तन्ते । य एतेन यजते ।। य उ चैनमेवं वेद, इति ।

प्रजापतिना सृष्टाः प्रजा अन्नार्थिन्यस्तदन्वेषणाय पुनरावृत्तिरहितारायन्यत्र क्वापि गताः । तदानीं प्रजापतिरन्नहेतुमोदनसवं दृष्ट्वा तदनुष्ठानेनान्नं प्राप्तोऽतिष्ठन् । ताश्च प्रजा अन्यत्रान्नमलब्ध्वा पुनः प्रजापतिं प्रत्यागताः । यो यजमान एतेनौदनसेवेन यजते यश्चैनमोदनसवं सम्यग्वेद वेत्ति तमेतमुभयविधं पुरुषमन्नप्राप्तियुक्तं दृष्ट्वा प्रजाः सर्वा आगच्छन्ति ।

पूर्वोक्तैः 'सिंहे व्याघ्रे' इत्यादिभिर्मदन्नं होतव्यं तदिह विधत्ते -

सर्वाण्यन्नानि भवन्ति (१) । सर्वे पुरुषाः । सर्वाण्योवान्नान्यवरुन्धे । सर्वान्पुरुषान्, इति ।

व्रीहिप्रियङ्गुश्यामाकादिभिर्निष्पाद्यानि यावन्त्यन्नानि संभवन्ति तावन्ति सर्वाण्यत्र कर्तव्यानि कर्तारश्च ब्राह्मणक्षत्रियवैश्यशूद्राः सर्वे पुरुषाः । तेन सर्वान्नसर्वपुरुषसमृद्धिः प्राप्यते ।

मन्थकल्पनमन्त्राणां तात्पर्यं दर्शयति-

राडसि विराडसीत्याह । स्वाराज्यमेवैनं गमयति, इति ।

राडसीत्यादींश्चतुरो मन्त्रान्पठेत्तेन स्वाराज्यप्राप्तिः ।

यदुक्तं सूत्रकारेण-"हिरण्यं ब्राह्मणाय ददाति । तिसृधन्वं राजन्याय । अष्ट्रां वैश्याय । माषकमण्डलुं शूद्राय" इति । तदेतत्सर्वं विधत्ते -

यद्धिरण्यँ ददाति । तेजस्तेनावरुन्धे । यत्तिसृधन्वम् । वीर्यं तेन । यदष्ट्राम् (२) । पुष्टिं तेन । यत्कमण्डलुम् । आयुस्तेन, इति ।

तिसृभिरिषुभिः सहितं धनुस्तत्तिसृधन्वम् । अष्ट्रा फालं लाङ्गलाग्रस्था लोहशलाकेत्यर्थः ।

कर्णे हिरण्याभरणबन्धनं विधत्ते -

यद्धिरण्यमाबध्नाति । ज्योतिर्वै हिरण्यम् । ज्योतिरेवास्मिन्दधाति । अथो तेजो वै हिरण्यम् । तेज एवाऽऽत्मन्धत्ते, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हिरण्यगता दीप्तिर्ज्योतिस्तद्धारणेन मुख्यस्य शोभनत्वं तेजः ।

होमद्रव्यशेषमाशनं विधत्ते -

यदौद॒नं प्राश्नाति॑ । ए॒तदे॒व सर्व॑मव॒रुध्यं (३) । तद॑स्मिन्नेक॒धात् , इति ।

सर्वान्नशेषभक्षणे सत्येतत्सर्वमन्नजातं संपूर्ण संपाद्य तत्संपादितमस्मिन्यजमान एकधाऽधादेकीकृत्य स्थापयति ।

ओदनसवनप्रयोगस्य नक्षत्रविशेषं विधत्ते -

रो॒हि॒ण्यां का॒र्यः॑ । यद्ब्रा॑ह्म॒ण ए॒व रौहि॒णी । तस्मा॑दे॒व । अथो॒ वर्ष्मै॒वैन॑ꣳ समा॒नानां॑ करोति, इति ।

यस्मात्कारणाद्रोहिणीनक्षत्रं ब्राह्मणवत्प्रशस्तं तस्मादेव कारणाद्रोहिण्यामयं कार्यः । 'सप्त सप्त क्रमाज्ज्ञेया विप्राद्याः कृत्तिकादयः' इति ज्योतिःशास्त्रे ब्राह्मणनक्षत्रेषु सप्तस्वस्थित्वाद्रोहिण्या ब्राह्मणत्वम् । अपि च रोहिण्यां कुर्वन्नेनं यजमानं समानानां सर्वेषां शिरःस्थानीयं करोति ।

रोहिणीनक्षत्रदिनेऽप्युदयकालं विधत्ते -

उ॒द्यता सूर्ये॑ण का॒र्यः॑ । उ॒द्यन्त॒ं वा ए॒त॑ꣳ सर्वाः॑ प्र॒जाः प्रति॑नन्दन्ति, इति ।

उदयं गच्छता सूर्येण सहायं सवः कर्तव्यः, सूर्योदयस्य सर्वपुरुषानन्दहेतुत्वात्तत्रानुष्ठानं प्रशस्तम् ।

वेदनं प्रशंसति-

दि॒दृ॒क्षेण्यो॑ दर्श॒नीयो॑ भवति । य ए॒वं वेद॑, इति ।

दिदृक्षेण्यो दर्शनेच्छाविषय उपास्य इत्यर्थः । दर्शनीयः सुरूपः यदुक्तं सूत्रकारेण-"अथैनं . त्रिभिर्दर्भपुञ्जीलैः, पवयति । अवभृतप्रत्याम्नायो भवतीति विज्ञायते" इति । तदिदं विधते-

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति (४) । अ॒वेत्यौ॑ऽवभृ॒था ३ ना ३ इति॑ ।। यद्द॑र्भपु॒ञ्जी॒लैः प॒वय॑ति । तत्स्व॑दे॒वावैति । तन्नावै॑ति, इति ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्मिन्नोदनसवे कियद् भृथः कार्यो न वेति ब्रह्मवादिनां विचारार्थेयं प्लुतिः । तदनुष्ठाने तु क्रियाबाहुल्यम् । अनुष्ठानाभावे शुद्ध्यभाव इति तेषामभिप्रायः । तत्र दोषद्वयरहितमिदमुत्तरम् । दर्भपुञ्जीलशब्देन कतिपयदर्भनाडीयुक्ताः शाखाविशेषा उच्यन्ते । तैः शोधने सति तदेवावभृथाख्यं कर्मावैति स्विदनुष्ठितमेव शुद्धेः संपन्नत्वात् ।। तस्मान्नानुष्ठितमपि क्रियाबाहुल्याभावात् ।

दर्भपुञ्जीलसंख्यां विधत्ते -

त्रिभिः पवयति । त्रय इमे लोकाः । एभिरेवैनं लोकैः पवयति । अथो अपां वा एतत्तेजो वर्चः । यद्दर्भाः । यद्दर्भपुञ्जीलैः पवयति । अपामेवैनं तेजसा वर्चसाऽभिषिञ्चति (५), इति ।

भवन्त्यष्ट्रामवरुध्य वदन्ति दर्भा यद्दर्भपुञ्जीलैः एवयत्येकं च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके सप्तमाध्याये नवमोऽनुवाकः ।। ९ ।।

त्रित्वसंख्याया लोकसाम्याल्लोकैः शुद्धिः कृता भवति । अपि च दर्भाणामुदकसारतत्वाद्बलहेतुत्वाच्च सारबलाभ्यामयं शोधितो भूत्वाऽभिषिक्तो भवति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे सप्तमप्रपाठके नवमोऽनुवाकः ।। ९ ।।

अथ सप्तमे दशमोऽनुवाकः ।

नवमेऽनुवाक ओदनसवोऽभिहितः । दशमे पञ्चशारदीयविधिरुच्यते । स च सूत्रकारेण स्पष्टमुदाहृतः-"पञ्चशारदीयेन बहोर्भूयान्भवति । अनुवत्सरं पशुबन्धेन यजते । सप्तदश पृश्नीनुक्ष्णः पञ्चवर्षानानयन्ति । सप्तदश पृश्नीर्वत्सतर्यः स्त्रीवत्सा अप्रवीताः । प्रोक्षितान्पर्यग्निकृतानुक्ष्ण उत्सृजन्ति वत्सतरीरालभन्ते" इति ।। तमिमं पञ्चशारदीयं विधत्ते -

प्रजापतिरकामयत बहोर्भूयान्स्यामिति । स एतं पञ्चशारदीयमपश्यत् तमाहरत् । तेनायजत् । ततो वै स

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बहोर्भूयानभवत् । यः कामयेत बहोर्भूयान्स्यामिति । स पञ्चशारदीयेन यजेत । बहोरेव भूयान्भवति, इति ।

बहोर्धनप्रजादिसमृद्धादन्यपुरुषादपि भूयानत्यन्तसमृद्धः । पञ्चसु शरत्सु संवत्सरेष्वनुष्ठेयः पञ्चशारदीयः । स्पष्टमन्यत् ।

तमेतं प्रशंसति –

मरुत्स्तोमो वा एषः । मरुतो हि देवानां भूयिष्ठाः (१), इति ।

स्तोमशब्देन स्तोमयुक्तो यज्ञ उपलक्ष्यते । मरुत्संज्ञकानां देवगणानां संबन्धी स्तोमो मरुत्स्तोमः । मरुतो ह्येतस्यानुष्ठानेन देवानां मध्येऽत्यन्तं समृद्धाः संपन्नाः ।

यागं वेदनं च प्रशंसति –

बहुर्भवति । य एतेन यजते । य उ चैनमेवं वेद, इति ।

संवत्सरसंख्यां प्रशंसति –

पञ्चशारदीयो भवति । पञ्च वा ऋतवः संवत्सरः । ऋतुष्वेव संवत्सरे प्रतितिष्ठति । अथो पञ्चाक्षरा पङ्क्तिः । पाङ्क्तो यज्ञः । यज्ञमेवावरुन्धे, इति ।

पञ्चसंख्यासामान्यादृतुद्वारा संवत्सरे प्रतिष्ठा । तथा पङ्क्तिच्छन्दोद्वारा यज्ञप्राप्तिः ।

स्तोमानामवधिं विधत्ते –

सप्तदशँ स्तोमा नातियन्ति । सप्तदशः प्रजापतिः । प्रजापतेराप्त्यै (२), इति ।

भूयिष्ठा यन्ति द्वे च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके सप्तमाध्याये दशमोऽनुवाकः ।। १० ।।

त्रिवृदादिस्तोमाः सप्तदशं स्तोमं नातिक्रामन्ति । तमेतमनतिक्रामं सत्रकारः स्पष्टमुदाजहार–“उत्तमीरालभ्य दीक्षन्ते त्रिवृदग्निष्टोमः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चदश उक्थ्यः सप्तदश उक्थ्यः पञ्चदशोऽग्निः सप्तदशोऽतिरात्रः" इति । पञ्चमे संवत्सरे वत्सतरीर्हि चरमभाविनीरालभ्य पश्चात्पञ्चरात्राय दीक्षयित्वा क्रमेण त्रिवृदाग्निष्टोमादीनि पञ्चाहान्यनुष्ठेयानि । तेषु पञ्चस्वप्यहः स्वेकविंशत्रिणवादयः स्तोमा न विद्यन्ते । सोऽयं सप्तशस्तोमानतिक्रमः । "आश्रावय" इत्याद्यक्षरात्मकत्वेन प्रजापतिः सप्तदशः । अतस्तदनतिक्रमः प्रजापतेः प्राप्त्यै भवति ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके दशमोऽनुवाकः ।। १० ।।

अथ सप्तम एकादशोऽनुवाकः ।

दशमे पञ्चशारदीयविधिरुक्तः । एकादशे तदीयपशुविधिरुच्यते । तत्राऽऽदौ सामविशेषं विधत्ते -

अगस्त्यो मरुद्भ्य उक्षणः प्रौक्षत् । तानिन्द्र आदत्त । न एनं वज्रमुद्यत्याभ्यायन्त । तानगस्त्यश्चैवेन्द्रश्च कयाशुभीयेनाशमयताम् । ताञ्छान्तानुपाह्वयत । यत्कयाशुभीयं भवति शान्त्यै, इति ।

अगस्त्यो महर्षिर्मरुत उद्दिश्योक्ष्णो वृषभान्पशून्प्रोक्षितवान्, तान्मरुदर्थं प्रोक्षितान्पशूनिन्द्रोऽपजहार । तदा ते मरुतो हस्तैर्वज्रमुद्यम्यैनमिन्द्रमभिलक्ष्य हन्तुमागताः । तदानीमगस्त्येन्द्रौ कयाशुभीयाख्येन साम्ना तान्मरुतः शान्तानकुरुतानम् । तत इन्द्रो गतक्रोधांस्तान्मरुतः स्वसमीपे समाहूतवान् । अतोऽस्मिन्पञ्चशारदीये शान्त्यर्थं कयाशुभीयं साम गायेत् ।

अथ पशून्विधत्ते -

तस्मादेत ऐन्द्रा मारुता उक्षाणः सवनीया भवन्ति । त्रयः प्रथमेऽहन्नालभ्यन्ते । एवं द्वितीये । एवं तृतीये (१) । एवं चतुर्थे । पञ्चोत्तमेऽहन्नालभ्यन्ते । वर्षिष्ठमिव ह्येतदहः, इति ।

यस्मादिन्द्रस्य मरुतां च पशुविषयमैकमत्यं संपन्नं तस्मादैन्द्रा मारुताः कर्तव्याः तेषां च सवनीयां सप्तदशानामुक्ष्णां पञ्चसु दिनेषु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विभज्य प्रयोगः । तत्र प्रतिदिनं पशुत्रये सति द्वावधिकाववशिष्येते । अतस्ताभ्यां सह पञ्च पशव उत्तमेऽहन्यालभ्याः । यस्मादेतदहः समाप्तिदिनत्वादतिशयेन प्रवृद्धम् । तत्र ह्युदीच्यादिदिग्विशेषा अतिरात्रत्वेन स्तोत्रविशेषाश्च संपद्यन्ते । तस्मात्तत्र पशुबाहुल्यं युक्तम् ।

यजनवेदने प्रशंसति -

वर्षिष्ठः समानानां भवति । य एतेन यजते । य उ चैनमेवं वेद, इति ।

समानानां मध्ये वर्षिष्ठो गुणैरतिशयेन प्रवृद्धः ।

पञ्चशारदीयं प्रशंसति-

स्वाराज्यं वा एष यज्ञः । एतेन वा एकयावा कान्दमः । स्वाराज्यमगच्छत्, इति ।

एष पञ्चशारदायाख्यां यज्ञः स्वाराज्यास्वरूपस्तत्प्राप्तिहेतुत्वात् । एतेन पञ्चशारदीयनैव पुरा कान्दमा नाम कश्चिदृषिः स्वाराज्यं प्राप्तवान् । स कीदृश एकयावा । एकन वाहनेन यातीत्येकयावा रथेनैव गच्छति न तु वाहनान्तरेणेत्यर्थः ।

यागवेदने प्रशंसति -

स्वाराज्यं गच्छति । य एतेन यजते (२) । य उ चैनमेवं वेद, इति ।

पशुदेवतारूपमरुत्संबन्धेन क्रतुं प्रशंसति -

मारुतो वा एष स्तोमः । एतेन वै मरुतो देवानां भूयिष्ठा अभवन् । भूयिष्ठः समानानां भवति । य एतेनं यजते । य उ चैनमेवं वेद, इति ।

यस्मादेतेन पञ्चशारदीयेन देवानां मध्ये मरुतोऽतिशयेन बहुला अभवंस्तस्मादेष । त्रिवृत्पञ्चदशसप्तदशस्तोमयुक्तो यागो मरुतः । एतद्याजी तद्वेदी च समानानां मध्येऽत्यन्तबहुलो भवति ।

पञ्चसु संवत्सरेष्वनुष्ठानं प्रशंसति -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चशारदीयो वा एष यज्ञः । आपञ्चमात्पुरुषादन्नमत्ति । य एतेन यजते । य उ चैनमेवं वेद, इति ।

स्वात्मानमारभ्य पुत्रपौत्रादिद्वारा यः पञ्चमः पुरुषस्तत्पर्यन्तं सर्वेषामन्नसमृद्धिर्भवति ।

सप्तदशं स्तोमावसा प्रशंसति-

सप्तदशꣳ स्तोमानातियन्ति । सप्तदशः प्रजापतिः प्रजापतेरेव नैति (३), इति ।

तृतीयं गच्छति य एतेन यजतेऽत्ति एतेन यजते य उ चैनमेवं वेद त्रीणि च ।। अगस्त्यः स्वाराज्यं मारुतः पञ्चशारदीयो वा एष यज्ञः सप्तदशः । प्रजापतेरेव नैति ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये एकादशोऽनुवाकः ।। ११ ।।

प्रजापतेः सकाशान्नातिगच्छतीत्यर्थः ।

अत्र मीमांसा । एकादशाध्यायस्य द्वितीयपादे चिन्तितम् -

"उक्षोत्सर्गे किमुत्कर्षत्यागो वाऽद्योऽत्र पूर्ववत् ।
अन्वहत्रित्वयोरुत्तमाहपञ्चत्वयोर्विधौ ।।
वाक्यभेदाद्विशिष्टानामन्येषां कर्मणा विधिः ।
तस्मादारण्यवच्छेषत्याग उत्सर्ग इष्यताम्" ।।

अस्त्यहीनेषु पञ्चशारदीयनामकः कश्चित्सवविशेषः पञ्चाहः । स च पञ्चसु संवत्सरेष्वनुष्ठेयः । तत्र प्रथमे संवत्सरे विशाखानक्षत्रयुक्तायाममावास्यायां सप्तदश स्त्रीपशव । सप्तदशोक्षाणश्च विहितास्तेषु सवेषु पर्यग्निकृते प्रोक्षितेषु सत्सु स्त्रीपशूनामालम्भं पुरुषपशूनामुत्सर्गं चाऽऽम्नाय पुनर्द्वितीये तृतीये चतुर्थे संवत्सरे तथैवानुष्ठानमाम्नाय पश्चादिदमाम्नातम् - "त्रींस्त्रीनित्येकैकस्मिन्नहन्यालभेरन्पञ्चोत्तमेऽहनि" इति । तत्र वत्सरचतुष्टयगतासु चतसृष्वमावास्यासु योऽयं पुरुषपशूनामुक्षणमुत्सर्गस्तत्र तत्कर्मशेषत्यागो न भवति, किंतूत्कर्षः । कुतः । त्रींस्त्रीनितिवाक्येनाऽलम्भस्याभिधानात् । यथा पूर्वत्र प्राजापत्यानामालम्भोत्कर्षस्तथाऽत्रापि युज्यत इति प्राप्ते ब्रूमः-"त्रींस्त्रिनेकैकस्मिन्नहन्यालभेरन्" इत्यत्र पर्यग्निकरणानन्तरभाविनं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्राप्तमालम्भमनूद्यैकैकाहत्वत्रित्वगुणयोर्विधां वाक्य भिद्येत । तथा "पञ्चोत्तमेऽहन्" इत्यत्रोत्तमाहत्वपञ्चत्वयोर्विधौ वाक्यभेदः । तस्मादणद्वयविशिष्टानामन्येषां कर्मणां विधिरभ्युपेयः । तथा सत्यारण्यपशुन्यायेन सप्तदशोक्षाणः पर्यग्निकरणप्रोक्षणाभ्यां समापनीयाः ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठक एकादशोऽनुवाकः ।। ११ ।।

अथ सप्तमे द्वादशोऽनुवाकः ।

एकादशे पञ्चशारदीयगताः पशवोऽभिहिताः । द्वादशे त्वग्निष्टुदाख्ये क्रतौ ग्रहाणां ग्रहकाले पुरोरुचोऽभिधीयन्ते । अत एव सूत्रकारेणोक्तम् -"तथाऽग्निष्टुतस्य पुरोरुचोऽस्याजरासोऽग्ने आयूंषि पवस इत्यैन्द्रवायवस्य द्वितीया मैत्रावरुणस्य तृतीयाऽऽश्विनस्य चतुर्थी पञ्चमी शुक्रामन्थिनोः षष्ठ्याग्रयणस्यान्यामाग्नेयीमुक्थ्यस्य नियुनक्ति नित्या ध्रुवस्य नियुनक्त्यैन्द्राग्नवैश्वदेवयोरग्निश्रिय इति तिस्रो मरुत्वतीयानां श्रुधि श्रुत्कर्णेत्युत्तरा माहेन्द्रस्य विश्वेषामदितिरिति तिस्र आदित्यग्रहस्योत्तमा सावित्रस्य" इति । तत्रैन्द्रवायवस्य या प्रथमा पुरोरुग्विद्यते तामाह-

अस्याजरासो दमा मरित्राः । अर्चद्धूमासो अग्नयः पावकाः । श्विचीचयः श्वात्रासो भुरण्यवः । वनर्षदो वायवो न सोमाः, इति ।

अस्य यजमानस्य दमा यज्ञग्रहा एवंगुणकाः सन्त्विति प्रार्थयते । किंगुणका अजरासो विनाशरहिताः । मरित्रा म्रियन्ते संज्ञप्यन्ते पशवो येष्विति मरित्राः पुनः पुनर्विशस्यमानपशुका इत्यर्थः । अर्चद्धूमासोऽर्चनीयधूमाः, अग्नयोऽग्निमन्तः, पावकाः शोधकाः, श्विचीचयः श्विचीं वृद्धिमञ्चन्ति गच्छन्ति प्रतिदिनमनुष्ठानवृद्धियुक्ता इत्यर्थः । अत एव श्वात्रासः श्वेता निर्मला इत्यर्थः । भुरण्यवो भरणकुशलाः फलसंपादका इत्यर्थः । वनर्षदो वननीयफलप्राप्तिहेतवः । वायवो न वायुसदृशा निरन्तरयज्ञप्रवृत्तियुक्ता इत्यर्थः । सोमाः सोमयागयुक्ताः ।

अथ मैत्रावरुणग्रहस्य पुरोरुचमाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजा नो मित्रावरुणा । यजा देवाँ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् इति ।

हे ग्रह नोऽस्मदर्थं मित्रावरुणा यजा मित्रावरुणाख्यौ देवौ पूजय । तद्द्वारा देवान्सर्वान्यज । ऋतं यज्ञरूपमिदं कर्म बृहत्प्रौढं वर्तते । अतो हेऽग्ने स्वं दमं स्वकीयं ग्रहं यक्षि पूजय कर्मनिष्पादनेनालं कुर्वित्यर्थः ।।

अथाऽऽश्विनग्रहस्य पुरोरुचमाह -

अश्विना पिबतँ सुतम् । दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा (१), इति ।

हेऽश्विनौ युवां सुतमभिषुतं सोमं पिबतम् । कीदृशौ दीद्यग्नी दीप्यमानाग्नियुक्तौ, शुचिव्रता शुद्धकर्मयुक्तौ, तथा यज्ञवाहसा यज्ञनिर्वाहकावृतुना यज्ञोचितकालविशेषेण युक्ताविति शेषः ।

अथ शुक्रग्रहस्य पुरोरुचमाह -

द्वे विरूपे चरतः स्वर्थे । अन्याऽन्या वत्समुपधायपेते । हरिरन्यस्यां भवति स्वधावान् । शक्रो अन्यस्यां ददृशे सुवर्चाः, इति ।

अहश्च रात्रिश्चेत्येते द्वे विरूपे शुक्लकृष्णत्वाद्विषमरूपे स्वर्थे सुप्रयोजने चरतः पर्यावर्तेते । अन्याऽन्या तयोरेकैका पृथक्पृथगव वत्समुपधापयेते वत्ससदृशं स्वस्वोचितं देवमुपधापयेते स्तनपानेनेव प्रीणयतः । तयोर्मध्येऽन्यस्यां रात्रिरूपायां मातरि वत्सस्थानीयो हरिर्हरणशीलोऽग्निः । स्वधावानन्नवान्भवति । अन्यस्यामहसंज्ञिकायां मातरि वत्सस्थानीयाः शुक्रः शुभ्रः सुवर्चः । शोभनदीप्तिरादित्योऽन्नवान्दृश्यन्ते । तथा चाग्निहोत्रब्राह्मणे श्रुतम् -"तस्मादग्नये सायं सूर्याय प्रातः" इति । एवंविधसूर्वा ग्निरूपोऽयं शुक्रग्रह इत्यर्थः ।

अथ मन्थिग्रहस्य पुरोरुचमाह -

पूर्वापरं चरतो माययैतौ । शिशू क्रीडन्तौ परियातौ अध्वरम् । विश्वान्यन्यो भुवनाऽभिचष्टे । ऋतूनन्यो विदधज्जायते पुनः, इति ।

एतौ सूर्याचन्द्रमोरूपौ मातृस्थानीयाया दिवः शिशू बालकौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूर्वभागमपरभागं च प्रति संचरतः । उदयाय पूर्वभागोऽस्तमयाय पश्चिमभागः । एवंविधसंचारे पारमेश्वरी मायैव साधनम् । सा हि पारमेश्वरी शक्तिः सूर्याचन्द्रमसौ निर्माय स्वस्वव्यापारे स्थापितवती । तौ च शिशू स्वकीयलीलया क्रीडन्तावस्मदीयमध्वरं परियातः । प्राप्नुतः । तयोर्मध्येऽन्यः सूर्यो विश्वानि भुवनानि सर्वांल्लोकानभिचष्टे सर्वतः । प्रकाशयति । अन्यश्चन्द्रमा ऋतून्वसन्तादीन्विदधन्निष्पादयन्पुनर्जायते तत्तच्छुक्लप्रतिपदि पुनः पुनरुरत्पद्यते । एवं विधचन्द्ररूपोऽयं मन्थिग्रहः तथा श्रुतम्-“असौ वा आदित्यः शुक्रश्चन्द्रमा मन्थी” इति ।

अथाऽऽग्रयणस्य पुरोरुचमाह -

त्रीणि शता त्रीषहस्राण्यग्निम् । त्रिँशच्च देवा नव चासपर्यन् (२) । औक्षन्घृतैरास्तृन्बर्हिरस्मै । आदिद्धोतारं न्यषादयन्त, इति ।

यद्यपि हविर्भुजस्त्रयस्त्रिंशद्देवास्तथाऽपि योगेश्वर्यकल्पितलीलाग्रहभेदाच्छत्त्रयं सहस्त्रत्रयं त्रिंशन्नव चेत्येतावन्तो देवा भवन्ति । ते च देवा अग्निमसपर्यन्परिचितवन्तः । त्रयस्त्रिंशत्संख्याकानामेव लीलाविग्रहाः । इत्यमुमर्थं वाजसनेयिनः साकल्यब्राह्मणे समामनन्ति- “महिमान एवैषां ये ते त्रयस्त्रिंशत्वेव देवाः” ते देवाः कथं परिचरन्तीति तदुच्यते-घृतैराज्यैरौक्षन्नुपरि जुह्वतीत्यर्थः । अस्मा बर्हिरास्तृणन्वेद्यं बर्हिरास्तृणन्ति । आद्यिदनन्तरमेवैनमग्निं होतारमनुमन्यमाना न्यषादयन्त । निषण्णं कुर्वन्ति -

अथैन्द्राग्नस्य पुरोरुचमाह -

अग्निनाऽग्निः समिध्यते । कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः, इति ।

इन्द्रसहितेनाग्निना ग्रहदेवतारूपेणायमाहुत्याधारोऽग्निः समिध्यते सम्यग्दीप्यते । कीदृशोऽग्निः कविर्हवनप्रकारं विद्वान्गृहपतिर्यज्ञगृहस्वामी युवा सर्वदा तरुणः, देवार्थं हव्यं वहतीति हव्यवाट्, जुहूरेवाऽऽस्यं मुखं यस्यासौ जुह्वास्यो जुहूगतं हविरयं भक्षयतीत्यर्थः ।

अथ वैश्वदेवग्रहस्य पुरोरुचमाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निर्देवानां जठरम् । पूतदक्षः कविक्रतुः । देवो देवेभिरागमत्, इति ।

योऽयमग्निः । स एव देवानां जठरमुदरस्थानीयः । पूतश्चासौ दक्षश्चेति पूतदक्षः, पूतः शुद्धो दमः कर्मनिष्पादनकुशलः कविक्रतुः कवीनां विदुषां देवानां संबन्धी क्रतुर्यागो यस्यासौ कविक्रतुस्तादृशो देवोऽग्निर्देवेभिरन्यैर्देवैः सहाऽऽगमदिह कर्मण्यागच्छतु ।

अथ मरुत्वतीयग्रहाणां यास्तिस्रः पुरोरुचस्तासां मध्ये प्रथमामाह ।-

अग्निश्रियो मरुतो विश्वकृष्टयः । आत्वेषमुग्रमव ईमहे वयम् (३) । ते स्वामिनो रुद्रिया वर्षनिर्णिजः । सिंहा न हेषक्रतवः सुदानवः, इति ।

य एते मरुतस्तेऽग्निभिश्रियो विश्वकृष्टयश्च । अग्निं श्रयन्ते सेवन्त इत्यग्निश्रियस्ते । हविःस्वीकरणार्थमग्निमायन्ति । विश्वे कृष्टयो मनुष्या येषां ते विश्वकृष्टयः तर्वैर्मनुष्यैः पूज्या इत्यर्थः । तादृशानां मरुतामवो रक्षणमासमन्ताद्वयमीमहे प्राप्नुमः ते ह्यस्मान्रक्षन्ति । कीदृशं त्वेषं दीप्तिमदुग्रं विरोधिनां भयंकरम् । यथा दीप्तया विरोधितमो नश्यति एवमेव तदीयरक्षणजन्येन तेजसाऽस्मद्विरोधिनो नश्यन्तीत्यर्थः । ते मरुतो वायुविशेषाः स्वामिनो वृष्टिवेलायां स्वानयुक्ता गर्जनयुक्ताः । रुद्रो वैद्युताग्निः "रुद्रो वा एष यदग्निः" इति श्रुतेः । रुद्रिया वैद्युताग्नियुक्ताः । निर्णेजन्ति भूमिं शोधयन्तीति वर्षनिर्णिजः । सिंहा न सिंहा इव । हेषक्रतवः शब्दकारिण उत्साहेन सिंहनादं कुर्वन्तीत्यर्थः । सुदानवः शोभनफलस्य दातारः ।

अथ द्वितीयामाह -

यदुत्तमे मरुतो मध्यमे वा । यद्वाऽवमे सुभगासो दिविष्ट ।। ततो नो रुद्रा उत वाऽन्वस्य । अग्ने वित्ताद्धविषो यद्यजामः, इति ।

हे मरुतो यूयं यदुत्तमे स्थाने यदि वा मध्यमे स्थिता यद्वाऽवमेऽत्यन्तनिकृष्टे स्थाने स्थिता अथवा सुभगासः सौभाग्ययुक्ताः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्तो दिवि द्युलोके स्थिताः । हे रुद्रा दुःखद्राविणो मरुतस्ततो द्युस्थानादुत वाऽन्यस्माननुगच्छत । हेऽग्नेयद्हविर्वयं यजामोऽस्यं हविषः सारं वित्ताज्ञानीहि ।

अथ तृतीयामाह -

ईडे अग्निँ स्ववसं नमोभिः । इह प्रसत्तो विचयत्कृतं नः ॥ रथैरिव प्रभरे वाजयद्भिः । प्रदक्षिणिन्मरुताँ स्तोमंमृध्याम्, (४), इति ।

स्ववसं सुष्टु रक्षकमग्निं नमोभिर्नमस्कारैः स्तुतिं कुर्वे । सोऽग्निरिह कर्मणि प्रसत्तः प्रकर्षेण समागतः सन्नोऽस्माभिर्यत्कृतं कर्म तद्विचयद्विषिनु यात् । वाजयद्भिरन्नमिच्छद्भिऋत्विग्भिः सहितोऽहं रथैरिव प्रभरे यथा रथैर्युद्धसाधनानि प्रकर्षेण हरन्त्येवमहं हवींषि प्रकर्षेण हरामि । प्रदक्षिणिन्प्रदक्षिणयन्भक्त्या प्रदक्षिणँ कुर्वन्नहं मरुतां संबन्धिनां स्तोमं स्तोत्रयुक्तं यज्ञमृध्यां समृद्धं कुर्याम् ।

अथ माहेन्द्रग्रहस्य पुरोरुचमाह -

श्रुधि श्रुत्कर्ण वह्निभिः । देवैरग्ने सयावभिः । आ सीदन्तु बर्हिषि । मित्रो वरुणो अर्यमा । प्रातर्यावाणो अध्वरम्, इति ।

हेऽग्ने श्रुत्कर्ण शृण्वत्कर्ण विज्ञाप्यस्य श्रोतर्वह्निर्हविष वोढृभिः सवावभिर्गमनशीलसहितैर्देवैः सह त्वं श्रुध्यमस्मद्विज्ञाप्यं शृणु । अध्वरं यज्ञं प्राप्तचर्वाणः प्रातःकाले गन्तारो मित्रादयस्त्रयो बर्हिष्यस्मदीययज्ञ आसीदन्त्वागत्य तिष्ठन्तु ।

अथाऽऽदित्यग्रहस्य तिस्रः पुरोरुचः । तत्र प्रथमामाह -

विश्वेषामदितिर्यज्ञियानाम् । विश्वेषामतिथिर्मानुषाणाम् ॥ अग्निर्देवानामव आवृणानः ॥ सुमृडीको भवतु विश्ववेदाः, इति ।

अयमग्निः सुमृडीकः सुखहेतुर्भवतु । कीदृशोऽनग्निर्यज्ञियानां यज्ञयोग्यानां विश्वेषां सर्वेषामृत्विजामदितिरखण्डयिता । मातृवत्पालक

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्यर्थः । तथा विश्वेषां सर्वेषां मानुषाणामतिथिरतिथिवत्पूजयनीयः । देवानां सर्वेषां मध्येषोऽस्मद्रक्षणमावृणानः । सर्वत्र प्रार्थयमानः । विश्ववेदा विश्वस्य वेदिता ।

अथ द्वितीयामाह –

त्वे अग्ने सुमतिं भिक्षमाणाः (५) । दिवि श्रवो दधिरे यज्ञियासः । नक्ता च चक्रुरुषसा विरूपे । कृष्णं च वर्णमरुणं च संधुः, इति ।

हेऽग्ने यज्ञियासो यज्ञार्हा ऋत्विग्ययजमानास्त्वे त्वयि सुमतिं शोभनबुद्धिं त्वत्सेवापरा भिक्षमाणा याचमाना दिवि द्युलोके श्रवः कीर्तिं दधिरे संपादितवन्तः । त्वां सेवित्वा देवेषु कीर्तिं प्राप्त इत्यर्थः । उषसोषः-कालेन सहनक्ता च रात्रिमपि चकारादहश्च विरूपे विलक्षणरुपयुक्ते चक्रुः कृतवन्तः । तदेव कथमिति तदुच्यते-कृष्णं वर्णं रात्रेः कृष्णरूपम्, अरुणं चोषसो रक्तरूपम्, चकाराभ्यामहः शुक्लरूपं च संधुः संपादितवन्तः । यज्ञानुष्ठानद्वारा यजमाना यज्ञेन तुष्टा देवा वा तादृशं रूपं कृतवन्त इत्यर्थः ।

अथ तृतीयामाह –

त्वामग्न आदित्यास आस्यम् । त्वां जिह्वाँ शुचयश्चक्रिरे कवे । त्वाँ रातिषाचो अध्वरेषु सश्चिरे । त्वे देवा हविरदन्त्याहुतम्, इति ।

हेऽग्ने, आदित्यास एत आदित्यास्त्वामास्यं मुखं चक्रिरे त्वयि हुतस्य भक्षणात् । हे कवे विद्वन्नग्ने शुचयः शुद्धा अन्येऽपि देवास्त्वां स्वकीयजिह्वां चक्रिरे । रातिं फलदानं सचन्ते समवनयन्तीति रातिवाचः फलप्राप्तिकामा इत्यर्थः । तादृशा यजमानासत्वामग्निमध्वरेषु यागेषु सश्चिरे फलदानाय प्राप्तवन्तः । देवाः सर्वेऽपि त्वे त्वय्याहुतं सर्वतो हुतं हविरिदमदन्ति ।

अथ सावित्रग्रहस्य पुरोरुचमाह –

नि त्वा यज्ञस्य साधनम् । अग्ने होतारमृत्विजम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धनुष्वद्देव धीमहि प्रचेतसम् । जीरं दूतममर्त्यम्, (६),
इति ।

यज्ञवाहसा सपर्यन्वयमृध्य भिक्षमाणाः प्रचेतसमेकं च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये द्वादशोऽनुवाकः ।। १२ ।।

हेऽग्ने देव त्वां निधीमहि नितरां ध्यायेम । कीदृशं यज्ञस्य साधनं होमद्वारा निष्पादकं होतारं देवानामाह्वातारमत एवर्त्विजमृत्विक्समानं प्रचेतसं प्रकृष्टज्ञानयुक्तं जीरं जीवनप्रदं दूतं हितार्थं यतमानममर्त्यं मरणरहितम् । वनुष्वदिति क्रियाविशेषणम् । परिचरणवद्यथा भवति तथा ध्यायेमेत्यर्थः ।

अत्र विनियोगसंग्रहः-

अस्या जरा पुरोरुक्स्यादग्निष्टुत्यैन्द्रवायवे ।
यजेति मैत्रावरुणे अश्विनेत्याश्विने ग्रहे ।। १ ।।
द्वे विरूपे तु शुक्रस्य ग्रहे पूर्वेति मन्थिनी ।
त्रीणीत्याग्रहणे ह्याग्निनेत्यैन्द्राग्रग्रहे भवेत् ।। २ ।।
अग्निर्देवा वैश्वदेवे ह्यग्निश्रिय इति त्रयम् ।
ज्ञेया मरुत्वतीयेषु माहेन्द्रे तु श्रुधीत्यसौ ।। ३ ।।
विश्वेषां तिस्र आदित्ये नि त्वा सावित्रके ग्रहे ।
अनुवाके द्वादशेऽस्मिन्मन्त्राः षोडश वर्णिताः ।। ४ ।।

अथ मीमांसा । दशमाध्यायस्य चतुर्थे पादे चिन्तितम्-

आग्नेयेषु ग्रहेषूहो नास्ति वा स्तुतशस्त्रयोः ।
संस्कारत्वादस्ति मैवमर्थकर्मत्वनिर्णयात् ।।

अग्निष्टुदाख्य एकाह श्रूयते -"आग्नेया ग्रहा भवन्ति" इति । तेषु चोदकप्राप्तयोर्नानादेवत्ययोः तुशस्त्रयोः संस्काराकर्मत्वभ्रमेणास्त्यूह इति वदन्तं प्रत्येतदुत्तरं द्वितीयाध्याये तयोरर्थकर्मत्वस्य निर्णीतत्वान्नास्त्यूह इति ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके द्वादशोऽनुवाकः ।। १२ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ सप्तमे त्रयोदशोऽनुवाकः ।

द्वादशेऽनुवाकेऽग्निष्टुद्यागे ग्रहाणां पुरोरूचोऽभिहिताः । अथ त्रयोदश इन्द्रस्तुद्यागे ग्रहाणां पुरोरुचोऽभिधीयन्ते । एतच्च सूत्रे स्पष्टमभिहितम्-"इन्द्रस्तुत इन्द्रस्तोमेनोक्थ्येनेन्द्रियकामो वीर्यकामो वा यजेत, ऐन्द्रियः पुरोरुचस्तिष्ठा हरी कस्य वृषेत्यैन्द्रवायवस्य तृतीया मैत्रावरुणस्य चतुर्थ्याश्विनस्य पञ्चमी षष्ठी शुक्रामन्थिनोः सप्तम्याग्रयणस्य नित्योक्थ्यस्य नियुनक्ति ध्रुवैन्द्राग्नवैश्वदेवानां नित्या मरुत्वतीयमाहेन्द्राणाम्, आ नो विश्वाभिरिति तिस्र आदित्यग्रहस्योत्तमा सावित्रस्य" इति । तत्रैन्द्रवायुवस्य प्रथमां पुरोरुचमाह -

ति॒ष्ठा॒ हरी॒ रथ॒ आ यु॒ज्यमा॑ना या॒हि । वा॒युर्न नि॒युतो॑ नो॒ अच्छ॑ । पिबा॒स्यन्धौ॑ अ॒भिसृ॑ष्टो अ॒स्मे । इन्द्र॒ स्वाहा॑ ररि॒मा ते॒ मदा॑य, इति ।

हे इन्द्र युज्यमाना रथे संबध्यमानौ हरी अश्वावातिष्ठाधितिष्ठ, नोऽस्मानच्छाभिलक्ष्याऽऽयाह्यागच्छ । तत्र दृष्टान्तः, वायुर्न नियुतो यथा नियुत्संज्ञकानश्वानभिलक्ष्य वायुर्याति तद्वत्, आगत्य चास्मेऽस्माभिरभिसृष्टः प्रेरितस्त्वमन्धोऽन्नरूपं सोमं पिबासि पीतवान्भव ।। हे इन्द्र ते मदाय तव हर्षार्थं स्वाहा ररिमा स्वाहाकृतं हविर्ददिम् ।

अथ तत्रैव द्वितीयां पुरोरुचमाह -

कस्य॒ वृषा॑ सु॒ते सचा॑ । नि॒युत्वा॑न्वृष॒भो र॑णत् । वृ॒त्रहा सोम॑पीतये, इति ।

कस्य प्रजापतेः संबन्धी वृषेन्द्र सुतेऽभिषुते सोमे सचा संबद्धो नियुत्वान्नियुन्नामकैरश्वैर्युक्तो वायुर्वृषभो रणत्, यथा वृषभो दृप्तो रणति तथाऽयं वायुन्तुष्टो रणति गर्जति । वृत्रहेन्द्रश्च सोमपीतये सोमपानाय रणति ।।

अथ मैत्रावरुणग्रहस्य पुरोरुचमाह -

इन्द्रं॑ व॒यं म॑हाध॒ने । इन्द्र॒मर्भे॑ हवामहे । युजं॑ वृ॒त्रेषु॑ व॒ज्रिण॑म् (१), इति ।

वयं यजमाना महाधने बहुधनसाध्ये प्रौढकर्मणींन्द्रं हवामह

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आह्वयामः । अर्भे स्वल्पेऽपि कर्मणीन्द्रं हवामह आह्वयामः । कीदृशमिन्द्रं युजं कर्मद्वयेऽपि योग्यं वृत्रेषु शत्रुषु प्राप्तेषु वज्रिणं वज्रहस्तम् ।

अथाऽऽश्विनग्रहस्य पुरोरुचमाह –

द्वितायो वृत्रहन्तमः । विद इन्द्रः शतक्रतुः । उप नो हरिभिः सुतम्, इति ।

द्वयोर्लोकयोः समूहो द्विता तस्यां द्वितायां वृत्रहन्तमोऽतिशयेन वैरिघाती शतक्रतुः शतसंख्याकाश्विमेधयुक्तो य इन्द्रो विद्यते सोऽयमिन्द्रो हरिभिरश्वैः सहोप नोऽस्माकं समीपं प्राप्य सुतमभिषुतं सोमं विदे लब्धवान् ।

अथ शुक्रग्रहस्य पुरोरुचमाह –

स सूर आ जनयञ्ज्योतिरिन्द्रम् । अया धिया तरणिरद्रिबर्हाः । ऋतेन शुष्मीनवमानो अर्कैः । व्युस्रिधो अस्रो अद्रिर्विभेद, इति ।

स शुक्रग्रहरूपः सूर आदित्यो ज्योतिः प्रकाशं जनयन्निन्द्रमागच्छतु । अया धियाऽतया मदनुग्रहबुद्ध्या तरणिस्त्वरमाणोऽद्रिबर्हा पर्वतानां शत्रूणां निवर्हिताऽभिभविता भवति । ऋतेन यज्ञेनानुष्ठितेन शुष्मीम्बलवतोऽस्मानर्कैरर्चनीयैः फलैरवमानः पालयमानो वर्तते । अस्रो निरसनकुशलोऽद्रिः पर्वतसमान इन्द्र उस्रिध उत्कर्षेणाऽऽगच्छतः शत्रून्विबिभेद विशेषेण दारितवान् ।

अथ मन्थिग्रहस्य पुरोरुचमाह –

उत त्यदाश्वश्वियम् । यदिन्द्र नाहुषीष्वा । अग्रे विक्षु प्रतीदयत् (२), इति ।

हे इन्द्र नाहुषीषु नहुषस्य राज्ञः संबन्धिनीषु विक्षु प्रजासु, यद्धनं प्रतीदयत्प्रत्येकमेव प्राप्तमासीत्तादृशमाश्वश्वियमुताऽऽशुगाम्यश्वसमूहयुक्तमपि हेऽग्न आत्यत्वमेव स्वभक्तेभ्य आनयसि ।

भरेष्विन्द्रꣳ सुहवꣳ हवामहे । अꣳहोमुचꣳ सुकृतं दैव्यं जनम् । अग्निं मित्रं वरुणꣳ सातये भगम् । द्यावापृथिवी मरुतः स्वस्तये, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुहवं सुखेनाऽऽह्वातुं शक्यमिन्द्रं भरेषु भरणीयेषु कर्मसु हवामह आह्वयामः । तथाऽग्निमित्रावरुणाभ्भगमादित्यं च सातये धनलाभायाऽऽह्वयामः । तथा द्यावापृथिव्यौ मरुतश्च स्वस्तये क्षेमायाऽऽह्वयामः ।

अथैन्द्राग्नस्य पुरोरुचमाह –

महि क्षेत्रं पुरुश्चन्द्रं विविद्वान् । आदित्सखिभ्यश्च रथꣳ समैरत् । इन्द्रो नृभिरजनद्दीद्यानः साकम् । सूर्यमुषसं गातुमग्निम्, इति ।

अयमिन्द्रो विविद्वान्विविधद्रव्यजातं जानन्नादिदनन्तरमेव सखिभ्यः सखिसदृशेभ्यो यजमानेभ्यो महि प्रौढं क्षेत्रं पुरुश्चन्द्रं बहुलमाह्लादकारि धनं च रथं चरणशीलं गोमहिषादि च समैरयत्सम्यक्प्रेरितवान्दत्तवानित्यर्थः । सोऽयमिन्द्रो दीद्यानो दीप्यमानो नृभिर्मनुष्यैर्ऋत्विग्भिः सार्धं सूर्यादीनजनयदुत्पादितवान् । गातुं गमनशीलो वायुस्तम् ।

अथ वैश्वदेवग्रहस्य पुरोरुचमाह –

उरूं नो लोकमनुनेषि विद्वान् । सुवर्वज्ज्योतिरभयꣳ स्वस्ति (३) । ऋष्वा त इन्द्र स्थविरस्य बाहू । उपस्थेयाम शरणा बृहन्ता, इति ।

हे इन्द्र त्वं विद्वान्सर्वं जानन्नोऽस्मदर्थमुरुं विस्तीर्णं लोकमनुनेष्यनुक्रमेण संपादयसि । तथा सुवर्वत्स्वर्गयुक्तं तत्साधनभूतमित्यर्थः । अभयं भयरहितं स्वस्ति क्षेमकरं ज्योतिरग्निस्वरूपमृष्व प्राप्नुहि । चिरकालीनत्वेन वृद्धसदृशस्य ते तव बाहू उपस्थेयामोपस्थानं करवाम त्वदीयं बाहुद्वयमनुग्रहबुद्ध्या यथाऽस्मच्छिरसि स्थापयसि तथा वयं त्वां भजेम । कीदृशौ बाहू शरणा रक्षितारौ बृहन्ता गुणाधिकौ ।

अथाऽऽदित्यग्रहस्य तिस्रः पुरोरुचः । तत्र प्रथमामाह –

आ नो विश्वाभिरूतिभिः सजोषाः । ब्रह्म जुषाणो हर्यश्व याहि । वरीवृजत्स्थविरेभिः सुशिप्र । अस्मे दधद्वृषणꣳ शुष्ममिन्द्र, इति ।

हरिनामकावश्वौ यस्यासौ हर्यश्वः । शोभने शिप्रे हनू यस्यातौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुशिप्रः, तादृश हे इन्द्र त्वं ब्रह्म जुषाणः परिवृद्धमिदं कर्म सेवमानः सजोषा अस्माभिः सह समानप्रीतिः सन्विश्वाभिरूतिभिः समस्तै रक्षणैः सहितो नोऽस्मान्प्रत्यायाह्यागच्छ । किं कुर्वन्स्थविरेभिर्वरीवृजत्प्रवृद्धैरुपायैर्वर्जयितव्याञ्छत्रूनत्यर्थं वर्जयन् । तथा वृषणं कामवर्षणहेतुं शुष्मं बलमस्मे दधदस्मासु संपादयन् ।

अथद्वितीयामाह –

इन्द्राय गाव आशिरम् । दुदुह्रे वज्रिणे मधु । यत्सीमुपह्वरेऽविदत्, इति ।

वज्रिणे वज्रयुक्तायेन्द्रायेन्द्रार्थमाशिरमीषन्मथितं दधिहेतुभूतं मधु मधुरं क्षीरं गावो दुदुह्रे दुग्धवत्यः । यत्सीं यदेव क्षीरमुपह्वरेऽस्मिन्प्रवृत्तेऽध्वरे वर्तमान इन्द्रोऽविददलब्ध । तत्क्षीरं दुदुह्र इति पूर्वत्रान्वयः ।

अथ तृतीयामाह –

तास्ते वज्रिन्धेनवो जोजयुर्नः । गभस्तयो नियुतो विश्ववाराः । अहरहर्भूय इज्जोगुवानः । पूर्णा इन्द्र क्षुमतो भोजनस्य, इति ।

हे वज्रिन्वज्रयुक्तेन्द्र ते त्वदर्थं ताः पूर्वोक्ता धेनवो नोऽस्माञ्जोजयुः शीघ्रमेव प्राप्ताः । कीदृश्यो धेनवो गभस्तयो दीप्तिमत्यः पुष्टशरीरा इत्यर्थः । नियुतो नियमेन क्षीरादेर्मिश्रयित्र्यः । विश्ववाराः । स्वकीयक्षीरेण क्षुधादिरूपं विश्वं सर्वमप्युपद्रवं वारयन्तीति विश्ववाराः । अहरहर्दिने दिने भूय इद्भूयिष्ठमेव जोगुवानाः शब्दयन्त्यः क्षीरपूर्णस्तनत्वेन दोहनार्थं वत्समाकारयितुं हम्भारवं कुर्वत्य इत्यर्थः । क्षुमतः शब्दवतो भोजनस्य पूर्णाःपूरयित्र्य क्षीरस्य बाहुल्ये सति चुलुंकन पुनः पुनर्भोजने हि महाञ्शब्द उत्पद्यते ।

अथ सावित्रग्रहस्य पुरोरुचमाह –

इमां ते धियं प्रभरे महो महीम् । अस्य स्तोत्रे धिषणा यत आनजे । तमुत्सवे च प्रसवे च सासहिम् । इन्द्रं देवासः शवसा मदन्ननु (४) इति ।

वज्रिणमयतस्वस्ति जोजयुर्नः सप्त च ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये त्रयोदशोऽनुवाकः ।। १३ ।।

हे इन्द्र महो महनीयस्य ते तव महीं महतीमिमिमामनुग्रहरूपां धियं प्रभरे प्रकर्षेण धारयामि । अस्य त ईदृशस्य तव संबन्धि यत्स्तोत्रमानजे त्वद्गुणानभिव्यञ्जयति तस्मिन्स्तोत्रे धिषणा मदीया बुद्धिः प्रवर्ततामिति शेषः । उत्सवेऽस्मिन्कर्मानुष्ठानरूपे प्रसवे च तत्फलोत्पादने सासहिमत्यन्तसहिष्णुं सर्वदोद्युक्तमित्यर्थः । तादृशं शवसा बलेन युक्तं तमिन्द्रं देवासः सर्वे देवा अनुमदन्ननुमोदन्ताम् ।

अत्र विनियोगसंग्रहः-

इन्द्रस्तुन्नामके यागे ग्रहाणां स्युः पुरोरुचः ।
तिष्ठा कस्येत्यैन्द्रावायव इन्द्रं तदन्तरे ।। १ ।।
द्विताय इत्याश्विने स्यात्स सूरः शुक्रसंज्ञके ।
उत त्यं मन्थिनाम्नि स्याद्वेष्वाग्रयणग्रहे ।। २ ।।
महीत्यैन्द्राग्नके वैश्वदेवे तूरुं न इत्यसौ ।
आदित्ये तिस्र आ नः स्युरिमां सावित्रकग्रहे ।
त्रयोदशेऽनुवाकेऽस्मिन्मन्त्रा उक्तास्त्रयोदश ।। ३ ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके त्रयोदशोऽनुवाकः ।। १३ ।।

अथ सप्तमे चतुर्दशोऽनुवाकः ।

त्रयोदश इन्द्रस्तुन्नामके क्रतौ ग्रहाणां पुरोरुच उक्ताः । चतुर्दशे त्वप्तोर्यामविधिरुच्यते । तं विधातुमाख्यानमाह -

प्रजापतिः पशूनसृजत । तेऽस्मात्सृष्टाः पराञ्च आ यन् । तानग्निष्टोमेन नाऽऽप्नोत् । तानुक्थ्येन नाऽऽप्नोत् । तान्षोडशिना नाऽऽप्नोत् । तान्रात्रियानाऽऽप्नोत् । तान्त्संधिना नाऽऽप्नोत् । सोऽग्निमब्रवीत् । इमान्म ईप्सेतेति । तानग्निस्त्रिवृता स्तोमेन नाऽऽप्नोत् (१)स इन्द्रमब्रवीत् । इमान्म ईप्सतेति । तानिन्द्रः पञ्चदशेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तोमेन नाऽऽप्नोत् । स विश्वान्देवानब्रीत् । इमान्मे ईप्सतेति । तान्विश्वे देवाः सप्तदशेन स्तोमेन नाऽऽप्नुवन् । स विष्णुमब्रवीत् । इमान्म ईप्सेति । तान्विष्णुरेक वि ँ शेन स्तोमेनाऽऽप्नोत् । वारवन्तीयै- नावारयत । इदं विष्णुर्विचक्रम इति व्यक्रमत, इति ।

प्रजापतिना सृष्टाः पशवो यदा पुनरावृत्तिरहिताः प्रजापतेः सकाशाद्गतास्तदा प्रजापतिरग्निष्टोमादिकं क्रमेणानुष्ठाय तान्पशून्प्राप्तुं न शक्तोऽभूत् । यद्रात्रियाऽतिरात्रक्रतुगतैर्रात्रिपर्यायैः स्तोत्रैः, संधिनाऽतिरात्रावसाने त्रिवृद्राथंतरः संधिरिति यत्स्तोत्रं विहितं तेन स्तोत्रेण । एतैरुपायैः पशून्प्राप्तुमशक्तः प्रजापतिरग्निं प्रत्यब्रवीत् । हेऽग्ने मे मदर्थमिमान्पशूनीप्साऽऽप्तुमिच्छा तदर्थमुद्योगं कुर्विति । ततः सोऽग्निस्तदर्थं त्रिवृत्सोममनुष्ठाय तेन प्राप्तुं शक्तो नाभूत् । एवमिन्द्रो विश्वे देवाश्च । विष्णुस्तु एकविंशस्तोममनुष्ठाय तेन पशून्प्राप्य वारयन्तीयेन साम्ना पुनर्गमनं निवारयामास । अतोऽयं विष्णुः "इदं विष्णुः" इति मन्त्रेणोक्तो यो विक्रमस्तं कृतवान् । तमेव पशुप्राप्तिरूपं विक्रमं मन्त्रोऽ वादीदित्यर्थः ।

इदानीमप्तोर्यामक्रतुं विधत्ते -

यस्मात्पशवः प्र प्रेव भ ँ शेरन् । स एतेन यजेत, इति ।

एकः प्रशब्दः प्राथम्यवाच्यपरः प्रकर्षवाची । प्रथममेव पशवो यस्मात्पुरुषात्प्रेव भ्रंशेरन्प्रकर्षेण भ्रष्टा इव भवन्ति स पुरुष एतेनाप्तोर्यामेण स्तोमेन यजेत । तत्स्वरूपं सूत्रकारेण स्पष्टमुक्तम्-"अप्तोर्यामश्चेत्संधिचमसानुन्नयंश्चतुर्ध्यश्चमसगणेभ्यो राजानमतिरेचयति" इति । संधिस्तोत्रपर्यन्तैरेकोनत्रिंशत्स्तोत्रैर्युक्तमतिरात्रप्रयोगमनुष्ठाय तत ऊर्ध्वं चतुर्भ्यश्चमसगणेभ्यो राजानमतिरेचयेत् । ततः पुनरपि चत्वारि स्तोत्राणि भवन्ति । तदेवं त्रयस्त्रिंशत्स्तोत्रयुक्तोऽप्तोर्यामः ।

तस्य निर्वचनं दर्शयति -

यदाप्नोत् । तदप्तोर्यामस्याप्तोर्यामत्वम्, इति ।

यस्मात्कारणादनेन क्रतुना पशूनाप्नोत्तस्मात्कारणादाप्त्यर्थो यामो यज्ञ इति व्युत्पत्त्या तन्नाम संपन्नम् ।

एतस्य क्रतोः सर्वकामप्राप्तिसाधनत्वं दर्शयति-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतेन वै देवा जैत्वानि जित्वा । यं काममकामयन्त तमाप्नुवन् । यं कामं कामयते । तमेतेनाऽऽप्नोति (२), इति ।

स्तोमेन नाऽऽप्नोदवारयत नव च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये चतुर्दशोऽनुवाकः ।। १४ ।।

पुरा देवा एतेनाप्तोर्यामक्रतुना जेतव्यानि सर्वाणि युद्धानि जित्वा काम्यमानं फलं प्राप्नुवन् । अतोऽन्योऽपि देववत्सर्वं प्राप्नोति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयाकाण्डे
सप्तमप्रपाठके चतुर्दशोऽनुवाकः ।। १४ ।।

अथ सप्तमे पञ्चदशोऽनुवाकः ।

चतुर्दशेऽप्तोर्यामोऽभिहितः । अथ पञ्चदशषोडशसप्तदशेष्वनुवाकेषु यज्ञसंयुक्तालौकिको राजाभिषेकोऽभिधीयते । तत्रास्मिन्ननुवाके तावदादौ होममन्त्रा उच्यन्ते । कल्पः- "व्याघ्रोऽयमग्नाविति सप्ताऽऽहुतीर्हुत्वा" इति ।

तत्र प्रथमामृचमाह -

व्याघ्रोऽयमग्नौ चरति प्रविष्टः । ऋषीणां पुत्रो अभिशस्तिपा अयम् । नमस्कारेण नमसा ते जुहोमि । मा देवानां मिथुया कर्म भागम्, इति ।

अयमभिषेकार्हो राजाऽस्मिन्नाहुत्याधारेऽग्नौ प्रविष्टो व्याघ्रवदप्रधृष्यी भूत्वा लोके चरति । सोऽयमृषीणामृत्विजां पुत्रोऽभिषेकसंस्कारेण तैरुत्पादितत्वात् । अभिशस्तिपाः पापेभ्यः पाता रक्षिता भवत्विति शेषः । हेऽग्ने ते तव नमस्कारेण युक्तोऽहं नमसोपनतेन हविषा जुहोमि । देवानां भागं मिथुया कर्म यथा मिथ्या भवति तथा वयं मा कार्ष्म किंतु सत्यमेव कुर्म इत्यर्थः ।

अथ द्वितीयामाह -

सावीर्हि देव प्रसवाय पित्रे । वर्ष्माणमस्मै

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वरिमाणमस्मै अथास्मभ्यँ सवितः सर्वताता । दिवे दिव आसुवा भूरिपश्वः, इति ।

हे देव प्रसवाय प्रजानां प्रेरकाय पित्रे पालकायास्मै राज्ञे वर्षाणं सावीर्हिं सर्वथा प्रेरय । अस्य राज्ञो देहो यथा सर्वान्पालयति तथा त्वमनु गृहाणेत्यर्थः । किंचास्मै राज्ञे वरिमाणमुरुत्वं राज्यविस्तारं सावीः प्रेरयानुजानीहि । अथानन्तरं हे सवितः सर्वे देवास्तायन्ते विस्तीर्यन्त एष्विति सर्वताता ये यज्ञास्तेषु सर्वतातास्मभ्यमस्मदर्थं भूरिपश्वो भूरीम्बहुलान्पशूनासुव सर्वतः प्रेरय ।

अथ तृतीयामाह -

भूतो भूतेषु चरति प्रविष्टः । स भूतानामधिपतिर्बभूव (१) । तस्य मृत्यौ चरति राजसूयम् । स राजा राज्यमनुमन्यतामिदम्, इति ।

भूतेषु प्राणिजातेषु मध्ये प्रविष्टोऽयं भूतः स्वयमुद्भूतश्चरति सर्वनियामकत्वेन प्रवर्तते । अत एव भूतानां प्राणिनां सर्वेषामधिपतिः स्वामी बभूव । तस्य राज्ञो मृत्यौ दुष्टशिक्षारूपमरणनिमित्तभूते सति राजसूयं चरति । राजा सूयतेऽभिषिच्यतेऽस्मिन्कर्मणीति राजसूयाख्यमिमममभिषेकमिदं कर्म च दुष्टशिक्षार्थं प्रवर्तत इत्यर्थः । सोऽभिषिक्तो राजा राज्यमिदमनुमन्यतां दुष्टशिक्षाशिष्टपरिपालनरूपं यद्राजकृत्यं तदङ्गीकरोतु ।

अथ चतुर्थीमाह -

येभिः शिल्पैः पप्रथानामदृँहत् । येभिर्द्यामभ्यपिँशत्प्रजापतिः । येभिर्वाचं विश्वरूपाँ समव्ययत् । तेनेममग्न इह वर्चसा समङ्ग्धि, इति ।

प्रजापतिर्येभिः शिल्पैर्यैः कौशलैः पप्रथानां विस्तारयुक्तामिमां पृथिवीमदृंहद् दृढीकृतवान् । तथा येभिः कर्मकौशलैर्या द्युलोकमभ्यपिंशदभितश्चन्द्रतारकादिभिः सुरूपामकरोत् । तथा येभिर्यैः कर्मकौशलैर्वाचमिमामुच्चार्य मायां विश्वरूपां नानापदार्थवाचकत्वेनानेकरूपां समव्ययत्सम्यक्संपादितवान् । तेन तथाविधकौशलजातेन वर्चसा तद्योगेन बलेन च हेऽग्न इमं राजानमिह लोके समङ्ग्धि समर्थं कुरु, तथाविधसामर्थ्येन संयोजयेत्यर्थः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमीमाह -

येभिरादित्यस्तपति प्रकेतुभिः । येभिः सूर्यो ददृशे चित्रभानुः । येभिर्वाचं पुष्कलेभिरव्ययत् । तेनेममग्न इह वर्चसा समङ्ग्धि (२), इति ।

येभिः प्रकेतुभिः प्रकृष्टतेजोविशेषैरयमादित्यः सर्वत्र तापं करोति । किंच येभिर्यैस्तेजोविशेषैः सूर्यश्चित्रभानुहृदये विचित्ररश्मियुक्तोऽयमिति । प्राणिभिर्दृश्यते । येभिर्यैस्तेजोविशेषैः पुष्कलैः संपूर्णैर्वाचं शब्दात्मिकामव्ययद्विविधां परिवृतां सर्वो जन्तुरकरोत् । तेनेत्यादि पूर्ववत् ।

अथ षष्ठीमाह -

आऽयं भातु शवसा पञ्च कृष्टीः । इन्द्र इव ज्येष्ठो भवतु प्रजावान् । स्मा अस्तु पुष्कलं चित्रभानु । आऽयं पृणक्तु रजसी उपस्थम्, इति ।

अयं राजा शवसा बलेन पञ्च कृष्टीः पञ्चसंख्याकान्मनुष्यान्निषादपञ्चमान्ब्राह्मणादिवर्णविशेषानाभातु समन्ताद्दीपयतु । किंचायं राजा स्वयमिन्द्र इव ज्येष्ठः प्रशस्यतमः प्रजावान्स्वाधीनप्रजायुक्तो भवतु । अस्मै राज्ञे विद्यमानं सर्ववस्तुजातं पुष्कलं संपूर्णं चित्रभानु विचित्रत्वेन भासमानं स्वस्वकार्यक्षममस्तु । किं चायं राजा रजसी रञ्जनात्मिके द्यावापृथिव्यावुपस्थं तत्समीपस्थितमन्तरिक्षं चाऽऽपृणक्तु तेजसा सर्वतः प्राप्नोतु पालयत्वित्यर्थः ।

यत्ते शिल्पं कश्यप रोचनावत् । इन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्त्सूर्या अर्पिता सप्त साकम् । तस्मिन्राजानमधिविश्रयेमम्, इति ।

हे कश्यपाख्य प्रजापते ते तव यच्छिल्पं कर्मकौशलं रोचनावद्दीप्तिमदिन्द्रियावद्वीर्योपेतं पुष्कलं संपूर्णं चित्रभानु विचित्रत्वेन भासमानम् । किंच यस्मिंस्त्वदीये शिल्पे सप्तसंख्याकाः सूर्याः साकमर्पिताः सहावस्थापिताः । ते च सप्त सूर्या आरण्यकाण्ड आरोगो भ्राज इत्यनुवाके प्रपञ्चिताः । तस्मिञ्शिल्प इमं राजानमधिविश्रयाधिकत्वेनाऽऽश्रितं कुरु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कल्पः-"द्यौरसि पृथिव्यसीति यजमानायतने शार्दूलचर्म प्राचीन ग्रीवमुत्तरलोमाऽऽस्तृणाति" इति पाठस्तु-

द्यौरसि पृथिव्यसि, इति ।

हे शार्दूलचर्म त्वं द्युलोकरूपमसि भूलोकरूपमसि ।

कल्पः-"तस्मिन्नजोपविशति 'व्याघ्रो वैयाघ्रे' इत्यासीनमभिमन्त्रयते" इति । पाठस्तु-

व्याघ्रो वैयाघ्रेऽधि (३) । विश्रयस्व दिशो महीः । विशस्त्वा सर्वा वाञ्छन्तु । मा त्वद्राष्ट्रमधिभ्रशत्, इति ।

हे राजन्, त्वं व्याघ्रवदप्रधृष्यो भूत्वा व्याघ्रसंबन्धिनि चर्मण्यध्युपरिस्थितो महीर्मतीर्दिशः प्राच्यादिका विश्रयस्व विशेषेणाऽऽश्रितो भव । सर्वा विशः प्रजास्त्वां वाञ्छन्तु कामयन्तु । इदं राष्ट्रं त्वन्माऽधिभ्रशत्त्वत्सकाशादभ्रष्टं मा भूत् ।

कल्पः-"अथैनं तोक्मावास्ताभिर्दूर्वावास्ताभिर्वाऽद्भिरभिषिञ्चति 'या दिव्या आपः' इति प्रतिपद्याऽऽपाङ्क्तात्" इति । यास्वप्सु तोक्मानि व्रीह्यङ्कुराण्यवास्तानि प्रक्षिप्तानि ता आपस्तोक्मावास्ता एवं दूर्वावास्ता अपि । पाठस्तु -

या दिव्या आपः पयसा संबभूवः । या अन्तरिक्ष उत पार्थिवीर्याः । तासां त्वा सर्वासा रुचा । अभिषिञ्चामि वर्चसा । अभि त्वा वर्चसा सिचं दिव्येन । पयसा सह । यथाऽऽसा राष्ट्रवर्धनः (४) । तथा त्वा सविता करत् । इन्द्रं विश्वा अवीवृधन् । समुद्रव्यचसं गिरः । रथीतमं रथीनाम् । वाजाना सत्पतिं पतिम् । वसवस्त्वा पुरस्तादभिषिञ्चन्तु गायत्रेण छन्दसा । रुद्रास्त्वा दक्षिणतोऽभिषिञ्चन्तु त्रैष्टुभेन छन्दसा । आदित्यास्त्वा पश्चादभिषिञ्चन्तु जागतेन छन्दसा । विश्वे त्वा देवा उत्तरतोऽभिषिञ्चन्त्वानुष्टुभेन छन्दसा । बृहस्पतिस्त्वोपरिष्टादभिषिञ्चतु पाङ्क्तेन छन्दसा (५), इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिव्या दिवि भवा आपो याः पयसा क्षीरेण सह संवभूवुः । अन्तरिक्षे याः संबभूवुः । उतापि च पार्थिवीः पृथिव्यामुत्पन्ना या आपस्तासां सर्वासां रुचा दीप्तया वर्चसा बलेन हे राजंस्त्वामभिषिञ्चामि । पयसा दिव्येन सह वर्चसा बलेन त्वामभितः सिचं सर्वतः सिक्तं करोमि । यथा लोके सविता स्वयं राष्ट्रवर्धन आस तथा त्वामपि राष्ट्रवर्धनं करोतु । विश्वा गिरः सर्वाः स्तुतिरूपा वाचस्त्वामवीवृधन्वर्धितवत्यः । कीदृशं त्वाम्, इन्द्रं परमैश्वर्ययुक्तं समुद्रव्यचसं समुद्रवद्व्यापिनं रथीनां रथीतमं रथयुक्तानां राज्ञां मध्येऽतिशयेन रथस्वामिनं वाजानामन्नानां पतिं पालकं तथा सत्पतिं सन्मार्गवर्तिनां पालकम् । हे राजंस्त्वां पुरस्तात्पूर्वस्या दिशि गायत्रच्छन्दोभिमानिदेवेन सह वसवोऽभिषिञ्चन्तु । एवं रुद्रास्त्वेत्यादिवाक्येष्वपि योजनीयम् ।

कल्पः–"अरुणं त्वा वृकमित्येनमभिमन्त्र्य" इति । पाठस्तु–

अरुणं त्वा वृकमुग्रं खजंकरम् । रोचमानं मरुतामग्रे अर्चिषः । सूर्यवन्तं मघवानं विषासहिम् । इन्द्रमुक्थ्येषु नामहूतमꣳ हुवेम, इति ।

हे राजन्, त्वामुक्थ्येषु स्तोत्रेष्विन्द्रं हुवेमेन्द्रत्वेनाऽऽह्वयाम । इन्द्रनाम्नैव व्यवहराम इत्यर्थः । कीदृशं त्वामरुणमुदयकालीनसूर्यसदृशं वृकमारण्यमृगवच्छत्रूणां भयहेतुमत एवोग्रं खजंकरं खजः शत्रूणां भर्त्सनं तत्करोतीति खजंकरस्तं मरुतां देवानामर्चिषोऽग्रे रोचमानं तदीयप्रकाशादप्यधिकेन प्रकाशेन युक्तमित्यर्थः । सूर्यवन्तमुपमानार्थं सूर्योऽस्यास्तीति सूर्यवांस्तं मघवानमन्नवन्तं विषवद्वैरिणः सहतेऽभिभवतीति विषासहिस्तं नामहूतमं युद्धेषु शत्रूनतिशयेन तत्तन्नाम्नाऽऽह्वयतीति नामहूतमस्तम् ।

कल्पः–"प्र बाहवेति बाहू प्रसार्य" इति । पाठस्तु–

प्र बाहवा सिसृतं जीवसे नः । आ नो गव्यूतिमुक्षतं घृतेन । आ नो जने श्रवयतं युवाना । श्रुतं मे मित्रावरुणा हवेमा, इति ।

हे बाहवोभौ बाहू नोऽस्माकं जीवसे जीवनाय प्रसिसृतं, प्रसृतौ भवतम् । नोऽस्माकं गव्यूतिं गोसमूहं घृतेनोक्षतं सिञ्चतम् । युवाना तरुणौ परस्परमिश्रितौ वा युवा नोऽस्माञ्जने जनसमूह आश्रवयसं सर्वत्र

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रख्यापयतम् । हे मित्रावरुणरूपो बाहू मे मदीयमिमा हवंदमाह्वानं श्रुतं शृणुतम् ।

कल्पः-"इन्द्रस्य ते वीर्यकृत इत्युपावहरति" इति । पाठस्तु-

इन्द्रस्य ते वीर्यकृतः । बाहू उपावहरामि (६), इति ।

वभूवार्व्ययत्तेनेममम्न इह वर्चसा समङ्ग्धि वैयाघ्रेऽधि राष्ट्रवर्धनः पाङ्क्तेन छन्दसोपावहरामि ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

सप्तमाध्याये पञ्चद शोऽनुवाकः ।। १५ ।।

हे राजन्वीर्यकृतः पराक्रमकारिण इन्द्रस्य परमैश्वर्ययुक्तस्य ते तव प्रसृतौ बाहू उपावहरामि पुनः संकुचितौ करोमि ।

अत्र विनियोगसंग्रहः-

व्याघ्रो राजाभिषेकाय जुहुयात्सप्तमन्त्रकैः ।।

द्यौर्व्याघ्रचर्म संस्तीर्य तत्स्थं व्याघ्रोऽभिमन्त्रयेत् ।।

अभिषिञ्चेदष्टभिर्वा, अरुणं मन्त्रयेत्तथा ।। १ ।।

प्र बाहवा प्रसारः स्यादिन्द्रोपावहरेदुभौ ।।

अनुवाके पञ्चदशे प्रोक्ता मन्त्रास्तु विंशतिः ।। २ ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

सप्तमप्रपाठके पञ्चदशोऽनुवाकः ।। १५ ।।

अथ सप्तमे षोडशोऽनुवाकः ।

पञ्चदशे राजाभिषेक उक्तः । षोडशे तदङ्गत्वेन रथारोहणमुच्यते ।

कल्पः-"अग्रेणाग्नि "रथोऽवस्थितो भवत्यभिप्रेहीति राजाऽभ्येति" इति । पाठस्तु -

अभि प्रेहि वीरयस्व । उग्रश्चेत्ता सपत्नहा, इति ।

सोऽयं मन्त्रोऽष्टमेऽनुवाके व्याख्यातः ।

कल्पः-"आतिष्ठ वृत्रहन्तम इत्यारोहन्तमभिमन्त्रयते " इति । पाठस्तु -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आतिष्ठ वृत्रहन्नर्मः । तुभ्यं देवा अधिब्रुवन्, इति ।

अयमपि तत्रैव व्याख्यातः ।

कल्पः–"अङ्कौ न्यङ्काविति रथचक्रे अभिमृशति" इति । पाठस्तु –

अङ्कौ न्यङ्कावभितो रथ यौ । ध्वान्तं वाताग्रमनुसंचरन्तौ । दूरे हैतिरिन्द्रियावान्पतत्री । ते नोऽग्नयः पप्रयः पारयन्तु, इति ।

अङ्क इति दक्षिणचक्रस्य नाम न्यङ्क इत्युत्तरचक्रस्य । रथमभितो रथस्य पार्श्वयोर्यावङ्कौ यौ च न्यङ्कौ विद्येते । एकैकस्मिन्पार्श्वे चक्रद्वयं रथस्य चक्रचतुष्टयोपेतत्वात् । अथवाऽङ्कशब्दश्चक्रवाची, न्यङ्कशब्दश्चक्रयुक्तपक्षवाची । यावङ्कौ तौ यौ च न्यङ्कौ तौ ध्वान्तं ध्वनियुक्तं वाताग्रं वायोः पूर्वभागमनुसंचरन्तौ वायोरपि शीघ्रवेगेन (ण) गच्छत इत्यर्थः । दूरं हेतिरित्यदिभिस्त्रिभिः शब्दैस्त्रयोऽग्निविशेषा उच्यन्ते । ते त्रयोऽप्यग्नयः पप्रयो गमनं पूरयन्तो नोऽस्मान्पारयन्तु गमनसमाप्तिं प्रापयन्तु ।

कल्पः–"नमस्त ऋष इति पुरोहितमभिमन्त्रयते" इति । पाठस्तु –

नमस्त ऋषे गद । अव्यधायै त्वा स्वधायै त्वा (१) । मा न इन्द्राभितस्त्वदृष्वारिष्टासः । एवा ब्रह्मन्तवेदस्तु, इति ।

हे ऋषेऽतीन्द्रियद्रष्टः, पुरोहित ते तुभ्यं नमोऽस्तु । गदास्मभ्यं हितं कथय । अव्यधायै शत्रुकृतबाधाराहित्याय त्वा त्वां भजाम इति शेषः । स्वधाया अन्नार्थं त्वां भजामः । हे ऋष्व पुरोहितात्मन्नृषे, इन्द्र परमैश्वर्यसंपन्न नोऽस्माकं त्वत्तव प्रसादादरिष्टासोऽस्माभिर्हिंसितुं बाधितुमशक्याः प्रत्यवाया अभितः सर्वतो मा भूवन् । हे ब्रह्मन्, तवेत्तवैव प्रसादादेवेत्थमेवास्तु ।

कल्पः–"तिष्ठा रथे इति सारथिम्" इति । अभिमन्त्रयत इत्युनवर्तते । पाठस्तु –

तिष्ठा रथे अधि यद्वज्रहस्तः, इति ।

हे सारथे यस्मात्त्वं वज्रहस्तस्तस्माद्रथेऽप्यधितिष्ठाधिरुह्य स्थितो भव ।

कल्पः–"आ रश्मीनिति रश्मीनालभेत" इति । पाठस्तु –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आ र॒श्मीन्दे॑व युवसे॒ स्वश्वः॑, इति ।

हे देव रथप्रवर्तक स्वश्वः शोभनाश्वयुक्तस्त्वं रश्मीन्प्रग्रहानायुवस आदाय मिश्रीकुरु ।

कल्पः–"आतिष्ठ वृत्रहन्निति षड् भिरारूढम्" इति । अभिमन्त्रयत इत्यनुवर्तते । तत्र चतुर्णां मन्त्राणां प्रतीकानि दर्शयति ।

आति॑ष्ठ वृत्रहन्ना॒तिष्ठ॑न्त॒ परि॑ । अनु॒ त्वेन्द्रो॑ म॒दत्वनु॒ त्वा मि॒त्रा॒वरु॑णौ, इति ।

एते मन्त्रा अष्टमानुवाके व्याख्याताः ।

पञ्चमं मन्त्रमाह –

द्यौश्च॑ त्वा पृथि॒वी च॒ प्रचे॑तसा । शु॒क्रो बृ॒हद्दक्षि॑णा त्वा पिपर्तु॒ । अनु॑ स्व॒धा चिकिता॒ ँ सोमो॑ अ॒ग्निः । अनु॑ त्वाऽवतु सवि॒ता स॒वेन॑ (२), इति ।

अत्रापि पादत्रयं तस्मिन्नेवानुवाके व्याख्यातम् । हे राजन्, सविता देवः सवेन प्रेरणेन त्वाऽन्वयत्वनुकूलः सन्रक्षतु ।

अथ षष्ठमन्त्रमाह –

इन्द्र॒ं विश्वा॑ अवीवृधन् । स॒मु॒द्रव्य॑चस॒ं गिरः॑ । र॒थीत॑म ँ रथीनाम् । वाजा॑ना॒ ँ सत्प॑तिं॒ पति॑म्, इति ।

अयं मन्त्रः पूर्वानुवाके व्याख्यातः ।

कल्पः–"परि मा सेन्या इति द्वे वाचयित्वा" इति तत्र प्रथमामाह–

परि॑ मा से॒न्या घोषाः॑ । ज्याना॑ं वृ॒ञ्जन्तु गृध्नवः॑ । मे॒थि॒ष्ठाः । पिन्व॑माना इ॒ह । मां गोप॑तिम॒भिसंवि॑शन्तु, इति ।

सेन्याः परकीयायां सेनायां भवाः, ज्यानां धनुर्गतानां घोषा नादा मा परिवृञ्जन्तु मां परितो वर्जयन्तु । तदीया धनुर्घोषा मद्विषये मा प्रवर्तन्ताम् । कीदृशा घोषा गृध्नवः । परराष्ट्रग्रहणेच्छावन्तो मेथिष्ठाः श्रोत्रसंगमनोचिता इहास्मिन्कर्मणि युद्धविशेषे वा पिन्वमाना

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अप्रतिकूलत्वेन मां प्रीणयन्तस्ता दृशा ज्याघोषा गोपतिं भूपतिं मामभिसंविशन्त्वभितः सम्यक्प्रविशन्तु । ये शत्रुसंबन्धिनो घोषास्ते सर्वेऽप्यप्रतिकूलत्वेन स्वकीयघोषा भवन्त्वित्यर्थः ।

अथ द्वितीयामाह -

तन्मेऽनुमतिरनुमन्यताम् । तन्माता पृथिवी तत्पिता द्यौः (३) । तद्ग्रावाणाः सोमसुतो मयोभुवः । तदश्विना शृणुत ँसौभगा युवम्, इति ।

अनुमत्याख्या देवी तन्मदीयं कर्मानुमन्यतामङ्गीकरोतु । पृथिव्याख्या माता तदनुमन्यताम् । द्युलोकरूपः पिता तदनुमन्यताम् । सोमसुतः सोममभिषुण्वन्तो मयोभुवः सुखस्य भावयितारो ग्रावाणः पाषाणास्तदनुमन्यन्ताम् । हेऽश्विनौ सौभगा युवं भाग्यवन्तौ युवां तच्छृणुतम् ।

कल्पः-"उत्तराभिस्तिसृभिरभिमंत्र्य" इति । तत्र द्वयोः प्रतीके दर्शयति-

अवते हेड उदुत्तमम्, इति ।

एतच्चोभयं संहितायां वैश्वानरो न इत्यनुवाके व्याख्यातम्-

अथ तृतीयामाह-

एना व्याघ्रं परिषस्वजानाः । सि ँह ँहिन्वति महते सौभगाय । समुद्रं न सुहुवं तस्थिवा ँसम् । मर्मृज्यन्ते द्वीपिनमप्स्वन्तः, इति ।

व्याघ्रं व्याघ्रवत्केनाप्यप्रधृष्यं सिंहं सिंहसमानशक्तियुक्तमेनं राजानं परिषस्वजाना आलिङ्गयतो ब्राह्मणा बान्धवाश्च महते सौभगाय हिन्वन्ति प्रीणयन्त्याशीर्वादान्कुर्वन्तीत्यर्थः । समुद्रं न समुद्रमिव सुखेनाऽऽह्वातुं शक्यं तस्थिवांसं तस्मिन्स्थानेऽवस्थितमेनं मर्मृज्यन्तेऽभिषेकलेपान्पुनः । पुनः शोधयन्ति । तत्र दृष्टान्तः- अप्स्वन्तर्जलमध्ये द्वीपिनं गजं यथा प्रक्षालयन्ति तद्वदित्यर्थः ।

कल्पः-"उदसावेत्वित्यादित्यमुदीक्षयति" इति । पाठस्तु -

उदसावेतु सूर्यः । उदिदं मामकं वचः । उदिहि देव सूर्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४) सह वग्नुना मर्म । अहं वाचो विवाचनम् । मयि वागस्तु धर्णसिः । यन्तु नदयो वर्षन्तु पर्जन्याः । सुपिप्पला ओषधयो भवन्तु, इति ।

असौ राजा सूर्यसमो भूत्वोदेतूदयमभिवृद्धिं गच्छतु । मामकं मदीयमिदमाशीर्वादरूपं वच उदेत्वभिवृद्धिं गच्छतु । हे सूर्य देव दीप्यमान राजन्मम ब्राह्मणस्य सह वग्नुनाऽऽशीर्वादेन सह त्वमुदिह्यभ्युदयं गच्छ । अहं पुरोहितो वाचो धर्माधर्मात्मिकाया विवाचनं विशेषेणाभिवदनसामर्थ्यं प्राप्नुयामिति शेषः । येयं मयि स्थिताऽऽशीर्वादरूपा वाक्साधर्णसिर्धरणशीला सुप्रतिष्ठिताऽस्तु । नद्यो नद्यः यन्तु पूर्णाः प्रवहन्तु । पर्जन्या मेघाः स्वस्वकाले वर्षन्तु । ओषधयो ब्रीह्यादयः सुपिप्पलाः शोभनफलोपेता भवन्तु ।

कल्पः–"अन्नवतामिति जनपदाननुवीक्षते" इति । पाठस्तु –

अन्नवतामोदनवतामामिक्षवताम् । एषा राजा भूयासम्, इति ।

स्वधायै त्वा सवेन द्यौः सूर्य सप्त च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये षोडशोऽनुवाकः ।। १६ ।।

अदनीयानि प्रशस्तभक्ष्यभोज्यानि येषु ग्रामेषु ते ग्रामा अन्नवन्तः । प्रभूतेन ब्रीहिप्रियङ्ग्वाद्योदनेन युक्ता ओदनवन्तः . आमिक्षाशब्देन दधिक्षीरादिरसद्रव्याण्युपलक्ष्यन्ते तैर्युक्ता आमिक्षवन्तः । तादृशानामेषां ग्रामाणां राजा स्वामी भूयासम् ।

अथ विनियोगसंग्रहः–

अभीति रथमागत्याऽऽतिष्ठाऽऽरोढुस्तु मन्त्रणम् ।
अङ्कौ चक्रे उपस्पृश्य नमो विप्राभिमन्त्रणम् ।। १ ।।

सारथिं मन्त्रयेत्तिष्ठाऽऽरश्मीन्रश्म्यभिमर्शनम् ।
आतिष्ठ षड्भिरारूढं मन्त्रयेत परिद्वयम् ।। २ ।।
वाचयेतावते हेड त्रिभिस्तमभिमन्त्रयेत् ।
उदसाविति राजानं राजानं द्वाभ्यां सूर्यमवेक्षयेत् ।।
अन्न ग्रामानवेक्षेत प्रोक्ता मन्त्रास्तु विंशतिः ।। ३ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके षोडशोऽनुवाकः ।। १६ ।।

अथ सप्तमे सप्तदशोऽनुवाकः ।

षोडशे राजाभिषेकाङ्गं रथारोहणमुक्तम् । सप्तदशे तदङ्गं वपनमभिधीयते । कल्पः–"ये केशिनो नर्ते ब्रह्मण इति द्वे आहुती हुत्वा" इति । तत्र प्रथमामाह –

ये केशिनः प्रथमाः सत्रमासत । येभिराभृतं यदिदं विरोचते । तेभ्यो जुहोमि बहुधा घृतेन । रायस्पोषेणेमं वर्चसा स ँ सृजाथ, इति ।

केशा येषां सन्ति ते केशिनः । केशिनोऽग्निवायुसूर्याः । शाखान्तरे त्रयःकेशिन इत्याम्नानात् । ते च देवाः प्रथमा इतरेभ्यो देवेभ्यः पूर्वं प्रवृत्ताः । केशिनो ये सत्रमासतानुष्ठितवन्तो यदिदं जगद्विरोचते विशेषेण प्रकाशते तदिदं सर्वं येभिर्यैर्देवैराभृतं संपादितं तेभ्यो देवेभ्यो घृतेन बहुधा बहुप्रकारं जुहोमि । हे देवाः केशिन इमं राजानं धनपुष्ट्या बलेन च संयोजयथ ।

अथ द्वितीयामाह –

नर्ते ब्रह्मणास्तपसो विमोकः । द्विनाम्नी दीक्षा वशिनी ह्युग्रा । प्रकेशाः सुवते काण्डिनो भवन्ति । तेषां ब्रह्मेदीशे वपनस्य नान्यः, इति ।

ब्रह्मणः परिवृढादेतस्माद्वपनादृतेऽभिषेकाख्यव्रतरूपात्तपसो विमोको विसर्गः समाप्तिर्नास्ति । उपक्रान्तं हि व्रतं समापनीयम् । अस्य चाभिषेकाख्यव्रतस्य वपनेनैव समाप्तिः । व्रतरूपा चेयमभिषेकदीक्षा द्विनाम्नी नामद्वययुक्ता । तस्याश्च वशिनीत्येकं नाम । तथाहि सर्वाः प्रजा वशीक्रियन्ते । उग्रेत्यपरं नाम । तथा हि दीक्षया शत्रवोऽभिभूयन्ते । दीक्षाया द्विविधव्रतत्वं सोमप्रकरणेऽप्याम्नातम्–'एतद्वै सुजघनं नाम व्रतमिति प्रथमम् । एतद्वै क्षुरपवि नाम व्रतमिति द्वितीयम्" । अतोऽस्य व्रतस्य समाप्तये वपनं कुर्यात् । अस्य राज्ञः केशाः प्रसुवते प्रकर्षेणात्यन्ता वर्धन्ते । अत एव काण्डिनो बहुसमूहयुक्ता भवन्ति । तेषां वर्धमानानां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बहुसमूहयुक्तानां केशानां ब्रह्मेत्प्रजापति रेवेशे समार्थो भवति । न त्वन्यः कश्चित् । तस्मात्प्रजापतिरूपोऽयं पुरोहितो वपनं करोत्वित्यर्थः ।

कल्पः-"यजमानायतन औदुम्बरीमासन्दीं प्रतिष्ठापयति- ता राजाऽऽरोहति आरोह प्रोष्ठम्' इत्यारोहन्तमभिमन्त्रयते ।" इति पाठस्तु-

आरोह प्रोष्ठं विषहस्व शत्रून् । अवास्त्राग्दीक्षा वशिनी ह्युग्रा (१) । देहि दक्षिणां प्रतिरस्वाऽऽयुः । अथा मुच्यस्व वरुणस्य पाशात्, इति ।

हे राजन्, प्रोष्ठमासन्दीरूपं मञ्चकमारोह । शत्रून्विषहस्व विशेषेणाभिभव । येयं वशिन्युग्रा चेति द्विनाम्नी दीक्षा सेयं यस्मादवास्राागवसृष्टा समाप्ता तस्मात्पुरोहिताय दक्षिणां देहि । आयुः प्रतिरस्व त्वमपि दीर्घमायुः प्राप्नुहि । अथानन्तरं वरुणस्य पाशादस्माद्रथनिर्बन्धान्मुच्यस्व मुक्तो भव ।

कल्पः-"तस्यामासीनः केशान्वापयते येनावपत्सविता क्षुरेण" इति । पाठस्तु-

येनावपत्सविता क्षुरेण । सोमस्य राज्ञो वरुणस्य विद्वान् । तेन ब्रह्माणो वपतेदमस्योर्जेमम् । रय्या वर्चसा सं सृजाथ, इति ।

पुरा विद्वान्सविता राज्ञो राजाभिषेकं प्राप्नुवतः सोमस्य वरुणस्य च केशान्येन क्षुरेणावपतेन क्षुरेण हे ब्राह्मणाः प्रजापतिरूपाः पुरोहिता अस्येदं केशजातं वपत । इमं च राजानमूर्जा क्षीरादिरसेन रय्या धनेन वर्चसा बलेन च संसृजाथ संयोजयत ।

कल्पः-"मा ते केशानिति केशान्याकीर्यमाणानतुपन्वयते" इति । पाठस्तु -

मा ते केशाननु गाद्वर्च एतत् । तथा धाता करोतु ते । तुभ्यमिन्द्रो बृहस्पतिः । सविता वर्च आदधात्, (२), इति ।

हे राजन्, ते वर्चो बलं केशाननु मा गान्माऽपगच्छतु । ते तवैतद्यथा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

भवति । तथा धाता करोतु । तुभ्यं त्वदर्थमिन्द्रबृहस्पतिसवितारो नूतनमप्यधिकं वर्चो बलं संपादयन्तु ।

कल्पः-"तान्समोप्य दर्भस्तम्बे निदधाति तेभ्यो निधानम्" इति । पाठस्तु -

तेभ्यौ निधानं बहुधा व्यैच्छन् । अन्तरा द्यावापृथिवी अपः सुवः । दर्भस्तम्बे वीर्यंकृते निधायं । पौँस्यैनेमं वर्चसा सँसृजाथ, इति ।

तेभ्यस्तत्केशार्थं निधानं स्थापनप्रदेशं बहुप्रकारं व्यैच्छन्ब्राह्मणा विशेषेणेच्छां कृतवन्तः । किं स्थानमिति तदुच्यते-ते द्यावापृथिवी अन्तरा द्यावापृथिव्योर्मध्यमेकं स्थानमैच्छन् । अपो जलं द्वितीयं स्थानमैच्छन् । सुवः स्वर्गरूपं तृतीयं स्थानमैच्छन् । वीर्यकृते सामर्थ्येन संपादिते दर्भस्तम्बे तान्केशान्निधायेमं राजानं पौंस्येन वर्चसा पौरुषेण बलेन संसृजाथ हे ब्राह्मणाः संयोजयत ।

कल्पः-"अथैनमाज्यमिश्रेण पयसाऽनक्ति 'बलं ते बाहुवोः' इति बाहु" इति । पाठस्तु-

बलं ते बाहुवोः सविता दंधातु । सोमस्त्वाऽनक्तु पयसाः घृतेनं । स्त्रीषु रूपमंश्विनैतन्निधंत्तम् । पौँस्यैनेमं वर्चसा सँसृजाथ, इति ।

हे राजन् , ते बाहुवोर्बलं सविता संपादयतु । सोमस्त्वां पयसा घृतेन च समनक्तु सम्यगक्तं करोतु । अश्विना हेऽश्विनैतद्रमणीयं रूपमेतदीयासु स्त्रीषु निधत्तं स्थापयतम् । पौंस्येनेत्यादि पूर्ववत् ।

कल्पः-"यत्सीमन्तमिति शिरः" इति । आज्यमिश्रेण पयसाऽनक्तीत्यनुवर्तते । पाठस्तु -

यत्सीमन्तं कङ्कंतस्ते लिलेखं । यद्वा क्षुरः परिववर्ज वपँस्ते । स्त्रीषु रूपमंश्विनैतन्निधंत्तम् । पौँस्यैने मँसँसृजाथो वीर्येण (३), इति ।

अवास्रगदीक्षा वशिनी ह्युग्रा दंधाद्ववर्ज वपँस्तं द्वे च ।। ये केशिनो नर्ते मा ते बलं यत्सीमन्तं पञ्च ।।

Digitized by Madhuban Trust, Delhi

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके
सप्तमाध्याये सप्तदशोऽनुवाकः ।। १७ ।।

हे राजन्, ते तव वपनात्पुरा कङ्कतः केशलघिमासंपादकः शलाकाविशेषो यत्सीमन्तं शिखावशेषाय वपनीयस्थापनीययोः केशभागयोर्विभागं चकार । यद्वाऽथवा क्षुरोऽयं वपन्वपनं कुर्वन्यत्केशजातं परिववर्ज वपनमकृत्वा स्थापितवान् । सीमन्तलेखनात्मकं यद्दर्शनीयं रूपं यच्च वपनवर्जननिमित्तं रूपमेतदुभयं हेऽश्विनावेतदीयासु स्त्रीष्वलंकाराय निधत्तम् । इमं तु राजानं पौंस्येन पुरुषसंबन्धिना वीर्येण संसृजाथः संयोजयतम् ।

अत्र विनियोगसंग्रहः-

ये केशिनः प्र नर्ते द्वे आहुती जुहुयादथ ।
आरोहन्तं तमासन्दीमारोहेत्यभिमन्त्रयेत् ।। १ ।।
येन वापयते केशान्मा ते केशानुमन्त्रणम् ।
तेभ्यास्तांस्तम्ब आदध्याद्बलं बाह्वोर्घृताञ्जनम् ।
यत्सी शिरोञ्जने मन्त्रा अष्टावत्र प्रकीर्तिताः ।। २ ।।

इति श्रीमत्साणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे
सप्तमप्रपाठके सप्तदशोऽनुवाकः ।। १७ ।।

अथ सप्तमेऽष्टादशोऽनुवाकः ।

सप्तदशे राजाभिषेकाङ्गवपनार्था मन्त्रा उक्ताः । तावताऽभिषेकः समाप्तः । अथाष्टादशे विघनाख्यः कश्चिदेकाहविशेष उच्यते तत्राऽऽदौ विघननिर्वचनं दर्शयति-

इन्द्रं॒ वै स्वा विशो॑ म॒रुतो॒ नापा॑चायन् । सोऽन॑पचाय्यमान ए॒तं वि॑घ॒नम॑पश्यत्। तमाह॑रत् । तेना॑यजत । तेनैवाऽऽसां त॑ꣳस॒ꣳस्त॒म्भं व्य॑हन् । यद्व्यह॑न् तद्वि॑घ॒नस्य॑ विघन॒त्वम्, इति ।

पुरा कदाचिद्राज्यं कुर्वन्तमिन्द्रं मरुसंज्ञकाः स्वीकायाः प्रजा करप्रदानेन पूजां नाकुर्वन् । सोऽ यमपूज्यमान इन्द्रस्तत्परिहारायैतं विघनाख्यं ऋतुविशेषमेकालं निश्चित्य तदनुष्ठानेनाऽऽसां प्रजानां तं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संस्तम्भं स्तम्भनरूपं प्रातिकूल्याचरणं व्यहन्विहतं कृतवान् । यद्यस्मात्कारणाददेन कर्मणा विहतवान्, तस्माद्विहन्त्यनेनेति व्युत्पत्या कर्मणो विघननाम संपन्नम् ।

तमेतं विघनाख्यं क्रतुं विधत्ते -

वि पाप्मानं भ्रातृव्यꣳ हते । य एतेन यजते । य उ चैनमेवं वेद (१), इति ।

अथ तत्राधिकारिणं दर्शयति --

यꣳ राजानं विशो नापचायेयुः । यो वा ब्राह्मणस्तमसा पाप्मना प्रावृतः स्यात् । स एतेन यजेत । विघनेनैवैनद्विहत्य । विशामाधिपत्यं गच्छति, इति ।

यं राजानं स्वकीयः प्रजा न पूजयेयुः करं न दद्युः । अथवा यो वा ब्राह्मणस्तमोरूपेण पाप्मना प्रकर्षेणाऽऽवृतः स्यात् । सोऽयमुभयविधः पुरुषोऽधिकारी । स च विघनाख्येनैव क्रतुना यजेत । तथा प्रातिकूल्यं विनाश्य प्रजानामाधिपत्यं राजा गच्छति, ब्राह्मणश्च विपापो भवति ।

स्तोत्रविशेषं विधत्ते -

तस्य द्वे द्वादशे स्तोत्रे भवतः । द्वे चतुर्विꣳशे । औद्भिद्यमेव तत् । एतद्वै क्षत्रस्यौद्भिद्यम् । यदस्मै स्वा विशो बलिꣳहरन्ति (२), इति ।

तस्य विघनाख्यस्य क्रतोर्द्वादशाख्येन स्तोमेन युक्तं स्तोत्रद्वयं कर्तव्यम् । तथा चतुर्विंशाख्येन स्तोमेन युक्तं स्तोत्रद्वयं कर्तव्यम् । तच्च स्तोत्रचतुष्टयमौद्भिद्यमेवोद्भेदनसाधनमेव । अत्र च प्रकृते क्षत्रस्य राज्ञः प्रजाः करं प्रयच्छन्तीति यदेतदेवौद्भिद्यं प्रातिकूल्यस्योद्भेदनं तच्च स्तोत्रचतुष्टयेन सिध्यति ।

वेदनं प्रशंसति -

हरन्त्यस्मै विशो बलिम् । ऐनमप्रतिख्यातं गच्छति । य एवं वेद, इति ।

अस्मै वेदित्रे प्रजाः पूजां कुर्वन्ति । अप्रतिख्यातं केनाप्यनिराकृता कीर्तिश्चैनं वेदितारमागच्छति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतस्य विघनस्य यागवेदने पुनः प्रशंसति -

प्रबाहुग्वा अग्रे क्षत्त्राण्यातेपुः । तेषामिन्द्रः क्षत्त्राण्यादत्त । न वा इमानि क्षत्त्राण्यभूवन्निति । तन्नक्षत्त्राणां नक्षत्रत्वम् । आ श्रेयसो भ्रातृव्यस्य तेज इन्द्रियं दत्ते । य एतेन यजते । य उ चैनमेवं वेद (३), इति ।

अग्रे पुरा कदाचित्क्षत्राणि क्षत्रियवंशे जाताः पुरुषाः प्रबाहुग्वै बाहुल्येनैवाऽऽतेपुः सर्वतस्तपः कृतवन्तः । तेषां तपः कुर्वतां सर्वेषां यानि क्षत्राणि बलानि तानीन्द्र आदत्त स्वीकृतवान् । तत इमानि क्षत्राणि बलानि नैवाभूवन्निति सर्वे जना उक्तवन्तः । यस्मादिन्द्रविरोधिनां क्षत्रं बलं नाऽऽसीत्तस्मात्तेषां बलराहित्यवाचि नक्षत्रनाम संपन्नम् । तस्मादिन्द्रवद्यो यजते यश्च वेद सोऽयमुभयविधः पुमाञ्श्रेयसोऽधिकस्य भ्रातृव्यस्य तेज आज्ञाशक्तिमिन्द्रियं शरीरं बलं चाऽऽदत्ते ।

पूर्वोक्तयोर्द्वादशचतुर्विंशस्तोमयोः स्थानविशेषं विधत्ते -

तद्यथा ह वै सचक्रिणौ कप्लकावुपावहितौ स्याताम् । एवमेतौ युग्मन्तौ स्तोमौ । अयुक्षु स्तोमेषु क्रियेते । पा पाप्मनोऽपहत्यै, इति ।

चक्रमस्यास्तीति चक्री रथः, चक्रिणा सह वर्तते इति सचक्रिणौ रथस्वामिनौ कप्लकौ कपिवद्गमनसमर्थौ . तादृशौ द्वौ पुरुषौ यथा लोक उपावहितौ गमनाय सावधानौ स्यातमेवमेतौ युग्मन्तौ समसंख्यायुक्तौ द्वादशचतुर्विंशस्तोमौ क्रतोः पारगमने समर्थौ । तावुभावयुक्षु विषमसंख्यायुक्तेषु स्तोमेषु कर्तव्यौ । त्रिवृत्पञ्चदशसप्तदशैक-विंशाख्याश्चोदकप्राप्ता विषमसंख्यायुक्ताः स्तोमास्तेषां स्थाने द्वावेतौ प्रयोक्तव्यौ । तत्र त्रिवृत्पञ्चदशयोः स्थाने द्वादशः सप्तदशैकविंशयोः स्थाने चतुर्विंश इति विवेकः । एतच्च पापविनाशनार्थं भवति ।

एतदनुष्ठानवेदने प्रशंसति -

अप पाप्मानं भ्रातृव्यꣳहते । य एतेन यजते य उ चैनमेवं वेद, इति ।

उक्तस्तोमयुक्तानां स्तोत्राणामाधारभूतानृग्विशेषान्विधत्ते -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तद्यथा ह वै सूतग्रामण्यः । एवं छन्दाꣳसि । तेषु सावादित्यो बृहतीरभ्यूढः (४) । सतोबृहतीषु स्तुवते सतो बृहन् । प्रजया पशुभिरसानीत्येव, इति ।

सूता रथपाः सारथयो ग्रामण्यो ग्रामनिर्वाहकास्तत्र लोके यथा सूतग्रामण्यस्तथा गायत्र्यादीनिच्छन्दांसि प्रवर्तन्ते । सूतेषु मध्ये रथस्वामी यमङ्गीकरोति स एव सूतो रथं प्रवर्तयति । ग्रामणीषु राजा यमङ्गीकरोति स एव ग्रामं नयति । एवमत्राप्यसावादित्यस्तेषुच्छन्दःसु मध्ये बृहतीछन्दोयुक्ता ऋचोऽभ्यूढोऽङ्गीकृतवान् । तस्मात्कारणात्सतो-बृहतीनामकच्छन्दोयुक्तास्वृक्षु स्तोत्रं कुर्युः । तेषां स्तोत्राणां प्रत्येक-मयमभिप्रायः । सतःसन्मार्गवर्तिनः पुरुषाद्बृहन्नधिकः सतो बृहन् । प्रजया च पशुभिश्चाहं सतो बृहन्नसानि भवानीत्येव स्तोतारः प्रवर्तन्ते ।

तास्वृक्षु गानकाले कंचिद्विशेषं विधत्ते -

व्यतिषक्ताभिः स्तुवते । व्यतिषक्तं वै क्षत्रं विशा । विशैवैनं क्षत्त्रेण व्यतिषजति, इति ।

याः सतोबृहत्य ऋचस्ताश्छन्दोन्तरयुक्ताभिर्ऋग्भिर्व्यतिषक्ताः कार्याः । ऋगेका सतोबृहती ऋगन्तरमन्यच्छन्दोयुक्तं पुनरपि सतो बृहती पुनरपिच्छन्दोन्तरमित्येवं व्यतिषङ्गः । तादृशीष्वृक्षु स्तुतिं कुर्युः । क्षत्रं क्षत्रजातिर्विशा वैश्यजात्या व्यतिषक्तं मिश्रीभूय वर्तते । प्रजाभ्यः करं गृहीत्वा क्षत्रियो राज्यं करोति । एवं सति व्यतिषक्तस्तोत्रेणैनं यजमानं विशाक्षत्रेण व्यतिषजति मिश्रयति ।

तमेव व्यतिषङ्गं प्रकारान्तरेण प्रशंसति -

व्यतिषक्ताभिः स्तुवते । व्यतिषक्तो वै ग्रामणीः सजातैः । सजातैरेवैनं व्यतिषजति, इति ।

ग्रामस्य निर्वाहकः पुरुषः सजातैः सहोत्पन्नैर्भ्रात्रादिभिस्तद ग्रामनिवासिभिर्व्यतिषक्तो मिश्रीभूतो वर्तते । अतो व्यतिषक्तस्तोत्रैणैवैनं यजमानं सजातैर्भ्रात्रादिभिः संयोजयति ।

पुनरपि प्रकारान्तरेण प्रशंसति -

व्यतिषक्ताभिः स्तुवते । व्यतिषक्तो वै पुरुषःपाप्मभिः । व्यतिषक्ताभिरेवास्य पाप्मानो नुदते (४), इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वेद हरन्त्येनमेवं वेदाभ्यूढ पाप्मभिरकं च ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

सप्तमाध्यायेऽष्टादशोऽनुवाकः ।। १८ ।।

पुरुषः प्रमादकृतैः पाप्मभिः संसृष्टो वर्तते । ततोऽत्र व्यतिषक्तस्तोत्रेणास्य पुरुषस्य पापानि विनाशयति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डे

सप्तमप्रपाठकेऽष्टादशोऽनुवाकः ।। १८ ।।

त्रिवृद्यदाग्नेयोऽग्निमुखा ह्यृद्धिर्यदाग्नेय आग्नेयो न वै सोमेन यो वै सोमेनैष गोसवः सिं हेऽभिप्रेहि मित्रवर्धनः । प्रजापतिस्ता औदनं प्रजापतिरकामयत बहोर्भूयानगस्त्योऽस्याजरासस्तिष्ठा हरी प्रजापतिः पशून्व्याघ्रोऽभिप्रेहि वृत्रहन्तमो ये केशिन इन्द्र वा अष्टादश ।।

त्रिवृद्यो वै सोमेनाऽऽयुरसि विश्वायुर्बहुर्भवति तिष्ठा हरीरथ आऽऽयं मातु तेभ्यो निधानं षट् षष्टिः ।

हरिः ॐ ।।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टके

सप्तमोऽध्यायः ।। ७ ।।

अस्य प्रपाठकस्यानुवाकार्थसंग्रहः-

सप्तमे तु सवाख्याः स्युः सूयते ह्यभिषिच्यते ।
ईश्वरत्वेन येष्वेते प्रोच्यन्ते सवनामकाः ।। १ ।।
बृहस्पतिसवो वैश्यसवो ब्रह्मसवस्तथा ।
प्रोक्तः सोमसवस्तद्वत्सवः स्यात्पृथिनामकः ।। २ ।।
गोसवश्चौदनाख्ये तु सवे होमार्थमन्त्रकाः ।
रथारोहः कर्मविधिः पञ्चशारदनामकः ।। ३ ।।
क्रतुस्तदीयपशवो ह्यग्निष्टुति पुरोरुचः ।
इन्द्रस्तुतिः पुरोरुक्स्यादप्तोर्यामविधिस्तथा ।। ४ ।।
राजाभिषेकमन्त्राश्च रथारोहणमन्त्रकाः ।
भवन्ति वपने मन्त्रो विघेनः क्रतुरप्ययम् ।। ५ ।।
वेदार्थस्य प्रकाशेन तयो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ।। ६ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये सप्तमः प्रपाठकः समाप्तः ॥ ७ ॥

(मूलक्रमेण-अष्ट. २ अध्या. ७ (१६) अनु. १८ (१६५) ।

(भाष्यक्रमेण-का:२. प्रपा. ७ (१५)अनु. १८ (१६५) ।

अथ द्वितीयकाण्डेऽष्टमपाठकारम्भः ।

तत्र प्रथमोऽनुवाकः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
प्रपाठके सप्तमे हि सवाः सर्वे समीरिताः ।
याज्यानुवाक्याः काम्यानां पशूनामष्टमे श्रुताः ॥ २ ॥
वायव्यः श्वेत आलभ्य इति काम्या उदीरिताः ।
एकैकस्मिन्पशौ सूक्तमेकैकं भवति क्रमात् ॥ ३ ॥
ऋचःषट्सूक्त एकस्मिंस्तत्र द्वे द्वे क्रमाच्छ्रुते ।
वपायां च पुरोडाशे हविषीति क्रमो भवेत् ॥ ४ ॥

'वायव्यꣳ श्वेतमालभेत भूतिकामः' इत्यत्र वपायाः पुरोनुवाक्यामाह -

पीवोन्नाँ रयिवृधः सुमेधाः । श्वेतः सिषक्ति नियुतामभिश्रीः । ते वायवे समनसो वितस्थुः । विश्वेन्नरः स्वपत्यानि चक्रुः, इति ॥

यो वायुदेवताकः श्वेतच्छागः पशुः सोऽयं सिषक्ति सक्तो भवति संबध्नातीत्यर्थः । उत्तरार्धे नर इत्यभिधास्यमानत्वान्नृन्मनुष्यान्यजमानान्सिषक्तीति योजनीयम् । कीदृशान्यजमानान्पीवोन्नान्पीवासि स्थूलानि प्रभूतान्यन्नानि येषां ते पीवोन्नास्तान् । रयिवृधो रय्या धनेन वर्धमानान् । सुमेधाः शोभनया मेधया यज्ञप्रयोगधारणशक्त्या युक्तान् । कीदृशः श्वेतः पशुर्नियुतामभिश्रीः, नितरां युवन्ति रथे मिश्रयन्तीति नियुतो वायोर्वडवास्तासामभिश्रयणीयः । एतस्य पशोर्वायव्यत्वेन वायुद्वारा वडवा अप्येतमाश्रयन्ति । यागे तान्नृन्यजमानाञ्श्वेतः सिषक्ति । ते नरो यजमाना वायवे वायुदेवतार्थं समनसस्तेन देवेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समानमनस्कास्तस्मिन्प्रीतियुक्ता भूत्वा वितस्थुर्विशेषेण स्थिताः । ततो विश्वेद्विश्वान्येव वायुदेवताकानि कर्माणि स्वपत्यानि शोभनापत्यप्रदानि चक्रुः कृतवन्तः ।

अथ वपाया याज्यामाह -

रायेऽनु यं जज्ञतू रोदसी उभे । राये देवी धिषणा धाति देवम् । अधा वायुं नियुतः सश्चत स्वाः । उत श्वेतं वसुधितिं निरेके, इति ।

रोदसी द्यावापृथिव्यावुभे रायेऽनु धनार्थमेव यं वायुं जज्ञतुरुत्पादितवत्यौ । यजमानानां धिषणा बुद्धिर्देवी विद्योतमाना सती वायुं देवं धाति धारयति निरन्तरं ध्यायतीत्यर्थः । अधाऽऽरब्धयागे तं वायुं स्वा नियुतः स्वकीया वडवाः सश्चत सेवन्ते । उतापि च रेको रिक्तत्वं तद्रहितं कर्म निरेकं तादृशे सर्वसाधनसंपूर्णे कर्मणि वसुधितिं हविर्लक्षणस्य वसुनो धारकं श्वेतं पशुमपि नियुतः सश्चतेत्यन्वयः ।

अथ पुरोडाशस्य याज्यानुवाक्ययोः प्रतीके दर्शयति -

आ वायो प्रयाभिः, इति ।

'ई वायो भूषा' इति पुरोनुवाक्या । सा चैन्द्रवायवप्रस्तावे व्याख्याता ।'प्रयाभिर्यासि दाश्वा ँ सम्' इत्येषा याज्या । सा च हिरण्यगर्भ आपो हेत्यनुवाके व्याख्याता ।

अथ हविषः पुरोनुवाक्यामाह -

प्र वायुमच्छा बृहती मनीषा (१) । बृहद्रयिं विश्ववारा ँ रथप्राम् । द्युतद्यामा नियुतः पत्यमानः । कविः कविमियक्षसि प्रयज्यो, इति ।

बृहती महती मनीषा यजमानस्य बुद्धिर्वायुमभिलक्ष्य प्रकर्षेण यातीति शेषः । कीदृशं वायुं बृहद्रयिं बृहती रयिर्महद्धनं यस्यासौ बृहद्रायिर्बृहद्धनप्रदमित्यर्थः । विश्ववारं विश्वेषामनिष्टानां निवारकम । रथप्रां स्वकीयं रथमपेक्षितैर्धनैः पूरयन्तम । हे प्रयज्यो प्रकर्षेण यष्टुमुद्यत्त यजमान कविर्देवतातत्त्वाभिज्ञस्त्वं कविं सर्वज्ञं वायुं देवमियक्षसि यज पूजय । कीदृशः विद्युतद्यामा यामशब्देन नियमरूपो यागोऽभिधीयते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्योतमानो यागो यस्यासौ द्युतद्यामा । नियुतः पत्यमानो नियुतो याः पूर्वोक्ता वडवास्ताः पत्यमानो वायोरानयनार्थं सेवमानः ।

अथ याज्यामाह –

आ नो नियुद्भिः शतिनीभिरध्वरम् । सहस्रिणीभिरुप याहि यज्ञम् । वायो अस्मिन्हविषि मादयस्व । यूयं पात स्वस्तिभिः सदा नः, इति ।

हे वायो शतिनीभिः शतसंख्यायुक्ताभिः सहस्रिणीभिः सहस्रसंख्यायुक्ताभिश्च नियुद्भिर्वडवाभिः सह नोऽस्मदीयमध्वरं हिंसारहितं यज्ञं प्रत्युपसमीप आयाह्यागच्छ । आगत्य चास्मिन्हविषि स्वीकृते सति मादयस्व त्वं दृष्टः सन्नस्मानपि हर्षय । यूयं त्वं च त्वदीयभृत्याश्च सर्वे स्वस्तिभिरविनाशैः फलैर्नोऽस्मान्सदा पात रक्षत । यदेतत्षड्चं सूक्तं वायव्यपशौ प्रवृत्तं तदेतत्सूत्रकारः स्पष्टी चकार–"काम्यैः पशुभिरमावास्यायां पौर्णमास्यां वा यजेत । तेषां निरूढपशुबन्धवत्कल्पो वायव्य श्वेतमिति । ये ब्राह्मणेन व्याख्यातास्तेषामावापिकेषु स्थानेषु यथादेवतं षड्चो निदधाति । वपायाः पुरोडाशस्य हविष इति द्वे द्वे पीवोन्ना ँ रयिवृधः सुमेधा इत्येतानि यथापूर्वं यथालिङ्गमाम्नातानि भवन्ति" इति ।

"अथ यः प्रजाकामः पशुकामः स्यात्स एतं प्राजापत्यमजं तूबरमालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह –

प्रजापते न त्वदेतान्यन्यः । विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु (२) । वय ँ स्याम पतयो रयीणाम्, इति ।

हे प्रजापते त्वदन्यः कश्चिदपि जातान्युत्पन्नानि यान्येतानि विश्वानि लोकजातानि सन्ति ता तानि परिबभूव परितो व्याप्तुं त्वत्त्वत्तोऽन्यः कोऽपि न समर्थः । वयं यत्कामा येन फलकामेन युक्ताः सन्तस्ते तुभ्यं जुहुमस्तत्फलं नोऽस्माकमस्तु सिध्यतु । वयं त्वत्प्रसादाद्रयीणां धनानां पतयः स्याम ।

अथ वपाया याज्यामाह –

रयीणां पतिं यजतं बृहन्तम् । अस्मिन्भरे नृतमं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वाजसातौ । प्रजापतिं प्रथमजामृतस्य । यजाम देवमधि नो ब्रवीतु, इति ।

भ्रियते संपाद्यते हविरत्रेति भरो यज्ञः । अस्मिन्भरे प्रजापतिं देवं वयं यजाम । कीदृशं देवं रयीणां पतिं धनस्वामिनम् । यजतं यजनीयम् । बृहन्तं महान्तम् । नृतममतिशयेन पुरुषं पुरुषेषूत्तममित्यर्थः । ऋतस्य यज्ञस्य प्रथमजां प्रथममेव जनयितारं "प्रजापतिर्यज्ञानसृत" इत्यन्यत्र श्रवणात् । कीदृशे भरे वाजसातौ वाजस्यान्नस्य सातिर्दानं यस्मिन्यज्ञे सोऽयं वाजसातिस्तस्मिन् । सोऽयमस्माभिरिष्टः प्रजापतिर्देवेषु मध्ये नोऽस्मानधिकान्ब्रवीतु ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

प्रजापते त्वं निधिपाः पुराणः । देवानां पिता जनिता प्रजानाम् । पतिर्विश्वस्य जगतः परस्पाः । हविर्नो देव विहवे जुषस्व, इति ।

हे प्रजापते त्वं निधिपाः शङ्खपद्मादीनां निधीनां पालकः । पुराणो जगतः स्रष्टृत्वादनादिः । देवानां पिता पालकः । प्रजानां मनुष्यादीनां जनितोत्पादयिता । विश्वस्य सर्वस्य जगतः पतिः स्वामी । परस्पा अतिशयेन पालयिता । हे देव विशेषेण हूयन्ते देवा अत्रेति विहवो यज्ञस्तस्मिन्विहवे नोऽस्मदीयं हविर्जुषस्व ।

अथ पुरोडाशस्य याज्यामाह -

तवेमे लोकाः प्रदिशो दिशश्च (३) । परावतो निवत उद्वतश्च । प्रजापते विश्वसृज्जीवधन्य इदं नो देव । प्रतिहर्य हव्यम्, इति ।

हे प्रजापते, इमे लोका भूरादयो याश्च प्रदिशः प्रधानभूताः प्राच्याद्या अप्यन्या आग्नेयाद्या दिशस्तत्सर्वं तवैवाधीनम् । लोका विशेष्यन्ते । परावतो दूरदेशस्था द्वीपान्तरादयः । निवतो न्यग्भूताः पातालादयः । उद्वतश्चोर्ध्ववर्तिनः स्वर्गादयोऽपि । हे देव त्वं विश्वसृड्विश्वस्य स्रष्टा पाता वा । जीवेषु प्राणिषु धन्य ईश्वरो जीवधन्यस्तादृशो भूत्वा नोऽस्मदीयमिदं हव्यं प्रतिहर्य प्रतिगृहाण ।

अथ हविषः पुरोनुवाक्यामाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजापतिं प्रथमं यज्ञियानाम् । देवानामग्रे यजतं यजध्वम् । स नो ददातु द्रविणꣳ सुवीर्यम् । रायस्पोषं विष्यतु नाभिमस्मे, इति ।

यज्ञियानां यज्ञयोग्यानां देवानां मध्ये प्रथमं मुख्यं प्रजापतिं यजतं यजनीयमग्रे यजध्वम् । हे ऋत्विज आदौ पूजयत । स प्रजापतिर्नोऽस्मभ्यं द्रविणं धनं रायस्पोषं धनपुष्टिं सुवीर्यं शोभनसामर्थ्यं च ददातु प्रयच्छतु । नाभिं नहनं दारिद्र्यादिबन्धनमस्मे विष्यत्वस्मत्तः शिथिलयतु ।

अथ हविषो याज्यामाह -

यो राय ईशे शतदाय उक्थ्यः । यः पशूनाꣳ रक्षिता विष्ठितानाम् । प्रजापतिः प्रथमजा ऋतस्य (४) । सहस्रधामा जुषताꣳ हविर्नः, इति ।

यः प्रजापतिः शतदायः शतसंख्याकधनप्रद उक्थ्यः स्तुत्यः सत्राय ईशे धनस्येश्वरो भवति । यश्च प्रजापतिर्विष्ठितानां विविधमवस्थितानां गोमहिषादीनां पशूनां रक्षिता वर्तते । स प्रजापतिर्ऋतस्य यज्ञस्य प्रथमजाः प्रथममुत्पादकः । सहस्रसंख्याकस्थानयुक्तः सन्नोऽस्मदीयं हविर्जुषताम् ।

अथ "सोमापौष्णं त्रैतमालभेत पशुकामः" इत्यस्य पशोः सूक्ते वपासंबन्धियाज्यापुरोनुवाक्ययोः प्रतीकं दर्शयति-

सोमापूषणेमौ देवौ, इति ।

'सोमापूषणा जनना' इति पुरोनुवाक्या । 'इमौ देवौ जायमानौ जुषन्त' इति याज्या । एतच्चोभयम् "अग्नाविष्णू महितद्वां महित्वम् " इत्यत्र व्याख्यातम् ।

अथ तत्रैव पुरोडाशस्य पुरोनुवाक्यामाह-

सोमापूषणा रजसो विमानम् । सप्तचक्रꣳ रथमविश्वमिन्वम् । विषूवृतं मनसा युज्यमानम् । तं जिन्वथो वृषणा पञ्चरश्मिम्, इति ।

हे सोमापूषणौ वृषणा कामवर्षकौ तं रथं जिन्वथः प्रीणयथ आरोहणे नालंकुरुत इ (मि)त्यर्थः । कीदृशं रथं रजसो रञ्जनात्मकस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गमनस्यविमानं निर्मातारम् । सप्तचक्रं सप्तसंख्याकैश्चक्रैर्युक्तम् । अत एवान्यत्राप्याम्नायते-"सप्तचक्रं सप्त वहन्त्यश्वाः" इति । अविश्वमिन्वं विश्वैः प्राणिभिर्मीयते परिच्छिद्यत इति विश्वमिन्वस्तद्विलक्षण-मविश्वमिन्दं केनापि परिच्छेत्तुमशक्यमित्यर्थः । विषूवृतमप्रतिहत गतित्वान्नानादेशेषु वर्तमानम् । मनसा युज्यमानमिच्छामात्रेणाश्वैः संयुज्यमानम् । पञ्चरश्मिं हेमन्तशिशिरयोरैक्येन पञ्चर्तवो रश्मिस्थानीया यस्य सूर्यरथस्य सोऽयं पञ्चरश्मिः । आदित्यरथगमनेन ह्यृतवो निष्पाद्यन्ते । तस्मादृतूनां रश्मित्वोपचारः ।

अथ पुरोडाशस्य याज्यामाह -

दि॒व्य॑न्यः सद॑नं च॒क्र उ॒च्चा । पृ॒थि॒व्याम॒न्यो अध्य॒न्तरि॑क्षे । ताव॒स्मभ्यं॑ पुरु॒वारं॑ पुरु॒क्षुम् । रा॒यस्पोषं॒ विष्य॑ता॒ नाभि॑म॒स्मे, (५) इति ।

योऽयं सोमश्चन्द्रो यश्च पूषाऽऽदित्यस्तयोरन्य एकः सूर्यो दिवि द्युलोक उच्चा सदनं चक्र उन्नतदेशे स्थानं कृतवान् । अन्यश्चन्द्रः पृथिव्यामन्तरिक्षे चाध्युपरि सदनं स्थानं चक्रे । पृथिव्यां लतात्मकः सोमस्तिष्ठति । अन्तरिक्षे चन्द्रस्तिष्ठति । तौ सोमापूषणावस्मभ्यं रायस्पोषं दत्तामिति शेषः । कीदृशं पुरुवारं पुरुभिर्बहुभिर्वरणीयम् । पुरुक्षुं पुरुभिर्बहुभिः क्षूयते शब्द्यते प्रशस्यत इति पुरुक्षुस्तादृशम् । नाभिं नहनं दारिद्र्यबन्धनमस्मे विष्यतामस्मत्तः शिथिलयताम् ।

अथ हविषः पुरोनुवाक्यामाह -

धियं॑ पू॒षा जि॑न्वतु विश्व॒मि॒न्वः । र॒यिꣳ सोमो॑ र॒यिप॑ति॒र्द॑धातु । अव॑तु दे॒व्यदि॑तिरन॒र्वा । बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑, इति ।

विश्वं मिनोत्येतावदिति निश्चितनोतीति विश्वमिन्वस्तादृशः पूषा सूर्यो धियमस्मद् बुद्धिं जिन्वतु प्रीणयतु । रयिपतिर्धनस्वामी सोमो रयिं धनं दधात्वस्मासु संपादयतु । अदितिर्भूमिदेव्यस्मानवतु । कीदृश्यनर्वाऽर्वणा भ्रातृव्येण रहिता भ्रातृव्यो वा अर्वा इति श्रुतेः । अर्वा रिपुः । सर्वोऽपि भूमेर्बन्धुरेव न तु कश्चिदपि शत्रुः । सुवीराः शोभनपुत्राद्युपेता वयं विदथे यज्ञे बृहत्प्रौढं स्तोत्रं वदेम ।

अथ हविषो याज्यामाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विश्वान्यन्यो भुवना जजान । विश्वमन्यो अभिचक्षाण एति । सोमापूषणाववतं धियं मे । युवाभ्यां विश्वाः पृतना जयेम, इति ।

अन्यः सोमो विश्वानि भुवनान्योषधिद्वारा जजानोत्पादयामास । अन्यः पूषा विश्वमभिचक्षाणः सर्वतः प्रकाशयमानः प्रतिसंचरति । हे सोमापूषणौ मे धियं बुद्धिं सत्कर्मविषयामवतं रक्षतम् । युवभ्यां युवयोः प्रसादाद्वयं विश्वाः पृतनाः सर्वाः परकीयसेना जयेम ।

अथ 'यो वरुणगृहीतः स्यात्स एतं वारुणं कृष्णमेकशितिपादमालभेत' इत्यस्य पशोर्वपापुरोडाशहविःषु प्रत्येकं याज्यापुरोनुवाक्ययोः प्रतीके दर्शयति-

उदुत्तमं वरुणास्तभ्नाद्द्याम । यत्किंचेदं कितवासः । अव ते हेडस्तत्त्वा यामि, इति ।

'उदुत्तमं वरुणपाशम् ' इति वपायाः पुरोनुवाक्या । सा च 'वैश्वानरः' इत्यत्र व्याख्याता । 'अस्तभ्नाद्द्यामृषभ' इति याज्या । सा च 'उदायुषा स्वायुषा' इत्यत्र व्याख्याता । 'यत्किंचेदं वरुण' इति पुरोडाशस्य पुरोनुवाक्या । 'कितवासो यद्रिपुः' इति याज्या, तदुभयं 'त्वमग्ने बृहत्' इत्यत्र व्याख्यातम् । 'अव ते हेडो वरुण' इति हविषः पुरोनुवाक्या, सा च 'वैश्वानरो नः' इत्यत्र व्याख्याता । 'तत्त्वा यामि ब्रह्मणा' इति याज्या, सा च 'इन्द्रं वो विश्वतस्परीन्द्रम् ' इत्यत्र व्याख्याता ।

अथ 'यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेयेति स एतामविं वशामादित्येभ्यः कामायाऽऽलभेत' इत्यस्य पशोः सूक्ते वपापुरोडाशहविष्षु क्रमेण याज्यापुरोनुवाक्ययोः प्रतीके दर्शयति-

आदित्यानामवसा न दक्षिणा । धारयन्त आदित्यासस्तिस्रो भूमीर्धारयन् । यज्ञो देवानाँ शुचिरपः (६), इति ।

मनीषाऽन्तु चर्तस्यास्मे कितवासश्चत्वारि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमाध्याये

प्रथमोऽनुवाकः ।। १ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'आदित्यानामवसा नूतनेन' इति वपायाः पुरोनुवाक्या । 'न दक्षिणा विचिकिते' इति याज्या । 'वारयन्त आदित्यासो जगत्स्याः' इति पुरोडाशस्य पुरोनुवाक्या । 'तिस्रो भूर्वीर्वाररयंस्त्री रुपद्यून्' इति याज्या । यज्ञोदेवानां पत्येति । 'इति हविषः पुरोनुवाक्या । 'शुचिरपसूयवासा अदब्धः' इति याज्या । तदेतत्सूक्तं, सर्वम् 'इन्द्रं वो विश्वतस्परीन्द्रं नरः' इत्यत्र व्याख्यातम् । अत्रेदं सूक्तं "यो ब्रह्मवर्चसकामः स्यात्तस्मा एतां दशर्षभामालभेत" इति पशौ योजनीयम् । पूर्वोक्ते तु पशौ सूक्तमुत्तरत्र भविष्यति । तत्र हि कामेन देवा इति कामशब्दोदितो लिङ्गविशेषः प्रतीयते । लिङ्गेन हि पाठक्रमस्य बाधो युक्तः . तस्माद्दशर्षभाया आदित्यदेवताकत्वात्तत्रेदं सूक्तमुत्क्रष्टव्यम् ।

अथ विनियोगसंग्रहः-

याज्याः काम्यपशूनां तु वर्णिता अष्टमे क्रमात् ।
ऋचः षट्सूक्त एकस्मिन्विधिशेषो विविच्यते ।। १ ।।
पीवोन्नामिति वायव्ये पशौ सूक्तमुदीरितम् ।
प्रजासूक्तं तूपरे स्यात्सोमा त्रैते पशुप्रदे ।। २ ।।
उदुत्तमं वारुणे स्यादादित्यानामवेत्यदः ।
दशर्षभाया विज्ञेयं लिङ्गेन क्रमबाधनात् ।। ३ ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्येऽष्टमप्रपाठके
प्रथमोऽनुवाकः ।। १ ।।

अथाष्टमे द्वितीयोऽनुवाकः ।

प्रथमानुवाके वायव्यादीनां पशूनां सूक्तान्यभिहितानि । द्वितीये वशादीनां पशूनां सूक्तान्युच्यन्ते । तत्र "स एतामविं वशामादित्येभ्यः कामायाऽऽलभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह-

ते शुक्रासः शुचयो रश्मिवन्तः । सीदन्नादित्या अधि बर्हिषि प्रिये । कामेन देवाः सरथं दिवो नः । आयान्तु यज्ञमुप नो जुषाणाः, इति ।

ते प्रसिद्धा आदित्याः प्रिये. बर्हिष्यस्मदीये यागेऽधिसीदन्नधिष्ठाय सीदन्तु । कीदृशा आदित्याः शुक्रासः कान्तियुक्ताः । शुचयः शुद्धिहेतवः । रश्मिवन्तो रश्मिभिरनेकैर्युक्ताः । कामेनाभिलषितार्थप्रदेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवेन सहिता आदित्या देवाः सरथं रथसहितं यथा भवति तथा दिवः सकाशान्नोऽस्मान्प्रत्यायांन्तु । ततो नोऽस्मदीयं यज्ञमुपेत्य जुषाणाः प्रीतिपूर्वकं सेवमानास्तिष्ठन्तु ।

अथ वपाया याज्यामाह -

ते सूनवो अदितेः पीवसामिषम् । घृतं पिन्वत्प्रतिहर्यन्नृतेजाः । प्र यज्ञिया यजमानाय येमुरे । आदित्याः कामं पितुमन्तमस्मे, इति ।

ते प्रसिद्धा अदितेरदितिदेवतायाः सूनवः पुत्रा ऋतेजा यज्ञनिमित्तमुत्पन्नाः सन्तः पीवसां पीवराणामतिस्थूलानां हविषां मध्य इषमिष्यमाणमस्मदीय पुरोडाशरूपमन्नं पिन्वदधृतं प्रीतिसाधनमाज्यं च प्रतिहर्यन्प्रत्येकं कामयन्ताम् । यज्ञिया यज्ञयोग्या आदित्या अस्मे मह्यं यजमानाय पितुमन्तमन्नवन्तं काममभिलषितार्थं प्रयेमुरे दत्तवन्तः ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

आ नः पुत्रा अदितेर्यान्तु यज्ञम् । आदित्यासः पथिभिर्देवयानैः (१) । अस्मे कामं दाशुषे सन्नमन्तः । पुरोडाशं घृतवन्तं जुषन्ताम्, इति ।

अदितेः पुत्रा आदित्यास आदित्यनामका देवा देवयानैः पथिभिर्देवानां योग्यैर्मार्गैर्नोऽस्मदीयं यज्ञं प्रत्यायान्तु । आगत्य च दाशुषे हविर्दत्तवतेऽस्मे मह्यं यजमानाय काममभिलषितार्थं सन्नमन्तः प्रापयन्तो घृतवन्तं बहुलघृतयुक्तं पुरोडाशं जुषन्ताम ।

अथ पुरोडाशस्य याज्यामाह-

स्कभायत निर्ऋतिं सेधतामतिम् । प्र रश्मिभिर्यतमाना अमृध्राः । आदित्याः काम प्रयतां वषट् कृतिम् । जुषध्वं नो हव्यदातिं यजत्राः, इति ।

हे आदित्या हे काम यूयं सर्वे निर्ऋतिं राक्षसजातिं बाधिकां देवतानां स्कभायत स्तब्धां कुरुत । अस्मद्बाधसामर्थ्यरहितां कुरुतेत्यर्थः । अमतिमस्मदीयं बुद्धिमान्द्यं सेधत प्रतिषेधत निवारयतेत्यर्थः । कीदृशा आदित्या रश्मिभिः स्वकीयैः प्रयतमाना

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्धकारनिवारणार्थमुद्योग कुर्वन्तः । अमृध्रा अमृदवोऽनिष्टनिवारणे तीक्ष्णा इत्यर्थः । तादृशा यूयं प्रयतां परिशुद्धां हव्यदातिं हविर्दानकारणभूतां नो वषट्कृतिमस्माभिः । प्रयुक्तं वषट्कारं जुषध्वम् । कीदृशा यूयं यजत्रा यज्ञयोग्याः ।

अथ हविषः पुरोनुवाक्यामाह -

आदित्यान्काममवसे हुवेम । ये भूतानि जनयन्तो विचिख्युः । सीदन्तु पुत्रा अदितेरुपस्थम् । स्तीर्णं बर्हिर्हविरद्याय देवाः (२), इति ।

ये पूर्वोक्ता आदित्या देवा यश्च कामदेवस्तान्सर्वानवसेऽस्मद्रक्षार्थं हुवेमह कर्मण्याह्वयामः । ये देवा भूतानि जनयन्तः प्राणिजातान्युत्पादयन्तो विचिख्युर्विशेषेण ख्यातिं गताः । ते देवा अदितेः पुत्रा हविरद्याय हविर्भक्षणायोपस्थं समीपे स्थातुं योग्यं स्तीर्णं वेद्यां प्रसारितं बर्हिः सीदन्तु प्राप्नुवन्तु ।

अथ हविषो याज्यामाह -

स्तीर्णं बर्हिः सीदता यज्ञे अस्मिन् । ध्राजाः सेधन्तो अमतिं दुरेवाम् । अस्मभ्यं पुत्रा अदितेः प्रय ँ सत । आदित्याः कामं हविषो जुषाणाः, इति ।

हे आदित्या हे कामास्मिन्यज्ञे स्तीर्णं वेद्यामास्तीर्णं बर्हिः सीदत प्राप्नुत । कीदृशा ध्राजा गतिमन्तोऽमतिमस्मदीयं बुद्धिमान्द्यं दुरेवां दुर्गतिं च सेधन्तः । प्रतिषेधन्तस्तादृशा अदितेः पुत्रा यूयं हविषो जुषाणा अस्मदीयं हविः सेवमाना अस्मभ्यं प्रयंसताभीष्टं प्रयच्छत ।

अथ यो ब्रह्मवर्चसकामः स्यात्तस्मा एतामह्ना आलभेत । आग्नेयीं कृष्णग्रीवी ँ सहितामैन्द्री ँ श्वेतां बार्हस्पत्याम् इति । अत्राऽऽग्नेय्याः सूक्ते वपायाः पुरोनुवाक्यामाह-

अग्ने नय सुपथा राये अस्मान् । विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनः । भूयिष्ठां ते नमउक्तिं विधेम, इति ।

हेऽग्ने देव त्वं विश्वानि वयुनानि सर्वान्मार्गान्विद्वाञ्ज्ञानन्वर्तसे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अतोऽस्मान्राये धनप्राप्तये सुपथा नय शोभनेन कर्मानुष्ठानमार्गेण प्रापय । जुहुराणं कुटिलं प्रतिबन्धकमेनः पापमस्मद्युयोध्यस्मत्तः पृथक्कुरु । ते तुभ्यं भूयिष्ठामतिबहुलां नमउक्तिं नमस्कारयुक्तां वाचं विधेम कुर्याम ।

अथ वपाया याज्यामाह –

प्र वः शुक्राय भानवे भरध्वम् । हव्यं मतिं चाग्नये सुपूतम् (३) । यो दैव्यानि मानुषा जनूꣳषि । अन्तर्विश्वानि विद्मना जिगाति, इति ।

हे ऋत्विजो वो युष्माकमभीष्टसिद्ध्यर्थं शुक्राय निर्मलाय भानवे रश्मियुक्तायाग्नये सुपूतं सुष्ठु पूतं शुद्धमिदं हव्यं मतिं चाग्निध्यानार्थं प्रकर्षेण भरध्वं संपादयत । योऽग्निर्दैव्यानि देवविषयाणि मानुषा मनुष्यविषयाणि जनूंषि जन्मानि विद्मना वेदनेन जिगाति प्राप्नोति । अभिज्ञः सन्देवान्मनुष्यांश्च जनयतीत्यर्थः । पुनरप्यन्तर्देवानां मनुष्याणां च मध्ये यान्यवान्तरजन्मानि यक्षगन्धर्वादीनि ब्राह्मणक्षत्त्रादीनि च तानि विश्वानि सर्वाणि जिगाति । तस्मा अग्नय इति पूर्वत्रान्वयः ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

अच्छा गिरो मतयो देवयन्तीः । अग्निं यन्ति द्रविणं भिक्षमाणाः । सुसंदृशꣳ सुप्रतीकꣳ स्वञ्चम् । हव्यवाहमरतिं मानुषाणाम्, इति ।

गिरोऽस्मदीयाः स्तुतिरूपा वाचो मतयो ध्यानरूपा बुद्धस्य देवयन्तीर्देवानिच्छन्त्यो द्रविणं भिक्षमाणा धनं याचमाना अग्निमेच्छाग्निमभिमुखीकृत्य यन्ति प्रवर्तन्ते । कीदृशमग्नि सुसंदृशमन्त्यन्तं सुखेन द्रष्टुं शक्यम् । सुप्रतीकं शोभनावयवोपेतम् । स्वञ्चं शोभनगतिम् । मानुषाणां यजमानानां हव्यवाहं हविषो वोढरि मानुषैर्यद्धविर्दीयते तद्देवान्प्रति वहतीत्यर्थः । रतिरुपमस्तद्रहितमरतिं निन्तरं वहतीत्यर्थः ।

अथ पुरोडाशस्य याज्यामाह –

अग्ने त्वमस्मद्युयोध्यमीवाः । अनग्नित्रा अभ्यमन्त कृष्टीः । पुनरस्मभ्यꣳसुविताय देव । क्षां विश्वेभिरजरेभिर्यजत्र (४), इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हेऽग्ने त्वममीवा रोगजातीरस्मद्युयोध्यस्मत्तो वियोजय । या रोगजातयोऽनग्नित्रा उदराग्नित्राणरहिता मन्दाग्निहेतव इत्यर्थः । तादृश्यो भूत्वा कृष्टीर्मनुष्यानभ्यमन्ताभितो बाधितवत्यस्तादृशीर्युयोधीति पूर्वत्रान्वयः । हे यजत्र यजनीय देवाजरेभिर्जरानिवर्तकैर्विश्वेभिः । सर्वैरौषधैः । क्षां क्षयव्याधिं पुनरस्मभ्यं युयोध्यस्मत्तो वियोजय । किमर्थं सुविताय शोभनगमनाय नीरोगत्वेन जीवनायेत्यर्थः ।

अथ हविषः पुरोनुवाक्यामाह –

अग्ने त्वं पारया नव्यो अस्मान् । स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उर्वी । भवा तोकाय तनयाय शं योः, इति ।

हेऽग्ने त्वं विश्वानि दुर्गाण्यति सर्वानुपद्रवानतिक्रम्य स्वस्तिभिः श्रेयोविशेषैः फलैर्युक्तः सन्नस्मान्पारय कर्मणः समाप्तिं प्रापय । कीदृशस्त्वं नव्यः सर्वदा नूतनो जरामरणरहित इत्यर्थः । नोऽस्माकं पूश्च निवासार्थं पुरी विस्तृता भवतु । उर्वी सस्यनिष्पत्त्यर्था भूमिश्च बहुलाऽत्यधिका भवतु । त्वं च तोकाय पुत्राय तनयाय तत्पुत्राय च शं सुखहेतुर्योर्दुःखवियोगहेतुश्च भव ।

अथ हविषो याज्यामाह –

प्र कारवो मनना वच्यमानाः । देवद्रीचीं नयथ देवयन्तः । दक्षिणावाड्वाजिनी प्राच्येति । हविर्भरन्त्यग्नये घृताची, इति ।

हे कारवः कर्मकर्तार ऋत्विजो यूयं वाच्यमाना मन्त्रपाठरूपं वचनं प्राप्नुवन्तो देवयन्तो देवानिच्छन्तो मनना मननीयामिमां यागक्रियां देवद्रीचीं नयथ देवान्प्रति तथा गच्छति यथा प्रापयत । सा च यज्ञक्रिया दक्षिणां वहतीति दक्षिणावाट् । वाजोऽन्नमस्या अस्तीति वाजिनी । प्रकृष्टं फलमञ्चति गच्छतीति प्राची । घृतमञ्चति प्राप्नोतीति घृताची । अग्नये हविर्भरन्ती सत्येति प्रवर्तते ।

अथ 'सहितामैन्द्रीम्' इत्यस्य पशोः सूक्ते वपाया याज्यानुवाक्ययोः प्रतीके दर्शयति –

इन्द्रं नरो युजे रथम्, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'इन्द्रं नरो नेमधिता' इति पुरोऽनुवाक्या । सा च 'इन्द्रं वो विश्वतस्परि' इत्यत्र व्याख्याता । 'युजे रथं गवेषणम्' इति याज्या । सा च 'जुष्टो दमूनाः' इत्यत्र व्याख्याता ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

जगृभ्णा ते दक्षिणमिन्द्र हस्तम् (५) । वसूयवो वसुपते वसूनाम् । विद्मा हि त्वा गोपतिं शूर गोनाम् । अस्मभ्यं चित्रं वृषणं रयिं दाः, इति ।

हे इन्द्र ते त्वदीयं दक्षिणहस्तं जगृभ्णा वयं गृहीतवन्तो हस्तं धृत्वा प्रार्थयाम इत्यर्थः । कीदृशा वयं वसूयवो धनेच्छावन्तः । वसूना वसुपत इत्येतदिन्द्रस्य विशेषणम् । यानि वसूनि धनानि हिरण्यानि सन्ति तेषां मध्ये यानि श्रेष्ठानि मणिमुक्तादीनि तत्स्वामिन्नित्यर्थः । हे शूर शत्रूणामभिभवितस्त्वां गोनां गवां मध्ये गोपतिं प्रशस्तगोस्वामिनं हि यस्माद्वयं विद्म तस्मादस्मभ्यं चित्रं नानाविधं वृषणं कामाभिवर्षणक्षमं रयं दा धनं देहि ।

अथ पुरोडाशस्य याज्यामाह -

तवेदं विश्वमभितः पशव्यम् । यत्पश्यसि चक्षसा सूर्यस्य । गवामसि गोपतिरेक इन्द्र । भक्षीमहि ते प्रयतस्य वस्वः, इति ।

हे इन्द्र सूर्यस्य चक्षसा प्रकाशेन यद्विश्वं पश्यसि, तदिदं विश्वमभितः सर्वतः पशव्यं पशुयुक्तं तवाधीनमिति शेषः । त्वमेक एव गवां मध्ये गोपतिरसि प्रशस्तगोस्वामी भवसि । प्रयतस्य प्रयतमानस्य ते तव वस्वो वसूनि धनानि भक्षीमह्यनुभूयास्म ।

अथ हविषः पुरोनुवाक्यामाह -

समिन्द्र णो मनसा नेषि गोभिः । स सूरिभिर्मघवन्त्स स्वस्त्या । सं ब्रह्मणा देवकृतं यदस्ति (६) । सं देवानां सुमत्या यज्ञियानाम्, इति ।

हे इन्द्र त्वं मनसा स्मरणमात्रेण नोऽस्मान्गोभिः संनेषि संयोजय । हे मघवन्सूरिभिर्विद्वद्भिः पुत्रैः संयोजय । स्वस्त्या क्षेमेण संयोजय ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवकृतं देवार्थं निष्पन्नं यन्मन्त्रजातमस्ति तेन ब्रह्मणा मन्त्रजातेन संयोजय। यज्ञियानां यज्ञार्हाणां देवानां सुमत्याऽनुग्रहबुद्ध्या संयोजय।

अथ हविषो याज्यामाह -

आराच्छत्रुमपबाधस्व दूरम्। उग्रो यः शम्बः पुरूहूत तेन। अस्मे धेहि यवमद्गोमदिन्द्र। कृधी धियं जरित्रे वाजरत्नाम्, इति।

हे पुरुहूत बहुभिर्यजमानैराहूतेन्द्र, उग्रः क्रूरो यः शम्बनामकोऽसुरोऽस्ति तेन सहितमारात्समीपे वर्तमानं शत्रुं दूरं यथा भवति तथाऽपबाधस्व। हे इन्द्र यवमद्यवैः प्रभूतैरुपेतं गोमद्बहुभिर्गोभिरुपेतं धनमस्मे धेह्यस्मासु स्थापय। जरित्रे जरणशीले मयि वाजरत्नामन्नेन रत्नैश्च संपूर्णां धियमनुग्रहबुद्धिं कृधि कुरु।

अथ 'श्वेतां बार्हस्पत्याम्' इत्यस्य पशोः सूक्ते वपाया याज्यानुवाक्ययोः प्रतीके दर्शयति -

आवेधसꣳस हि शुचिः, इति।

'आवेधसं नीलपृष्ठम्' इति पुरोनुवाक्या। 'स हि शुचिः शतपत्रः' इति याज्या। एतदुभयं 'यज्ञो राये' इत्यत्र व्याख्यातम्।

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

बृहस्पतिः प्रथमं जायमानः। महो ज्योतिषः। परमे व्योमन्। सप्तास्यस्तुविजातो रवेण। वि सप्तरश्मिरधमत्तमाꣳसि (७), इति।

योऽयं बृहस्पतिः सोऽयमितरेभ्यो देवेभ्यः प्रथमं पूर्वं जायमानः सन्परमे व्योमन्नुत्कृष्ट आकाशे स्वर्गरूपे ज्योतिषो महोऽन्यदीयात्प्रकाशादत्यन्तं महान्भासते। कीदृशो बृहस्पती रवेण वेदशास्त्ररूपेण शब्देन सप्तास्यः प्रसृतमुखः। अथवा सप्तसंख्याकान्यास्यानि ज्वालारूपाणि यस्याग्नेः सोऽस्मभ्य सप्तास्यः रवेण मन्त्रेण होमकाले हविः स्वीकर्तुं वह्निरूपो भवतीत्यर्थः। तुविजातः सर्वेषां मध्ये बल युक्तत्वेनोत्पन्नः। तादृशो बृहस्पतिः सप्तरश्मिरग्निरूपेण सप्तजिह्वात्मकरश्मियुक्तः संस्तमांसि व्यधमद्विनाशितवान्।

अथ पुरोडाशस्य याज्यामाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बृहस्पतिः समजयद्वसूनि । महो व्रजान्गोमतो देव अपः । अपः सिषासन्त्सुवरप्रतीतः । बृहस्पतिर्हन्त्यमित्रमर्कैः, इति ।

अयं बृहस्पतिर्वसूनि धनानि समजयत्सम्यग्जितवान् । तथैष देवो गोमतो बहुभिर्गोभिर्युक्तान्महो महतः प्रौढान्व्रजान्गोगृहान्समजयत्सम्यग्जितवान् । तादृशो बृहस्पतिरपः सिषासन्वृष्टिरूपं जलं दातुमिच्छन्सुवः । स्वर्गमप्रतीतः प्रत्यावृत्तिराहित्येन प्राप्तः सर्वदा तत्र स्थित इत्यर्थः । स च बृहस्पतिरर्कैरस्मत्कृतैरर्चनैरमित्रं शत्रुं हन्ति ।

अथ हविषो याज्यानुवाक्ययोः प्रतीके दर्शयति –

बृहस्पते पर्येवा पित्रे, इति ।

'बृहस्पते परिदीया रथेन' इति पुरोनुवाक्या । 'एवा पित्रे विश्वदेवाय' इति याज्या । बृहस्पते परिदीया रथेनेत्यसौ 'आशुः शिशानः' इत्यत्र व्याख्याता । 'एवा पित्रे विश्वदेवाय' इत्यसौ 'अग्नाविष्णू महि तद्वाम' इत्यत्र व्याख्याता ।

अथ 'सारस्वतं मेषम्' इत्यस्य पशोः सूक्ते पञ्चानामृचां प्रतीकानि दर्शयति–

आ नो दिवः पावीरवी । इमा जुह्वाना यस्ते स्तनः ।सरस्वत्यभि-नो नेषि, इति ।

'आ नो दिवो बृहतः' इत्येषा वपायाः पुरोनुवाक्या । सा च 'अग्नाविष्णू महि तद्वाम्' इत्यत्र व्याख्याता । 'पावीरवी कन्या' इत्येषा याज्या । सा च 'आग्नेयं यज्ञमध्वरम्' इत्यत्र व्याख्याता । 'इधा जुह्वाना युष्मदा नमोभिः' इत्येषा पुरोडाशस्य पुरोनुवाक्या । सा च 'उत नः प्रिया' इत्यत्र व्याख्याता । 'यस्ते स्तनः शशयः' इति याज्या । सा चारण्यकाण्डे प्रवर्ग्यमन्त्रेष् व्याख्यास्यते । 'सरस्वत्यभि नो नेषि वस्यः' इति हविषः पुरोनुवाक्या । सा च 'जुष्टी नरः' इत्यत्र व्याख्याता ।

अथ हविषो याज्यामाह –

इय ँ शुष्मेभिर्बिसखा इवारुजत् । सानु मिरीणा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रूविषेभिरुर्मिभिः । पारावदग्नीमवसे सुवृक्तिभिः ।
सरस्वतीमाविवासेम धीतिभिः, (८), इति ।

देवयानैर्देवाः सुपूतं यजत्र हस्तमस्ति तमा ँ स्यर्मिभिर्देव च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमाध्याये
द्वितीयोऽनुवाकः ।। २ ।

इयं सरस्वती नदीरूपोर्मिभिः स्वकीयैस्तरङ्गैः स्वतीरावस्थितानां गिरीणां सानु मूलप्रदेशमरुजद्भग्नमकरोत् । तत्र दृष्टान्तः-विसखा इव यथा जलमध्ये बिसानि खनितुं प्रवृत्तः पुरुष आया समन्तरेणैवोन्मूलयत्येवमत्राप्यूर्मिस्पर्शमात्रेण पर्वतमूलानि विशीर्णानि भवन्ति । कीदृशैरूर्मिभिः शुष्मेभिःप्रबलैः । तविषेभिरति स्थूलैः वयं तु सरस्वतीं धीतिभिर्ध्यानविशेषैराविवासेम सर्वत आच्छादयामः । किमर्थम् । अवसे रक्षणार्थम् । कीदृशी सरस्वतीं पारावदघ्नीम् । अवदमवरतीरं पारं परतीरं च स्ववेगेन हन्तीति पारावदघ्नी ताम् । कीदृशीभिर्धीतिभिः सुवृक्तिभिः वृक्तिरन्यचिन्ता वर्जनं सुष्ठु वृक्तिर्यासु ध्यानक्रियासु ताः सुवृक्तयस्ताभिरनन्य (रन्य)- चिन्तारहितैध्या-नविशेषैर्निरन्तरं ध्यायाम इत्यर्थः ।

अत्र विनियोगसंग्रहः-

ते शुक्रेति वपायां स्यादाग्नेय्यामग्न इत्यथ ।
इन्द्रमैन्द्र्यां तथाऽवेधसं श्वेतायामुदीरितम् ।।
आ नो मेष्यां द्वितीयेऽस्मिन्सूक्तपञ्चकमीरितम् ।। १ ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डेऽष्टमप्रपाठके
द्वितीयोऽनुवाकः ।

अथाष्टमे तृतीयोऽनुवाकः ।

द्वितीये वशादीनां पशूनां सूक्तान्यभिहितानि । तृतीये सौम्यादीनां सूक्तान्युच्यन्ते । तत्र "आग्नेयं कृष्णग्रीवमालभेत सौम्यं आशुं ज्योगामयावी" इत्येतस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह-

सोमा ँ धेनुं सोमो अर्वन्तमाशुम् । सोमो वीरं कर्मण्यं ददातु । सादन्यं विदथ्य ँ सभेयम् । पितु ददा दस्मै, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योऽयं सोमो देवः सोऽयमस्मै यजमानाय धेनुं ददातु । तथा स सोम आशुं शीघ्रगामिनमर्वन्तमश्वं ददातु । तथा स सोमः कर्मण्यं श्रौतस्मार्तकर्मयोग्यं वीरं पुत्रं ददातु । कीदृशं वीरं सदनं गृहं तत्र साधुः सादन्यस्तं गृहनिर्वाहकमित्यर्थः । विदथे यज्ञे कुशलं विदथ्यम् । सभायां साधुः सभेयस्तं सभेयम् । स्वकीयस्य पितुः श्रवणं कीर्तिः संपाद्यते येन सोऽयं पितुःश्रवणस्तम् । यो यजमानः सोमाय देवाय ददाशच्चरुपुरोडाशादिकं ददात्यस्मै यजमानायेति पूर्वत्रान्वयः ।

अथ वपाया याज्यायाः पुरोडाशस्य पुरोनुवाक्यायाश्च प्रतीके दर्शयति -

अषाढं युत्सु त्वꣳ सोम क्रतुभिः, इति ।

"अषाढं युत्सु पृतनासु" इति वपाया याज्या । "त्वꣳ सोम क्रतुभिः" इति पुरोडाशस्य पुरोनुवाक्या । एतच्चोभयं "जुष्टी नरः" इत्यत्र व्याख्यातम् ।

अथ पुरोडाशस्य याज्याः प्रतीकं दर्शयति -

स ते धामानि हविषा यजन्ति, इति ।

स च "अग्नेरातिथ्यमसि" इत्यत्र व्याख्याता ।

अथ हविषः पुरोनुवाक्यामाह -

त्वमिमा ओषधीः सोम विश्वाः । त्वमपो अजनत्वं गा । त्वमाततन्थोर्वन्तरिक्षम् । त्वं ज्योतिषा न मो ववर्थ (१) । इति ।

हे सोम त्वं विश्वाः सर्वा इमा ओषधीरजनय उत्पादितवानसि । तथा त्वमपो जलान्यजनयः । तथा त्वं गा गवादिपशूनजनयः । तथा त्वमुरु विस्तीर्णमन्तरिक्षमाततन्थ विस्तारितवानसि । तथा त्वं ज्योतिषा तेजसा तमोऽन्धकारं ववर्थ निवारितवानसि ।

हविषो याज्यामाह -

या ते धामानि दिवि या पृथिव्याम् । या पर्वतेष्वोषधीष्वप्सु । तेभिर्नो विश्वैः सुमना अहेडन् । राजन्त्सोम प्रति हव्या गृभाय, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हे सोम राजंस्ते तव द्युलोके या धामानि यानि स्थानानि सन्ति तथा पृथिव्यां यानि सन्ति पर्वतेष्वोषधीष्वप्सु यानि सन्ति । सुमना अस्माभिः सह सौमनस्ययुक्तस्त्वं तेभिर्विश्वैस्तैः सर्वैः स्थानैर्युक्तो नोऽस्मान्प्रति हेडन्क्रोधमकुर्वन्हव्या प्रतिगृभाय हवींषि प्रतिगृहाण ।

अथ 'वैष्णवं वामनमालभेत स्पर्धमानः' इत्यस्य पशोः सूक्ते प्रतीकत्रयं दर्शयति–

विष्णोर्नु कं तदस्य प्रियम् । प्र तद्विष्णुः, इति ।

"विष्णोर्नु कं वीर्याणि" इति वपायाः पुरोनुवाक्या । सेयं "युञ्जते मनः" इत्यत्र व्याख्याता । "तदस्य प्रियमभि पाथो अश्याम" इति वपाया याज्या । सेयम् । "उत नः प्रिया" इत्यत्र व्याख्याता । "प्र तद्विष्णुस्तवते" इति पुरोडाशस्य पुरोनुवाक्या । सेयं "जुष्टी नरः" इत्यत्र व्याख्याता ।

अथ पुरोडाशस्य याज्यामाह –

परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वम् । परमस्य
वित्से (२), इति ।

हे विष्णो देव मात्रया कृत्स्नं जगन्मातुं प्रवृत्तया तनुवा त्रिविक्रमावताररूपया मूर्त्या वृधान हे वर्धमान पर उत्कृष्टोऽसि । ते त्वदीयं महित्वं महिमानं नान्वश्नुवन्ति केऽपि समर्था अनुगन्तुं न क्षमन्ते । ते तव लोकान्मातुं प्रवृत्तस्य पृथिव्या आरभ्योभे रजसी द्वे रञ्जनस्थाने पृथिव्यन्तरिक्षमित्येते त्वदीयपदे इति वयं विद्मः । त्वं पुनः परमस्योत्कृष्टस्य तृतीयस्य पदस्य स्थानं वित्से जानासि ।

अथ हविषो याज्यानुवाक्ययोः प्रतीके दर्शयति –

विचक्रमे त्रिर्देवः, इति ।

'विचक्रमे पृथिवीमेषः" इति पुरोनुवाक्या । "त्रिर्देवः पृथिवीमेषः" इति याज्या । एतच्चोभयं "जुष्टी नरः" इत्यत्र व्याख्यातम् ।

अथ "इन्द्राय मन्युमते मनस्वते ललामं प्राशृङ्गमालभेत" इत्यस्य पशोः सूक्ते प्रतीकत्रयं दर्शयति–

आ ते महो ये जात एव । अभि गोत्राणि, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

"आ ते मह इन्द्र" इति वपायाः पुरोनुवाक्या। 'यो जात एव प्रथमो मनस्वान्' इति याज्या। एतच्चोभयमन्त्रहमासा इत्यत्र व्याख्यातम्। "अभि गोत्राणि सहसा गाहमानः" इति पुरोडाशस्य पुरोनुवाक्या। सा च "आशुः शिशानः" इत्यत्र व्याख्याता।

अथ पुरोडाशस्य याज्यामाह -

आभिः स्पृधो मिथतीररिषण्यन् । अमित्रस्य व्यथया मन्युमिन्द्र । आभिर्विश्वा अभियुजो विषूचीः । आर्याय विशोऽवतारीर्दासीः, इति ।

हे इन्द्र, अमित्रस्यास्मद्वैरिणो मन्युं क्रोधं व्यथय व्यथितं निष्फलं कुरु। अस्मासु क्रुद्धः शत्रुर्यदाऽस्मान्हन्तुं न क्षमते तदा तदीयः क्रोधो निष्फलो भवेत्तथा त्वं कुर्वित्यर्थः। किं कुर्वन्स्पृधः शत्रूणां स्पर्धमाना अस्मदीयाः सेना मिथतीस्त्वां प्रत्यभयं याचमाना आभिर स्मदीयाभिः स्तुतिभिररिषण्यन्नहिंसिताः कुर्वन्। अस्मदीयस्तुतिभिस्तुष्टस्त्व-मस्मदीयाः सेनाः यथा न हिंसिता भवन्ति तथा कुर्वित्यर्थः। किंच विश्वाः परकीयाः सर्वाः सेना अभियुजोऽस्मद्वयधमभिलक्ष्य प्रयुज्यमाना विषूचीर्नानागतीर्दासीरुपक्षयं प्राप्ता विशःसर्वाः प्रजा अभितुष्टः सन्नवतरारीर्विनाशय। यथाऽस्मदीयस्तुत्या तुष्टं त्वां प्रत्यभयं याचमानानामस्मत्सेनानां न हिंसां कृतवानसि तथैवास्मदीयस्तुत्या तुष्टः सन्परकीयसेना विनाशयेत्यर्थः।

अथ हविषः पुरोनुवाक्यामाह -

अयँ शृण्वे अध जयन्नुत घ्नन् । अयमुत प्रकृणुते युधा गाः । यदा सत्यं कृणुते मन्युमिन्द्रः (३) । विश्वं दृढं भयत एजदस्मात्, इति ।

अयमिन्द्रोऽध कदाचिज्जयन्वर्तते। उताथवा घ्नन्वर्तत इत्यहं शृण्वे। अयमर्थः-यदा यदेन्द्रस्य वार्ता शृणोमि तदा तदा जयतीति वा वैरिणं हन्तीति वा शृणोमि। उतापि चायमिन्द्रो युधा युद्धेन गाःपरकीयाः प्रकृणुते प्रकर्षेण स्वाधीनाः करोति। किंच यदाऽयमिन्द्रः स्वकीयं मन्युं सत्यमवश्यंभाविनं कृणुते करोति। तदानीं दृढं क्वचिदेवावस्थितं स्थावरमेजत्कम्पमानं जङ्गमं च विश्वं सर्वं जगदस्मादिन्द्राद्भयते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बिभेति । अयमर्थः-परिहासार्थो यः कोपस्तमन्तरेण यदा हृदयपूर्वकं कोपं करोति तदा सर्वं जगद्बिभेतीति ।

अथ हविषो याज्यामाह -

अनु स्वधामक्षरन्नापो अस्य । अवर्धत मध्य आ नाव्यानाम् । सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन, हन्मनाऽहन्नभिद्यून्, इति ।

अस्येन्द्रस्य स्वधां हविर्लक्षणमन्वापो वृष्टिलक्षणा अक्षरन्स्रवन्ति । नाव्याना नावा तरणीयानां नदीनां मध्य आऽवर्धत जलं सर्वतोऽभिवृद्धमभूत् । अयमिन्द्र ओजिष्ठेनात्यन्तबलयुक्तेन सध्रीचीनेन सह वर्तमानेन मनसा युक्तत्वं प्रसिद्धं मेघमभिद्यून्प्रतिदिनं हन्मनां हनन साधनेन स्वायुधेन वज्रेणाहंस्ताडयति । अयमर्थः-यदाऽयं स्वेच्छया मेघं भिनत्ति तदा वृष्ट्या नदीपूरणक्षमं जलं वर्धत इति ।

अथ "इन्द्राय मरुत्वते पृश्निसक्थमालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह -

मरुत्वन्तं वृषभं वावृधानम् । अकवारिं दिव्यँ शासमिन्द्रम् । विश्वासाहमवसे नूतनाय । उग्रँ सहोदामिह तँ हुवेम, इति ।

इह कर्मणि तमिन्द्रं हुमेवाऽऽह्वयामः । किमर्थं नूतनायावसेऽन्यैरकृतपूर्वाय रक्षणाय । कीदृशमिन्द्रं मरुत्वन्तं मरुद्भिः संयुतम् । वृषभं कामानां वर्षितारम् । वावृधानमतिशयेन वर्धमानम् । अकवारिमकुत्सितारिम् । कुत्सितेनातिस्वल्पेन वैरिणा सह स्पर्धा लज्जायै भवति । दिव्यं दिवि भवम् । शासं शासितारं विश्वासाहं विश्वस्याभिभवितारम् । उग्रमनभिभवनीयम् । सहोदां बलप्रदम् ।

अथ वपाया याज्यामाह -

जनिष्ठा उग्रः सहसे तुराय (४) । मन्द्र ओजिष्ठो बहुलाभिमानः अवर्धन्निन्द्रं मरुतश्चिदत्र । माता यद्वीरं दधनद्धनिष्ठा, इति ।

हे इन्द्र त्वमुग्रः परैरप्रधृष्यो जनिष्ठ उत्पन्नोऽसि । किमर्थं सहसे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैरिबलस्य तुराय हिंसार्थम् । कीदृश इन्द्रो मन्द्रो हर्षयुक्तः । ओजिष्ठो बलवत्तरः । बहुलाभिमानः प्रभूताहंकारः मरुतश्चिन्मरुतोऽपि बलकर्मणि वृत्रवधाधिक इन्द्रमवर्धन्वर्धितवन्तः । किंच धनिष्ठाऽतिशयेन धनवती माताऽदितिरूपा यद्वीरं यमिन्द्रं शूरं दधनद्धारितवती तमिन्द्रमदर्धन्नित्यन्वयः ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

क्वं स्या वो मरुतः स्वधाऽऽसीत् । यन्मामेकं समधत्ताहिहत्यें । अहं ह्युग्रस्तविषस्तुविष्मान् । विश्वस्य शत्रोरनमं वधस्नैः, इति ।

इन्द्रस्य मरुतां च परस्परसंवादोऽयम् । अहिनामकस्यासुरस्य वधे मरुत इन्द्रस्य साहाय्यमकृत्वा पलायिता अतस्तान्प्रतीन्द्रः कुपित एवं ब्रवीति । हे मरुतो यद्यस्मात्कारणादहिहत्येऽहिनामकशत्रोर्वधे मामेकमेव यूयं समधत्त संयोजितवन्तस्तदानीं यो युष्माकं स्वधा साऽन्ननिमित्ता शक्तिः क्वाऽऽसीत्कुत्र गता । अथवा किं मे युष्माभिः अहं ह्युग्रोऽहमेवातितीव्रस्तुविषो महांस्तुविष्मान्बलवांस्तादृशः सन्विश्वस्य सर्वस्यापि शत्रोर्वधस्नैर्वधबन्धनैरनमं वशीकरणे शक्तोऽस्मि ।

अथ पुरोडाशस्य याज्यामाह –

वृत्रस्यं त्वा श्वसथादीषमाणाः । विश्वे देवा अंजहुर्ये सखायः । मरुद्भिरिन्द्रं सख्यं ते अस्तु (५) । अथेमा विश्वाः पृतना जायसि । इति ।

पुरा वृषवधार्थमिन्द्रः सर्वेषां देवानां स (सा) हाय (य्य) मपेक्षमाणस्तैः सह युद्धार्थमागतः । तदा सर्वे देवा वृत्रस्य श्वासमात्रेण निराकृताः सन्तो गताः । मरुतस्तु पलायनमकृत्वेन्द्रस्य सख्यमारचरन् । सोऽयं वृत्तान्तो बह्वृचब्राह्मणस्योऽन्मन्त्रे सूच्यते । तमेतमर्थमिन्द्रं संबोध्य होता कथयति । हे इन्द्र विश्वे सर्वे देवा वृत्रस्य श्वसथात्त दुच्छ्वासादीषमाणाः पलायमानाः सन्तस्त्वामजहुः परित्यक्तवन्तः । ये तु सखायो मरुतो न पलायन्त तैर्मरुद्भिः सख्यं तवास्तु । अथानन्तरमिमा विश्वाः सर्वाः पृतनाः सेना जयासि जेष्यसि ।

अथ हविषः पुरोनुवाक्यामाह –

वर्धी' वृत्रं मरुत इन्द्रियेणं । स्वेन भामेन तविषो बभूवान् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अहमेता मनवे विश्वश्चन्द्राः । सुगा अपश्चकर वज्रबाहुः, इति ।

हे मरुत इन्द्रोऽहं स्वेनेन्द्रियेण हस्तेन स्वेन भामेन स्वकीयेन कोपेन वृत्रं वधीमवधिषम् । अतस्तविषो बभूवान्महानभवम् । इन्द्रो महानित्येवं लोके, कीर्तिर्जातित्यर्थः । अहमिन्द्रो वज्रबाहुः सन्विश्वश्चन्द्राः सर्वस्य जगत आह्लादकराः सुगाः सुखेन गन्तुं प्राप्तुं शक्या एता दृश्यमाना वृष्टिलक्षणा अपो मनवे मनुष्यार्थं चकर कृतवानस्मि । सर्वस्य लोकस्यानिष्टनिवारणाय वृत्रं हत्वेष्टप्राप्तये वृष्टिमुत्पादितवानस्मीत्यर्थः ।

अथ हविषो याज्यामाह -

स यो वृषा वृष्णियेभिः समोकाः । महो दिवः पृथिव्याश्च सम्राट् । सतीनसत्त्वा हव्यो भरेषु । मरुत्वान्नो भवत्विन्द्र ऊती, इति ।

य इन्द्रो वृषत्वादिगुणकः स इन्द्रो नोऽस्मान्प्रति मरुत्वान्मरुद्भिर्युक्त ऊती रक्षणहेतुर्भवतु । के ते गुणा इति तेऽभिधीयन्ते-वृषा कामानां वर्षयिता । वृष्णियशब्दो बलनामसु पठितः । वृष्णियैर्बलैः समोकाः संयुक्तः । महो महत्या दिवः पृथिव्याश्च सम्राट् स्वामी सन्सम्यग्राजमानः । सतीनशब्दो जलनामसु पठितः । सतीनसत्त्वा वृष्ट्यात्मकजलप्रदः । भ्रियन्ते संपाद्यन्ते हवींषि येषु यागेष्विति भरा यागास्तेषु हव्य आह्वानार्हः ।

अथ "इन्द्राय वृत्रतुरे ललामं प्राशृङ्गमालभेत" इत्यस्य पशोःसूक्ते वपायाः पुरोनुवाक्यामाह -

इन्द्रो वृत्रमतरद्वृत्रतूर्ये (६) । अनाधृष्यो मघवा शूर इन्द्रः । अन्वेनं विशो अमदन्त पूर्वीः । अयꣳ राजा जगतश्चर्षणीनाम्, इति ।

अयमिन्द्रो वृत्रतूर्ये वृत्रवधनिमित्ते युद्धे वृत्रमतरद्विनाशितवान् । स इन्द्रोऽनाधृष्यः केनापि तिरस्कर्तुमशक्यः । मघवा धनवान् । शूरो विक्रमयुक्तः । पूर्वी पूर्वकालीना विशः प्रजा एनमिन्द्रमन्वमदन्त वृत्रवधेनेन्द्रे हृष्टे सति प्रजा अपि हृष्टवत्यः । अयमिन्द्रश्चर्षणीनां मनुष्याणां कृत्स्नस्य जगतश्च राजा भूत्वा वर्तते ।

अथ वपाया याज्यामाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स एव वीरः स उ वीर्यवान्। स एकराजो जगतः परस्पाः। यदा वृत्रमतरच्छूर इन्द्रः। अथाभवद्दमिताऽभिक्रतूनाम्, इति।

योऽयमिन्द्रः स एव वीरो युद्धेषु शूरः। स उ वीर्यावान्स एवोत्साहयुक्तः। स एकराजः कृत्स्नस्य जगत एक एव राजा। परस्पा अतिशयेन पाता। सोऽयं शूर इन्द्रो यदा वृत्रमतरद्विनाशितवानथानन्तरमभिक्रतूनामभिप्राप्तविरोधाचरण- लक्षणकर्मणां दमिता दमन हेतुरभवत्।

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

इन्द्रो यज्ञं वर्धयन्विश्ववेदाः। पुरोडाशस्य जुषता ँ हविर्नः। वृत्रं तीर्त्वा दानवं वज्रबाहुः (७)। दिशोऽदृ ँ हद् दृ ँ हिता दृ ँ हणेन, इति।

विश्ववेदाः सवर्वज्ञोऽयमिन्द्रो यज्ञमस्मदीयं वर्धयन्नोऽस्मदीयस्य पुरोडाशस्स्य सारांशं हविर्जुषताम। वज्रबाहुरयं वृत्राख्यं दानवं तीर्त्वा हत्वा दृंहणेन दृढीकरणसाधनेन दृंहिता दृढीकर्तुमुद्यतः सन्दिशोऽदृंहद्वृत्रकृतोपद्रवेण प्रचलितानां सर्वदिग्वर्तिप्रजानां स्थैर्यं कृतवानित्यर्थः।

अथ पुरोडाशस्य याज्यामाह -

इमं यज्ञं वर्धयन्विश्ववेदाः। पुरोडाशं प्रतिगृभ्णात्विन्द्रः। यदा वृत्रमतरच्छूर इन्द्रः। अथैकराजो अभवज्जनानाम्, इति।

स्पष्टोऽर्थः।

अथ हविषः पुरोनुवाक्यामाह -

इन्द्रो देवाञ्छम्बरहत्य आवत्। इन्द्रो देवानामभवत्पुरोगाः। इन्द्रो यज्ञे हविषा वावृधानः। वृत्रतूर्णो अभय ँ शर्म य ँ सत्, इति।

शम्बरहत्ये शम्बराख्यस्यासुरस्य हत्ये वधे निष्पन्ने सति स इन्द्रो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवानावद्रक्षितवान् । स चेन्द्रो देवानां मध्ये पुरोगा मुख्योऽभवत् । इन्द्रोऽस्मिन्यज्ञे हविषा वावृधानोऽतिशयेन वर्धते । वृत्रतूर्वृत्रघाती स इन्द्रो नोऽस्मभ्यमभयं भयरहितं शर्म सुखं यंसद्यच्छतु ।

यः सप्त सिन्धूँ रदधापृथिव्याम् । यः सप्त लोकान कृणोद्दिशश्च । इन्द्रो हविष्मान्त्सगणो मरुद्भिः । वृत्रतूर्णो यज्ञमिहोपयासत् (८), इति ।

ववर्थ वित्स इन्द्रस्तु रायास्तु वृत्रतूर्ये वृत्रतूर्ये वज्रबाहुः पृथिव्यां त्रीणि च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमाध्याये तृतीयोऽनुवाक ॥ ३ ॥

योऽयमिन्द्रः पृथिव्यां सप्त सिन्धून्समुद्रानदधात्स्थापितवान् । य इन्द्रः सप्त लोकान्भूरादीन्दिशश्चाकृणोत्कृतवान् । मरुद्भिर्देवैः सगणो गणसहित इन्द्रो हविष्मान्हविर्युक्तोऽभूत् । वृत्रतूर्वृत्रघाती स इन्द्र इह लोके नोऽस्मदीयं यज्ञमुपयासदुपागच्छतु ।

अत्र विनियोगसंग्रहः-

सोमो धेनुमिति प्रोक्तं सौम्ये विष्णोर्नु वामने ।
आ ते महो य ऐन्द्रे स्यान्मरुत्वत्यैन्द्रके मरुत् ।
इन्द्रो वृत्रतुरैन्द्रे स्याद्वर्णितं सूक्तपञ्चकम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डेऽष्टमे प्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

अथाष्टमे चतुर्थोऽनुवाकः ।

तृतीये सौम्यादिपशुसूक्तान्यभिहितानि । चतुर्थे त्वभिमातिहेन्द्रादिपशुसूक्तान्युच्यन्ते । तत्र "इन्द्रायाभिमातिघ्ने लैलामं प्राशृङ्गमालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह -

इन्द्रस्तरस्वानभिमातिहोग्रः । हिरण्यवाशीरिषिरः सुवर्षाः । तस्य वयँ सुमतौ यज्ञियस्य । अपि भद्रे सौमनसे स्याम, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योऽयमिन्द्रोऽस्ति यज्ञियस्य यज्ञार्हस्य तस्येन्द्रस्य सुमतावनुग्रहबुद्धौ वयं स्याम तिष्ठेम । कीदृश इन्द्रस्तरस्वांस्तरो जवस्तद्वान् । अभिमातिहा शत्रुघाती । उग्रः शत्रुषु क्रूरः । वाशीति वाङ्नाम । हिरण्यं वाश्यां वाचि यस्यासौ हिरण्यवाशीः । अस्मै शतमस्मै सहस्रमित्येवं सर्वदा धनदानं वक्तीत्यर्थः । इषिर एषणीयः । सुवर्षाः स्वर्गप्रदः । तादृशस्यानुग्रहे स्थित्वा भद्रे कल्याणे सौमनसेऽपि चित्तसमाधानरूपे सुखेऽपि स्याम तिष्ठेम ।

अथ वपाया याज्यामाह –

हिरण्यवर्णो अभयं कृणोतु । अभिमातिहेन्द्रः पृतनासु जिष्णुः । स नः शर्म त्रिवरूथं वियँसत् । यूयं पात स्वस्तिभिः सदा नः, इति ।

अयमिन्द्रोऽस्माकमभयं कृणोतु करोतु । कीदृशो हिरण्यवर्णः सर्वाभरणभूषितत्वेन हिरण्यसदृशवर्णोपेतः । अभिमातिहा शत्रुघाती । पृतनासु परकीयसेनासु जिष्णुर्जयशीलः । स तादृश इन्द्रो नोऽस्मभ्यं त्रिवरूथं त्रिभूमिकं शर्म गृहं वियंसद्विशेषेण यच्छतु । हे इन्द्र यस्त्वं ये च त्वत्सेवकास्ते सर्वे यूयं नोऽस्मान्स्वस्तिभिः क्षेमैः सदा पात ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

इन्द्रँस्तुहि वज्रिणं स्तोमपृष्ठम् । पुरोडाशस्य जुषताँ हविर्नः (१) । हतऽवभिमातीः पृतनाःसहस्वान् । अथाभयं कृणुहि विश्वतो नः, इति ।

हे वागिन्द्रियेममिन्द्रं स्तुहि । कीदृशं वज्रिणं वज्रयुक्तम् । स्तोमपृष्ठं स्तोमैः साध्यानि पृष्ठस्तोत्राणि यस्यासौ स्तोमपृष्ठस्तम् । स चेन्द्रो ऽस्मदीयस्य पुरोडाशस्य सारभूतं हविर्जुषताम् । सहस्वान्बलवानिन्द्रोऽभिमातीः पृतना वैरिसेनाः सर्वा हत्वाऽथानन्तरं नोऽस्माकं विश्वतः सर्वस्मादभयं कृणुहि कुरु ।

पुरोडाशस्य याज्यामाह –

स्तुहि शूरं वज्रिणमप्रतीतम् । अभिमातिहनं पुरुहूतमिन्द्रम् । य एक इच्छतपतिर्जनेषु । तस्मा इन्द्राय हविरा जुहोत, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अप्रतिकूलत्वेन प्राप्तमप्रतीतं शूरादिशब्दैर्विशेषितमिन्द्रं हे वागिन्द्रियं स्तुहि । योऽयमिन्द्र एक इदेक एव जनेषु सर्वेषु मध्ये शतपतिः शतसंख्याकानां देवानां स्वामी तस्मा इन्द्राय हे ऋत्विजो हविराजुहोत सर्वतो हुतं कुरुत ।

अथ हविषः पुरोनुवाक्यामाह –

इन्द्रा देवानामधिपाः पुरोहितः । दिशां पतिरभव द्वाजिनीवान् । अभिमातिहा तविषस्तुविष्मान् । अस्मभ्यं चित्रं वृषण ँरयिं दात् (२), इति ।

अयमिन्द्रः सर्वेषां देवानामधिपाः स्वामी सन्पुरोहितो मुखत एव हितकारी दिशां प्राच्यादीनां पतिः पालको वाजिनीवानन्नसमूह युक्तोऽभवत् । अभिमातिहा शत्रुघाती । तविषो महान् । तुविष्मान्बलवान् । तादृश इन्द्रोऽस्मभ्यं चित्रं मणिमुक्तादिरूपेण नानाविधं वृषणं कामाभिवर्षणक्षमं रयिं धनं दाद्दातु ।

अथ हविषो याज्यामाह –

य इमे द्यावापृथिवी महित्वा । बलेनादृ ँहदभिमातिहेन्द्रः । स नो हविः प्रतिगृभ्णातु रातयै । देवानां देवो निधिपा नो अव्यात्, इति ।

अभिमातिहा शत्रुघाती य इन्द्रो महित्वा महता बलेनेमे द्यावापृथिव्यावदृहद्दृढीकृतवान् । स इन्द्रो नोऽस्मभ्यं रातये धनदानाय हविः प्रतिगृभ्णातु स्वीकरोतु । देवानामपि देवः पूज्यः । निधिपाः शङ्खपद्मादिनिधीनां पालकः । इन्द्रो नोऽस्मानव्याद्रक्षतु ।

अथ "इन्द्राय वज्रिणे ललामं प्राशृङ्गम्" इत्यस्य पशोः सूक्ते वपापुरोडाशविषयाणां याज्यानुवाक्यानां प्रतीकानि दर्शयति –

अनवस्ते रथं वृष्णे यत्ते । इन्द्रस्य न वीर्याण्यहन्नहिम्, इति ।

'अनवस्ते रथमश्वाय ' इति वपायाः पुरोनुवाक्या । 'वृष्णे यत्ते वृषणो अर्कम्' इति याज्या । एतच्चोभयम् 'इन्द्रं वो विश्वतस्परि' इत्यत्र व्याख्यानम् । 'इन्द्रस्य नु वीर्याणि प्रवोचम्' इति पुरोडाश पुरोनुवाक्या ।'

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अहन्नहिमन्वपः' इति याज्या। एतच्चोभयम् ' आ नो भर भगमिन्द्र' इत्यत्र व्याख्यातम्।

अथ हविषः पुरोनुवाक्यामाह -

इन्द्रो यातोऽवसितस्य राजा। शमस्य च शृङ्गिणो वज्रबाहुः। सेदु राजा क्षेति चर्षणीनाम्। अरान्न नेमिः परिता बभूव (३), इति।

अयमिन्द्रो यातो गच्छतो जङ्गमस्यावसितस्य क्वचिदवस्थितस्य स्थावरस्य च राजा स्वामी। किंच वज्रबाहुः स एवेन्द्रः शमस्य शान्ति युक्तस्य महिर्षिवर्गस्य शृङ्गिणः शृङ्गोपेतस्य गवादेरपि चर्षणीनां मनुष्याणामपि राजा भूत्वा क्षेति निवसति। तस्य दृष्टान्तः- अरान्न नेमिर्यथा रथचक्रस्य परितो वर्तमाना नेमिस्तत्र स्थितानराण्व्याप्नोति तथाऽयमिन्द्रः परिता बभूव परितस्तानि स्थावरजङ्गमादीनि प्राप्तवान्।

अथ हविषो याज्यामाह -

अभि सिध्मो अजिगादस्य शत्रून्। वि तिग्मेन वृषभेणा पुरोऽभेत्। सं वज्रेणासृजद्वृत्रमिन्द्रः। प्र स्वां मतिमतिरच्छाशदानः, इति।

अस्येन्द्रस्य सिध्मः कार्यसाधको वज्रः शत्रून्सर्वानभि सर्वतोऽजिगात्प्राप्तवान्हतवानित्यर्थः। तिग्मेन तीक्ष्णेन वृषभेण श्रेष्ठेन वज्रेण पुरः शत्रूणां पुराणि व्यभेद्विशेषेण भिन्नवान्। अयमिन्द्रो वज्रेण वृत्रं समसृजत्संसृष्टवान्संसर्गमात्रेण हतवानित्यर्थः। शाशदानः पुनः पुनर्वैरिणो विनाशयन्स्वां मतिं स्वकीयां बुद्धिं प्रातिरत्प्रकर्षेण वर्धितवान्।

अथ "यो भ्रातृव्यवान्स्यात्स स्पर्धमानां वैष्णववारुणीं वशामालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह -

विष्णुं देवं वरुणमूतये भगम्। मेदसा देवा वपया यजध्वम्। ता नो यज्ञमगतं विश्वधेना। प्रजावदस्मे द्रविणेह धत्तम्, इति।

हे देवा दीप्यमाना ऋत्विजो भगं भजनीयं विष्णुं वरुणं च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवमूतयेऽस्मद्रक्षणार्थं मेदसा मेदोयुक्तया वपया यजध्वं पूजयध्वम् । मेदः-शब्देन वपायां लेपरूपो मांससार उच्यते । विष्णुर्वरुणश्चेत्येतौ देवौ विश्वधेना प्रकर्षेण प्रीणयन्तौ ता तौ युवां नोऽस्मदीयं यज्ञं प्रत्यागतमागच्छतम् । आगत्य चेह कर्मणि प्रजावत्पुत्रपौत्रादियुक्तं द्रविणा धनमस्मे धत्तमस्मान्संपादयतम् ।

अथ वपाया याज्यामाह –

मेदसा देवा वपया यजध्वम् । विष्णुं च देवं वरुणं च रातिम् (४) । ता नो अमीवा अपबाधमानौ । इमं यज्ञं जुषमाणावुपेतम्, इति ।

हे देवा ऋत्विजो रातिं फलस्य दातारं विष्णुं च वरुणं च देवं मेदोयुक्तया वपया यजध्वं पूजयत । हे विष्णो वरुण ता तौ युवां नोऽस्माकममीवा रोगानपबाधमानाविमं यज्ञं सेवमानावुपेतं समीपमागच्छतम् ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

विष्णूवरुणा युवमध्वराव नः । विशे जनाय महि शर्म यच्छतम् । दीर्घप्रयज्यू हविषा वृधाना ज्योतिषाऽरातीर्दहतं तमाँसि, इति ।

हे विष्णुवरुणौ युवां नोऽस्मदीयायाध्वराय यज्ञाय विशे करप्रदाय प्रजायै जनाय पुत्रपौत्रादिरूपाय मनुष्याय महि शर्म महत्सुखं यच्छतम् । दीर्घप्रयज्यू चिरं प्रकर्षेण यष्टव्यौ, हविषा वृधानाऽतिशयेन वर्धमानौ ज्योतिषा भवदीयेन तेजसाऽरातीः शत्रूंस्तमांस्यन्धकारांश्च दहतम् ।

अथ पुरोडाशस्य याज्यामाह –

ययोरोजसा स्कभिता रजाँसि । वीर्येभिर्वीरतमा शविष्ठा । या पत्येते अप्रतीता सहोभिः । विष्णू अगन्वरुणा पूर्वहूतौ (५), इति ।

ययोर्विष्णुवरुणयोरोजसा बलेन रजांसि रञ्जनात्मकानि पृथिव्यादिस्थानानि स्कभिता स्तम्भितानि दृढीकृतानीत्यर्थः । वीर्येभिस्तत्तद्युद्धगतैः पराक्रमैर्वीरतमाऽत्यन्तं शूरौ शविष्ठाऽतिशयेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बलवन्तौ यौ विष्णुवरुणौ सहोभिर्बलैरप्रतीनौ सन्तौ प्रतिकूलरहितौ पत्यंत ऐश्वर्यं प्राप्नुतः । तौ विष्णुर्वरुणश्चेत्येतौ पूर्वहूतौ प्रथममाहूतौ युवामगन्ना-गच्छतम् ।

अथ हविषः पुरोनुवाक्यामाह -

विष्णूवरुणावभिशस्तिपा वाम् । देवा यजन्त हविषा घृतेन । अपामीवा ँ सेधत ँ रक्षसश्च । अथा धत्तं यजमानाय शं योः, इति ।

देवा ऋत्विजो हे विष्णुवरुणावभिस्तिपाऽपवादात्पातारौ वां युवा घृतेन हविषा घृतयुक्तेन पश्वङ्गलक्षणेन हविषा यजन्त पूजयन्तु । अमीवां रोगं रक्षसश्च सक्षांस्यप्यपसेधतं निराकुरुतम् । अथानन्तरं यजमानाय शमिष्टप्राप्तिनिमित्तं सुखं योरनिष्टवियोगं च धत्तं संपादयतम् ।

अथ हविषो याज्यामाह -

अ ँहोमुचा वृषभा सुप्रतूर्ती । देवानां देवतमा शविष्ठा । विष्णूवरुणा प्रतिहर्यतं नः । इदं नरा प्रयत्तमूतये हविः, इति ।

हे विष्णुवरुणौ नरा पुरुषश्रेष्ठौ युवां नोऽस्माकमूतये रक्षणाय प्रयतं प्रकर्षेण समर्पितमिदं हविः प्रतिहर्यतं कामयतम् । कीदृशौ युवामंहोमुचा पापान्मोचयितारौ । वृषभा श्रेष्ठौ । सुप्रतूर्ती सुष्ठु वैरिणां हिंसकौ । देवानां मध्ये देवतमाऽतिशयेन दीप्तिमन्तौ । शविष्ठाऽतिशयेन शक्तिमन्तौ ।

अथ "द्यावापृथिव्यां धेनुमालभेत ज्योगपरुद्धः" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह -

मही नु द्यावापृथिवी इह ज्येष्ठे । रुचा भवता ँ शुचयद्भिरर्कैः (६) । यत्सीं वरिष्ठे बृहती विमिन्वन् । नृवद्भ्योऽक्षा पप्रथानेभिरेवैः, इति ।

द्यावापृथिव्यौ देवते अर्केरस्मदीयैरर्चनीयैस्तुष्टे सत्याविह भवताम स्मिन्कर्मणि तिष्ठताम । कीदृश्यौ द्यावापृथिव्यौ मही महत्यौ । नु प्रसिद्धे । रुचा स्वकीये तेजसा ज्येष्ठे अत्यन्तप्रशस्ते । कीदृशैरर्कैः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शुचयद्भिरस्मत्पापं शोधयद्भिः । यद्ये द्यावापृथिव्यौ सीं फलसीमानं विभिन्वन्निश्चितवत्यौ ते द्यावापृथिव्याविति पूर्वत्रान्वयः । कीदृश्यौ वरिष्ठे गुणैरत्यन्तश्रेष्ठे । बृहती स्वरूपेण विस्तृते । पप्रथानेभिरतिप्रथितैः प्रसिद्धैरेवैरागमनैर्नृवद्भ्य ऋत्विक्पुरुषयुक्तेभ्यो यजमानेभ्योऽक्षा प्रत्यक्षत्वेनावस्थिते पुनः पुनरागत्य भक्तजनानां दृश्ये भवत इत्यर्थः ।

अथ वपाया याज्यामाह –

प्र पूर्व॒जे पि॒तरा॒ नव्य॑सीभिः । गी॒र्भिः कृ॑णुध्व॒ꣳ सद॑ने ऋ॒तस्य॑ । आ नो द्यावापृथिवी॒ दैव्ये॑न । जने॑न यात॒ं महि॑ वा॒ं वरू॑थम्, इति ।

पूर्वजे सृष्ट्यादावुत्पन्ने पितरा मातापितृस्थानीये द्यावापृथिव्यौ नव्यसीभिरत्यन्तनूतनाभिर्गीर्भिः स्तुतिभिस्तुष्टे सत्यावृतस्य यज्ञस्य संबन्धिनी सदने निवासाय द्वे स्थानं कृणुध्वं कुरुताम् । प्रशब्दः सदनविशेषणं प्रकृष्टे स्थाने इत्यर्थः । हे द्यावापृथिव्यौ दैव्येन दिवि भवेन जनेन सह वां युवयोः संबन्धि महि वरूथं प्रौढं यागगृहं प्रत्यायातमागच्छतम् ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह–

स इत्स्वपा॒ भुव॑नेष्वास । य इ॒मे द्याव॑ापृथि॒वी ज॒जान॑ । उ॒र्वी ग॑भी॒रे रज॑सी सु॒मेके॑ । अ॒व॒ꣳशे धीर॒ः शच्या॒ समै॑रत् (७), इति ।

यः प्रजापतिरिमे द्यावापृथिव्यौ जजानोत्पादयामास । स इत्स एव प्रजापतिर्भुवनेषु लोकेषु मध्ये स्वपा आस । अपःशब्दः कर्मवाची । शोभनव्यापारो बभूवेत्यर्थः । कीदृश्यौ द्यावापृथिव्यावुर्वी स्वरूपेण विस्तीर्णे । गभीरे गुणैर्गम्भीरे । रजसी रञ्जनात्मिके सुमेके सुनिर्माणे । अवंशे कश्यपभरद्वाजादिगोत्ररूपवंशरहिते सर्वेभ्यो महर्षिभ्यः पूर्वमुत्पन्नत्वान्नास्ति तयोः कश्चिद्वंशः । तादृश्यौ द्यावापृथिव्यौ धीरो धीमान्प्रजापतिः शच्या स्वकीयया शक्त्या समैरत्संयोजितवान् ।

अथ पुरोडाशस्य याज्यामाह –

भूरि॒ं द्वे अच॑रन्ती॒ चर॑न्तम् । प॒द्वन्त॒ं गर्भ॑म॒पदी॑ दधाते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नित्यं न सूनुं पित्रोरुपस्थे । तं पिपृत रोदसी सत्यवाचम्, इति ।

द्वे द्यावापृथिव्यौ गर्भं सर्वप्राणिरूपं दधाते धारयतः । कीदृश्यौ द्वे अरचनी क्वाप्यविचरन्त्यौ स्थिरे इत्यर्थः । अत एवापदी पादरहिते न हि गमनाभावे पादयोरस्ति कश्चिदुपयोगः । कीदृशं गर्भं भूरिं देवतिर्यगादिरूपेण बहुविधम् । चरन्तं जङ्गमत्वेन संचारयुक्तम् । अत एव पद्वन्तं पादयुक्तम् । तत्र दृष्टान्तः-पित्रोरुपस्थे मातापित्रोरुत्सङ्गे नित्यं न सूनुं पुत्रमिव सर्वदा वर्तमानम् । हे रोदसी द्यावापृथिव्यौ सत्यवाचमवितथवाग्युतं देवादिरूपं गर्भं पिपृतं पालयतम् ।

अथ हविषः पुरोनुवाक्यामाह -

द्यावापृथिवी सत्यमस्तु । पितर्मातर्यदिहोपब्रुवे धाम् । भूतं देवानामवमे अवोभिः । विद्यामेषं वृजनं जीरदानुम्, इति ।

हे पितर्द्युलोक हे मातः पृथिवी वां युवामभिलक्ष्येह कर्मणि यद्वचनमहमुपब्रुवे हे द्यावापृथिव्याविदं मदीयं वचनं सत्यमस्तु । किं तद्वचनमिति तदुच्यते-अवोभिरस्मदीयरक्षणैः सह देवानां सर्वेषामवमे भूतं युवां रक्षके भवतम् । वयमपि भवत्प्रसादादिषमन्नं वृजनं पापवर्जितं जीरदानुं दातारं विद्याम लभेम ।

हविषो याज्यामाह -

ऊर्वी पृथ्वी बहुले दूरे अन्ते । उपब्रुवे नमसा यज्ञे अस्मिन् । दधाते ये सुभगे सुप्रतूर्ती । द्यावा रक्षतं पृथिवी नो अश्वात्, इति ।

ऊर्वी गुणैरधिके पृथ्वी स्वरूपेण विस्तीर्णं बहुले भोगैः प्रभूते दूरे अन्ते सर्वेषां दूरवर्तिन्यौ समीपवर्तिन्यौ च सर्वत्र विद्यमानत्वात् । तादृश्यौ द्यावापृथिव्यावभिलक्ष्याहमस्मिन्यज्ञे नमसा नमस्कारेण युक्तमुपब्रुवे किंचिद्विज्ञापनं ब्रवीमि किं तद्विज्ञापनमिति तदुच्यते- ये द्यावापृथिव्यौ सुभगे सौभाग्ययुक्ते सुप्रतूर्ती सुष्ठु शत्रुहिंसके दधाते जगद्गर्भं धारयतस्ते द्यावापृथिवी युवामुभे नोऽस्मानभ्वाद्र- क्षतमभवनमसद्भावो विनाशस्तस्माद्विनाशात्पालयतम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ "ओषधीभ्यो वेहतमालभेत प्रजाकामः" इत्यस्य पशोः सूक्तं क्रमेण वपापुरोडाशहविषां षट्प्रतीकानि दर्शयति-

या जाता ओषधयोऽतिविश्वाः परिष्ठाः । या ओषधयः सोम राज्ञीरश्वावती सौमवतीम् । ओषधीरिति मातरोऽन्या को अन्यामवतु, इति ।

हविर्नो दाद्बभूव रातिं पूर्वहूतावकैरैरदस्मिन्पञ्च च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमाध्याये चतुर्थोऽनुवाकः ।। ४ ।।

'या जाता ओषधयः' इति वपायाः पुरोनुवाक्या । 'अतिविश्वाः परिष्ठास्तेन इव' इति याज्या । 'या ओषधयः सोम राज्ञीःइति पुरोनुवाक्या । 'अश्वावती ँ सोमवतीम् ' इति याज्या । "ओषधीरिति मातरः "इति हविषः पुरोनुवाक्या । 'अन्या वो अन्यामवतु' इति याज्या । एतत्सर्वं "या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा "इत्यस्मिन्ननुवाके व्याख्यातम् ।

अत्र विनियोगसंग्रहः-

इन्द्रस्तरस्वानित्येतदभिमातिघ्न ऐन्द्रके ।

अनवो वज्रयुक्तैन्द्रै वशायां विष्णुमित्यदः ।।

मही द्यावापृथिव्यामां या जाता वेहतीष्यते ।। १ ।।

इति श्रीमत्सायणाचार्यविरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डेऽष्टमप्रपाठके चतुर्थोऽनुवाकः ।। ४ ।।

अथाष्टमे पञ्चमोऽनुवाकः ।

चतुर्थेऽनुवाकेऽभिमातिहैन्द्रपश्वादीनां सूक्तान्यभिहितानि । पञ्चमे त्वैन्द्राग्निपश्वादीनां सूक्तान्यभिधीयन्ते । तत्र "ऐन्द्राग्नं पुनरुत्सृष्टमालभेत" इत्यस्य पशोः सूक्ते षण्णामप्यृचां प्रतीकानि दर्शयति-

शुचिं नु स्तोमं ँ श्नथद्वृत्रम् । उभा वामिन्द्राग्नी प्रचर्षणिभ्यः । आवृत्रहणा गीर्भिर्विप्रः, इति ।

'शुचिं नु स्तोमं नवजातम्' इति वपायाः पुरोनुवाक्या । सा च 'उभा वामिन्द्राग्नी' इत्यत्र व्याख्याता । 'श्नथद्वृत्रमुत सनोति' इति वपाया

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

याज्या । सा चेन्द्राग्नी रोचना दिव इत्यत्र व्याख्याता । 'उभा वामिन्द्राग्नी इति पुरोडाशस्य पुरोनुवाक्या । 'प्रचर्षणिभ्यः' इति याज्या । 'आवृत्रहणा वृत्रहाभिः । इति हविषः पुरोनुवाक्या । 'गीर्भिर्विप्रः प्रमतिम्' इति याज्या । एतच्चोभयं पाशुकहौत्रे व्याख्यास्यते ।

अथ "ब्राह्मणस्पत्यं तूवरमालभेत" इत्यस्य पशोः सूक्ते वपायाःपुरोनुवाक्यामाह-

ब्रह्मणस्पते त्वमस्य यन्ता । सूक्तस्य बोधि तनयं च जिन्व । विश्वं तद्भद्रं यदवन्ति । देवाः । बृहद्वदेम विदथे सुवीराः, इति ।

ब्रह्मणो मन्त्रजातस्य पतिः पालकःकश्चिद्देवो हे ब्रह्मणस्पते त्वमस्यास्माभिः पठ्यमानस्य सूक्तस्य यन्ता नियामकोऽतो बोध्येतस्य सूक्तस्य तात्पर्यं बुध्यस्व । ततस्तनयं च त्वत्पुत्रसमानं च मां जिन्व प्रीणय । देवा युष्मदादयो विश्वमवन्तीति यदस्ति तद्भद्रं कल्याणम्, अतो रक्षार्थं सुवीराः शोभनापत्ययुक्ता वयं विदथे यज्ञे बृहत्प्रौढं स्तोत्रं वदेम ।

अथ वपाया याज्यामाह -

स ईं सत्येभिः सखिभिः शुचद्भिः । गोधायसं वि धनसैरदर्दत । ब्रह्मणस्पतिर्वृषभिर्वराहैः (१) । धर्मस्वेदेभिर्द्रविणं व्यानट्, इति ।

स ईं स एव ब्रह्मणस्पतिर्गोधायसं गोर्भूमेर्धारकं प्रतिपक्षिणं राजानं व्यतर्दद्विशेषेण हिंसितवान् । कैः सहितः सखिभिः स्नेहयुक्तैः । कीदृशैः सखिभिः सत्येभिः सत्यवादिभिः शुचद्भिः शुद्धियुक्तैर्धनसैर्हविर्लक्षणस्य धनस्य दातृभिः । ईदृशैर्ऋत्विग्भिः पूजितो ब्रह्मणस्पतिर्विरोधिनो विनाशयतीत्यर्थः । न केवलमनिष्टं निवारयति किंत्विष्टमपि प्रापयति । कथमिति तदुच्यते-अयं ब्रह्मणस्पतिर्वृषभिर्वर्षणशीलैर्घर्मस्वेदेभिर्घर्म-निमित्तस्वेदयुक्तपुरुषसदृशैर्वराहैर्मेघैर्द्रविणं सस्य निष्पत्तिरूपं धनं व्यानड्विशेषेण व्याप्तवान् । वारिवाहशब्दस्य वर्णव्यत्ययेन वराह इति प्रयोगः । यथा घर्मसंतप्ताः पुरुषाः स्विद्यन्ति तथा मेघदेहा ब्रह्मणस्पतिना प्रेरिता जलं स्रावयन्तीत्यर्थः ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्मणस्पतेरभ द्यथा वशम । सत्यो मन्युर्महि कर्मा करिष्यतः । यो गा उदाजत्स दिवे वि चाभजत् । महीव रीतिः शवसा सरत्पृथक्, इति ।

अस्य ब्रह्मणस्पतेः सर्वं जगद्यथा वशमभवद्येन प्रकारेणायमिच्छति तथैव प्रवर्तते । महिकर्मा जगन्नियमनरूपं महान्तं व्यापारं करिष्यतो ब्रह्मणस्पतेर्मन्युः सत्योऽवितथः कोपस्तस्मादेतदिच्छानुसारेण जगत्प्रवर्तते । जगत एतदधीनत्वमेव स्पष्टीक्रियते-गोशब्दोऽत्र जलवाची । य आदित्यो गा उदाजद्घर्मकाले जलानि स्वरश्मिभिर्भूम्या ऊर्ध्वं स्वीकृतवान्स आदित्यः पुनरपि दिवे दिवः सकाशाद्व्यभजद्विशेषेण विभागं कृत्वा वृष्टिकाले जलं प्रेरितवान् । योऽयं धर्मकाले जलस्वीकारो यश्च वृष्टिकाले पुनरपि जलस्य परित्याग एतत्सर्वं जगद्यवहारस्योपलक्षणम् । ब्रह्मणस्पतेरीदृशी रीतिर्महीव जगन्नियमनप्रकारो महानेष भूत्वा शवसा तदीयबलेन पृथक्सरद्बहुधा प्रवर्तते ।

अथ पुरोडाशस्य याज्यामाह -

इन्धानो अग्निं वनवद्वनुष्यतः । कृतब्रह्मा शूशुवद्रातहव्य इत् । जातेन जातमति सृत्प्रसृं सते । यं यं युजं कृणुते ब्रह्मणस्पतिः, इति ।

ब्रह्मणस्पतिर्देवो यं यं यजमानं युजं कृणुते कर्मानुष्ठानयुक्तं कुरुते, असावसौ यजमानोऽग्निमिन्धानः प्रदीपयन्वनुष्यतः स्वात्मानं हिंसिष्यतः शत्रून्वनवद्वनुयात्प्रतिहिंस्यात् । स च यजमानः कृतब्रह्मसंस्कृतमन्त्रो रातहव्य दत्तहविष्क एव भूत्वा शूशुवदतिशयेन वर्धते । अयं यजमानः सृत्प्रसृतं जातं वैरिणां जन्म जातेन स्वकीयेन जन्मनाऽतिप्रसृंसतेऽतिशयेन प्रस्रंसयत्यधः करोतीत्यर्थः ।

अथ हविषः पुरोनुवाक्यामाह -

ब्रह्मणस्पते सुयमस्य विश्वहा (२) । रायःस्याम रथ्यां विवस्वतः । वीरेषु वीराँ उपपृङ्ग्धि नस्त्वम् । यदीशानो ब्रह्मणा वेषि मे हवम्, इति ।

हे ब्रह्मणस्पते सुयमस्य सुष्ठु नियामकस्य विवस्वतः शत्रून्विनाश

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यतस्तव प्रसादाद्विश्वहा सर्वेष्वहःसु रायो धनयुक्ता रथ्यो रथयुक्ताः स्याम । त्वं तु नोऽस्मदीयेषु वीरेषु पुत्रेषु वीरान्परकीयान्पुत्रा- नुपपृङ्ध्युक्षपणीत्वेन संपृक्तान्कुरु । यद्यदेशानोऽस्मत्स्वामी त्वं ब्रह्मणा मन्त्रेण युक्तं मे हवं मदीयं हविर्वेषि प्राप्नोषि, तदेतत्सर्वं कुर्विति पूर्वत्रान्वयः ।

अथ हविषो याज्यामाह –

स इज्जनेन स विशा स जन्मना । स पुत्रैर्वाजं भरते धना नृभिः । देवानां यः पितरमाविवासति । श्रद्धामना हविषा ब्रह्मणस्पतिम्, इति ।

योऽयं यजमानो देवानां पितरं पालकं ब्रह्मणस्पतिं श्रद्धामनाः श्रद्धायुक्तेन मनसा ध्यायन्, हविषा दीयमानेनाऽऽविवासति सर्वतो विशेषेणाऽऽच्छादयति प्रभूतं हविर्ददातीत्यर्थः । स इत्स एव यजमानो जनेन स्वकीयेन सह वाजं भरतेऽन्नं पोषयति । स इज्जनेनेत्युक्तमेव प्रपञ्चयति–स विशा स यजमानः करप्रदया प्रजया सह वाजं भरते । स जन्मना स यजमानो जातेन सहोदरेण युक्तो वाजं भरते । तथा स यजमानः पुत्रैः सह वाजं भरते । तथा स यजमानो नृभिरन्यैर्मनुष्यैः सह धना भरते मणिमुक्तादीनि धनानि संपादयति ।

अथ "पौष्णँश्यामममालभेतान्नकामः" इत्यस्य पशोः सूक्ते तिसृणामृचां प्रतीकानि दर्शयति–

यास्ते पूषन्नावो अन्तः । शुक्रं ते अन्यत्पूषेमा आशाः, इति ।

'यास्ते पूषन्ना वो अन्तः' इत्येषा वपायाः पुरोनुवाक्या । सा च 'यज्ञो राये' इत्यनुवाके व्याख्याता । 'शुक्रं ते अन्यद्यजतं ते अन्यत्' इति वपाया याज्या । सा च 'अग्ने यं यज्ञम्' इत्यत्र व्याख्याता । 'पूषेमा आशाः' इति पुरोडाशस्य पुरोनुवाक्या । सा च 'जुष्टो दमूनाः' इत्यनुवाके व्याख्याता ।

अथ पुरोडाशस्य याज्यामाह –

पप्रथे पथामजनिष्ट पूषा (३) । प्रपथे दिवः प्रपथे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पृथिव्याः । उभे अभि प्रियतमे सधस्थे । आ च परा च चरति प्रजानन्, इति ।

पूषा पोषकोऽयमादित्यः पथामन्तरिक्षवर्तिनां मार्गाणां मध्ये प्रपथे प्रकृष्टमार्गेऽजनिष्टावस्थितः । तथा दिवो द्युलोकस्य संबन्धिनि प्रपथे प्रकृष्टमार्गेऽजनिष्ट । तथा हि पृथिव्याः संबन्धिनि प्रपथेऽजनिष्ट । प्रियतमे अतिशयेन प्रीतिमत्यौ सधस्थे परस्परं सहैवावस्थिते उभे द्यावापृथिव्यावभिलक्ष्यायं पूषा प्रजानन्यजमानेन कृतं कर्म तत्फलं च प्रकर्षेण विद्वानाचरति च पराचरति चाऽऽगच्छति पुनर्गच्छति च । यजमानकृतस्य कर्मणः साक्षी भूत्वा लोकयोरुभयोरपि गमनागमने करोतीत्यर्थः ।

अथ हविषः पुरोनुवाक्यामाह –

पूषा सुबन्धुर्दिव आपृथिव्याः । इडस्पतिर्मघवा दस्मवर्चाः । तं देवासो अददुः सूर्यायै । कामेन कृतं तवसꣳ स्वञ्चम्, इति ।

अयं पूषा दिवो द्युलोकवर्तिनो जनस्य बन्धुः । आपृथिव्याः पृथिवीलोकवर्तिनश्च जनस्य बन्धुः । इडस्पतिरन्नस्य पालकः । मघवा धनवान् । दस्मवर्चा दर्शनीयतेजास्तं पूषणं देवास इन्द्रादयः सर्वे देवाः सूर्यायै विवाहदेवताया अददुर्दत्तवन्तः । सूर्या च देवता विवाहप्रकरणे–"सूर्यां यः प्रत्यक्षम् " इत्यादिमन्त्रेषु प्रसिद्धा । कीदृशं पूषणं कामेन कृतं भोगेच्छया प्रेरितं तवसं महान्तं स्वञ्चं शोभनगतिम् ।

अथ हविषो याज्यामाह –

अजाश्वः पशुपा वाजवस्त्यः । धियंजिन्वो विश्वे भुवने अर्पितः । अष्ट्रां पूषा शिथिरामुद्वरीवृजत् (४) चक्षाणो भुवना देव ईयते, इति ।

यः पूषा सोऽयमजाश्वोऽश्वस्थाने रथे बध्यत इत्यर्थः । पशुपाः पशूनां पालयित । वस्त्यं गृहम् । वाजेनान्नेन संपूर्णं गृहं यस्यासौ वाजवस्त्यः । धियं प्राणिनां बुद्धिं जिन्वति प्रीणयतीति धियंजिन्वः । विश्वे भुवने सर्वस्मिँल्लोकेऽर्पितोऽवस्थितः । तादृशः पूषाऽष्ट्रां स्वहस्तेऽवस्थितामायुधविशेषरूपामारां शिथिरां शिथिलां कृत्वोद्वरीवृजदुद्धृत्य वर्जितवान्परित्यक्तवान् । मदमत्तानां गजानां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निवारिका येयं दीर्घदण्डा सेयमारा । सा च पूष्णो हस्ते वर्तते । तथा च बह्वृचा आमनन्ति–"यां पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणः" इति । 'या ते अष्ट्रा' इति मन्त्रान्तरे समाम्नानादारैवाष्ट्राऽस्मदनुग्रहार्थं भयहेतुमारां वर्जितवानित्यर्थः । स देवः पूषा भुवना संचक्षाणो लोकान्सम्यक्प्रकाशयन्नीयते चेष्टते ।

अथ "मारुतं पृश्निमालभेतान्नकामः" इत्यस्य पशोः सूक्तं वपायाः पुरोनुवाक्यामाह –

शुची वो हव्या मरुतः शचीनाम् । शुचिं हिनोम्यध्वरꣳ शुचिभ्यः । ऋतेन सत्यमृतसाप आयन् । शुचिजन्मानः शुचयः पावकाः, इति ।

हे मरुतः शुचीनां शुद्धानां वो युष्माकं शुची हव्या शुद्धानि हवींषि हिनोमि प्रापयामीत्यर्थः । तथा शुचिभ्यो मरुद्भ्यः शुचिं शुद्धमध्वरं हिंसारहितं कर्म हिनोमि संपादयामि । ऋतसापो यज्ञसमवायिनो मरुत ऋतेन यज्ञेन सत्यमवितथं फलमायन्प्रापितवन्तः । कीदृशा मरुतः शुचिजन्मानः शुद्धेन जन्मना युक्ताः । शुचय आचरणेनापि शुद्धाः । पावका इतरेषां शोधकाः ।

अथ वपाया याज्यामाह –

प्र चित्रमर्कं गृणते तुराय । मारुताय स्वतवसे भरध्वम् । ये सहाꣳसि सहसा सहन्ते । रेजते अग्ने पृथिवी मखेभ्यः, इति ।

हे ऋत्विजो मारुताय मरुतां संघातायार्कमर्चनं प्रभरध्वं प्रकर्षेण संपादयत । कीदृशमर्कं चित्रं नानाविधम् । कीदृशाय मारुताय गृणतेऽस्मद्धितं ब्रुवते । तुराय सेनायुक्ताय । स्वतवसे स्वतः सिद्धबलयुक्ताय । ये मरुतः सहांसि परकीयबलानि सहसा स्वकीयबलेन सहन्तेऽभिभवन्ति । हेऽग्ने मखेभ्यो यागस्वामिभ्यस्तेभ्यो मरुद्भ्यः पृथिवी रेजते कम्पते, अतस्तच्छान्त्यर्थं हविः प्रदातव्यमित्यभिप्रायः ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

अꣳसेष्वा मरुतः खादयो वः (५) । वक्षःसु रुक्मा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपशिश्रियाणाः । वि विद्युता न व्यृष्टिभी रुचानाः । अनु स्वधामायुधैर्यच्छमानाः, इति ।

हे मरुतो वो युष्माकमंसेषु खादयः शत्रून्खादितुं प्रहर्तुं समर्था आयुधविशेषा आ सर्वत आरूढाः । वक्षःसु त्वदीयेषु रुक्मा रत्नाभरणविशेषा उपशिश्रियाणा उपेत्याऽऽश्रित्य वर्तन्ते । विद्युतो न यथा विद्युत्संपाता रोचन्ते । तद्वद्यूयं व्यृष्टिभिरायुध- विशेषैर्व्यृष्ट्या- ख्यैर्विशेषेण रोचमानाः स्थिताः । तथा च मन्त्रान्तरम् –"यत्क्रीडथ मरुत ऋष्टिमन्तः" इति । ऋष्टिविशिष्टत्वादव्यृष्टय इत्युच्यन्ते । तथा स्वकीयैरायुधैः स्वधां परकीयमन्नं जग्ध्वाऽनुयच्छमाना अनुदिनमस्मभ्यं ददतोऽवस्थिताः ।

अथ पुरोडाशस्य याज्यामाह –

या वः शर्म शशमानाय सन्ति । त्रिधातूनि दाशुषे यच्छताधि । अस्मभ्यं तानि मरुतो वियन्त । रयिं नो धत्त वृषणः सुवीरम्, इति ।

हे मरुतो वो युष्माकं या शर्म यानि शरणानि गृहाणि शशमानाय सन्ति शंसनं कुर्वते यजमानस्य दातुं संपादितानि तानि गृहाणि त्रिधातूनि, अशनं पानं खादनमित्येतानि त्रीणि धारयन्तीति त्रिधातूनि । तदेतत्त्रयमन्यत्राऽऽम्नायते–"त्रेधा विहितं वा इदमन्नमशनं पानं खादः" इति । एतैस्त्रिविधैरन्नैरुपेतानि गृहाणि दाशुषे हविर्दत्तवते यजमानायाधियच्छताऽऽधिक्येन धत्त हे मरुतोऽस्मभ्यमपि तानि गृहाणिं वियन्त विशेषेण यच्छत । वृषणः कामानां वर्षितारो यूयं रयिं धनं सुवीरं सुष्ठु वीरपुत्रयुतं धत्त संपादयत ।

अथ हविषः पुरोनुवाक्यामाह –

इमे तुरं मरुतो रामयन्ति । इमे सहः सहस आनमन्ति । इमे शꣳसं वनुष्यतो निपान्ति (६) । गुरु द्वेषो अररुषे दधन्ति, इति ।

इमे मरुतो तुरं तूर्णं रामयन्त्यस्मान्क्रीडयन्ति । इमे मरुतः सहसो बलवतः शत्रोः सहो बलमानमन्त्यानतं कुर्वन्ति विनाशयन्तीत्यर्थः । इमे मरुतः शंसं शंसितारं यजमानं वनुष्यतो हिंसितुः शत्रोः सकाशान्निपान्ति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

नितरां रक्षन्ति । अररुषे हविष्प्रदानमकुर्वते नास्तिकाय गुरुद्वेषो महान्तं द्वेषं दधन्ति कुर्वन्ति ।

अथ हविषो याज्यामाह –

अ॒रा इ॒वेदच॑रमा अहे॑व । प्र प्र॑जायन्ते॒ अक॑वा॒ महो॑भिः ।
पृश्नैः पु॒त्रा उ॑प॒मासो॒ रभि॑ष्ठाः । स्वया॑ म॒त्या म॒रु॒तः
संमि॑मिक्षुः, इति ।

अरा इवेद्यथा रथचक्रस्याराः सर्वतो वर्तमाना अचरमाः प्रथमचरमभावरहितास्तथैवैते मरुतः सर्वे सहोत्पन्नत्वात्प्रथमचरमभावरहिताः । अहेव यथा वाऽहानि षष्टिघटिकात्मकानि न्यूनाधिकभावरहितानि तथैवैते मरुतश्चलनस्वभावेन समानत्वादुत्तमाधमभावरहिताः । ते च मरुतोऽकवा अकुत्सिता महोभिः स्वकीयैर्माहात्म्यैः प्र प्रजायन्तेऽतिशयेन प्रकृष्टाः संपद्यन्ते । ते च मरुतः पृश्नेः पुत्रा गोरूपायाः पृश्निदेवताया अपत्यानि । उपमासः सर्वेषामुत्तमवस्तूनामुपमारूपा एव । रभिष्ठा अतिशयेन वेगेन युक्ताः । ते च मरुतः स्वया मत्या स्वकीया बुद्ध्या संमिमिक्षुः सम्यङ्मेहनं वृष्टिजलं दत्तवन्तः ।

अथ "ऐन्द्रमरुणमालभेतेन्द्रियकामः" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह –

अनु॑ ते दायि म॒ह इ॑न्द्रि॒याय॑ । स॒त्रा ते॒ विश्व॒मनु वृ॒त्र॒हत्ये॑ ।
अनु क्ष॒त्रमनु॒ सहो॑ यजत्र । इन्द्र॑ दे॒वेभि॒रनु ते नृ॒षह्ये॑, इति ।

हे इन्द्र ते तवेन्द्रियायेन्द्रियाभिवृद्ध्यर्थं महे महती पूजाऽनुदाय्यनुक्रमेण दत्ता । अथवा महे महत इन्द्रियाय यदनुकूलं तद्दत्तम् । तथा वृत्रहत्ये वृत्रवधे सति ते तुभ्यं सत्रा साकं सर्वैर्देवैर्मिलित्वा विश्वमनुदत्तम् । यदा वृत्रवधं कृतवानसि तदा तव विश्वस्वामित्वं सर्वैर्देवैरङ्गीकृतमित्यर्थः । हे यजत्र पूजार्हेन्द्र क्षत्रं क्षत्रियजातिरनुदत्ता सर्वक्षत्रियस्वामित्वं तुभ्यं दत्तमित्यर्थः । तथा सहो बलमनुदत्तम् । नृषह्ये मनुष्याणामभिभवे प्राप्ते देवेभिस्ते तुभ्यमनुदत्तम् । तद्रक्षणमिति शेषः ।

अथ वपाया याज्यामाह –

य इन्द्र॒ शुष्मो॑ मघवन्ते अस्ति (७) । शिक्षा॒सखि॑भ्यः

Digitized by Madhuban Trust, Delhi

पुरुहूत नृभ्यः । त्व ँहि दृढा मघवन्विचेताः । अपावृधि परि तिं न राधः, इति ।

हे मघवन्धनवन्निन्द्र ते तव यः शुष्मो बलमस्ति तद्धे पुरुहूत सखिभ्यस्त्वयि स्निग्धेभ्यो नृभ्यो मनुष्येभ्यो यजमानेभ्यः शिक्षा शिक्षितं शुष्मं बलं देहि । हे मघवन्निन्द्र त्वं हि यस्मात्कारणादृढा बलाधिक्यादत्यन्तदृढो विचेता विविधजगदभिज्ञश्च तस्मात्कारणाद्राधोऽन्नमपावृध्यभिवर्धय । परिवृतिं न परिवारमप्यभिवर्धय ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

इन्द्रो राजा जगतश्चर्षणीनाम् । अधिक्षमि विषुरूपं यदस्ति । ततो ददातु दाशुषे वसूनि । चोदद्राध उपस्ततश्चिदर्वाक्, इति ।

अयमिन्द्रः कृत्स्नस्य जगतो विशेषतश्चर्षणीनां मनुष्याणां च राजा, अधिक्षमि क्षमाया भूमेरुपरि विषुरूपं नानाप्रकारं यद्धनमस्ति ततः सकाशाद्दाशुषे हविर्दत्तवते यजमानाय वसून्यपेक्षितानि धनानि ददातु । उपस्तुतो यजमानेन स्तूयमानः सन्नर्वागभिमुखो भूत्वा राधश्चिदन्नमपि चोदत्प्रेरयतु ददात्वित्यर्थः ।

अथ पुरोडाशस्य याज्यामाह –

तमु ष्टहि यो अभिभूत्योजाः । वन्वन्नवातः पुरुहूत इन्द्रः । अषाढमुग्र ँसहमानमाभिः । गीर्भिर्वर्ध वृषभं चर्षणीनाम्, इति ।

शत्रूणाममभिभूतौ शक्तमोजो बलं यस्यासावभिभूत्योवास्तादृशो य इन्द्रोऽस्ति । तमु तमेवेन्द्रं हे वागिन्द्रिय स्तुहि । अयमिन्द्रः पुरुहूतो बहुभिर्यजमानैराहूतः । अवातो वायुरहितो निश्चल इत्यर्थः । तादृशो वन्वन्नभिमतप्रदानं कुर्वन्वर्तते । अषाढमन्यैरभिभवितुमशक्यम् । उग्रं तीव्रम् । सहमानं शत्रूनभिभवन्तम् । चर्षणीनां वृषभं मनुष्याणां कामाभिवर्षणहेतुम् । आभिर्गीर्भिर्वेदोक्ताभिः स्तुतिभिर्वर्ध हे वागिन्द्रिय वर्धस्व ।

अथ हविषः पुरोनुवाक्यामाह –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्थूरस्य रायो बृहतो य ईशे । तमु ष्टवाम विदथेष्विन्द्रम् । यो वायुना जयति गोमतीषु । प्रधृष्णुया नयति वस्यो अच्छ, इति ।

य इन्द्रः स्थूरस्य स्थूलस्य बहुलस्येत्यर्थः । बृहतो महतोऽनर्घस्येत्यर्थः । तादृशस्य रायो धनस्येशे स्वामी भवति । तमु तमेवेन्द्रं विदथेषु यज्ञेषु स्तवाम नानाविधैः स्तोत्रैः स्तुतिं करवाम । य इन्द्रो वायुना सहितो गोमतीषु गोमहिषादियुक्तासु परसेनासु जयति जयं प्राप्नोति । धृष्णुया स्वकीयेन धृष्णुत्वेन प्रागल्भ्येन वस्यो वसीयसो धनवत्तमान्पुत्रादीनच्छास्मदाभिमुख्येन प्रकर्षेण नयति ।

अथ हविषो याज्यामाह –

आ ते शुष्मो वृषभ एतु पश्चात् । ओत्तरादधरागा पुरस्तात् । आ विश्वतो अभि समेत्वर्वाङ् । इन्द्र द्युम्नꣳ सुवर्वद्धेह्यस्मे (८), इति ।

वराहैर्विश्वहाऽजनिष्ट पूषोद्वरीवृजत्खादयो वः पान्त्यस्त्याभिर्नव च ।

इति कृष्णयजुर्वेदीयतैतिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमाध्याये पञ्चमोऽनुवाकः ।। ५ ।।

हे इन्द्र वृषभः श्रेष्ठस्ते तव शुष्मो बलं पश्चादस्मत्तः पश्चिमभाग ऐत्वागच्छतु । तथैवोत्तरादुत्तरभागेऽप्यागच्छतु । अधरागधो भागेऽप्यागच्छतु । पुरस्तात्पूर्वभागेऽप्यागच्छतु । विश्वतः सर्वेषु प्रदेशेष्व भ्यस्मानभिलक्ष्यार्वाङ्समीपवर्ती समेतु सम्यक्प्राप्नोतु । हे इन्द्र सुवर्वत्स्वर्गयुक्तं द्युम्नं धनमस्मे धेह्यस्मासु संपादय ।

अत्र विनियोगसंग्रहः–

पुनरुत्सृष्ट ऐन्द्राग्ने शुचिं नु स्तोमसूक्तकम् ।
ब्रह्मणस्पत इत्येतद्ब्राह्मणस्पत्यतूपरे ।। १ ।।
यास्ते पूषन्निति त्वन्नप्रदे श्यामे हि पौष्णके ।
शुची व इति पृश्नौ स्यान्मारुतेऽन्नस्य दातरि ।।
अनु ते दाय्यैन्द्रके स्यादरुणे हीन्द्रियप्रदे ।। २ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्येऽष्टमप्रपाठके
पञ्चमोऽनुवाकः ।। ५ ।।

अथाष्टमे षष्ठोऽनुवाकः ।

पञ्चम ऐन्द्राग्नपश्वादीनां सूक्तान्यभिहितानि । षष्ठे सावित्रादिपशूनां सूक्तान्यभिधीयन्ते । तत्र "सावित्रमुपध्वस्तमालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह –

आ देवो यातु सविता सुरत्नः । अन्तरिक्षप्रा वहमानो अश्वैः । हस्त दधानो नर्या पुरूणि । निवशयन् च प्रसुवन् च भूम इति ।

सविता देव आयात्वागच्छतु । कीदृशः सुरत्नः शोभनै रत्नैर्युक्तः । अन्तरिक्षप्राः स्वकीयै रश्मिभिरन्तरिक्षं पूरयिता । अश्वैर्वहमानः स्वकीयैरश्वै रथं वाहयन् । नर्या नरेभ्यो हितानि पुरुणि बहूनि रत्नानि यजमानाय दातुं हस्ते दधानः । भूम बहुलं जगत्प्राणिजातं निवेशयंश्च रात्रौ स्वस्वगृहेऽवस्थापयन्नपि प्रसुवंश्च दिवसे स्वस्वव्यापारेषु प्रेरयन्नपि वर्तत इति शेषः ।

अथ वपायां याज्यामाह –

अभीवृतं कृशनैर्विश्वरूपम् । हिरण्यशम्यं यजतो बृहन्तम् । आस्थाद्रथ ँसविता चित्रभानुः । कृष्णा रजा ँसि तविषीं दधानः, इति ।

अयं सविता रथमास्थादारूढवान् । कीदृशं रथं कृशनैर कृशनशब्दः सुवर्णवाची सुवर्णैरभितोऽलंकृतामित्यर्थः । विश्वरूपमनेकैराकारैरुपेतम् । हिरण्यशम्यं युगच्छिद्रे प्रक्षेप्यः यः काष्ठविशेषः शम्या सुवर्णमयीभ्यां शम्याभ्यामुपेतम् । बृहन्तमतिप्रौढम् । कीदृशः सविता यजतो यष्टव्यः । चित्रभानुर्बहुविधरश्मियुक्तः । तविषीं स्वकीयं बलं प्राप्य कृष्णारजांसि दधानः क्वचित्कृष्णानि रूपाणि क्वचिद्रक्तानि रूपाणि धारयन्वर्तते । एतद्रूपान्तराणामप्युपलक्षणम् । अत एवच्छन्दोगाः–"असौ वा आदित्यो देवमधु" इत्येतस्यां मधुविद्यायां– 'यदेतदादित्यस्य रोहितं रूपं यदेतदादित्यस्य शुक्रं, रूपं यदेतदादित्यस्य कृष्णं रूपम्, इति बहुविधानि रूपाण्यामनन्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

तवा नो देवः सविता सवाय । आसाविषद्वसुपतिर्वसूनि (१) । विश्रयमाणो अमतिमुरूचीम् । मर्तभोजनमधरासते न, इति ।

तथा स एव सविता देवो वसुपतिर्धनपतिर्भूत्वा नोऽस्माकं सवाय कर्मानुष्ठानाय वसूनि धनान्यासाविषत्सर्वतः संपादितवान् । किं कुर्वन्- उरुचीं विस्तीर्णां गतिममतिमस्मदीयां मन्दप्रज्ञां विश्रयमाणो विप्रतिषेधन् । अथानन्तरं मर्तभोजनं मनुष्यैर्भोक्तुं योग्यमन्नं न रासतेऽस्मभ्यं ददाति ।

अथ पुरोडाशस्य याज्यामाह -

वि जनाञ्छ्यावाः शितिपादो अख्यन् । रथꣳ हिरण्यप्रउगं वहन्तः । शश्वद्विशः सवितुर्दैव्यस्य । उपस्थे विश्वा भुवनानि तस्थुः, इति ।

श्यावाः श्यामवर्णाः शितिपादः श्वेतैः पादैर्युक्ताः सवितुरश्वा जनाञ्जन्तून्व्यख्यन्विशेषेण ज्ञापितवन्तः । अश्वेषु गच्छत्सु हि आदित्यो गच्छतीत्येवं जानन्ति । कीदृशा अश्वा रथं वहन्तः । कीदृशं रथं हिरण्यप्रउगम्, ईषाग्रयोर्योगः प्रउग इत्युच्यते, सुवर्णमयः प्रउगो यस्य रथस्य सोऽयं हिरण्यप्रउगस्तम् । दैव्यस्य देवेभ्यो हितस्य सवितुरुपस्थ उत्सङ्गे दिशः प्राच्याद्या विश्वा भुवनानि पृथिव्यादयः सर्वे लोकाश्च शश्वत्तस्थुर्निरन्तरं तिष्ठन्ति । सवितृप्रकाशमध्ये वर्तमानमेव तदुत्सङ्गेऽवस्थानम् ।

अथ हविषः पुरोनुवाक्यामाह -

वि सुपर्णो अन्तरिक्षाण्यख्यत् । गभीरवेपा असुरः सुनीथः । क्वेदानीꣳ सूर्यः कश्चिकेत । कतमां द्याꣳ रश्मिरस्याऽऽततान (२), इति ।

सुपर्णः पक्षिसदृश आदित्यः । आकाशगामित्वात्पक्षिसादृश्यम् । तादृश आदित्योऽन्तरिक्षाण्याकाशप्रदेशविशेषान्व्यख्यद्विशेषेण प्रकाशितवान् । पृथिव्यन्तरिक्षद्युलोकान्सर्वान्प्रकाशयतीत्यर्थः । कीदृशः सविता गभीरवेपा. वेपशब्दः कर्मवाची,

Digitized by Madhuban Trust, Delhi

उदयास्तमयलक्षणगभीरकर्मेत्यर्थः । असुरः प्राणप्रदः । अत एवान्यत्राऽऽम्नायते-"योऽसौ तपन्नुदेति । स सर्वेषां भूतानां प्राणानादायोदेति" इति । सुनीथः प्रशस्तः । एवंभूत आदित्य इदानीं रात्रौ क्व प्रदेशे वर्तत इत्येवं कश्चिकेत को वा जानाति । अस्य सूर्यस्य रश्मिः कतमां द्यामाततान कं नामाऽऽकाशभागं व्याप्नोतीति को वा जानाति । रात्रौ सूर्यस्य तद्रश्मेश्चावस्थानदेशस्य बुद्धिमद्भिरपि दुर्विज्ञेयत्वादयमचिन्त्यमहिमेत्यर्थः ।

अथ हविषो याज्यामाह -

भगं धियं वाजयन्तः पुरन्धिम् । नराँ शसो ग्नास्पतिर्नो अव्यात् । आऽये वामस्य संगथे रयीणाम् । प्रिया देवस्य सवितुः स्याम, इति ।

भगं सौभाग्यं धियं सत्कर्मविषयां प्रज्ञां सवितुः प्रसादाद्वाजयन्तः प्राप्नुवन्तो वर्तामहे । नोऽस्माकं पुरन्धि बहुविषयां प्रज्ञामयं देवोऽव्याद्रक्षतात् । कीदृशोऽयं नराशंसो नरैः शंसनीयः । ग्नास्पतिश्छन्दसां पालयिता । "छन्दाँसि वै ग्नाः" इति श्रुत्यन्तरात् । देवपत्न्यो वा ग्नाशब्देनाभिधीयन्ते । "उत ग्ना वियन्तु देवपत्नीः" इति मन्त्रवर्णात् । अयशब्द एतव्यं प्राप्तव्यमाचष्टे । आ समन्तादये प्राप्तव्ये रयीणां धनानां संगथे संगमे निमित्तभूते सति वामस्य सर्वेषां वननीयस्य सवितुर्देवस्य वयं प्रियाः स्याम ।

अथ "वैश्वदेवं बहुरूपमालभेतान्नकामः" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह -

आ नो विश्वे अस्क्रा गमन्तु देवाः । मित्रो अर्यमा वरुणः सजोषाः । भुवन्यथा नो विश्वे वृधासः । करन्त्सुषाहा विथुरं न शवः, इति ।

मित्रोऽर्यमा वरुण इत्याद्याः सजोषाः समानप्रीतयो विश्वे सर्वे देवा अस्का आभिमुख्येन कर्तारः सन्तो नोऽस्मान्प्रत्यागमन्त्वागच्छन्तु । विश्वेदेवा नोऽस्मान्वर्धयितारो यथा भुवन्भवन्ति शवोऽस्मदीयं बलं सुषाहा सुषहं परेषामभिभवितृ विथुरं नाचलितं यथा करन्कुर्वन्ति तथाऽस्मानागच्छन्त्विति पूर्वत्रान्वयः ।

अथ वपाया याज्यामाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शं नो देवा विश्वदेवा भवन्तु । शं सरस्वती सह धीभिरस्तु (३) । शमभिषाचः शमु रातिषाचः । शं नो दिव्याः पार्थिवाः सं नो अप्याः, इति ।

विश्वदेवशब्दो वसुरुद्रादिशब्दवद्गणविशेषवाची । विश्वे (श्व) देवाख्या देवा नोऽस्माकं शं सुखहेतवो भवन्तु । सरस्वती देवी धीभिर्बुद्ध्यभिमानिनीभिर्देवताभिः सह शं सुखहेतुरस्तु । अभितः सचन्ते समवयन्तीत्यभिषाचो बान्धवास्ते शं सुखहेतवो भवन्तु । रातिर्मित्रं ते सचन्त इति रातिषाचो मित्रद्वारा संबध्यमानाः पुरुषा उ तेऽपि शं सुखहेतवो भवन्तु । दिवि भवा दिव्याः पृथिव्यां भवाः पार्थिवा अपोऽन्तरिक्षं तत्र भवा अप्याः "ये देवा दिव्येकादश स्थ" इत्यत्र पठिता लोकत्रयवर्तिनो देवाः शं सुखहेतवो भवन्तु ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

ये सवितुः सत्यसवस्य विश्वे । मित्रस्य व्रते वरुणस्य देवाः । ते सौभगं वीरवद्गोमप्रदः । दधातन द्रविणं चित्रमस्मे, इति ।

ये विश्वे देवाः सत्यसवस्य सत्यप्रेरणस्य सवितुर्मित्रस्य वरुणस्य च संबन्धिनि व्रते कर्मणि समागतास्ते सर्वे यूयं सौभगं सौभाग्यप्रदः कर्मविशेषं द्रविणं धनं चास्मे दधातनास्मासु संपादयत । कीदृशं सौभगं वीरवद्बहुर्भिर्वीरैः पुत्रैर्युक्तम् । गोमद्बहुभिर्गोभिर्युक्तम् । कीदृशं द्रविणं चित्रं मणिमुक्तादिभेदेन बहुविधम् ।

अथ पुरोडाशस्य याज्यामाह –

अग्ने याहि दूत्यं वारिषेण्यः । देवाँ अच्छा ब्रह्मकृतागणेन । सरस्वतीं मरुतो अश्विनाऽपः । यक्षि देवान्रत्नधेयाय विश्वान् (४), इति ।

हेऽग्ने देवानच्छा देवानभिलक्ष्य दूत्यं याहि दूतकर्म कुरु । वारिषेण्यो मारीरिषः कार्यविघातेनास्मान्मा हिंसीः । कान्देवानभिलक्ष्यते तदुच्यते–ब्रह्मपरिवृढमिदं कर्म करोतीति ब्रह्मकृत्तेन कर्मकारिणा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैश्वदेवगणेन सह सरस्वत्यादीन्देवानभिलक्ष्य दूत्यं रत्नधेयाय रत्नसंपादनाय विश्वान्देवान्यक्षि पूजय ।

अथ हविषः पुरोनुवाक्यामाह –

द्यौः पितः पृथिवि मातरध्रुक् । अग्ने भ्रातर्वसवो मृडता नः । विश्व आदित्या अदिते सजोषाः । अस्मभ्यꣳ शर्म बहुलं वियन्त, इति ।

येयं द्यौस्तद्रूप हे पितस्त्वमध्रुग्द्रोहरहितः । हे पृथिवि मातस्त्वमप्यध्रुक् । हेऽग्ने भ्रातस्त्वमप्यध्रुक् । हे वसवो यूयमप्यद्रुहः । ते यूयमस्माकं द्रोहमनाचरन्तो नोऽस्मान्मृडत सुखयत । हे विश्वेदेवा हे आदित्या हेऽदिते यूयं सजोषाः समानप्रीतयोऽस्मभ्यं बहुलं शर्म सुखं वियन्त विशेषेण यच्छत ।

अथ हविषो याज्यामाह –

विश्वे देवाः शृणुतेमꣳ हवं मे । ये अन्तरिक्षे य उप द्यवि ष्ठ । ये अग्निजिह्वा उत वा यजत्राः आसद्यास्मिन्बर्हिषि मादयध्वम्, इति

हे विश्वे देवा मे हवं मदीयमाह्वानं शृणुत । ये यूयमन्तरिक्षे स्थान्तरिक्षलोके स्थिता ये चोप समीपे पृथिव्यां स्थिता ये च द्यवि दिवि लोके स्थ ये यूयमग्निजिह्वा अग्निद्वारेण हविषः स्वीकर्तार उत वाऽन्येऽपि वा यजत्रा यष्टव्यास्ते सर्वेऽप्यस्मिन्बर्हिषि याग आसद्योपविश्य मादयध्वं तृप्ता भवत । अस्मानपि अर्पयत ।

अथ "मैत्रावरुणीं द्विरूपामालभेत" इत्यस्य पशोः सूक्ते पुरोनुवाक्यामाह–

आ वां मित्रावरुणा हव्यजुष्टिम् । नमसा देवाववसाऽऽववृत्याम् (४) । अस्माकं ब्रह्म पृतनासु सत्या अस्माकम् । वृष्टिर्दिव्या सुपारा, इति ।

मित्रावरुणा हे मित्रावरुणौ देवावसाऽस्मद्रक्षणेन निमित्तभूतेन वां युवयोर्हव्यजुष्टिं हविषः प्रीतिं नमसा नमस्कारेण सहाऽऽववृत्यां पुनः पुनरावर्तयामि । अतो भवत्प्रसादादस्माकं पृतनासु परकीयसेनासु प्राप्तासु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्म भवदुपदिष्टं मन्त्र जातं सह्याः सहतां परकीयसेना अभिभवतु । किं चास्माकं भवत्प्रसादाद्दिवि भवा दिव्या वृष्टिः सुपारा सुष्ठु पारयित्री फलं प्रापयन्ती भवन्तु ।

अथ वपाया याज्यामाह –

युवं वस्त्राणि पविसा वसाथे । युवोरच्छिद्रा मन्तवो ह सर्गाः । अवातिरतमनृतानि विश्वा । ऋतेन मित्रावरुणा सचेथे, इति ।

हे मित्रावरुणौ पीवसाऽतिस्थूलौ युवं यथावुभौ वस्त्राणि बहुविधानि वसाथे आच्छादयतः । युवोर्युवयोर्मन्तवो मननरूपा अनुग्रहविशेषाः सर्गा भवद्भिः सृष्टा अच्छिद्रा अच्छिन्ना निरन्तरं भवदनुग्रहादस्मासु वर्त्तन्त इत्यर्थः । विश्वा सर्वाण्यृतान्यस्मदीयापराधरूपाण्यबातिरतं युवां विनाशितवन्तौ । हे मित्रावरुणौ, ऋतेन सत्येन शास्त्रीयमार्गेण सचेथं अस्मान्संयोजयथः ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

तत्सु वां मित्रावरुणा । ईर्मा तस्थुपरिहभिर्दुदुह्रे । विश्वाः पिन्वथ स्वसरस्य धेनाः । अनु वामेकः यविरा ववर्ति (६), इति ।

हे मित्रावरुणौ वां युवयोस्तन्महित्वं माहात्म्यं सुष्ठु वर्तते । किं तन्माहात्म्यमिति तदुच्यते–ईर्मा गमनशील आदित्ये तस्थुषी रश्मिद्वारेणावस्थिता अपोऽहभिः सर्वेष्वहःसु दुदुहे युवां दुग्धवन्तौ । आदित्यमण्डले रश्मिद्वारा यो बलसंग्रहः पुनरपि संगृहीतस्य यदवर्णं तदुभममाश्चर्यरूपं भवदीयं माहात्म्यम् । स्वयं सरति सर्वदा गच्छतीति स्वसर आदित्यस्तस्य सम्बन्धिना वृष्टिजलेन धेना धातव्याः पोषणीयाः, विश्वाः सर्वाः प्रजाः पिन्वथ प्रीणयथः । अनु वृष्टिकालानन्तरमेव वां युवयोर्मध्य एको मित्र आदित्यः पविः स्वकीयेनाऽऽतपेन पङ्कयुक्ताया भूमेः शोषकः सन्नाववर्ति पुनः पुनरावर्तते ।

अथ पुरोडाशस्य याज्यामाह –

यद्व ँ हिष्ठं नातिविदे सुदानू । अच्छिद्र ँ शर्म भुवनस्य गोपा । ततो नो मित्रावरुणाववीष्टम् । सिषासन्तो जीयि ँ सः स्याम्, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भुवनस्य लोकस्य गोपा रक्षकौ सुदानू शोभनस्य फलस्य दातारौ हे मित्रावरुणौ यद्यस्मात्कारणाद्बंहिष्ठमत्यन्तबहुलमच्छिद्रं विनाशरहितं शर्म सुखं नातिविदे भवदनुग्रहं विना प्रकारान्तरेणास्माभिर्नात्यन्तं लभ्यं ततः कारणाद्धे मित्रावरुणौ नोऽस्मावीष्टं रक्षितवन्तौ । सिषासन्तो भवद्दत्तं फलं लब्धुमिच्छन्तो वयं जीगिवांसो जेतुं प्राप्तवन्तः स्याम ।

अथ हविषः पुरोनुवाक्यामाह –

आ नो मित्रावरुणा हव्यदातिम् ।
घृतैर्गव्यूतिमुक्षतामिडाभिः । प्रति वामत्र वरमा जनाय ।
पृणीतमुद्नो दिव्यस्य चारोः, इति ।

हे मित्रावरुणौ युवां हव्यदातिं हविर्दानहेतुं नो गव्यूतिमस्मदीयं गोसमूहमिडाभिस्तृणादिभक्ष्यविशेषैः सह तज्जनितेन घृतेनाऽऽज्येनाऽऽ-समन्तादुक्षतं सिञ्चतम् । बहुविधगोग्रासद्वारा घृतसंपूर्तिं कुरुतमित्यर्थः । हे मित्रावरुणौ वां युवामत्रास्मिन्देशे जनाय सर्वजनोपकारार्थं दिव्यस्य दिवि भवस्य चारोरुद्गः समीचीनस्योदकस्य वरं श्रेष्ठं सारं प्रति पृणीतं प्रतिक्षेत्रं पूरयतम् ।

अथ हविषो याज्यामाह –

प्र बाहवा सिसृतं जीवसे नः । आ नो गव्यूतिमुक्षतं घृतेन
(७) । आ नो जने श्रवयतं युवाना । श्रुतं मे मित्रावरुणा
हवेमा, इति ।

हे मित्रावरुणौ नो जीवसेऽस्माकं जीवनार्थं बाहवा भवदीयौ बाहू प्रसिसृतं प्रसारयतं बाहू प्रसार्यास्मानादाय रक्षतमित्यर्थः । नो गव्यूतिमस्मदीयं गोसमूहा समन्ताद्घृतेनोक्षतं सिञ्चतम् । युवाना नित्यवरुणौ परस्परमिश्रितौ वा, युवां नोऽस्माञ्जने जनमध्ये श्रवयतं प्रख्यापयतम् । हे मित्रावरुणौ मे मदीयमिमा हवा श्रुतमिदमाह्वानं शृणुतम् ।

अथ "रौद्रीं रोहिणीमालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह –

इमा रुद्राय स्थिरधन्वने गिरः । क्षिप्रेषवे देवाय

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वधाम्ने । अषाढाय सहमानाय मीढुषे । तिग्मायुधाय भरता शृणोतन, इति ।

हे ऋत्विजो हे पुत्रपौत्रा वा शृणोतन मदीयं वाक्यं शृणुत । किं वाक्यमिति तदुच्यते-रुद्रायेमा वेदोक्ता गिरः स्तुतिरूपा वाचो भरत संपादयत । कीदृशाय रुद्राय स्थिरधन्वने दृढेन धनुषा युक्ताय । क्षिप्रेषवे शीघ्रगामिबाणयुक्ताय । देवाय द्योतमानाय स्वधाम्ने स्वकीयस्थानयुक्ताय स्वधाशब्दवाच्येनान्नेन युक्ताय वा । अषाढाय परैरभिभवितुमशक्याय । सहमानाय परानभिभवितुं समर्थाय । मीढुषे वृष्ट्यादिसेचनसमर्थाय । तिग्मायुधाय तीक्ष्णैरायुधैरुपेताय ।

अथ वपाया याज्यामाह -

त्वा दत्तेभी रुद्र शंतमेभिः । शत ँहिमा अशीय भेषजेभिः । व्यस्मद् द्वेषो वितरं व्य ँहः । व्यमीवा ँ श्चातयस्वा विषूचीः (८), इति ।

हे रुद्र त्वा दत्तेभिस्त्वयाऽस्मभ्यं दत्तैः शंतमेभिः । सुखतमैर्भेषजेभिरौषधैः शतं हिमाः शतसंख्याकान्संवत्सरानशीय प्राप्नुयाम । द्वेषो द्वेषिणः शत्रूनमस्मद्विचातयस्वास्मत्तो वियोजयस्व नात्र वियोगमात्रं किंतु वितरमतिशयेन वियोगं कुरु । अंहः पापं विचातयस्व । अमीवान्रोगान्विषूचीर्विविधगतियुक्तान्कृत्वा विचातयस्व ।

अथ पुरोडाशस्य याज्यानुवाक्ययोः प्रतीके दर्शयति -

अर्हन्बिभर्षि मा नस्तोके, इति ।

"अर्हन्बिभर्षि सायकानि धन्वा" इत्येषा पुरोनुवाक्या । सा च प्रवर्ग्यमन्त्रकाण्डे व्याख्यास्यते । 'मा नस्तोके तनये' इति याज्या । सा च त्वमग्ने बृहद्वय इत्यनुवाके व्याख्याता ।

अथ हविषः पुरोनुवाक्यामाह -

आ ते पितर्मरुता ँसुम्नमेतु । मा नः सूर्यस्य संदृशो युयोथाः । अभि नो वीरो अर्वति क्षमेत । प्रजायेमहि रुद्र प्रजाभिः, इति ।

हे मरुतां पितः पालक रुद्र ते सुम्नं त्वया संपादितत्वेन त्वदीयं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सुखमा समन्तादेत्वस्मान्प्राप्नोतु । किंच त्वमस्मान्सूर्यस्य संदृशः सूर्यसंबन्धिनो दर्शनान्मा युयोधा मा वियोजय । सूर्यानुगृहीतं चक्षुष्पाटवमस्माकं सर्वदाऽस्त्वित्यर्थः । पुत्रोनोऽस्माकं वीरः ऽर्वत्यश्वस्य पृष्ठेऽभिक्षमेत सर्वप्रकारेण समर्थोऽस्तु । हे रुद्र त्वत्प्रसादाद्वयं प्रजाभिः प्रजायेमहि बह्वीः प्रजा उत्पादयामः ।

अथ हविषो याज्यामाह –

एवा बभ्रो वृषभ चेकितान । यथा देव न हृणीषे न हंसि । हावनश्रूर्नो रुद्रेह बोधि । बृहद्वदेम विदथे सुवीराः, इति ।

हे देव यथा न हृणीषे न कुप्यसि न हंसि च न मारयस्यप्येवैवमेव त्वामाह्वयामीति शेषः । रुद्रस्य विशेषणानि-बभ्रो पिङ्गलवर्ण वृषभ कामानां वर्षक चेकितान सर्वज्ञ हे रुद्र हावनश्रूराह्वानस्य श्रोता सन्निह कर्माणि नोऽस्मान्बोधि बुध्यस्वास्मदीया हूतिं जानीहीत्यर्थः । वयं सुवीराः शोभनापत्ययुक्ताः । सन्तो विदथे यज्ञे बृहद्वदेम प्रौढं स्तोत्रं पठामः ।

अस्मिन्नेव रौद्रे पशौ विकल्पिते सूक्ते षण्णामृचां प्रतीकानि दर्शयति –

परि णो रुद्रस्य हेतिः स्तुहि श्रुतम् । मीढुष्टमार्हन्बिभर्षि । त्वमग्ने रुद्र आ वो राजानम् (९), इति ।

वसूनि ततानास्तु विश्वान्ववृत्यां ववर्ति घृतेन विषूचीः श्रुतं द्वे च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणेद्वितीयाष्टकेऽष्टमाध्याये षष्ठोऽनुवाकः ॥ ६ ॥

'परि णो रुद्रस्य हेतिर्वृणक्तु' इति वपायाः पुरोनुवाक्या 'स्तुहि श्रुतं गर्तसदं युवानम्' इति याज्या । 'मीढुष्टम शिवतम' इति पुरोडाशस्य पुरोनुवाक्या । एतत्त्रयं रुद्राध्याये व्याख्यातम् । 'अर्हन्बिभर्षि' इति पुरोडाशस्य याज्या । सा च प्रवर्ग्यमन्त्रेषु व्याख्यास्यते । 'त्वमग्ने रुद्रो असुरः' इति हविषः पुरोनुवाक्या । 'आ वो राजानमध्वरस्य' इति याज्या । एतच्चोभयं त्वमग्ने रुद्र इत्युनवाके व्याख्यातम् ।

अत्र विनियोगसंग्रहः–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

आ देव इति सावित्रे उपध्यस्ते सनिप्रदे ।
आ नो विधे वैश्वदेवे बहुरूपेऽशनप्रदे ।। १ ।।
आ वां मित्रा द्विरूपायां मैत्रावरुणनामनि ।
इमा रुद्राय रोहिण्यां रौद्यां गवि समीरितम् ।
परि णो रुद्र इत्येतत्तत्रैव हि विकल्पितम् ।। २ ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डेऽष्टमप्रपाठके षष्ठोऽनुवाकः ।।६।।

अथाष्टमे सप्तमोनुवाकः ।

षष्ठे सावित्र्यादिपशूनां सूक्तान्यभिहितानि । सप्ततमे सौर्यादिपशूनां सूक्तान्यभिधीयन्ते । तत्र 'यो ब्रह्मवर्चसकामः स्यात्तस्मा एता ँ सौरीं श्वेतां वशामालभेत' इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह –

सूर्यो देवीमुषस ँ रोचमाना मर्यः । न योषामभ्यैति पश्चात् । यत्रा नरो देवयन्तो युगानि । वितन्वते प्रति भद्राय भद्रम्, इति ।

योऽयं सूर्योऽस्ति सोऽयं रोचमाना दीप्यमानामुषसमुषोधां देवीमभिलक्ष्य पश्चादेति पृष्ठभागे गच्छति । तत्र दृष्टान्तो मर्यो न योषा यथा मर्त्यो योषामभिलक्ष्य पृष्ठतो गच्छति तद्वत् । उषा देवी प्रथमं प्रभातं करोति पश्चात्सूर्य उदेतीत्यर्थः । यत्र यस्यामुषसि प्रवृत्तायां नरो मनुष्या यजमाना देवयन्तो देवानात्मार्थमिच्छतो युगानि दंपतिरूपाणि युग्मानि भूत्वा भद्राय कल्याणाय भद्रं वितन्वते कल्याणं कर्मानुतिष्ठन्ति । यस्यामुषसि कर्मानुष्ठानप्रवृत्तिस्तास्तामुषसमभ्येतीति पूर्वत्रान्वयः ।

अथ वपाया याज्यामाह –

भद्रा अश्वा हरितः सूर्यस्य । चित्रा एदग्वा अनुमाद्यासः । नमस्यन्तो दिव आ पृष्ठमस्थुः । परि द्यावापृथिवी यन्ति सद्यः, इति ।

एतच्छब्दपर्याय एदग्वशब्दः सूर्यस्याश्वमाचष्टे । अत एव मन्त्रान्तरमाम्नायते – "एदग्वेन त्वा सूर्ये देवतां गमयतु" इति । सूर्यस्यैदग्वा अश्वा दिवः पृष्ठं द्युलोकस्योपर्यास्थुरास्थितवन्तः । कीदृशा

Digitized by Madhuban Trust, Delhi

एदग्वा भद्राः कल्याणरूपा अश्वा आशुगामिनो हरितो नीलवर्णाश्चित्रा विचित्रगतियुक्ता अनुमाद्यासो रथयोजनमनुहृष्यन्तो नमस्यन्तो नमस्कारमिच्छन्त इव प्रह्वीभूतास्तथाविधा अश्वाः । सद्यस्तस्मिन्नेव क्षणे द्यावापृथिवी परियन्ति लोकद्वयं परिभ्राम्य गच्छन्ति ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

तत्सूर्यस्य देवत्वं तन्महित्वम् । मध्या कर्तोर्विततं संजभार (१) । यदेदयुक्त हरितः सधस्थात् । आद्रात्रीवासस्तनुते सिमस्मै, इति ।

विततं विस्तीर्णं रश्मिजालं कर्तोर्मध्या कृष्यादिक्रियाया मध्ये संजभार संहृतवानिति तदेव सूर्यस्य देवत्वं प्रकाशकत्वं तदेव महित्वं माहात्म्यम् । अयमर्थः- सूर्यरश्मिसंचारे सति तदीयप्रकाशेनानुगृहीता मनुष्याः । सर्वेषु देशेषु बहुविधानि कृष्यादिकर्माण्यारभन्ते तदा यामचतुष्टयमात्रेण सर्वं रश्मिजालं संहत्यास्तमेति । यतो रश्मिजालस्य जगत्प्रकाशनाय क्षणमात्रेण प्रसारणं पुनः संहरणं वच नाल्पमहिम्नः संभवत्यतो महदेतन्माहात्म्यमिति । यदेद्यदैव सधस्थात्कर्मानुष्ठातॄणां सहावस्थानयोग्यादस्माद्देशान्मेरुमतीत्य गन्तुं हरितः स्वकीयानश्वानयुक्त सूर्यः स्वरथे योजयत्यादनन्तरमेव सिमस्मै सर्वस्मै प्राणिजाताय तदुपाकारार्थं रात्री वासस्तनुते लोकप्रसिद्धरात्री निवासं करोति । अयमर्थः- मेरूं प्रदक्षिणीकुर्वन्नादित्यो यदैवास्मान्मेरुपार्श्वादपरपार्श्वं गन्तुमुद्युक्तस्तदानीमेव रात्रिर्भवतीति ।

अथ पुरोडाशस्य याज्यामाह -

तन्मित्रस्य वरुणस्याभिचक्षे । सूर्यो रूपं कृणुते द्योरुपस्थे । अनन्तमन्यद् रुशदस्य पाजः । कृष्णमन्यद्धरितः संभरन्ति, इति ।

अयं सूर्यो द्योरुपस्थे द्युलोकस्योपरि रूपं कृणुते स्वकीयं रूपं करोति प्रादुर्भवतीति यदस्ति तदेतत्प्रादुर्भूतं रूपं मित्रस्य वरुणस्य तदुभयोरुपलक्षितस्य सर्वस्य जगतोऽभिचक्षेऽभितो दर्शनाय संपद्यते । अस्य सूर्यस्यानन्तं पाजोऽत्यधिकं रश्मिजालरूपं बलमन्यद्वक्ष्यमाणापेक्षया पृथगेव भूत्वा रुशद्दीप्यते । मध्याह्नकालेऽत्यधिकेन तेजसा प्रकाशते । अत एवान्यत्राऽऽम्नातम्-"बृहस्पतेर्मध्यंदिनः । तत्पुण्यं तेजसाऽहः । तस्मात्तर्हि तेक्ष्णिष्ठं तपति" इति । अन्यत्पूर्वोक्तान्मध्यंदिनात्पृथगेव रात्रौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

कृष्णं रूपं हरतिः सूर्यस्याश्वाः संभरन्ति संपादयन्ति । एतेऽश्वा यदा मेरोः पश्चिमभागे गच्छन्ति तदानीमत्र कृष्णं रूपं संपद्यते ।

अथ हविषः पुरोनुवाक्यामाह -

अ॒द्या दे॑वा॒ उदि॑ता॒ सूर्य॑स्य । निर ँहसः पिपृ॒तानिर॑व॒द्यात् । तन्नो॑ मि॒त्रो वरु॑णो मामहन्ताम । अदि॑ति॒ः सिन्धु॑ः पृथि॒वी उ॒त द्यौः (२), इति ।

हे देवा अद्यास्मिन्दिने सूर्यस्योदितोदितेनोदयेनास्मानंहसः पापान्निष्कृष्य पिपृतात्पालयत । तथाऽवद्याल्लौकिकादपि द्वेषान्निष्कृष्य पिपृतात्पालयत । तद्युष्माभिः । क्रियमाणमस्मत्पालनं मित्रादमः सर्वे देवा मामहन्तामतिशयेन पूजयन्त्वनुमोदन्तामित्यर्थः । सिन्धुर्नदविशेषः समुद्रो वा । उतशब्दःसमुच्चयार्थः ।

अथ हविषो याज्यामाह -

दि॒वो रु॒क्म उ॑रु॒चक्षा॒ उदे॑ति । दू॒रेअ॑र्थस्त॒रणि॒र्भ्राज॑मानः । नू॒नं जनाः सूर्ये॑ण॒ प्रसू॑ताः । आयन्नर्था॑नि कृ॒णव॒न्नपा ँसि, इति ।

अयं तरणिः सूर्य उदेति । कीदृशो दिवो रुक्मः स्वर्गस्य भासकः । उरुचक्षा उरुषु विस्तीर्णेषु पृथिव्यादिलोकेषु प्रकाशकः । दूरेअर्थो दूरदेशविषयेऽर्थो गमनरूपं प्रयोजनं यस्यासौ दूरेअर्थः । बहुदूरगमनं च पुराणे स्मर्यते-

योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ।
एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते ।। इति ।।

तादृशोऽयं भ्राजमानो दीप्यमानो वर्तते । नूनमवश्यं जनाः सर्वे सूर्येण प्रसूताः प्रेरिताः । सन्तोऽर्थान्यर्थ्यमानानि कृष्णादिफलान्यायन्प्राप्नुवन्ति । अपांसि वैदिकानि कर्माणि कृण्वन्कुर्वन्ति ।

अथ तस्मिन्नेव हविषि विकल्पितामन्यां पुरोनुवाक्यामाह -

शं नो॑ भव॒ चक्ष॑सा॒ शं नो॒ अह्ना॑ । शं भा॒नुना॒ श ँहि॒माशं घृणेन॑ । यथा॒ शम॒स्मै शमस॑द्दुरो॒णे । तत्सू॑र्य॒ द्रवि॑णं धे॒हि चि॒त्रम्, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हे सूर्य त्वं नोऽस्माकं चक्षसा चक्षुरनुग्रहेण शं सुखहेतुर्भव । तथा नोऽस्माकमह्ना । दिननिष्पादनेन शं भव । भानुना रश्मिरूपप्रकाशनेन शं भव । हिमा हिमेन रश्मीनुपसंहृत्य शैत्यप्रदानेन शं भव । वसन्तग्रीष्मयोः शैत्यप्रदानमृत्वन्तरेषु घर्मप्रदानमिति विवेकः । प्राणिनां हि वसन्तादौ शैत्यापेक्षा वर्षादिष्वौष्ण्यापेक्षाऽतस्तदुभयं प्रार्थ्यते । अस्मै यजमानाय गृहाद्बहिः संचरते यथा शमसद्येन प्रकारेण सुखं भवति दुरोणे गृहे च यथा शमसद्येन प्रकारेण सुखं भवति हे सूर्य तद्धेहि तथा कुरु । किंच चित्रं मणिमुक्तादिरूपेण नानाविधं द्रविणं धेहि संपादय ।

अथ हविषो विकल्पितामन्यां याज्यामाह –

चि॒त्रं दे॒वाना॒मुद॑गा॒दनी॑कम् । चक्षु॑र्मि॒त्रस्य॒ वरु॑णस्या॒ग्नेः (३) । आप्रा॒ द्यावा॑पृथि॒वी अ॒न्तरि॑क्षम् । सूर्य॑ आ॒त्मा जग॑तस्त॒स्थुष॑श्च, इति ।

चित्रं ताम्रारुणबभ्रुत्वादिरूपेण विचित्रं सूर्यमण्डलमुदगादुदयं प्राप्नोत् । तदेवाऽऽम्नातम्–"असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः" इति । कीदृशं मण्डलं देवानामनीकं दीप्यमानबहुरश्मिरूपाणां देवानां सैन्यसदृशम् । तथा मित्रावरुणाग्न्यादीनां सर्वेषां दृष्ट्यनुग्राहकत्वेन चक्षुः स्थानीयम् । जगतो जङ्गमस्य प्राणिजातस्य तस्थुषश्च स्थावरस्याप्यात्मा प्रत्यगात्मत्वेन हृदयेऽवस्थितः सूर्यो लोकत्रयमाप्राः सर्वतः स्वचैतन्येन स्वरश्मिना च पूरितवान् ।

अथ "त्वाष्ट्रं वडवमालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोडाशस्य याज्यानुवाक्ययोश्चत्वारि प्रतीकानि दर्शयति–

त्वष्टा॒ दध॒त्तन्न॑स्तु॒रीप॑म् । त्वष्टा॑ वी॒रं पि॒श॒ङ्ग॑रूपः, इति ।

'त्वष्टां दधदिन्द्राय' इति वपायाः पुरोनुवाक्या । सा चेयं 'समिद्ध इन्द्र उषसाम' इत्यत्र व्याख्याता । 'तन्नस्तुरीपमध पोषयित्नु' इति वपाया याज्या । सा च 'अग्निना रयिमश्नवत्' इत्यत्र व्याख्याता । त्वष्टा वीरं देवकामम्, इति पुरोडाशस्य पुरोनुवाक्या । सा च 'समिद्धो अञ्जन्, इत्यत्र व्याख्याता । 'पिशङ्गरूपः सुभरः' इति पुरोडाशस्य याज्या । सा च 'अग्निना रयिमश्नवत्' इत्यत्र व्याख्याता ।

अथ हविषः पुरोनुवाक्यामाह –

दशे॒मं त्वष्टु॑र्जनयन्त॒ गर्भ॑म् । अत॑न्द्रासो युव॒तयो॒

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बिभर्त्रम् । तिग्मानीकं ँस्वयशसंजनेषु । विरोचमानं परिषीं नयन्ति, इति ।

प्राच्याद्या दश दिश इममग्निं गर्भस्थानीयं त्वष्टुः सकाशाज्जनयन्तोदपादयन् । पुरा कदाचित्सर्वत आन्ध्ये सति प्रकाशार्थं दशस्वपि दिक्षु त्वष्टा बह्निमुत्पादिवानित्याख्यायिका ब्राह्मणान्तरे द्रष्टव्या । कीदृशो दिशोऽतन्द्रासः प्राणिधारणरुपे स्वव्यापारे कदाचिदप्यालस्यरहिताः । युवतयो नित्यतरुणस्वभावाः । कीदृशमग्निं बिभर्त्रं दाहपाकप्रकाशप्रदानेन सर्वस्य जगतः पोषकम् । तिग्मानीकं तीक्ष्णज्वालारूपेण सैन्योपेतम् । स्वयशसं स्वतः प्रसिद्धयशोयुक्तम् । जनेषु प्राणिषु विरोचमानमुदराग्निरूपेण बहिष्प्रकाशकत्वेन च विशेषेण दीप्यमानम् । तादृशमग्निं परिषीं परितोऽवस्थितासु तत्तद्गृहसीमासु सर्वे प्राणिनो नयन्ति ।

अथ हविषो याज्यामाह –

आविष्ट्यो वर्धते चारुरासु । जिह्मानामूर्ध्वः स्वयशा उपस्थे (४) । उभे त्वष्टुर्बिभ्यतुर्जायमानात् । प्रतीची सिं ँह प्रतिजोषयेते, इति ।

आविष्ट्य आविर्भूतश्चारुः शोभनः सूर्य आसु जिह्मानामासां कुटिलानां तिर्यगवस्थितानां दिशां मध्य उपस्थ उपरिभागे स्वयशाः स्वाधीनयशस्को वर्धते । योऽयमादित्यरूपेणोपरि वर्तते स एवाग्निरूपेण त्वष्टुः सकाशाज्जायते । जायमानात्तस्मादग्रग्नेरुभे द्यावापृथिव्यौ बिभ्यतुर्भीते आस्ताम् । अत्यन्तदहननिमित्तेयं भीतिः । ते च भीते सत्यौ प्रतीची प्रतीच्यामभिमुखे भूत्वा सिंहं सिंहसदृशं दुरासदमग्निं प्रतिपद्य जोषयेते प्रीणयतः । ततः प्रीतोऽग्निर्नात्यन्तं धक्षतीति तयोरभिप्रायः ।

अथ "मैत्रं ँश्वेतमालभेत" इत्यस्य पशोः सूक्ते वपाया याज्यानुवाक्ययोः प्रतीके दर्शयति–

मित्रो जनान्प्रसमित्र, इति ।

'मित्रो जनान्यातयति' इति पुरोनुवाक्या । 'प्रसमित्र मर्तो अस्तु' इति याज्या । एतच्चोभयं 'त्वमग्ने बृहद्वयः' इत्यत्र व्याख्यातम् ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अयं मित्रो नमस्यः सुशेवः । राजा सुक्षत्रो अजनिष्ट वेधाः । तस्य वयँ सुमतौ यज्ञियस्य । अपि भद्रे सौमनसे स्याम, इति ।

अयं पशुना पूज्यमानो मित्रो देवो नमस्यः सर्वैर्नमस्कार्यः । सुशेवः सुष्ठु सेवितुं शक्यः । राजा सर्वेषां स्वामी । सुक्षत्रः शोभनबलयुक्तः । वेधाःप्राणिनां विधाता भूत्वाऽजनिष्ट प्रादुर्भूतः । यज्ञियस्य यज्ञयोग्यस्य यस्य मित्रस्य सुमतावनुग्रहरूपायां बुद्धौ वयं स्यामावस्थिता भूयास्म । अपि च भद्रे कल्याणे सौमनसे चित्तस्वास्थ्ये स्यामावस्थिता भूयास्म ।

अथ पुरोडाशस्य याज्यामाह –

अनमीवास इडया मदन्तः । मितज्ञवो वरिमन्ना पृथिव्याः । आदित्यस्य व्रतमुपक्ष्यन्तः (५) । वयं मित्रस्य सुमतौ स्याम, इति ।

वयं यजमाना मित्रस्य देवस्य सुमतावनुग्रहबुद्धौ स्याम सर्वदाऽवस्थिता भूयास्म । कीदृशा वयमनमीवासो रोगरहिताः । इडया मदन्तोऽन्नसमृद्ध्या हृष्यन्तः । मितज्ञवो भूमाववस्थितजानुकाः । लोके हि स्वामिनः संनिधौ विज्ञापनां कुर्वन्तो भृत्यास्तथा वर्तन्ते । पृथिव्याः संबन्धिनि वरिमन्वरिष्ठे देवयजन आ समन्तादादित्यस्य मित्रनाम्न आदित्यविशेषस्य संबन्ध्येतत्पशुरूपं कर्मोपक्ष्यन्तोऽनुतिष्ठन्तः ।

अथ हविषः पुरोनुवाक्यामाह –

मित्रं न ईँ शिम्या गोषु गव्यवत् । स्वाधियो विदथे अप्स्वजीजनन् । अरेजयता रोदसी पाजसा गिरा । प्रति प्रियं यजतं जनुषामवः, इति ।

स्वाधियः स्वतन्त्रबुद्धय ऋत्विजो नोऽस्मदीय ई विदथेऽस्मिन्यज्ञे शिम्याऽनुष्ठानेन जनयितव्यास्वप्सु निमित्तभूतासु सतीषु मित्रं देवमजीजनन्नुत्पादितवन्तोऽस्मिन्कर्मण्याहुतवन्त इत्यर्थः । तत्र दृष्टान्तो गोषु गव्यवद्यथा गोषु गव्यं क्षीरादिकं जनयन्ति तथाऽस्मिन्कर्मणि मित्रं हविर्भोक्तृत्वेनोत्पादितवन्तः । रोदसी द्यावापृथिव्यौ पाजसा मित्रस्य बलेनारेजयतामकम्पतां मित्रस्याऽऽज्ञया वर्तेते इत्यर्थः । यजतं यजनीयं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रियं मित्रं प्रतिजनुषां जन्मवतामस्माकमवो रक्षणं गिरा वाचा प्रार्थयामह इति शेषः ।

अथ हविषो याज्यामाह -

महा ँ आदित्यो नमसोपसद्यः । यातयज्जनो गृणते सुशेवः । तस्मा एतत्पन्यतमाय जुष्टम् । अग्नौ मित्राय हविराजुहोत, इति ।

य आदित्योऽदितेः पुत्रो मित्रो महानाकारेण बहलः । नमसोपसद्यो नमस्कारेण सेवनीयः । यातयज्जन एतदाराधनार्थं प्रयत्नं कारयद्भिर्जनैर्युक्तः । गृणते स्तुतिं कुर्वते यजमानाय सुशेवः सेवितुं शक्यः । पन्यतमायातिशयेन स्तुत्याय तस्मै पूर्वोक्तगुणयुक्ताय मित्राय जुष्टं प्रियमेतद्धविरग्नावाहवनीये हे ऋत्विज आजुहोत ।

अथ "आश्विनं धूम्रमालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह -

आ वा ँ रथो रोदसी बद्बधानः (६) । हिरण्ययो वृषभिर्यात्वश्वैः । घृतवर्तनिः पविभीरुचानः । इषा वोढा नृपतिर्वाजिनीवान्, इति ।

हेऽश्विनौ वां युवयो रथोऽश्वैर्युक्त आयात्वस्मद्यज्ञं प्रत्यागच्छतु । कीदृशो रथो रोदसी द्यावापृथिव्यौ बद्बधानोऽतिशयेन बाधमानः । हिरण्ययः सुवर्णमयः । घृतवर्तनिर्घृतं वर्तन्यां मार्गे यस्य रथस्य सोऽयं घृतवर्तनी रथमार्गः सर्वोऽपि घृतसमानेन जलेन पूर्ण इत्यर्थः । पविभिर्वज्रसमानैरायुधै रुचानो दीप्यमानो रथस्योपरि बहून्यायुधानि तिष्ठन्तीत्यर्थः । इषां भक्तेभ्यो देयानामन्नानां वोढा । नृपतिर्नृणां पालयिता । वाजिनीवान्वाजिनीभिरन्नहेतुभिर्युक्तः । कीदृशैरश्वैर्वृषभिः सेचनसमर्थैः ।

अथ वपाया याज्यामाह -

स पप्रथानो अभि पञ्चभूम । त्रिबन्धुरो मन साऽऽयातु युक्तः । विशो येन गच्छथो देवयन्तीः । कुत्राचिद्यामममश्विना दधाना, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स रथो मनसा युक्त आयातु स्मरणमात्रेणास्मदीयं यज्ञमागच्छतु । कीदृशो रथः पञ्चभूमाभिपप्रथा । भूमशब्दो भुवनवाची । पञ्चसंख्याकानि भुवनानि पृथिव्यन्तरिक्षद्युलोकपाताल-लोकजनलोकरूपाण्यभिलक्ष्य पप्रथानोऽतिशयेन प्रथमानः । बन्धुरशब्देन सारथिस्थानमुच्यते । त्रीणि बन्धुराणि यस्यासौ त्रिबन्धुरो रथे बद्धश्वेषु योजितेषु कक्ष्यात्रये सारथय उपविश्य तान्सर्वानश्वान्प्रेरयन्ति । हेऽश्विनौ युवां येन रथेन देवयन्तीर्देवानात्मन इच्छन्तीर्विशो प्रजा गच्छथः स रथः पूर्वोक्तगुणकः । हेऽश्विनौ कुत्रचिद्यत्र क्वापि यानं गमनं दधाना मनसि धारयन्तौ तेनैव रथेन गच्छथ इति शेषः ।

अथ पुरोडाशस्य, पुरोनुवाक्यामाह –

स्वश्वा यशसाऽऽयातमर्वाक् । दस्रा निधिं मधुमन्तं पिबाथः । वि वाꣳ रथो बध्वा यादमानः (७) । अन्तान्दिवो बाधते वर्तनिभ्याम्, इति ।

हे दस्राऽश्विनौ स्वश्वा शोभनैरश्वैर्युक्तौ तथा यशसा युक्तावर्वागायातमस्मदभिमुखमागच्छतम् । आगत्य च मधुमन्तं माधुर्ययुक्तं निधिं निधितमानं वपादिकं पिबाथो भिक्षयथः । बध्वा सहितयोर्वा युवयोरयं रतो यादमान इतस्ततो भ्रमन्वर्तनिभ्यां चक्रधाराभ्यां चक्रमार्गाभ्यां वा दिवोऽन्तान्द्युलोकस्य पर्यन्तान्विशेषेण बाधते ।

अथ पुरोडाशस्य याज्यामाह –

युवो श्रियं परि योषा वृणीत । सूरो दुहिता परितक्मियायाम् । यद्देवयन्तमवथः शचिभिः । परिघ्रꣳस वां मना वां वयो गाम्, इति ।

हेऽश्विनौ सूरो दुहिता सूर्यस्य कन्यका या योषाऽस्ति सा परितक्मियायां परितो गमनलक्षणायां क्रियायां युवोः श्रियं युवयोराश्रयभूतं रतं परिवृणीत वरितो वृतवती । अयमर्थः । सूर्यस्य दुहितरं परिवरितुं सर्वे देवाः कांचिन्मर्यादां चक्रुस्तस्यामश्विनौ जितवन्तौ । तदानीमियं दुहिता गमनार्थं तदीयं रथं वव्र इति । इदमुपाख्यानं शाखान्तरे द्रष्टव्यम् । यद्देवयन्तं यस्मात्कारणाद्देवान्कामयमानं यजमानं हेऽश्विनौ शचीभिः स्वशक्तिभिरव थो रक्षथस्तस्मात्कारणात्परिघ्रतघस्रो दिनमित्यर्थस्तस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परितः सांयप्रातःकालयोरित्यर्थः । तयोः कालयोर्वा युवां वयो हविर्लक्षणमन्नं गां गच्छतु । कीदृशं वयो वां मना युवयोर्मननीयम् ।

अथ हविषः पुरोनुवाक्यामाह –

यो ह स्य वा ँरथिरा वस्त उस्राः । रथो युजानः परियाति वर्तिः । तेन नः शं योरुषसो व्युष्टौ । न्यश्विना वहतं यज्ञे अस्मिन्, इति ।

हे रथिरौ रथयुक्तावश्विनौ वां युवयोः संबन्धी यो ह यः खलु रथोऽस्ति स्यः स एष रथ उस्रा उस्रैः स्वनिष्ठमणिमुक्तादिरश्मिभिर्वस्ते स्वात्मानमाच्छादयति मण्यादिभिरलंकृत इत्यर्थः । स च रथो युजानोश्वयुक्तः सन्वर्तिन्यां मार्गे परियाति परितो गच्छति । तेन रथेन नोऽस्माकं शं सुखप्राप्तिहेतुं योर्दुःखवियोगहेतुं चोषसे व्युष्टौ व्युष्टायामुषसि प्रातः कालेऽस्मिन्यज्ञे हेऽश्विनौ निवहतं तदुभयं नितरां प्रापयतम् ।

अथ हविषो याज्यामाह –

युवं भुज्युमर्ववविद्ध ँ समुद्रे (८) । उदूहथुरर्णसो अस्रिधानैः । पतत्रिभिरश्रमैरव्यथिभिः । द ँ सना भिरश्विना पारयन्ताम्, इति ।

हेऽश्विनौ युवं युवामुभौ समुद्रेऽवविद्धं निमग्नं भुज्युं कंचिद्राजानं भुज्युनामकमर्णत्त उदकादुदूहथुरूर्ध्वमानीतवन्तौ । केन साधननेति तदुच्यते । अस्रिधानैरमन्दवेगैः पतत्रिभिः पक्षिविशेषैः । अश्रमैः श्रमरहितैः । अव्यथिभिर्भयरहितैः । कीदृशावश्विनौ दंसनाभिव्यापारविशेषैः पारयन्ता तीरं प्रापयन्तौ । भुज्युनाम्नो राज्ञोऽश्विभ्यां समुद्रादुद्धरणमन्यत्रापि "तमूहथुर्नौभिरात्मन्वतीभिः" इति मन्त्रे स्पष्टमाम्नातम् ।

अथ तृतीयकाण्डोक्तस्य "अग्नीषोमीयामालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह –

अग्नीषोमा यो अद्य वाम । इदं वचः सपर्यति । तस्मै धत्त ँसुवीर्यम् । गवां पोष ँस्वश्वियम्, इति ।

हेऽग्नीषोमौ योऽयं यजमानोऽस्मिन्कर्मणि वां युवामिदं वचोऽनेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वचसा प्रयुज्यमानेन मन्त्रेण सपर्यति परिचरति तस्मै यजमानाय सुवीर्यं शोभनसामर्थ्यं गवां पोषं गोसमृद्धिं स्वश्वियं शोभनाश्वसमूहं च धत्तं संपादयतम् ।

अथ वपाया याज्यामाह –

यो अ॒ग्नीषोमा॑ ह॒विषा॑ सप॒र्यात् । दे॒व॒द्रीचा॒ मन॑सा॒ यो घृ॒तेन॑ । तस्य॑ व्र॒तꣳ र॑क्षतं पा॒तमꣳह॑सः (९) । वि॒शे जना॑य॒ महि॒ शर्म॑ यच्छतम्, इति ।

हेऽग्नीषोमौ यो यजमानो हविषा पशुरूपेण सपर्यात्परिचरति यश्च देवद्रीचा देवान्प्राप्नुवता मनसा मननीयेन घृतेन परिचरति तस्य यजमानस्य व्रतमिदं कर्म विघ्नेभ्यो रक्षतम् । तं च यजमानमंहसः । पापात्पातं रक्षतम् । विश्वे प्रजायुक्ताय यजमानाय जनाय मनुष्याय यजमानाय महि शर्म महत्सुखं यच्छतम् ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

अग्नीषो॒मा॒ य आहु॑तिम् । यो वा॒ं दाशा॑द्ध॒विष्कृ॑तिम् । स प्र॒जया॑ सु॒वीर्य॑म् । विश्व॒माय॒र्व्य॑श्नवत्, इति ।

हेऽग्नीषोमौ योऽयं यजमान आहुतिं दाशाद्दद्यात् । तदेव पुनर्वाक्यान्तरेण स्पष्टीक्रियते-यो यजमानो वां युवाभ्यां हविष्कृतिं हविर्योग्येन (ण) संस्कारेण संस्कृतामाहुतिं दाशाद्दद्यात् । मन्त्रेण क्रियया चाविकलं यथा भवति तथाऽनुतिष्ठेदित्यर्थः । स यजमानः प्रजया पुत्रपौत्रादिरूपया यह सुवीर्यं शोभनसामर्थ्ययुक्तं विश्वमायुः शतसंवत्सरपर्यन्तमायुर्वयश्चवद्विशेषेण प्राप्नोति ।

अथ पुरोडाशस्य याज्यामाह –

अग्नीषो॒मा॒ चेति॒ तद्वी॒र्यं॑ वाम् । यदमु॑ष्णी तमव॒सं प॒णिं गोः । अवा॑तिरत॒ं प्रथ॑यस्य॒ शेषः॑ । अवि॑न्दत॒ं ज्याति॒रेकं॑ ब॒हुभ्यः॑ इति ।

हेऽग्नीषोमौ पणिं पणिनाम्नः कस्यचिदसुरस्य गोर्यावत्यो गावः सन्तिः ताः सर्वा अमुष्णीतं युवामपहृतवन्ताविति वदेतदस्ति तदेत[illegible]वीर्यं युवयोः शौर्यं चेति चेतसि सर्वो जनो विजानाति । पणिनामकः कश्चिदसुरो देवेभ्यो भीतः स्वकीया गाः स्वीकृत्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्वचित्पलायनमकरोत् । तदानीमेतावग्नीषोमौ ताः सर्वा गा बलादानीतवन्तौ । सेयमाख्यायिका शाखान्तरे द्रष्टव्या । हेऽग्नीषोमौ तथा युवां प्रथयस्य प्रथयनाम्नः कस्यचिदसुरस्य शेषः शेषमपत्यं वृत्रनामानमसुरमवाति रतमिन्द्रद्वारा विनाशितवन्तौ । ततस्तमोरूपस्यासुरस्य वृत्रस्य नाशाद्बहुभ्यो बहुयजमानोपकारार्थं ज्योतिरेकं संपूर्ण चन्द्रमण्डलरूपं ज्योतिः प्रकाशमविन्दतं लब्धवन्तौ । इदं च वृत्रवधाख्यानं-"त्वष्टा हतपुत्रः" इत्यनुवाके प्रपञ्चितम् । तत्र हि "घ्नन्ति वा एनं पूर्णमासः" इति वाक्ये तमोरूपस्य वृत्रस्य वधे सति पौर्णमासदिने संपूर्णचन्द्रमण्डलरूपस्य प्रकाशस्याऽऽविर्भावः श्रुतस्तत्सर्वत्र संगृह्योक्तम् ।

अथ हविषो याज्यानुवाक्ययोः प्रतीके दर्शयति-

अग्नीषोमाविम ँ सुमेऽग्नीषोमा हविषः प्रस्थितस्य (१०),

इति ।

जभार द्यौरग्नेरुपस्थं उपक्षयन्तौ बद्बधानौ यादमानः समुद्रे ह ँ सः प्रस्थितस्य ।

इति कृष्णयजुर्वेदीयत्तैतिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमाध्याये

सप्तमोऽनुवाकः ।। ७ ।।

'अग्नीषोमाविम ँ सुमे शृणुतम्' इति पुरोनुवाक्या । 'अग्नीषोमा हविषः प्रस्थितस्य' इति याज्या । एतच्चोभयं 'सप्रत्नवं निकाव्यः' इत्यत्र व्याख्यातम् ।

अत्र विनियोगसंग्रहः-

सूर्यो देवी श्वेतसौर्ये ब्रह्मवर्चसकामिनः ।
शं नो भवेति मन्त्रौ द्वौ पूर्वत्रैव विकल्पितौ ।। १ ।।
त्वष्टा दधदिति त्वाष्ट्रवडवे पशुकामिनः ।
मित्रौ जनेति मैत्रे स्यात्संग्रामे समयार्थिनः ।। २ ।।
आ वां रथ इति त्वेतदाश्विने धूम्रलाञ्छिते ।
अग्नीषोमा वशायां स्यादजायामन्नकामिनः ।। ३ ।।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डेऽष्टमप्रपाठके
सप्तमोऽनुवाकः ।। ७ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथाष्टमेऽष्टमोऽनुवाकः ।

सप्तमे सौर्यादिपशूनां सूक्तान्यभिहितानि । अष्टमे बेहतादिपशूनां सूक्तान्युच्यन्ते । ते च पशवः शाखान्तरे समाम्नाताः । तत्र सूत्रकारेणोदाहृतम्-"सान्नाय्ये बेहतमालभेत" इत्यस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह-

अहमस्मि प्रथमजा ऋतस्य । पूर्वं देवेभ्यो अमृतस्य नाभिः । यो मा ददाति स इदेव माऽऽवाः । अहमन्नमन्नमदन्तमद्मि, इति ।

बह्वृचा आरण्यकाण्डे त्रिविधमन्नमामनन्ति-"त्रेधा विहितं वा इदमन्नमशनं पानं खादः" इति । तस्याशनादेस्त्रिविधस्यान्नस्याभिमानिनी या देवतास्तदीयानि वचनान्यस्मन्सूक्ते प्रतिपाद्यन्ते । अहमन्नस्वामी देव ऋतस्य यज्ञस्य प्रथमजाः प्रथमं जनयिताऽस्मि । यज्ञस्य हविर्जन्यत्वाद्धविषोऽन्नरूपत्वात् । तादृशोऽहमन्नस्वामी पूर्वं पुरा देवेभ्यो देवार्थममृतस्य नाभिर्बन्धकोऽस्मि । न ह्यतिबध्नात्यमृतमिति नाभिः । देवा ह्यमृतमुपजीवन्ति । अमृतं चान्नविशेषस्तस्मादहमेवामृतस्य संपादकः । यः श्रद्धालुः पुमान्मा मामन्नरूपं ददाति ब्राह्मणादिभ्यः प्रयच्छति स इदेव स दाता स्वयमेव मा मामन्नदेवमावा आवृणोति स्वीकरोतीत्यर्थः । द्वौ हि लोके पुरुषौ दाता चादाता च । तत्राऽऽद्यः कालान्तरे भोक्तुं मां संगृह्णाति । यावदन्नमिदानीं दीयते तावत्येव कालान्तरे शतधा सहस्रधा वर्धते । तस्माद्दातैव मां संगृह्णाति । यस्त्वन्तिमो नामदत्वा स्वयमेवात्ति अहमेवान्नमद्मीत्यभिमन्यते तमन्नमदत्ताभिमानिनमन्नदेवोऽहमद्मि तं विनाशयामि । अदातुः कालान्तरेऽन्नाभावात् ।

अथ वपाया याज्यामाह -

पूर्वमग्नेरपि दहत्यन्नम् । यत्तौ हाऽऽसाते अहमुत्तरेषु । व्यात्तमस्य पशवः सुजम्भम् । पश्यन्ति धीराः प्रचरन्ति पाकाः, इति ।

यदिदमन्नमग्नेरपि पूर्वमदातृभिर्भुज्यते तदिदमन्नं तं भोक्तारं दहति । अथ भुक्तमन्नमुदराग्निर्दिनमात्रेण दहति पाचयति । अदाता तु भोक्ता भुज्यमानेनान्नेन तदानीमेव दह्यते । नरकहेतोः प्रत्यवायस्य तदैवोत्पन्नत्वात् । अत एवाऽऽहुः- "अदाता विषमश्नुते" इति । यत्तौ हा प्रयत्नवन्तावेवाऽऽसाते दाता चादाता चेत्युभौ तिष्ठतः । दाता हि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दानार्थं प्रयत्नं करोति । इतरस्तु भोजनार्थम् । तयोर्मध्ये ये पुरुषा दातुः पक्षे वर्तन्ते त एवोत्तराः श्रेष्ठः । तेषूत्तरेषु दातृषु कालान्तरेष्वहमक्षीणो वसामि । ये पशवो मूढा अदातारस्तान्प्रत्यस्यान्नदेवस्य मुखं व्यात्तं विवृत्तं सुजम्भं तीक्ष्णदन्तोपेतं वर्तते । खादयाम्यदातृनिति सर्वदोद्युङ्क्त इत्यर्थः । एतमन्नदेवस्याभिप्रायं दातारो धीरा बुद्धिमन्तः जानन्ति । अत एवाददतः पाका बाला मूढाः प्रचरन्ति प्रकर्षेण भक्षयन्त्येव न तु किंचिदपि ददति ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

जहाम्यन्यं न जहाम्यन्यम् । अहमन्नं वशमिच्चरामि (१) । समानमर्थं पर्येमि भुञ्जत् । को मामन्नं मनुष्यो दयेत, इति ।

अन्नदेवोऽहमन्नमदातारं जहामि परित्यजामि । अन्यं तु दातारं न जहामि । अहमन्नमन्नदेवरूपोऽहं वशमित्स्ववशमेव यथा भवति तथा चरामि । अदातुः परित्यागो दातृस्वीकारश्चेत्येतत्स्ववशत्वम् । यः पुमान्भोगदानयोः समानः सन्धनमर्थयते तं समानमर्थयितारं भुञ्जत्पालयन्नहं पर्येमि परितः प्राप्नोमि । यस्तु भोगमात्रलम्पटस्तं न पालयामि नापि तं पर्येमीत्यभिप्रायः । एवमदातृपरित्यागेन दातृपक्षपातेन च वर्तमानं मां को मनुष्यो दयेत रक्षन्निवारयेत् । न कोऽपि मां निवारयितुं शक्त इत्यर्थः ।

अथ पुरोडाशस्य याज्यामाह –

पराके अन्नं निहितं लोक एतत् । विश्वैर्देवैः पितृभिर्गुप्तमन्नम् । यदद्यते लुप्यते यत्परोप्यते । शततमी सा तनूर्मे बभूव, इति ।

पूर्वस्मिन्मन्त्रे वशमिच्चरामि मां को दयेतेति यत्स्वातन्त्र्यमुक्तं तदुपपादयितुं स्वमाहात्म्यमत्र वर्ण्यते । द्विविधो ह्यन्नस्य व्यवहारः पारलौकिक ऐहिकश्चेति । तत्र पराके परलोके दूरस्थे पित्रादिलोक एतदन्नं निहितम । दाता हि देवलोके पितृलोके वा ममेदं भूयादित्यभिप्रेत्यैव ब्राह्मणेभ्यो ददाति । अतो दत्तमन्नं दूरस्थे लोके निहितं भवति । तच्चान्नं तत्तल्लोके विश्वैः सर्वैर्देवैः पितृभिश्च स्वार्थं गुप्तं रक्षितं भवति । यदग्नौ हुतं यच्च ब्राह्मणेभ्यो दत्तं तदेवोपजीव्य देवाः पितरश्च वर्तन्ते । एवं पारलौकिकोऽन्नव्यवहार उक्तः । ऐहिकोऽपि व्यवहार उच्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदन्नमद्यते प्राणिभिर्भक्ष्यते यच्च विदग्धं सद्भाण्डेऽपि भवति पर्युषितत्वेन वा पूती भवति तादृशं लुप्यते नष्टं भवति । यच्च परोप्यते स्वकीयैश्वर्यप्रकटनाय बहिः परित्यज्यते सा सर्वाऽप्यैहिकामुष्मिकान्नरूपा मेन्नस्वामिनो देवस्य शततमीः शतसंख्यापूरणी तनूः । स च सर्वोऽपि लेश एवेत्यर्थः । ईदृशं मदीयं माहात्म्यम् ।

अथ हविषः पुरोनुवाक्यामाह –

म॒हान्तौ॑ च॒रू स॑कृद्दु॒ग्धेन॑ पप्रौ । दिवं॑ च॒ पृश्नि॑ पृथि॒वीं च॑ सा॒कम् । तत्सं॒पिब॑न्तो॒ न मि॑नन्ति वे॒धस॑ः । नैतद्भूयो॒ भव॑ति॒ नो कनी॑यः (२), इति ।

पुनरपि माहात्म्यमेव प्रपञ्च्यते । तत्रायं दृष्टान्तः । यथा लोके बहुक्षीरप्रदाया गोः सकृद् दुग्धेन महान्तौ चरू प्रौढौ कुम्भौ पूरयति एवमत्रापि पृश्नि स्वल्पमपि दत्तमन्नं दिवं च पृथिवीं च साकं लोकद्वयमपि सह पूरयती । अग्नौ ब्राह्मणेषु वा दत्तमन्नं सत्सहस्रधा फलति । अतऽम्नायते– "यावदेका देवता कामयते यावदेका तावदाहुतिः प्रथते" इति । तदन्नं संपिबन्तः सम्यग्भक्षयन्तो वेधसो बुद्धिमन्तो न मिनन्ति न हिंसन्ति स्वात्मानमन्नं वा न विनाशयन्ति । दानपूर्वकं भक्षणं सम्यग्भक्षणं तत्कुर्वन्तः । पुरुषा अन्नं न हिंसन्ति, तत्तस्यान्नस्य च वर्धमानत्वात् । स्वात्मानमपि न हिंसन्ति प्रवृद्धस्यान्नस्य च चिरभोक्तृत्वात् । अपि चैतद्भोजनार्थमन्नं न भूयो नापि कनीयः । भूयस्त्वे स्यादजीर्तिः कनीयस्त्वे नास्ति क्षुन्निवृत्तिः ।

एतदेवाभिप्रेत्य स्मर्यते –

"नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः" इति ।

एवं दानपुरः सरं युक्तेन प्रमाणेन भुञ्जानान्पुरुषांल्लोकद्वये पालयतीत्यर्थः ।

अथ हविषो याज्यामाह –

अन्नं॑ प्रा॒णमन्न॑मपा॒नमा॑हुः । अन्नं॑ मृ॒त्युं तमु॑ जी॒वातु॑माहुः । अन्नं॑ ब्र॒ह्माणो॑ ज॒रसं॑ वदन्ति । अन्न॑माहुः प्र॒जन॑नं प्र॒जाना॑म्, इति ।

सर्वव्यवहारकारणत्वादस्यान्नस्य माहात्म्यमविवादम् । तत्कथमिति तदुच्यते– योऽयं प्राणवायुरूर्ध्वं संचरति यश्चापानवायुरधः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संचरति तावुभावन्नजन्यबलादेव संचरतः । अतस्तयोरन्नात्मकत्वमाहुः । रसवैषम्येण व्याधिद्वारा मारकत्वादन्नं मृत्युमाहुः । तमेवान्नदेवं जीवातुं जीवनौषधमाहुः । तच्च लोके प्रसिद्धम् । ब्रह्माण आयुर्वेदशास्त्राभिज्ञा अन्नमेव जरसं वदन्ति जराहेतुमाहुः । केनचिदाहारविशेषेण सहसाऽतिपलितत्वप्राप्तिरित्यायुर्वेदप्रसिद्धिः । अन्नमेवेन्द्रियवृद्धिद्वारा प्रजानां प्रजननमुत्पादकमाहुः ।

अथ हविष एव विकल्पितामन्यां पुरोनुवाक्यामाह –

मोघमन्नं विन्दते अप्रचेताः । सत्यं ब्रवीमि वध इत्स तस्य । नार्यमणं पुष्यति नो सखायम् । केवलाघो भवति केवलादी, इति

योऽयमदाता सोऽयमप्रचेताः प्रकृष्टज्ञानरहितो मोघं व्यर्थमेवान्नं विन्दते लभते । तदेतत्सत्यं ब्रवीमि न केवलं वैयर्थ्यं किंतु सोऽयमदत्तोऽन्नपदार्थस्तस्य दानसहितस्य पुरुषस्य वध इद्वध एव वधवद्बाधकमेवेत्यर्थः । तत्र वैयर्थ्यं तावत्स्पष्टीक्रियते । योऽयमदाता सोऽयमन्नेनार्यमादिकं देवं न पुष्यत्यग्नावाहुत्यभावात् । सखायतमतिथ्यादिरूपं मनुष्यं न पुष्यति दानाभावात् । अतः परलोकेऽनुपयोगेन वैयर्थ्यम् । वधहेतुत्वं स्पष्टीक्रियते-केवलादी केवलं भुङ्क्ते न तु ददाति सोऽयं केवलाघो भवति । पापमेव संपादयति । न तु किंचिदपि पुण्यम् । सोऽयं वध एव नरकहेतुत्वात् ।

अथ हविषो विकल्पितां याज्यामाह –

अहं मेघः स्तनयन्वर्षन्नस्मि । मामदन्त्यहमद्म्यन्यान् (३) । अहँ सदमृतो भवामि । मदादित्या अधि सर्वे तपन्ति, इति ।

योऽयं मेघः स्तनयन्गार्जन्वर्षंश्च वर्तते सोऽयं मेघोऽप्यहमन्नदेवोऽस्मि । अग्नौ हुतस्यान्नस्य मेघरूपेण परिणतत्वात् । अत एव स्मर्यते-"अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः" इति । दातारो ये सन्ति ते मामदन्ति सुखेन भक्षयन्ति । अन्यांस्तु दानरहितानहमेवाद्मि विनाशयामि । अहमेव दातृणां पथ्यं सदमृतो भवाम्यमरणहेतुर्भवामि देवत्वं प्रापयामीत्यर्थः । सर्वेऽप्यादित्या मदन्ननिमित्तत्वादधिकत्वेन तपन्ति । अन्नाभावे ते स्वयमेव न जीवेयुः । कुतस्तपेयुरित्यर्थः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यदुक्तं सूत्रकारेण-"वाचे वेहतम्" इति, गर्भघातिनी गौर्वेहदित्युच्यते, तस्य पशोः सूक्ते प्रतीकद्वयं दर्शयति -

देवीं वाचमजनयन्त यद्वाग्वदन्ति, इति ।

"देवीं वाचमजनयन्त देवाः" इति वपायाः पुरोनुवाक्या । 'यद्वाग्वदन्ति' इति याज्या तदुभयम् । "उत न प्रिया" इत्यत्र व्याख्यातम् ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

अनन्तामन्तादधिनिर्मितां महीम् । यस्यां देवा अदधुर्भोजनानि । एकाक्षरां द्विपदा षट्पदां च । वाचं देवा उपजीवन्ति विश्वे, इति ।

देवा इन्द्रादयो यस्यां वाचि भोजनान्यदधुः संपादितवन्तः । इन्द्राय स्वाहेति मन्त्रेण हुतं भुङ्क्तेऽतो वाङ्निमित्तं तद्भोजनम् । तां वाचं स्वभोजनहेतुं विश्वे सर्वे देवा उपजीवन्ति । सर्वेषामपि देवानां मन्त्रपुरःसरं दत्तमेवान्नं जीवनहेतुः । कीदृशीं वाचमनन्तां न हि लौकिकवैदिकशब्दानामन्तः पारोऽस्ति । अत एव महाभाष्याकार उदाजहार -बृहस्पतिश्च वक्ता, इन्द्रश्चाध्येता दिव्यं च वर्षसहस्रमध्ययनकालः शब्दपारायणस्यान्तं च न जगामेति । अन्तादधि निर्मितान् । पूर्वसृष्टेरन्तः । परमेश्वरत्वरूपं तस्मिन्हि जगल्लीयते । तस्मादन्तात्परमेश्वरादधिकत्वेन निर्मितां तामेकाक्षरां प्रणवरूपां द्विपदां संस्कृतापशब्दरूपां षट्पदां प्राकृतपैशाचिकादिभाषाभेदेन षड्विधामत एव महीं महतीम् ।

अथ पुरोडाशस्य याज्यामाह -

वाचं देवा उपजीवन्ति विश्वे । वाचं गन्धर्वाः पशवो मनुष्याः । वाचीमा विश्वा भुवनान्यर्पिता (४) । सा नो हवं जुषतामिन्द्रपत्नी, इति ।

पूर्वमन्त्रोक्तरीत्या सर्वे देवा आहुतिकालीनमन्त्ररूपां वाचमेवोपजीवन्ति । गन्धर्वादयश्च वाचैव व्यवहरन्ति । पशूनामपि हम्भारवादिरूपा वाचैव व्यवहारो दृश्यते । तस्मादिमा विश्वा भुवनानि सर्वलोकनिवासिन एते प्राणिनो वाच्यर्पिता वाचमेवाश्रित्य वर्तन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

येयमीदृशी वाक्सेयमिन्द्रपत्नीन्द्रस्य पालयित्री सती नो हवमस्मदीयमिदं हविर्जुषताम् ।

अथ हविषः पुरोनुवाक्यामाह –

वागक्षरं प्रथमजा ऋतस्य । वेदानां माताऽमृतस्य नाभिः । सा नो जुषाणोपयज्ञमागात् । अवन्ती देवी सुहवा मे अस्तु, इति ।

येयं वाक्सैवाक्षरमविनश्वरं परमात्मस्वरूपं तत उत्पन्नत्वात् । सा चर्तस्य यज्ञस्य प्रथमजा प्रथममुत्पादयित्री . मन्त्रैर्हि कर्माण्युत्पाद्यन्ते । अत एवाऽऽथर्वणिका आमनन्ति–"तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यन्" इति । सा वाग्देवी जुषाणा प्रीतियुक्ता सती नोऽस्मदीयं यज्ञमुपागात्प्राप्नोतु । सा च देव्यवन्त्यस्मान्रक्षन्ती मे मम सुहवा सुखेनाऽऽह्वातुं शक्याऽस्तु ।

अथ हविषो याज्यामाह –

यामृषयो मन्त्रकृतो मनीषिणः । अन्वैच्छन्देवास्तपसा श्रमेण । तां देवीं वाचꣳ हविषा यजामहे । सा नो दधातु सुकृतस्य लोके, इति ।

मन्त्रकृतः संप्रदायप्रवर्तकरूपेण मन्त्राणां कर्मकर्तारो मनीषिणो बुद्धिमन्तो धारणशक्तियुक्ता ऋषयो वसिष्ठाद्याः श्रमेण तपसा बहुप्रयाससाध्येन तपसा युक्तास्तथा देवाश्च यां वाचमन्वैच्छननुप्राप्तु मिच्छामकुर्वन् । अत एव स्मर्यते–

युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः । स्वयंभुवा ।। इति ।।

तां तादृशीं वाचं देवीमनेन हविषा यजामहे । सा च देवी सुकृतस्य कर्मणः फलभूते लोके नोऽस्मान्दधातु स्थापयतु ।

अथ हविष एव विकल्पितां याज्यामाह –

चत्वारि वाक्परिमिता पदानि (५) । तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति । तुरीयं वाचो मनुष्या वदन्ति, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

येयं वाक्सा परिमितेयत्तया परिच्छिन्नानि चत्वारि पदानि चतुरोऽवयवान्प्राप्य वर्तते । परा पश्यन्ती मध्यमा वैखरीत्येते चत्वारः पादाः । तानि चत्वार्यपि पदानि ये ब्राह्मणा मनीषिणः शास्त्रज्ञास्ते विदुर्न त्वितरे मूढाःतत्र हेतुरुच्यते-त्रीणि परा पश्यन्ती मध्यमेत्येतानि पदानि गुहायां शरीर मध्ये निहितानि स्थापितानि वर्तन्ते नेङ्गयन्ति न तु बहिः प्रसरन्ति । वाचस्तुरीयं वैखरीया (त्या) ख्यं पदं मनुष्याः सर्वे वदन्त्युच्चारयन्ति ।

एतच्च शिक्षाकारेण स्पष्टीकृतम् -

आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनःकायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।
प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ।।
कण्ठे माध्यंदिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ।।
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ।।
स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत ।। इति ।

तस्माच्छरीरमध्ये गूढं पादत्रयं मनीषिण एव जानन्ति । मूढास्तुरीयमेव वदन्ति ।

यदुक्तं सूत्रकारेण -"श्रद्धायै वेहतम्" इति, तस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह -

श्र॒द्धया॒ऽग्निः समि॑ध्यते । श्र॒द्धया॒ विन्दते ह॒विः । श्र॒द्धां भग॑स्य मू॒र्धनि॑ । वच॒साऽऽवैदयामसि, इति ।

शास्त्रार्थे विश्वासातिशयरूपा चित्तवृत्तिः । श्रद्धा तदभिमानिनी देवताऽपि तन्नामिकैव । श्रद्धया विश्वासातिशयेनानन्यया भक्त्याऽयमग्निः । समिध्यते सम्यक्प्रज्वाल्यते । हविश्च श्रद्धया लभ्यते । भगस्य सौभाग्यस्य मूर्धन्युपरि स्थितां श्रद्धां वचसाऽऽवेदयामसि । जनानामग्ने सौभाग्यहेतुः श्रद्धेति प्रख्यापयामः ।

अथ वपाया याज्यामाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रिय ँश्रद्धे ददतः । प्रिय ँश्रद्धे दिदासतः । प्रियं भोजेषु यज्वसु (६) । इदं म उदितं कृधि, इति ।

हे श्रद्ध इदानीं ददतो मे प्रियं भवत्वभीष्टं सिध्यतु । इतःपरमपि दातुमिच्छतो मे प्रियं भवतु । भोजेषु भोगपरेषु जन्तुषु यजमानेषु च प्रियं भवतु । इदमनन्तरोक्तं यज्वसु मे प्रियमुदितं कृध्यत्यधिकं कुरु ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

यथा देवा असुरेषु । श्रद्धामुग्रेषु चक्रिरे । एवं भोजेषु यज्वसु । अस्माकमुदितं कृषि, इति ।

यथा लोके देवा उग्रेष्वसुरेषु श्रद्धां चक्रिरेऽवश्यमेते हन्तव्या इति दृढामिच्छां कृतवन्तः । एवमस्माकं फलभोगेषु तत्साधकेषु यज्वस्वपि प्रियमुदितं कुरु ।

अथ पुरोडाशस्य याज्यामाह –

श्रद्धां देवा यजमानाः । वायुगोपा उपासते । श्रद्धा ँ हृदय्ययाऽऽकूत्या । श्रद्धया हूयते हविः, इति ।

हे देवा इन्द्रादय एते यजमाना वायुगोपाः स्वकीयप्राणरक्षकाः सन्तः श्रद्धामुपासते सेवन्ते । उक्तार्थ एव स्पष्टीक्रियते–हृदय्यया हृदये भवयाऽऽकूत्या संकल्पक्रियया श्रद्धामुपासतेऽत्यादरेणोपासत इत्यर्थः । हविरपि श्रद्धयैव हूयते ।

अथ हविषः पुरोनुवाक्यामाह –

श्रद्धां प्रातर्हवामहे (७) । श्रद्धां मध्यंदिनं परि । श्रद्धा ँ सूर्यस्य निम्रुचि । श्रद्धे श्रद्धापयेह मा, इति ।

श्रद्धां श्रद्धाख्यां देवीं प्रातर्हवामहे प्रातःकाले समाह्वयामः । तथा मध्यंदिनं परि मध्यंदिनसमीपमपि श्रद्धामाह्वयामः । सूर्यस्य निम्रुच्यस्तमयवेलायामपि श्रद्धामाह्वयामः । हे श्रद्धे देवीह कर्माणि मां श्रद्धापय विश्वासयुक्तं कुरु ।

अथ हविषो याज्यामाह –

श्रद्धा देवानधिवस्ते । श्रद्धा विश्वमिदं जगत् । श्रद्धां कामस्य मातरम् । हविषा वर्धयामसि, इति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इयं श्रद्धा देवी देवानधिवस्ते देवेष्वधिवसति । विश्वं सर्वमिदं जगत्, श्रद्धामयम्, इच्छाविश्वासव्यतिरेकेण कस्यापि व्यवहारस्याभावात् । कामस्य मातरं काम्यमानफलस्योत्पादिकां श्रद्धां देवीमनेन हविषा वर्धयामस्याभिवृद्धां संतुष्टां कुर्मः ।

यदुक्तं सूत्रकारेण-"ब्रह्मण ऋषभम्" इति तस्य पशोः सूक्ते वपायाः पुरोनुवाक्यामाह -

ब्रह्म जज्ञानं प्रथमं पुरस्तात् । वि सीमतः सुरुचो वेन आवः । स बुध्निया उपमा अस्य विष्ठाः (८) । सतश्च योनिमसतश्च विवः, इति ।

यदेतज्जगत्कारणं ब्रह्म "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतिप्रसिद्धं तदेतत्प्रथमं सृष्ट्यादौ जज्ञानं जगदाकारेणोत्पद्यमानं सत्पुरस्तात्पूर्वस्या दिशि वेनः कमनीय आदित्यो भूत्वा सुरुचः सुष्ठु दीप्यमानः सीमतः पूर्वदक्षिणपश्चिमोदग्दिग्विशेषसीम्नो विभज्याऽऽवरावृणोत् । स वेन आदित्यो बुध्निया बुध्नं मूलं तत्रभवा आकाशवाय्यग्निजलपृथिव्यो विष्ठा विभज्यावस्थिता अकरोदिति शेषः । तथा सतश्च विद्यमानस्य गिरिनदीसमुद्रादेरसतश्चाविद्यमानस्य योनिं कारणं प्र (णमुप) मा भ्रान्तिरूपं विवर्विवृतवान्सर्वजगद्व्यवस्थां निर्मितवानित्यर्थः ।

अथ वपाया याज्यामाह -

पिता विराजामृषभो रयीणाम् । अन्तरिक्षं विश्वरूप आविवेश तमर्कैरभ्यर्चन्ति वत्सम् । ब्रह्म सन्तं ब्रह्मणा वर्धयन्तः, इति ।

योऽयं वेन आदित्यः पूर्वमुक्तः सोऽयं विराजां विशेषेण राजमानानां रयीणां धनानां पिता पालयिता, ऋषभः श्रेष्ठो विश्वरूपः पूर्वाह्णादिषु वसन्तादिषु कालविशेषेषु च बहुरूपस्तादृशोऽयमिदमन्तरिक्षमाविवेश प्रतिदिनं प्रविशति । ब्रह्म सन्तं परब्रह्मस्वरूप एव भूत्वाऽवस्थितं तमादित्यं ब्रह्मणा मन्त्रेण वर्धयन्तो ब्राह्मणा अर्केरर्चनीयैरभ्यर्च्यन्त्यभितः पूजयन्ति तत्र दृष्टान्तो वत्सं यथा दोग्धुकामाः पुरुषा वत्समुपलालयन्त्येवं फलकामा आदित्यमभ्यर्चन्ति ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ब्रह्म देवानजनयत्। ब्रह्म विश्वमिदं जगत्। ब्रह्मणः क्षत्रं निर्मितम्। ब्रह्म ब्राह्मण आत्मना, इति।

यज्जगत्कारणं ब्रह्म तदेव देवानिन्द्रादीनजनयत्। तथैव तद्ब्रह्मान्यदपि विश्वं सर्वमिदं जगदजनयत्। ब्रह्मणः सकाशात्क्षत्रं निर्मितं क्षत्रियजातिर्निर्मिता। यत्परं ब्रह्म तदात्मना स्वस्वरूपेणैव ब्राह्मणोऽभवत्। अस्ति हि ब्राह्मणशरीरे परब्रह्मण आविर्भावविशेषः। अत एवाध्यापनादावधिक्रियते।

अथ पुरोडाशस्य याज्यामाह –

अन्तरस्मिन्निमे लोकाः (९)। अन्तर्विश्वमिदं जगत्। ब्रह्मैव भूतानां ज्येष्ठम्। तेन कोऽर्हति स्पर्धितुम्, इति।

अस्मिन्ब्रह्मण्यन्तर्मध्य इमे भूरादयो लोका अवस्थिताः तथैवान्तर्मध्ये विश्वं सर्वमिदं जगत्स्थावरजङ्गमरूपमवस्थितम्। तस्कात्कारणाद् ब्रह्मैव भूतानामाकाशादिपञ्चमहाभूतानां प्राणिनां च मध्ये ज्येष्ठमतिशयेन श्रेष्ठं प्रशस्तं च। तेन तादृशेन ब्रह्मणा को नामान्यः पुरुषः स्पर्धितुमर्हति। तत्समानस्य स्पर्धा युक्ता। न चास्ति कश्चित्समानः। अत एव श्वेताश्वतरशाखायामभिधीयते– "न तत्समश्चाभ्यधिकश्च दृश्यते" इति।

अथ हविषः पुरोनुवाक्यामाह –

ब्रह्मन्देवास्त्रयस्त्रिꣳशत्। ब्रह्मन्निन्द्रप्रजापती। ब्रह्मन्ह विश्वा भूतानि। नावीवान्तः समाहिता, इति।

हे ब्रह्मन्यथोक्ते ब्रह्मणि त्रयस्त्रिंशद्देवाः "ये देवा दिव्येकादश स्थ" इतिमन्त्रोक्ताः समाहिताः। तथा ब्रह्मन्परब्रह्मण्येव देवस्वामिनाविन्द्र-प्रजापती समाहितौ। तथा ब्रह्मण्येव विश्वा भूतानि सर्वाणि स्थावरजङ्गमान्यन्तः समाहितानि सम्यगवस्थितानि। तत्र दृष्टान्तो नावीवेति यथा समुद्रनद्यादितरणवेलायां चेतनाचेतनानि वस्तूनि नौमध्येऽवस्थाप्यन्ते तद्वत्।

अथ हविषो याज्यामाह –

चतस्र आशाः प्रचरन्त्वग्नयः। इमं नो यज्ञं नयतु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजानन् । घृतं पिन्वन्नजरꣳ सुवीरम् (१०) । ब्रह्म समिद्भवत्याहुतीनाम्, इति ।

यथोक्ते ब्रह्मणि चतस्र आशाश्चतुर्विधाः प्राच्यादिदिशः प्रत्यग्नय आहवनीयाद्याः प्रचरन्तु प्रकर्षेण वर्तन्ताम् । पूर्वस्यां दिश्याहवनीयो दक्षिणस्यां दिश्यन्वाहार्यपचनः पश्चिमायां दिशि गार्हपत्य उदिच्यां दिश्याग्नीध्रीयः । तथाविधः सर्वाधारपरमात्मा नोऽस्मदीयमिमं यज्ञं प्रजानन्प्रकर्षेणानुसंदधानो नयतु समाप्तिं प्रापयतु । किं कुर्वन्नजरमविनश्वरं सुवीरं शोभनापत्यहेतुभूतमिदं घृतमाहुतिरूपं पिन्वन्पिबन् । किं बहुना, आहुतीनामस्माभिरनुष्ठीयमानानां ब्रह्म समिद्भवति परब्रह्मैव सम्यक्प्रकाशकं भवति ।

यदुक्तं सूत्रकारेण-"आ गावो अग्मन्नित्युपहोमाः" इति । तत्राष्टानामृचां मध्ये प्रथमामाह -

आ गावो अग्मन्नुत भद्रमक्रन् । सीदन्तु गोष्ठे रणयन्त्वस्मे । प्रजावतीः पुरुरूपा इह स्युः । इन्द्राय पूर्वीरुषसो दुहानाः, इति ।

या एता गावः सन्ति ता आऽग्मन्निहाऽऽगच्छन्तु । उतापि च भद्रं कल्याणमक्रन्कुर्वन्तु । अस्मदीये गोष्ठे सीदन्तु तिष्ठन्तु । अस्मेऽस्मान्रणयन्तु रमयन्तु । इहास्मद्गृहे प्रजावतीर्बहुवत्सोपेताः पुरुरूपाः श्वेतकृष्णादिरूपेण बहुरूपाः स्युर्भवेयुः । उषस उषःकालात्पूर्वी पूर्वास्तु रात्रिष्विन्द्रायेन्द्रार्थं सांनाय्यमाशिरं च दुहानास्तिष्ठन्तु ।

अथ द्वितीयामाह -

इन्द्रो यज्वने पृणते च शिक्षति । उपेद्ददाति न स्वं मुषायति । भूयो भूयो रयिमिदस्य वर्धयन् । अभिन्ने खिल्ले निदधाति देवयुम्, इति ।

योऽयं यज्वा यागानुष्ठायी यश्च पृणन्यागकाले हविः पूरयन्वर्तते, अथवा गां ददाति तयोरुभयोरर्थ इन्द्रः । शिक्षति फलं ददाति । उपेत्पुनरपि ददाति । स्वमात्मानं न मुपायति न मुष्णाति । यजमानं प्रति भूयो भूयो ददानोऽपि कदाचिदपि न तिरोभवतीत्यर्थः । अस्य यजमानस्य भुवो भूयः पौनः पुन्येन रयिमिद्धनमेव वर्धयन्देवयुं देवानात्मन इच्छन्तं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यजमानमभिन्ने स्वनिवासस्थाने भेदरहिते खिल्ले खिलीभूते यागरहितैरगम्ये निदधाति स्थापयति । स्वकीयलोक एव तं गमयतीत्यर्थः ।

अथ तृतीयाचतुर्थ्योः प्रतीके दर्शयति-

न तानशन्ति न ता अर्वा (११), इति ।

"न तानशन्ति न दभाति तस्करः" इति तृतीया । "न ता अर्वा रेणुककाटोः" इति चतुर्थी । एतच्चोभयम् -"उत नः प्रिया" इत्यत्र व्याख्यातम् ।

अथ पञ्चमीमाह -

गावो भगो गाव इन्द्रो मे अच्छात् । गावः सोमस्य प्रथमस्य भक्षः । इमा या गावः स जनास इन्द्रः । इच्छामीद्धृदा मनसा चिदिन्द्रम्, इति ।

वा गावस्ता भगः सौभाग्यम् । सतीषु हि गोषु क्षीरादिसंपत्तिल ण सौभाग्यं भवति । अच्छादच्छा निर्मला गाव एव मे ममेन्द्रः स्वामी । यथा स्वामी पालयति तथा निर्मला गावो मा पालयन्तीत्यर्थः । तथा गाव एव प्रथमस्य मुख्यस्य सोमस्याभिषुतस्य भक्षो भजनीयः । सोमो हि दध्यादिश्रपणार्थं गोभजनं करोति । या इमा गावः सन्ति हे जनासो मनुष्यास्ता गाव एव स इन्द्रः । इन्द्रो हि गाः पालयति । तस्मादभेदोपचारः । हृदा हृत्कमलनिष्ठेन मनसा चिन्मनसैव गोरक्षार्थमिन्द्रमिच्छामि ।

अथ षष्ठीमाह -

यूयं गावो मेदयथा कृशं चित् । अश्लीलं चित्कृणुथा सुप्रतीकम् । भद्रं गृहं कृणुथ भद्रवाचः । बृहद्वो वय उच्यते सभासु, इति ।

हे गावो यूयं कृशं चित्कृशमपि पुरुषं वत्सं वा मेदयथा मेदस्विनं पुष्टं कुरुत । अश्लीलं चिदश्लीलं कुरूपमपि पुरुषं सुप्रतीकं कृणुथ घृतादिना पोषयित्वा शोभनावयवं कुरुथ । भद्रवाचःकल्याणवाचो गावो गृहं भद्रं कृणुथ हम्भारवयुक्ताभिर्गोभिर्वत्सैश्च संपूर्णं गृहं रमणीयं भासते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हे गावो वो युष्मदीयं वयोऽन्नं क्षीरघृतादिकं सभासु यज्ञशालासु बृहदुच्यते महत्त्वेन प्रस्तूयते ।

अथ सप्तमीमाह -

प्रजावतीः सूयवसँ रुशन्तीः । शुद्धा अपः सुप्रपाणे पिबन्तीः । मा वः स्तेन ईशत माऽघशँसः । परि वो हेती रुद्रस्य वृञ्ज्यात्, इति ।

एता गावः प्रजावतीर्वत्सोपेताः सूयवसं शोभनं तृणादिकं रिशन्तीर्भक्षयन्त्य इत्यर्थः । सुप्रपाणे सुष्ठु प्रकर्षेण पातुं शक्ये तटाकादौ शुद्धा अपः पिबन्तीर्विमलं जलं पिबन्त्यो वर्तन्तामिति शेषः । हे गावः स्तेनश्चोरो वो मेशत युष्मानपहर्तुमीश्वरो मा भूत् । अघशँसोऽघं पापं शंसति मारय ताडयेत्यादिभिर्भर्त्सनं करोतीत्यघशंसः सोऽपि वो मेशत । तथा रुद्रस्य क्रूरस्य देवस्य हेतिरायुधं वः परिवृञ्ज्याद्युष्माकं परितो वर्जनं करोतु ।

अथाष्टमीमाह -

उपेदमुपपर्चनम् । आसु गोषूपपृच्यताम् । उपर्षभस्य रेतसि । उपेन्द्र तव वीर्ये (१२), इति ।

चरामि कनीयोऽन्यार्निर्पता पदानि यज्वसु हवामहे विष्ठा लोकाः सुवीरमर्वा पिबन्तीः षट् च ।

इति कृष्णयजुर्वेदीयत्तैतिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमाध्यायेऽष्टमोऽनुवाकः ।। ८ ।।

इदं च वक्ष्यमाणं सर्वमुपपृच्यतां समीपे युज्यताम् । किं किमिति तदुच्यते- उपपर्चनं समीपे संपर्कयोग्यतृणादिकमासु गोषूपपृच्यतां समीपे युज्यताम् । ऋषभस्य रेतस्युपपृच्यतां गर्भ इति शेषः । हे इन्द्र तव वीर्ये त्वदीये रक्षणसामर्थ्य उपपृच्यतां गाव इति शेषः ।

अत्र विनियोगसंग्रहः-

अहमष्टावन्यशाखाकथितान्नार्थवेहति ।
देवीं वाचे वेहति स्याच्छ्रद्धे श्रद्धार्थवेहति ।।
ब्रह्म ब्रह्मार्थ ऋषभ आ गाव उपहोमकाः ।। १ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये द्वितीयकाण्डेऽ
ष्टमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

अथाष्टमे नवमोऽनुवाकः ।

अष्टमेऽन्नार्थपश्वादीनां सूक्तान्यभिहितानि । नवमे शुक्लकृष्णपश्वादीनां सूक्तान्युच्यन्ते । यदुक्तं सूत्रकारेण-“सूर्याचन्द्रमोभ्यां यमौ श्वेतं च कृष्णं चैकयूपे” इति । यमावेकस्मिन्गर्भे सहोत्पन्नौ . तयोः पश्वोः सूक्ते वपयोः पुरोनुवाक्यामाह -

ता सूर्याचन्द्रमसा विश्वभृत्तमा महत् । तेजो वसुमद्राजतो दिवि । सामात्माना चरतः सामचारिणा । ययोर्व्रतं न ममे जातु देवयोः, इति ।

ययोः सूर्याचन्द्रमसोर्देवयोः संबन्धि व्रतं कर्म जातु कदाचिदपि न ममे कश्चिदपि मातुं न शक्तः । एतदीयं कर्मैतावता फलेन युक्तमिति न कोऽपि परिच्छेत्तुं शक्नोति । तौ तथाविधौ सूर्याचन्द्रमसौ दिवि राजतो द्युलोके दीप्येते । कीदृशौ विश्वभृत्तमाऽतिशयेन विश्वस्य भर्तारौ पोषकावत एव महन्महान्तौ तेजस्तेजस्विनौ वसुमद्धनवन्तौ । सामशब्देन सामभेदाद्युपायेषु चतुर्षु प्रथमोपायोऽभिधीयते । तदात्मकौ प्रजापालने सामोपायप्रधानावित्यर्थः । अत एव सामचारिणौ साम्नोपायेन सर्वजगदनुग्राहकप्रकाशरूपेण चरणशीलौ चरतः परिभ्रमतः ।

अथ वपयोर्याज्यामाह -

उभावन्तौ परियात अर्म्या । दिवो न रश्मीँस्तनुतो व्यर्णवे । उभा भुवन्ती भुवना कविक्रतू । सूर्या न चन्द्रा चरतो हतामती, इति ।

उभावन्तौ पृथिव्याः पूर्वः पश्चिमश्चेत्येतावसानभागावर्म्या गत्या परियातः परिक्रमणं कुरुतो दिवो न दिवीवार्णवे समुद्रसमानेऽन्तरिक्षे रश्मीन्वितनुत, प्रसारयतो भुवना भुवन्ती लोकान्भावयन्तावुत्पादयन्तौ कविक्रतू कविर्मेधावी क्रतुःकर्ता कवी च तौ क्रतू च कविक्रतू हतामती हता विनाशिता प्राणिनाममतिरन्धकारनिमित्तमज्ञानं याभ्यां तौ हतामती सूर्या न चन्द्रा सूर्यश्चन्द्रश्चेत्येतावुभौ चरतः संचारं कुरुतः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पुरोडाशस्य पुरोनुवाक्यामाह -

पती द्युमद्विश्वविदा उभा दिवः । सूर्या उभा चन्द्रमसा विचक्षणा (१) । विश्ववारा वरिवोभा वरेण्या । ता नोऽवतं मतिमन्ता महिव्रता, इति ।

द्युमद् द्युमन्तौ दीप्तिमन्तावुभौ देवौ विश्वविदा सर्वज्ञौ दिवः पती द्युलोकस्य पालकौ वर्तेते । सूर्याचन्द्रमसा सूर्याचन्द्रमसेत्येतावुभौ विचक्षणौ कुशलौ । विश्ववारा विश्वेषां शत्रूणां निवारयितारौ वरिवस्यमानौ सर्वैः परिचर्यमाणावुभौ देवौ वरेण्या वरणीयौ मतिमन्तावत्यन्तबुद्धियुक्तौ महिव्रता महता व्रतेन कर्मणा युक्तौ । ईदृशौ तावुभौ नोऽस्मानवतं रक्षतम् ।

अथ पुरोडाशस्य याज्यामाह -

विश्ववपरी प्रतरणा तरन्ता । सुवर्विदा दृशये भूरिरश्मी । सूर्या हि चन्द्रा वसु त्वेष दर्शता । मनस्विनोभाऽनुचरतो नु सं दिवम्, इति ।

विश्वपरी विश्वस्मिञ्जगति रश्मीनावप्तारौ विस्तारयितारौ प्रतरणाऽऽपदां प्रकर्षेण तारयितारौ तरन्ताऽऽकाशसमुद्रं तरन्तौ सुवर्विदा स्वर्गस्य लम्भयितारौ दृशये सर्वलोकस्य दर्शनाय भूरिरश्मी प्रभूतदीप्ती सूर्या हि चन्द्रा सूर्यश्चन्द्रश्चेत्येवं प्रसिद्धौ वसु वासयितारौ त्वेष दर्शता दीप्त्या दर्शनीयौ दृढेन मनसा युक्तावुभा देवावुभौ नु क्षिप्रं दिवं द्युलोकमनुसंचरतः ।

अथ हविषः पुरोनुवाक्यामाह -

अस्य श्रवो नद्यः सप्त बिभ्रति । द्यावा क्षामा पृथिवी दर्शतं वपुः । अस्मे सूर्याचन्द्रमसाऽभिचक्षे । श्रद्धे कमिन्द्र चरतो विचर्तुरम् (२), इति ।

हे इन्द्र त्वमस्मेऽस्मदर्थं सूर्याचन्द्रमसैतौ सूर्याचन्द्रमसाव-भिचक्षेऽभितः कथयसि । श्रद्धे श्रद्धार्थं कं सुखार्थं च विचर्तुरं विशेषेण त्वरा यथा भवति तथा चरत एतावुभौ संचरतः । अस्य तवेन्द्रस्य श्रवः श्रवणीयं दर्शतं दर्शनीयं च वपुः शरीरं सप्त नद्यो गङ्गायमुनाद्याः सप्तसंख्याकाः सरितो द्यावा क्षमा पृथिवी क्षामशब्दोऽन्तरिक्षमभिधत्ते,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रयो लोकाश्च बिभ्रति धारयन्ति । अयमर्थः । यदेतद्वृष्टिनिमित्तं जलं तदेतदिन्द्रेणोत्पदातितत्वादिन्द्रस्य शरीरं तच्च सर्वेषां प्राणिनां प्रियत्वाच्छ्रवणीयं दर्शनीयं च तदिदं शरीरं सप्तनद्युपलक्षिताः सर्वा नद्यः समुद्रास्त्रयो लोकाश्च धारयन्ति । न हि जलमन्तरेण लोकत्रयव्यवहारः सिध्यतीति ।

अथ हविषो याज्यामाह –

पूर्वापरं चरतो माययैतौ । शिशू क्रीडन्तौ परियातो अध्वरम् । विश्वान्यन्यो भुवनाऽभिचष्टे । ऋतूनन्यो विदधज्जायते पुनः, इति ।

एतौ सूर्याचन्द्रमसौ परमेश्वरस्य शक्त्याऽनुगृहीतौ पूर्वापरं भूमेः प्राक्पश्चिमभागौ प्रतिचरतः परिभ्रमणं कुरुतः । शिशू बालकाविव क्रीडन्तावध्वरं कत्वापि हिंसा यथा न भवति तथा परियातोऽथवाऽध्वरमस्माभिरनुष्ठीयमानं यज्ञं प्राप्नुतः । उभयोर्मध्येऽन्य एक आदित्यो विश्वानि भुवनान्यभिचष्टे सर्वतः प्रकाशयति । अन्यश्चन्द्रः प्रतिपदादितिथिशुक्लकृष्णपक्षचैत्रादिमासद्वारा ऋतून्विदधत्पुनः पुनर्जायत उदयं गच्छतीत्यर्थः ।

यदुक्तं सूत्रकारेण "अद्ध्यां वहतम्" इति, तस्य पशोः सूक्ते षण्णामृचां प्रतीकानि दर्शयति –

हिरण्यवर्णा शुचयः पावका यासा ँ राजा । यासां देवाः शिवेन मा चक्षुषा पश्यत । आपो भद्रा आदित्पश्यामि, इति ।

"हिरण्यवर्णाः शुचयः पावकाः" इति वपायाः पुरोनुवाक्या । 'यासां राजा वरुणः" इति याज्या । 'यासां देवा दिवि कृण्वन्ति भक्षम्' इति पुरोडाशस्य पुरोनुवाक्या । 'शिवेन मा चक्षुषा पश्यत' इति याज्या । 'आपो भद्रा घृतनिदाप आसुः' इति हविषः पुरोनुवाक्या । 'आदित्पश्याम्युत वा शृणोमि' इति याज्या । एतत्सर्वं 'हिरण्यवर्णाः शुचयः पावकाः'. इत्यनुवाकं व्याख्यातम् ।

यदुक्तं सूत्रकारेण–"तत्र सलिलमुपजुहुयात् " इति । तत्र पूर्वोक्ते कर्मणि नासदासीयसूक्तगतैर्मन्त्रैर्जलद्रवेणोपहोमाः कर्तव्या इत्यर्थ । तस्मिन्सूक्ते प्रथमामृचमाह –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नासदासीन्नो सदासीत्तदानीम्। नासीद्रजो नो व्योमापरो यत्। किमावरीवः कुह कस्य शर्मन् (३)। अम्भः किमासीद्गहनं गभीरम्, इति।

यदा पूर्वसृष्टिः प्रलीनोत्तरसृष्टिश्च नोत्पन्ना तदानीं सदसती द्वे अपि नाभूताम्। नामरूपविशिष्टत्वेन स्पष्टं प्रतीयमानं जगत्सच्छब्देनोच्यते। नरविषाणादिसमानं शून्यमसदित्युच्यते। तदुभयं नाऽऽसीत्। किंतु काचिदव्यक्तावस्थाऽऽसीत्। सा च विस्पष्टत्वाभावान्न सती जगदुत्पादकत्वेन सद्भावान्नाप्यसती नो सदासीदिति यत्संग्रहेणोक्तं तदेव प्रपञ्च्यते–नाऽऽसीद्रजो रजःशब्देन सत्वरजस्तमोगुणत्रयमुपलक्ष्यते तत्त्रयं नाऽऽसीत्। नो व्योम, आकाशवाचिना व्योमशब्देन भूतपञ्चकमुपलक्ष्यते तदपि नाऽऽसीत्। यथोक्तगुणत्रयपञ्चभूतापेक्षयाऽपरः पदार्थोऽन्यो गिरिनदीसमुद्रादिको यद्यो दृश्यते सोऽपि नाऽऽसीत्। यथा भूतानि नाऽऽसंस्तद्वद्भौतिकमपि नाऽऽसीदित्यर्थः। अनेन भूतभौतिकगुणत्रयनिषेधेन ब्रह्माण्डस्य निषेधः संपन्नः। अण्डाद्बहिर्महत्तत्वाद्यावरणानि पौराणिका वदन्ति तदेतदावरणजातमाक्षेपवाचिना किंशब्दत्रयेण निषिध्यते। आवरणस्य दृष्टिविषयभूतं किंचिदाध्रियमाणंपेक्षितम्। तत्राण्डाभावात्किमावरीवः किं नाम वस्तु तैरावरणैराव्रियेत '। अतः सावरणकस्यासंभवादावरणमपि न संभवतीत्यर्थः। कुहेति देशाक्षेपः। निमित्ताक्षेपः कस्य शर्मन्निति। कुत्र देशे कस्य भोक्तुः सुखनिमित्तमिदमावरणं स्यात्, न त्वस्ति तदा कश्चिद्देशो नापि सुखस्य भोक्ता कश्चिद्विद्यते। अत्र कश्चिन्मन्दोऽवान्तरप्रलविषयाम "आपो वा इदमग्रे सलिलमासीत्" इति श्रुतिं श्रुत्वा महाप्रलयेऽपि तथाविधं जलमस्तीति भ्राम्यति तद् भ्रमव्युदासाय जलं निषिध्यते। गहनं प्रवेष्टुमशक्यं गभीरमगाधत्वेनावस्थातुमप्यशक्यं यदम्भस्तत्किमासीत्तदपि नाऽऽसीदित्यर्थः।

अथ द्वितीयामृचमाह –

न मृत्युरमृतं तर्हि न। रात्रिया अह्न आसीत्प्रकेतः। आनीदवातँ स्वधया तदेकम्। तस्माद्धान्यं न परः किंच नाऽऽस, इति।

तर्हि तस्मिन्महाप्रलयकाले प्राणिनां मृत्युर्नाऽऽसीत्तेषामेवाभावात। अत एवामृतं जीवनमपि नाऽऽसीत्। रात्रियाः प्रकेतश्चिह्नं चन्द्रनक्षत्रादि, अह्नः प्रकेतः सूर्यस्तदुभयमपि नाऽऽसीत। किंतु तत्सर्वोपनिषत्प्र–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सिद्धमेकं ब्रह्म वस्तु स्वधया स्वस्मिन्नाश्रितया सर्वजगत्कारणरूपया मायया सहितमानीच्चेष्टितवत् । नात्र चलनं चेष्टां किन्तु सद्भावमात्रमित्यभिप्रेत्यावातमिति विशेष्यते । वायुरहितं निश्चलमित्यर्थः । तस्मादेकस्माद्ब्रह्मणोऽन्यत्किंच किमपि परमुत्कृष्टं नाऽऽस नैवाऽऽसीत् । जगतो निषिद्धत्वान्निकृष्टं पूर्वमेव निराकृतम् । तस्मादुत्कृष्टं निकृष्टं च किमपि ब्रह्मव्यतिरिक्तं नाऽऽसीत् ।

अथ तृतीयामाह -

तम॑ आसी॒त्तम॑सा गू॒ढमग्रे॑ प्रके॒तम् । स॒लि॒ल॑ꣳ सर्व॑मा इ॒दम् । तु॒च्छेना॒म्वपि॑हितं॒ यदासी॑त् । तम॑स॒स्तन्म॑हि॒ना जाय॒तैक॑म्, इति ।

तमःशब्देनाविद्यामायाशक्त्यादिशब्दवाच्यं जगद्विकारोपादानं मूलाज्ञानमुच्यते । यथा तमः पदार्थानावृणोत्येवमिदमपि ब्रह्मतत्त्वमावृणोतीति तमःशब्देन व्यवहारः । तादृशं जगद्विकारनिष्पादनक्षमं ब्रह्मण्याश्रितं किंचित्तम आसीत् । तेन तमसा सर्वं जगदगूढं यथा मृत्पिण्डे घटो गूढो यथा वा बीजे वृक्षो गूढस्तद्वत् । अत एव प्रकेतं प्रकर्षेण ज्ञातुमशक्यम् । तथा च मनुना स्मर्यते-

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ।। इति ।

तत्र दृष्टान्तः-सलिलमिति यथा वर्षे पतिताः वर्षोपलाः सलिलमात्रत्वेनावशिष्यन्ते तथा सर्वे जगदिदं तम आसीत्तमोमात्ररूपेणावशिष्टमित्यर्थः । अत्र हि काणादाद-योऽसत्कार्यवादिनः कारणे पूर्वमविद्यमानमेव कार्यमुत्पद्यत इत्याहुः । सत्कार्यवादिनस्तु सांख्यादयः पूर्वं विद्यमानमेव कार्यमव्यक्तं सत्कारणव्यापारेण व्यक्ती भवतीत्याचक्षते । तत्र सत्कार्यवादिनां मतमेव तमसा गूढमिति श्रुत्याऽङ्गीकृतम् । आ समन्ताद्भवत्युत्पद्यत इत्याभूज्जगत्तदेतत्तुच्छेनापिहितम् । तत्वज्ञानमात्रेण निवर्त्यत्वात्तत्कारणं मूलाज्ञानं तेनापिहितं प्रलयकाल आच्छादितम् । तादृशं यज्जगदासीत्तज्जगदव्यंक्तं सत्पूर्वोक्तादज्ञानरूपात्तमसः सकाशान्महिना महत्त्वेनाभिव्यक्तजगद्रूपेणाजायतोत्पन्नम् । तदिमज्ञानदृष्ट्या जगदा-कारेण भासमानमपि परमार्थत एकं ब्रह्मैव ।

अथ चतुर्थीमाह -

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कामस्तदग्रे समवर्तताधि (४) । मनसो रेतः । प्रथमं यदासीत् । सतो बन्धुमसति निरविदन् । हृदि प्रतीष्या कवयो मनीषा, इति ।

परब्रह्मसंबन्धिनो मनसः प्रथमं रेत आद्यं कार्यं यदासीत्तत्कार्यमग्रे सृष्ट्यादौ कामो भूत्वाऽधिसमवर्तताऽऽधिक्येनाऽऽविरभूत । अयमर्थः- यदेतदेकमेवाद्वितीयं सत्यं ज्ञानमनन्तं ब्रह्म इत्येवंरूपं वस्तु सृष्टेः पूर्वं तमसाऽऽवृतमासीत्तस्य तमोविशिष्टस्य ब्रह्मणः सिसृक्षारूपं यन्मन आदावुत्पन्नं तस्य मनसः काम एव प्रथमकार्यभूतः पदार्थः । स च काम उपनिषदि स्पष्टमाम्नातः-

'सोऽकामयत बहु स्यां प्रजायेय" इति । एकोऽद्वितीयरूपोऽहमेव बहुविधो भवेयम् । तत्रायमुपायः पूर्वमवस्थितमद्वितीयरूपमनुपमृद्य प्रकर्षेण मायाकल्पित जदग्रूपेणोत्पद्येयेति तस्य वाक्यस्यार्थः । स च कामः ततो बन्धुरिदानीं सत्त्वेन प्रतीयमानस्य भूतभौतिकरूपस्य जगतोऽसच्छब्दाभिधेये । यथा वा जागरणेऽप्यत्यन्तमलभ्ये विषये समुत्पन्ना तृष्णा सुखदुःखपर्यन्तं मनोराज्यरूपं व्यवहारं बध्नाति, एवमयं परमेश्वरस्य कामो देवतिर्यङ्नुष्यादिसर्वव्यहारं बध्नाति । कवयो विद्वांसो वेदान्तपारं गता हृदि हृदयकमले स्वबुद्ध्या प्रतीष्य विचार्यासत्यव्यक्ते तमसि कामं सत उत्पत्स्यमानस्य जगतो बन्धुं बन्धनहेतुं निरविन्दन्निश्चितवन्तः । कामस्य सर्वव्यवहारहेतुत्वं वाजसनेयिनः समामनन्ति- "अथो खल्वाहुः काममय एवायं पुरुषः" इति । व्यासोऽपि स्मरति-

"कामबन्धनमेवेदं नान्यदस्तीह बन्धनम् " इति ।

अस्मदनुभवोऽपि तथा दृश्यते । सर्वो हि पुरुषः प्रथमं किंचित्कामयित्वा तदर्थं प्रयतमानः सुखं दुःखं वा लभते । तस्माच्छ्रुतिस्मृत्यनुभवसिद्धत्वात्काम एव सर्वव्यवहारहेतुरिति विदुषां निश्चयः ।

अथ पञ्चमीमाह -

तिरश्चीनो विततो रश्मिरेषाम् । अधस्विदासी३दुपरि स्विदासी३त् । रेतोधा आसन्महिमान आसन् । स्वधा अवस्तात्प्रयतिः परस्तात्, इति ।

रश्मिः सूर्यरश्मिसमानः कश्चित्स्वयंप्रकाशश्चैतन्यपदार्थः । एषां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूतभौतिकरूपाणां जगद्वस्तूनां मध्ये तिरश्चीनस्तिर्यग्वर्तमानो विततो व्याप्तः स चैतन्यरूपःपरमात्माऽमीषां पदार्थानामधोभागेऽवस्थितः । किंवोपरिभागेऽवस्थितः । स्विच्छब्दौ विकल्पितपक्षद्वयसूचनार्थौ । प्लुतिर्विचारद्वयंद्योतनार्था । अयमभिप्रायः । सोऽयं प्रकाशः कश्चिच्चैतन्यपदार्थः सर्वेषां वस्तूनां मध्ये पर्यालोच्य मानो दीर्घतन्तुवत्तिर्यग्भूतो व्याप्यावभासते । अधः पर्यालोच्यमानस्तत्राप्यवभासते । उपरि पर्यालोच्यमानस्तत्राप्यवभासते । तस्मादध ऊर्ध्वं मध्ये च भासमानत्वादेकत्रैवावस्थित इति वक्तुमशक्यः । यथा घटस्योपादानभूतो मृत्पिण्डो घटस्याधऊर्ध्वमध्यभागेषु सर्वेष्वनुवर्तते, एवं तत्तत्पदार्थोपादानानि तत्तत्कार्येषु व्याप्यैव वर्तन्ते । एवमयं परमात्माऽपि स्वकार्येषु व्याप्य वर्तमानः सन्नध आसीदित्येव वोपर्यासीदित्येव वा निश्चेतुमशक्य इति । सर्व एते पदार्था भूतभौतिकरूपाः पूर्वोक्तस्य विततरश्मिरूपस्य स्वप्रकाशचैतन्यस्य रेतोधाःसाररूपधारिण आसन् । तत्र चिदेकरसस्य हि वस्तुनः सद्रूपं सारं तच्च सर्वे पदार्था धारयन्ति, अस्तीत्येवं स्वरूपेणैव सर्वेषामवभासमानत्वात् । ते च सद्रूपधारिणः सर्वे महिमानो गिरिनद्यादिरूपेण महान्त आसन् । एवं स्वधाशब्द वाच्यमायाविद्यादिशब्देनाभिधीयमाना पारमेश्वरी शक्तिरवस्तादधमं कारणम् । प्रयतिः । सा शक्तिः प्रयतते यस्मिन्परमात्मनि सोऽयं शक्तिप्रयत्नाधारः परमात्मा प्रयतिः । स च परस्तात्परममुत्तममं कारणम् । तावेतौ शक्तिपरमात्मानावेव जगत्कारणभूतौ प्रकृतिपुरुषाविति शास्त्रेषु व्यपदिश्यंते ।

अथ षष्ठीमाह –

को अ॒द्धा वे॑द॒ क इ॒ह प्रवो॑चत् । कुत॒ आजा॑ता॒ कुत॑ इ॒यं वि॒सृ॑ष्टिः । अ॒र्वाग्दे॒वा अ॒स्य वि॒सर्ज॑नाय (५) । अथा॒ को वे॑द॒ यत॑ आ ब॒भूव॑, इति ।

अत्र केचिदागममुपेक्ष्य स्वस्वबुद्धिबलादन्यथाऽन्यथोत्प्रेक्षन्ते । तथा हि परमाणवो मूलकारणमिति काणादगौतमादयो मन्यन्ते । स्वतन्त्रमचेतनं प्रधानं जगतो मूलकारणमिति कपिलप्रभृतयः शून्यादितो जगदुत्पत्तिरिति माध्यमिकाः । जगतः कारणव नास्ति स्वभावत एवावतिष्ठत इति लोकायतिकाः । ते सर्वेऽपि भ्रान्ता एव । कोऽद्धा वेद जगत्कारणं को नाम पुरुषः साक्षादवगच्छति । अनवगत्य च क इह प्रवोचत्स्वयमदृष्ट्वा को नाम जगत्कारणमीदृगिति वक्तुं शक्नोति । कोऽयमत्र वक्तव्यांश इति चेदुच्यते–इयं विविधा सृष्टिः कुत आजाता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कस्मादुपादानकारणात्सर्वत उत्पन्ना पुनरपि कुतो निमित्तादुत्पन्नेति तदिदमुपादानं निमित्तं च वक्तव्यम् । तच्च वक्तुमशक्यम् । कुतोऽशक्तिरिति चेदुच्यते-किं देवा एतद्ब्रूयुः, उतान्यः कश्चिन्मनुष्यः । न तावद्देवा वक्तुं शक्तास्ते ह्यस्य जगतो विसर्जनाय विविधसृष्टेरर्वागेव विद्यन्ते । न तु सृष्टेः पूर्वं ते सन्ति । यदा देवानामपीदृशी गतिस्तदानीं यतो जगदाबभूव तत्कारणं वक्तुमन्यः को वा वेद । देवाश्च मनुष्याश्च सृष्टेः प्रागवस्थां न तावत्प्रत्यक्षेण पश्यन्ति तदानीं स्वय (स्वेषा) मेवाभावात् । नाप्यनुमातुं शक्तास्तास्तद्योग्ययोर्हेतुदृष्टान्तयोरभावात् । तस्मादतिगम्भीरमिदं परमार्थतत्त्वं वेदैकसमधिगम्यमित्यभिप्रायः ।

अथ सप्तमीमाह -

इयं विसृष्टिर्यत आबभूव । यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन् । सो अङ्ग वेद यदि वा
न वेद,इति ।

इयं दृश्यमाना भूतभौतिकरूपा विविधा सृष्टिर्यत उपादानकारणादाबभूव सर्वत उत्पन्ना तदुपादानकारणं यदि वा किंचित्स्वरूपं धृत्वाऽवतिष्ठते यदि वा तस्य स्वरूपमेव नास्ति तमिमं निर्णयं यो परमेश्वरोऽस्य जगतोऽध्यक्षः स्वामी सो अङ्ग वेद स एव वेद यदि वा सोऽपि न वेद । ईशित्रीशितव्यादिलौकिकव्यवहारदृष्ट्या सो अङ्ग वेदेत्युक्तम् । "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इत्यादिसर्वव्यवहारातीतपरमार्थदृष्ट्या यदि वा वेदेत्युक्तम् । अतो मनुष्यादिषु तद्वेदनशङ्काऽपि दूरापेता ।

अथाष्टमीमाह -

कि ँस्विद्वनं क उ स वृक्ष आसीत् । यतो द्यावापृथिवी
निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तत् । यदध्यतिष्ठद्
भुवनानि धारयन्, इति ।

लोके हि गृहं चिकीर्षुः पुमान्वनं गत्वा तत्र कंचिद् वृक्षं छित्वा तदीयैः काष्ठैर्गृहं निर्मिमीते । तद्दृष्टान्तेनात्रापि यतो यस्माद्वनजन्याद् वृक्षाद्द्यावापृथिवी द्युलोकभूलोकौ निष्टतक्षुस्तक्षणेन निर्मितारो निर्मितवन्तः । तादृशं वनं किंस्विद्भवेत् । कश्च तादृशः स वृक्ष आसीत् । हे मनीषिणो बुद्धिमन्तो मनसा स्वकीयेन विचार्य तदिदमर्थ-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वयमाचार्यसमीपे पृच्छत । किंच यत्कारणभूतं वस्तु भुवनानि सर्वांल्लोकान्स्वात्मनि धारयन्नध्यतिष्ठन्नियमनमकरोत्तदिदु तदपि वस्तु पृच्छत ।

अथ नवमीमाह –

ब्रह्म वनं ब्रह्म स वृक्ष आसीत् (६) । यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा विब्रवीमि वः । ब्रह्माध्यतिष्ठद्भुवनानि धारयन, इति ।

यदुक्तं मनीषिणां प्रश्नत्रयं तस्याऽऽचार्य उत्तरं ब्रूते । यस्माद्वनजन्याद् वृक्षाद्द्यावापृथिव्यौ निर्मिते तद्वनस्थानीयं तद् वृक्षस्थानीयं ब्रह्मैव । तस्य सर्वशक्तित्वात् । यस्योत्पाद्यस्य या सामग्र्यपेक्षिता सा सर्वा तस्मिन्विद्यते । तदेवं ब्रह्म सर्वाणि भुवनानि स्वस्मिन्धारयति नियमयति च । हे मनीषिण आचार्योऽहं मनसा निश्चित्य वो युष्मभ्यं विब्रवीमि विविधमुत्तरं ब्रवीमि ।

यदुक्तं सूत्रकारेण–"भगाय वाशिताम्" इति । गर्भधारणयोग्या वाशिता । तस्य पशोः सूक्तस्य वपायाः पुरोनुवाक्यामाह –

प्रातरग्निं प्रातरिन्द्र ँ हवामहे । प्रातर्मित्रावरुणा प्रातरश्विना । प्रातर्भगं पूषणं ब्रह्मणस्पतिम् । प्रातः सोममुत रुद्र ँहुवेम, इति ।

प्रातः कालेऽग्न्यादीन्देवानाह्वयामः । प्रतिदेवं वाक्यभेदेन प्राधान्यद्योतनाय प्रातः शब्दावृत्तिः । यत्राऽऽवृत्तिर्नास्ति तत्राप्यावृत्तिरुन्नेया ।

अथ वपाया याज्यामाह –

प्रातर्जितं भगमुग्र ँहुवेम । वयं पुत्रमदितेर्यो विधर्ता । आध्रश्चिद्यं मन्यमानस्तुरश्चित् (७) । राजचिद्यं भगं भक्षीत्याह, इति ।

प्रातःकाले जितं जययुक्तमुग्रं तीव्रं भगं देवं हवेमाऽऽह्वयामः । कीदृशमदितेः पुत्रमादित्यं य आदित्यो विशेषेण जगतो धारयिता तमिति पूर्वत्रान्वयः । आध्रश्चिद्दरिद्रोऽपि यं देवमभिमतप्रदं मन्यमानो भगं देवं भक्षीत्याह भजनं करोमीति ब्रूते तथा तुरश्चित्कार्येषु त्वरमाणोऽपि यं भगं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कार्यसाधकं मन्यमानो भजेयेति ब्रूते तथा राजाचिद्राजदाऽपि यं भगं राज्यसाधकं मन्यमानो भजेयेति ब्रूते तं भगमाह्वयाम इति पूर्वत्रान्वयः ।

अथ पुरोडाशस्य पुरोनुवाक्यामाह –

भग प्रणेतर्भग सत्यराधः । भगेमां धियमु दवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैः । भग प्रनृभिर्नृवन्तः स्याम,
इति ।

हे प्रणेतः प्रकर्षेण नेतुं कुशल हे भग देवास्मान्कर्मणि प्रणयेति शेषः । हे सत्यराधः सत्यधन भगदेवास्मभ्यं धनं देहीति शेषः । हे भग नोऽस्मभ्यमिमां धियं ददत्कर्मानुष्ठानबुद्धिं प्रयच्छन्नुदवोत्कर्षेण रक्ष । हे भगदेव नोऽस्मान्गोभिरश्वैः प्रजनय तमुक्तान्कुर्वित्यर्थः । हे भग त्वत्प्रसादाद्वयं नृभिः पुत्रपौत्रादिभिः पुरुषैर्नृवन्तः पुरुवन्तः स्याम ।

अथ पुरोडाशस्य याज्यामाह –

उतेदानीं भगवन्तः स्याम । उत प्रपित्व उत मध्ये
अह्नाम् । उतोदिता मघवन्सूर्यस्व । वयं देवाना सुमतौ
स्याम, इति ।

उतेदानीमस्मिन्कर्मकालेऽपि भगवन्तोऽनेन देवेन युक्ताः स्याम । उत प्रपित्वे सायंकालेऽपि, उताह्नां मध्ये मध्याह्नकालेऽपि । उतोदितोदयकालेऽपि भगेन देवेन युक्ताः स्याम । हे मघवन्देव वयं सूर्यस्य तव सुमतौ स्यामानुग्रहबुद्धौ तिष्ठेम ।

अथ हविषः पुरोनुवाक्यामाह –

भग एव भगवाँ अस्तु देवाः (८) । तेन वयं भगवन्तः
स्याम । तं त्वा भग सर्व इज्जोहवीमि । स नो भग पुर
एता भवेह, इति ।

हे देवा भगाख्यो देव एव भगवानस्तु सौभाग्यवान्भवतु तेन देवेन भगवन्तः सौभाग्यवन्तः स्याम । हे भगाख्यदेव तं तादृशं त्वां सर्व इत्सर्व एव लोको जोहवीम्याह्वयतीत्यर्थः । हे भगदेव स त्वमिहास्मिन्कर्मणि नोऽस्माकं पुर एता पुरतो गन्ता भव ।

अथ हविषो याज्यामाह –

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समध्वरायोषसो नमन्त । दधिक्रावेव शुचये पदाय । अर्वाचीनं वसुविदं भगं नः । रथमिवाश्वा वाजिन आवहन्तु, इति ।

अस्य भगदेवस्य प्रसादादुषस उषःकालदेवता अध्वराय यज्ञनिष्पत्त्यर्थं संनमन्तः समनमन्त । तत्र दृष्टान्तो दधिक्रावेत्यश्वस्य नाम । अश्वो यथाऽऽधानकाले शुचयेऽग्निनिष्पत्तये पदायाऽऽहवनीयायतने संभाराणामुत्तरतः पादेनाऽऽक्रमणाय संप्राप्नोति तथैवोषकालदेवता अपि प्राप्नुवन्तु । अन्योऽपि दृष्टान्त उच्यते-वाजिनो वेगवन्तोऽश्वा यथा रथमावहन्ति, तथा नोऽवार्चीनमस्माकमभिमुखे वसुविदं धनस्य लब्धारं भगदेवमावहन्त्विह कर्मण्यानयन्तु ।

अथ हविष एव विकल्पितां याज्यामाह –

अश्वावतीर्गोमतीर्न उषासः । वीरवतीः सदमुच्छन्तु भद्राः । घृतं दुहाना विश्वतः प्रपीना । यूयं पात स्वस्तिभिः सदा नः (९), इति ।

विचक्षणा विचर्तुर ँ शर्मन्नीर्धविसर्जनाय ब्रह्म वनं ब्रह्म स वृक्ष आसीत्तुरश्चिद्देवाः प्रपीना एकं च ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमप्रपाठके नवमोऽनुवाकः ।। ९ ।।

अश्वावतीर्बहुभिरश्वैर्युक्ता गोमतीर्बहुभिर्गोभिर्युक्ता वीरवतीः पुत्रपौत्रादिभिर्वीरैर्युक्ता भद्राः कल्याणरूपा घृतं दुहाना घृतक्षीरादिद्रव्याणि संपादयन्त्यो विश्वतः प्रपीनाः सर्वमपि जगत्प्रकर्षेणाऽऽप्याययन्त्य उषासो यथोक्तगुणविशिष्टा उषःकालदेवता भगस्य प्रसादात्सदं सदनं कर्मानुष्ठानस्थानं प्रत्युच्छन्तु प्रभातं कुर्वन्तु । हे उषासो यूयं स्वस्तिभिः क्षेमरूपैः फलप्रदानैर्नोऽस्मान्पात रक्षत ।

अत्र विनियोगसंग्रहः-

ता सूर्येति पशुद्वंद्वे चन्द्रसूर्याख्यदेवते ।। १ ।।
हिरण्याद्द्वयो वेहति स्यान्नासत्तत्रोपहोमकः ।
प्रातरग्निमिति प्रोक्तं पशौ स्याद्भगदेवके ।। २ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्येऽष्टमप्रपाठके
नवमोऽनुवाकः ॥९॥

पीवोऽन्नान्ते शुक्रासः सोमो धेनुमिन्द्रस्तरस्वाञ्छुचिमा देवो यातु सूर्यो देवीमहमस्मि ता सूर्याचन्द्रमसा नव । पीवोऽन्नाममग्ने त्वं पारयानामधृष्यः शुचं नु स्तोमं विश्रयमाणो दिवो रुक्मोऽन्नं प्राणं ता सूर्याचन्द्रमसा नवसप्ततिः ।

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणेऽष्टमः प्रपाठकः समाप्तः ॥८॥

इति कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणे द्वितीयः काण्डः समाप्तः ॥२॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ३ ॥

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये
वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्येऽष्टमः
प्रपाठकः समाप्तः ॥ ८ ॥

इति श्रीमद्राजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरहरि-
हरभूपालसाम्राज्यधुरंधरसायणाचार्यविरचिते माधवीये
वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणभाष्ये
समाप्तोऽयं द्वितीयः काण्डः ॥ २ ॥

(मूलक्रमेण–अष्ट. २ अध्याय. ८ (१६) अनु. (१५६) ।

(भाष्यक्रमेण–का.२ प्रपा. ८ (१६) । अनु. ९ (१५६) ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

अशुद्धि

Digitized by Madhuban Trust, Delhi

	अशुद्ध	शुद्ध
पृ. 633	निवशायन	निवेशायन
633	आख्या द्रवां	आख्याद्वां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

would depend upon the compensator concentration 'x'. A less pronounced decrease in T_c in case of Ce^{4+} compensation was due to the fact that Ce^{4+}, with zero magnetic moment, replaced yttrium and occupied the dodecahedral sites. Since neither the concentration of Fe^{3+} nor the neighbouring dodecahedral interaction was affected, the decrease in T_c was minimal. This result clearly showed that with the use of a Ce^{4+} compensation scheme, a large fraction of Co^{2+} introduction can be achieved for obtaining high magnetic coercivity and higher value of uniaxial anisotropy in the normal direction to the film plane without seriously reducing the saturation magnetization. For application in perpendicular recording such as in MO memory disks, this property is of considerable advantage.

e. Mechanism of Garnet Film Growth by MOCVD

Growth of garnet thin films by the MOCVD process ensues from a very complex reaction sequence which involves (a) thermal dissociation of metallo-organic complexes (b) metal ion (Y^{3+}, Fe^{3+}, Co^{2+}, Ce^{4+}) formation and concurrent oxidation reaction and (C) reaction of component oxides to form intermediate and the garnet

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Prof. Pushpendra Kumar, Professor of Sanskrit Deptt., Delhi University, Delhi.

1. First class first and gold medalist in M.A. (Sanskrit), Delhi University-1958. Shastri-Punjab University.
2. Ph.D. on 'Śakti Cult in the Purana's (Published) Delhi University, 1967.
3. Common-Wealth Scholar and Post Doctoral fellow, London University-London 1970-72.
4. Visited many European countries viz. France, Italy, Germany, Austria, Holland, Switzerland and Greece for higher studies.
5. Principal, Shri Lal Bahadur Shastri Kendriya Sanskrit Vidyapeetha, New Delhi, 1972-74.
6. Fellow of Royal Asiatic Socity of Great Britain and Ireland since 1971.
7. Author of fifteen books and more than 50 articles.
8. General editor : Cultural Heritage from the Purāṇas : (a ten volume project of the 'Purāṇa-Vidya Series).
9. Chief Investigator - U.G.C.'s Major Research project - 'A descriptive Catalogue of Sanskrit Inscriptions.'
10. Specialization in Purāṇas, Tantras, Buddhism, Indian Art, Sanskrit Literature, Epigraphy and Grammar.
11. Organised ten All India Saminars on very interesting and fascinating topics and published the proceedings.

Ag
664
Bh
4vol
Bh
3vol
Br
728
De
115
Ga
832
Ga
668
Ha
180
Ku
298
Lin
774
Ma
828
Na
932
Pa
238
Sh
150
Sh
412
Sk
560
Sk
(sm
Va
472

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.